T. N. 412

# कुमारतन्त्रम

KUMĀRATANTRAM

copied from a manuscript with
no 17 belonging to Sundara-
Dīkṣitar, Tirunelveli

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T. No. 412

कुमारतन्त्रम् ?

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T. 412

# कुमारतन्त्रम्
## (सुब्रह्मण्याष्टबन्धनविधिप्रयोगः)


| | |
|---|---|
| यात्राकुम्भपूजादि | p. 1-87 |
| द्वितीयदिवसविधिः | " 87-156 |
| तृतीयदिनविधिः | " 157-217 |
| तुरीयदिनविधिः | " 217-278 |
| कायनोद्वासनम् | " 279 |
| गर्भन्यासः | " 279-280 |
| रत्नन्यासः | " 280-281 |
| अष्टबन्धनम् | " 281-282 |
| सप्तशुद्धिः | " 282-283 |
| प्रासादशुद्धिः | " 283-284 |
| पञ्चमदिवसविधिः | " 284-335 |
| घृताद्यर्पणविधिः | " 335-336 |
| न्यासक्रमः | " 336-345 |
| दशदानानि | " 345-348 |
| कुम्भाभिषेकविधिः | " 349-351 |
| पञ्चविंशति स्नपनम् | " 351-402 |
| महाभिषेकविधिः | " 403-405 |
| महाहविर्निवेदनम् | " 405- |
| कल्याणक्रमविधिः | " 405-406 |
| शकोत्सवः | " 406- |
| चूर्णोत्सवः | " 406-407 |
| अवभृथस्नानविधिः | " 407-409 |
| दक्षिणादानविधिः | " 409- |
| आचार्यपूजा | " 409-411 |
| स्रुक् स्रुवलक्षणम् | " 412- |


Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्री: ॥

Book No. 17

Palm-leaf belonging to Sundara Diksitar, Tirunelveli

87, 127, 136

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

1a पश्चात् यात्राकुम्भपूजामारभेत्। देवाग्रे अर्धमण्टपे
शुद्धिं कृत्वा नवकोष्ठं विधाय कोष्ठमध्ये शा...
.......... ल सर्षप निष्पाव निम्बलाज-
मेतानि नव धान्यान्युपर्युपरि विन्यस्य स्वर्ण-
रजत ताम्र मृण्मयादिकान् कुम्भान् द्रोणोदक प्रपू-
रितान् अस्त्रेण प्रक्षाल्य धूपधूम्रेणापूर्य कार्पा-
ससूत्रेण वा पट्टसूत्रेण वा विधिवद्वेष्टितानि
कृत्वा नलिनोपरि संस्थाप्य मृगमदकर्पूर-
परिमल हिमाम्बु गन्धतोयेन आपो वा इति
मन्त्रेणापूर्य नवरत्न स्वर्णप्रतिम स्वर्णपुष्प-
एलालवङ्ग जातीफल उशीर तक्कोल कोष्ठ पाटल्या-
न्निधाय अन्तः कूर्चाम्रदलनारिकेल ऊर्ध्वकूर्च स्वर्ण-
कूर्चवस्त्राद्यैर्गन्धमाल्यैरलङ्कृत्य तद्दक्षवामयोः वर्धनी-
द्वयं च सर्वालङ्कारसहितं संस्थाप्य पूर्वादारभ्याष्टकुम्भा-
नाढकोदकप्रपूरितान् सर्वालङ्कारसहितान् संस्थाप्य
बिम्बकुम्भयोः स्वर्णसूत्रेण कार्पाससूत्रेण दर्भसूत्रेण
वा बन्धनं कृत्वा पादौ प्रक्षाल्याचम्य भस्मधारणं कृ-
त्वा कुम्भस्य दक्षिणभागे कूर्मासने उत्तराभिमुखमुपवि-
श्य ' अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः। ये
1b भूता विघ्नकर्तारस्ते नश्यन्तु गुहाज्ञया ॥ ' इति पार्ष्णिघात-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

करतालत्रयं कृत्वा प्राणायामत्रयं कृत्वा कृतकरन्यास

गतशुद्ध्यङ्गन्यास दण्डभाङ्गि मुण्ड? मुञ्ज भङ्गि मातृकान्यास

एकत्रिंशत्कलासु षडक्षरन्यासं च विधाय पश्चादात्म-

पूजान्तर्यजनं विधाय कलशपूजां शंखपूजां सामान्या-

र्घ्यपाद्यविशेषार्घ्यं साधयित्वा विघ्नेश्वरं सम्पूज्य सङ्कल्प्य

शिवशम्भोराज्ञया इत्यादिविशेषेण श्रीवल्लीदेवनाय-

कीसमेत श्रीमत्सुब्रह्मण्येश्वरप्रीत्यर्थं श्रीसुब्रह्मण्येश्व-

रस्य पुनरा प्रत्यष्टबन्धनस्य सङ्कोचकर्माङ्गत्वेन यात्रा-

कुम्भपूजाकर्म करिष्ये । तदङ्ग शुद्धिपुण्याहं वाचयिष्ये।

इति सङ्कल्प्य विघ्नेश्वरमुद्वास्य पुण्याहं वाचयित्वा

अस्त्रेण प्रोक्ष्य पश्चात्पीठार्चनं कुर्यात् । तद्यथा – कुम्भ-

स्याधः ॐ ह्रां आधारशक्तये नमः । तदुपरि वृत्ताकारं श्वेत-

मनन्तासनं सञ्चिन्त्य । पूर्वाद्यष्टदिक्षु ॐ ह्रां अनन्ता-

~~[illegible]~~य नमः । वासुक्यै नमः । तक्षकाय नमः । कर्कोटकाय

नमः । पद्माय नमः । महापद्माय नमः । शंखपालाय नमः । उ-

लिकाय नमः । तन्मध्ये ओं ह्रां अनन्तासनाय नमः । इत्य-

नन्तासनं तदुपरि सिंहासनं चतुरश्रं रक्तवर्णं विचिन्त्य

तत्तदाग्नेयादिकोणेषु ओं ह्रां धर्माय नमः । ज्ञानाय नमः ।

वैराग्याय नमः । ऐश्वर्याय नमः । . . . . . . . . .

2a . . . . अधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अनैश्वर्याय नमः। दक्षिणोत्तरमध्येषु राजसाय नमः। ताम-
साय नमः। . . . . . . . . . . . र्ध्वे मेखला-
धोभागे शयनीयाच्छदने (थ) नैऋते अधश्छदनाय नमः।
तदूर्ध्वच्छदने ईशाने ऊर्ध्वच्छदनाय नमः। मध्ये ओं
. . . . . . य नमः। सिंहासनं तदुपरि योगास-
नं षट्कोणं पीतवर्णं विचिन्त्य। आग्नेयादिषु ओं ह्रां कृत-
युगाय नमः। त्रेतायुगाय नमः। द्वापरयुगाय नमः। कलि-
युगायनमः। पूर्वादिषु अव्यक्ताय नमः। नियतये नमः। क-
लाय नमः। कालाय नमः। तन्मध्ये केशवाय नमः। ओं ह्रां
योगासनाय नमः। इति योगासनं तदुपरि पद्मासनं वृत्तं
श्वेताकारं विचिन्त्य। तन्मध्ये ओं ह्रां कन्दाय नमः। बी-
जाय नमः। अङ्कुराय नमः। नालाय नमः। दलेभ्यो नमः।
केसरेभ्यो नमः। कर्णिकाय नमः। बीजेभ्यो नमः। पद्मास-
नाय नमः। ततः पूर्वादीशान्तकेसरेषु ओं ह्रां शाकिन्यै
नमः। रेवत्यै नमः। त्रेतायै नमः। महाव्रतायै नमः। निशी-
थिन्यै नमः। मालिन्यै नमः। शीतलायै नमः। भृत्यै नमः।
कर्णिकामध्ये विश्वतोमुख्यै नमः। दलाग्रवृत्ते सूर्यमण्ड-
लाय नमः। सूर्यमण्डलाधिपतये ब्रह्मणे नमः। केसराग्र-
वृत्ते सोममण्डलाय नमः। सोममण्डलाधिपतये वि-
ष्णवे नमः। कर्णिकाग्रवृत्ते वह्निमण्डलाय नमः। वह्नि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मण्डलाधिपतये रुद्राय नमः। कर्णिकामध्ये शक्तिमण्डला-
य नमः। शक्तिमण्डलाधिपतये कौमार्यै नमः। इति स-
2b म्पूज्य। तदुपरि विमलासनं बद्धोणम ·· चित्रम् व्याघ्र-
चर्मरूपं विचिन्त्य, आग्नेयादिकोणेषु ओं ह्रां ऋग्वेदाय
नमः। यजुर्वेदाय नमः। सामवेदाय नमः। अथर्वणवेदाय
नमः। पूर्वादिदिक्षु जयायै नमः। विजयायै नमः। प्रति-
ष्ठायै नमः। सुप्रसन्नायै नमः। इत्यभ्यर्च्य। तन्मध्ये ओं ह्रां
स्कन्दासनाय नमः। इति स्कन्दासनं कृत्या शक्त्यादिकु-
टिलाशक्तिपर्यन्तं विभाव्य। ओं ह्रां हं हां स्कन्दमूर्तये
नमः इति (की?) आर्तिं तेजोरूपं दण्डाकारमाविगच्छावयवां वि-
भाव्य कुम्भवेष्टने निवेशयेदिति दण्डभङ्गिन्यासं कु-
र्यात्। अस्यां मूर्तौ ओं सों ईशानमूर्ध्नाय जगद्भवाय न-
मः। इति शिरसि ओं सों तत्पुरुषवक्त्राय वचद्भवाय नमः।
इति मुखमण्डले। ओं सुं अघोरहृदयाय विश्वभुवाय नमः।
इति हृदये। ओं सिं वामदेवगुह्याय रुद्रभुवाय नमः इति
गुह्ये। ओं सं सद्योजातपादाय ब्रह्मभुवाय नमः इति पादे।
ओं सौं (आ!) रूप्यभुवाय भुवद्भवाय नमः इति सर्वाङ्गं न्यस्य।
ततः मुण्डभङ्गिन्यासं कुर्यात्। ओं सों ईशानाय जगद्भव-
मूर्ध्ने नमः इति ईशानमूर्ध्नि। ओं सों तत्पुरुषाय वच-
द्भवमूर्ध्ने नमः इति पूर्वमूर्ध्नि। ओं सुं अघोराय विश्व-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भुवमूर्ध्ने नमः इति दक्षिणमूर्ध्नि। ओं सिं वामदेवाय रुद्र-
भुवमूर्ध्ने नमः इति उत्तरमूर्ध्नि। ओं सं सद्योजाताय ब्रह्म-
भुवमूर्ध्ने नमः इति पश्चिममूर्ध्नि। ओं सौं आप्यभुवाय
भुवद्भुवमूर्ध्ने नमः इति इति नैरृतमूर्ध्नि . . . .

3 a . . . . . . . . . . . . . . . . न्यासं ततः वक्त्रभङ्गिन्या-
सं कुर्यात्। ओं सों ईशानाय जगद्भुववक्त्राय नमः इति
ईशानवक्त्रे। ओं सें तत्पुरुषाय वचद्भुववक्त्राय नमः इति
पूर्ववक्त्रे। ओं सुं अघोराय विश्वभुववक्त्राय नमः इति
दक्षिणवक्त्रे। ओं सिं वामदेवाय रुद्रभुववक्त्राय नमः
इति उत्तरवक्त्रे। ओं सं सद्योजाताय ब्रह्मभुववक्त्राय
नमः इति पश्चिमवक्त्रे। ओं सौं आप्यभुवाय भुवद्भुव-
वक्त्राय नमः इति नैरृतवक्त्रे न्यसेत्। ततः कलाभङ्गि-
न्यासं कुर्यात्। ओं सौं शान्त्यतीतकलायै नमः इति शि-
रसि। ओं हैं शान्तिकलायै नमः इति मुखमण्डले। ओं
हूं विद्याकलायै नमः इति हृदये। ओं सिं प्रतिष्ठाकलायै
नमः इति गुह्ये। ओं ह्वां निवृत्तिकलायै नमः इति पाद-
योर्विन्यस्य। त्रितत्वन्यासं कुर्यात्। ओं सौं शिवतत्वाय
नमः। ओं सौं शिवतत्वाधिपतये रुद्राय नमः इति शि-
रसि। ओं ह्रीं विद्यातत्वाय नमः। ओं ह्रीं विद्यातत्वाधि-
पतये नमः विष्णवे नमः इति हृदये। ओं ह्रां आत्मतत्वाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। ओं हां आत्मतत्वाधिपतये ब्रह्मणे नमः इति पाद-
योर्विन्यस्य। पश्चात्पञ्चतत्वन्यासं कुर्यात्। ओं हं आकाश-
तत्वाय नमः ओं हं आकाशतत्वाधिपतये सदाशिवाय नमः।
इति शिरसि। ओं यं वायुतत्वाय नमः ओं यं वायुतत्वा-
धिपतये महेश्वराय नमः। इति मुखमण्डले। ओं रं तेजः
स्तत्वाय नमः। ओं रं तेजस्तत्वाधिपतये रुद्राय नमः। इति
हृदये। ओं वं अप्तत्वाय नमः। ओं वं अप्तत्वाधिपतये
3 b विष्णवे नमः इति गुह्ये। ओं लं पृथिवीतत्वाय नमः। ओं
पृथिवीतत्वाधिपतये ब्रह्मणे नम इति पादयोर्विन्यस्य।
स्कन्दकलान्यासं कुर्यात्। जगद्भुवं जयायै नमः इतीशा-
नमूर्ध्नि। बहुतो बलायै नमः पूर्वमूर्ध्नि। हुतं उन्नतायै
नमः दक्षिणमूर्ध्नि। वचद्भुवं वामायै नमः उत्तरमूर्ध्नि।
नमस्ते ऽस्तु नन्दिन्यै नमः पश्चिममूर्ध्नि। विश्वभुवविज-
यायै नमः नैऋतमूर्ध्नि। जगद्भुवोधिपति जयायै नमः
ईशानवक्त्रे। सेनानि सेनायै नमः पूर्ववक्त्रे। मयूरप्रियायै
नमः दक्षिणवक्त्रे। षडाननमङ्गानि शान्त्यै नमः उत्तरवक्त्रे।
सन्ध्यायाः नमस्ते ऽस्तु सत्यै नमः पश्चिमवक्त्रे। सुखं वह्नि-
सूक्ष्मायै नमः नैऋतवक्त्रे। सुब्रह्मण्यसुमत्यै नमः हृदये। बृ-
हस्पतये सुखाय प्रज्ञायै नमः गले। अस्य पद्मयोनेः अमृ-
तायै नमः। दक्षिणबाहौ। यस्यात्माय यशस्विन्यै नमः वाम-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बाहौ । वहने वहन्तु वरिष्ठायै नमः नाभौ । सुब्रह्मण्य सुप्र-
तिष्ठायै नमः कुक्षौ । रुद्रभुवे रुचये नमः पृष्ठे । ब्रह्मभुवे
ब्रह्माण्यै नमः उरसि । भुवद्भुवे भूत्यै नमः गुह्ये । मातृता-
यमान्यै नमः शिश्ने । जगद्भुवे जीवायै नमः दक्षिणोरौ । सु-
ब्रह्मण्यश्रुतायै नमः वामोरौ । कृत्तिकासुतकृपायै नमः द-
क्षिणजानुनि । षष्टिकासद्दशयै नमः वामजानुनि । जग-
द्भुवे जगत्यै नमः दक्षिणजंघायाम् । वचद्भुवे वरदायै नमः
वामजंघायाम् । स्कन्दविशाखिने कामदायै नमः दक्षिण-
4 a कुक्षौ । हव्यवाह्याय धारिण्यै नमः वामपादे । षण्मुखश्या-
मायै नमः इति उरसि विन्यस्य षडक्षरन्यासं कुर्यात् ।
ओं सौं शं नमः शिरसि । ओं सौं रं नमः मुखमण्डले । ओं
सौं वं नमः दक्षिणनेत्रे । ओं सौं हं नमः वामनेत्रे । ओं सौं भं
नमः दक्षिणनासिकायाम् । ओं सौं वं नमः वामनासिकायाम् ।
न्यसेदिति प्रथमः । ओं सौं शं नमः दक्षिणबाहुशिखरे ।
ओं सौं रं नमः दक्षिणकोर्परे । ओं सौं वं नमः दक्षिणमणि-
बन्धे । ओं सौं णं नमः दक्षहस्ताङ्गुलिमूले । ओं सौं भं नमः
दक्षहस्ताङ्गुलिमध्ये । ओं सौं वं नमः दक्षहस्ताङ्गुल्यग्रे ।
इति द्वितीयम् । ओं सौं शं नमः वामबाहुशिखरे । ओं सौं रं
नमः वामकोर्परे । ओं सौं वं नमः वाममणिबन्धे । ओं सौं
णं नमः वामहस्ताङ्गुलिमूले । ओं सौं भं नमः वामहस्ता-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ङ्गुलिमध्ये। ओं सौं वं नमः वामहस्ताङ्गुल्यग्रे। इति तृतीयम्।
ओं सौं शं नमः दक्षिणोरुमूले। ओं सौं रं नमः दक्षिणजानु-
नि। ओं सौं वं नमः दक्षिणगुल्फे। ओं सौं णं नमः दक्षपा-
दाङ्गुलिमूले। ओं सौं भं नमः दक्षिणपादाङ्गुलिमध्ये। ओं सौं
4 b वं नमः दक्षिणपादाङ्गुल्यग्रे। इति तुरीयम्। ओं सौ शं नमः
वामोरुमूले। ओं सौं रं नमः वामजानुनि। ओं सौं वं नमः
वामगुल्फे। ओं सौं णं नमः वामपादाङ्गुलिमूले। ओं सौं भं
नमः वामपादाङ्गुलिमध्ये। ओं सौं वं नमः वामपादाङ्गुल्य-
ग्रे। इति पञ्चमम्। ओं सौं शं नमः हृदये। ओं सौं रं न-
मः दक्षिणपार्श्वे। ओं सौं वं नमः वामपार्श्वे। ओं सौं णं नमः
नाभौ। ओं सौं भं नमः पृष्ठे। ओं सौं वं नमः लिङ्गे। इति षष्ठ-
मम्। ध्यानम् — विद्रुमप्रभ एकमुखं बिभ्रं वज्रशक्तिवर-
दाभयपाणिनम्। देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं
शिखिवाहनम्॥ इति ध्यात्वा पुष्पाञ्जलिं नाभ्यादिभ्रूम-
ध्यान्तमारोप्य हृदयस्थितिपुष्पाञ्जलिगतं विभाव्य ओं हां
सौं विद्यादेहाय नमः इति पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्य-
स्य पश्चात् षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः इति नेत्र-
मुद्रां विन्यस्य पश्चात् कुण्डसमीपं गत्वा कुण्डमूर्तिषु आ-
सनमूर्तिमूलैरभ्यर्च्य पञ्चावरणं सम्पूज्य धूपदीपनैवेद्यं
दत्वा समिच्चर्वाज्यं स्कन्दमूलेन पञ्चविंशतिवारं हुत्वा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततः आत्मानं आसनमूर्तिविद्यादेहनेत्रान्तं विन्यस्य ततः
5a कुण्डमूर्तिं तन्मूलेनात्मानं संयोज्य उपचारैस्सम्पूज्य पश्चात्
बिम्बान्तिकं गत्वा दक्षिणभागे स्थित्वा सामान्यार्घ्यशाला ..
..... सम्प्रोक्ष्य पीठार्चनं कुर्यात्। तद्यथा - ओं हां आधा-
रशक्तये नमः। मूलप्रकृत्यै नमः। आदिकूर्माय नमः। महामण्डू-
काय नमः। अनन्ताय नमः। सुधासिन्धवे नमः। रत्नद्वीपाय
नमः। मणिमण्टपाय नमः। नन्दनोद्यानाय नमः। कल्पवृक्ष-
वाटिकाय नमः। चिन्तामणिगृहराजाय नमः। रत्नसिंहासनाय
नमः। तन्मध्ये सहस्रदलसंयुक्तं शुद्धविद्यामयं पद्मास-
नाय नमः। गं गणपतये नमः। सं सरस्वत्यै नमः। ओं ह्रीं म-
होङ्कारपरब्रह्मजगदाधारशक्त्यै नमः। विश्वज्योतिर्महाम-
ण्डूकाय नमः। विश्वतोमुखशिखादीप्यमानकालाग्निरु-
द्राय नमः। विश्वजगन्मूलप्रकृत्यै नमः। विश्वम्भरादिकूर्मा-
य नमः। भोगिभूषणफणामणिस्फुरदनन्ताय नमः। हरि-
हयादिहरिदीश्वरसामन्तचक्रहेमहिमगिरिधृतवसु-
न्धराय नमः। कुन्द .... शरच्चन्द्रिकासान्द्रकल्लोलसुधा-
समुद्राय नमः। चिन्तामण्यादिदिव्यमणिगणरमणीय-
मणिद्वीपाय नमः। हरिचन्दनमन्दारादिदिव्य ..... द-
सुन्दरकल्पवृक्षमहोद्यानाय नमः। नवरत्नप्राकारेभ्यो नमः।
5b पुरसुन्दरहरिन्मुखीभवचन्द्रकान्तकपाटतोरणाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न . . . विचित्रितहेमप्राकारेभ्यो नमः। स्वर्णरत्नमेखला-
लापरिष्कृतमणिकुट्टिमभूचिन्तामणिगृहराजमध्यान्त-
रान्तररत्नस्तम्भशतसहस्रजाति . . . . जातरूपसाल-
भञ्जिकापुञ्जमञ्जुलशतसहस्रस्वर्णस्तम्भमण्टपाय नमः।
तन्मध्ये चतुर्वेदस्तम्भ . . . ाय नमः। तन्मध्ये अष्टगज-
धृतैन्द्रविमानाय नमः। तन्मध्ये रत्नसिंहासनाय नमः।
शुभ्रवर्णाय सिंहरूपाय धर्माय आग्नेयाङ्घ्रये नमः। पीतव-
र्णाय सिंहरूपाय ज्ञानाय नैरृताङ्घ्रये नमः। रक्तवर्णाय
सिंहरूपाय वैराग्याय वायव्याङ्घ्रये नमः। हरिद्वर्णाय सिंह-
रूपाय ऐश्वर्याय ऐशान्याङ्घ्रये नमः। राजावर्तनिभाय नरा-
कृतये अधर्माय पूर्वफलकाय नमः। राजावर्तनिभाय नराकृ-
तये अज्ञानाय दक्षिणफलकाय नमः। राजावर्तनिभाय नरा-
कृतये अवैराग्याय पश्चिमफलकाय नमः। राजावर्तनिभाय
नराकृतये अनैश्वर्याय उत्तरफलकाय नमः। मध्ये लक्ष्मी-
पतिफलकाय नमः। तन्मध्ये ओं हां स्कन्दासनाय नमः। ओं हां
हं हां स्कन्दमूर्तये नमः। इत्यासनमूर्तिं विन्यस्य ततः दण्ड-
6 a भङ्गिन्यासं कुर्यात्। अस्यां मूर्तौ ओं सों ईशानमूर्ध्नाय जग-
द्भुवाय नमः। इति शिरसि। ओं सों तत्पुरुषवक्त्राय पचद्भुवा-
य नमः इति वक्त्रे। ओं सों अघोरहृदयाय विश्वभुवाय नमः
इति हृदये। ओं सिं वामदेवगुह्याय रुद्रभुवाय नमः इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गुह्ये। ओं सं सद्योजातपादाय ब्रह्मभुवाय नमः इति पादे।
ओं सौं आप्यभुवाय भुवङ्भुवाय नम इति सर्वाङ्गं न्यसेत्।
अथ मुण्डभङ्गिन्यासं कुर्यात्। ओं सों ईशानाय जगद्भुव-
मूर्ध्ने नमः इतीशानमूर्ध्नि। ओं सों तत्पुरुषाय पंचद्भुवमूर्ध्ने
नमः पूर्वमूर्ध्नि। ओं सुं अघोराय विश्वभुवमूर्ध्ने नमः दक्षि-
णमूर्ध्नि। ओं सिं वामदेवाय रुद्रभुवमूर्ध्ने नमः उत्तरमूर्ध्नि।
ओं सं सद्योजाताय ब्रह्मभुवमूर्ध्ने नमःपश्चिममूर्ध्नि। ओं सौं
आप्यभुवाय भुवङ्भुवमूर्ध्ने नमः इति नैऋतमूर्ध्नि न्यसेत्।
कलाभङ्गिन्यासं कुर्यात्। ओं सौं शान्त्यतीतकलायै नमः
इति शिरसि। ओं हैं शान्तिकलायै नमः वक्त्रे। ओं हूं विद्या-
कलायै नमः हृदये। ओं सिं प्रतिष्ठाकलायै नमः गुह्ये। ओं ह्वां
निवृत्तिकलायै नमः इति पादयोः विन्यस्य पञ्चतत्वन्यासं
कुर्यात्। ओं हं आकाशतत्वाय नमः। ओं हं आकाशतत्वाधि-
पतये सदाशिवाय नमः इति शिरसि। ओं यं वायुतत्वाय
नमः। ओं यं वायुतत्वाधिपतये महेश्वराय नमः वक्त्रे।
66 ओं रं तेजस्तत्वाय नमः। ओं रं तेजस्तत्वाधिपतये . . . .
नमः हृदये। ओं वं अमृततत्वाय नमः। ओं वं अमृततत्वा-
धिपतये विष्णवे नमः। गुह्ये। ओं लं पृथिवीतत्वाय नमः। ओं
लं पृथिवीतत्वाधिपतये . . . . नमः इति पादयोर्वि-
न्यस्य, त्रितत्वन्यासं कुर्यात्। ओं हुं शिवतत्वाय नमः। ओं हुं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवतत्वाधिपतये रुद्राय नमः। इति शिरसि। ओं ह्रिं विद्या-
तत्वाय नमः। ओं ह्रिं विद्यातत्वाधिपतये विष्णवे नम इति
हृदये। ओं हं आत्मतत्वाय नमः। ओं हं आत्मतत्वाधिपतये
ब्रह्मणे नमः इति पादयोर्विन्यस्य अथ मातृकान्यासं कु-
र्यात्। अं नमः शिरसि। आं नमः मुखमण्डले। इं नमः दक्ष-
नेत्रे। ईं नमः वामनेत्रे। उं नमः दक्षकर्णे। ऊं नमः वामकर्णे।
ऋं नमः दक्षिणगण्डे। ॠं नमः वामगण्डे। ऌं नमः दक्षिण-
नासिकायाम्। ॡं नमः वामनासिकायाम्। एं नमः ऊर्ध्वोष्ठे।
ऐं नमः अधरोष्ठे। ओं नमः ऊर्ध्वदन्ते। औं नमः अधोदन्ते।
अं नमः जिह्वायाम्। अः नमः इति शिरसि विन्यस्य। कं न-
मः दक्षिणबाहुशिखरे। खं नमः दक्षिणकोर्परे। गं नमः दक्षि-
णमणिबन्धे। घं नमः दक्षहस्ताङ्गुलिमूले। ङं नमः दक्षिण-
हस्ताङ्गुल्यग्रे। चं नमः वामबाहुशिखरे। छं नमः वामकोर्प-
रे। जं नमः वाममणिबन्धे। झं नमः वामहस्ताङ्गुलिमूले।
ञं नमः वामहस्ताङ्गुल्यग्रे। टं नमः दक्षिणोरुमूले। ठं नमः
7a दक्षिणजानुनि। डं नमः दक्षिणगुल्फे। ढं नमः दक्षपादाङ्गुलि-
मूले। णं नमः दक्षिणपादाङ्गुल्यग्रे। तं नमः वामोरुमूले।
थं नमः वामजानुनि। दं नमः वामगुल्फे। धं नमः वामपादा-
ङ्गुलिमूले। नं नमः वामपादाङ्गुल्यग्रे। पं नमः दक्षिणपार्श्वे।
फं नमः वामपार्श्वे। बं नमः पृष्ठे। भं नमः नाभौ। मं नमः उदरे।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यं नमः हृदये । रं नमः दक्षिणदोर्मूले । लं नमः वामदोर्मूले ।
वं नमः पिठरे । शं नमः दक्षिणकक्षौ । षं नमः वामकक्षौ ।
सं नमः दक्षिणबाहौ । हं नमः वामबाहौ । ळं नमः दक्षिण-
पादे । क्षं नमः वामपादे न्यसेत् । स्कन्दकलान्यासं कुर्यात् ।
जगद्भुवं जयायै नमः इतीशानमूर्ध्नि । बहुतो बल्लायै नमः
पूर्वमूर्ध्नि । हुतं उन्नतायै नमः दक्षिणमूर्ध्नि । पचद्भुवं वा-
मायै नमः उत्तरमूर्ध्नि । नमस्तेऽस्तु नन्दिने नमः पश्चिम-
मूर्ध्नि । विश्वभुवे विजयायै नमः नैरृतमूर्ध्नि । जगद्भुवोऽ-
धिपतिर्जयायै नमः ईशानवक्त्रे । सेनानी सेनायै नमः पूर्व-
वक्त्रे । मयूरप्रियायै नमः दक्षिणवक्त्रे । षडाननमङ्गनिशायै
नमः उत्तरवक्त्रे । · · · या: नमस्तेऽस्तु सत्यै नमः पश्चिम-
वक्त्रे । सुरवं बह्लि सूक्ष्मायै नमः नैरृतवक्त्रे । सुब्रह्मण्यसु-
मत्यै नमः हृदये । · · · · · · · य नमः गले ।
अस्य पद्मयोनेः अश्रुतायै नमः दक्षिणबाहौ । यस्यात्माय
76 यशस्विन्यै नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः · · ·
· · · · · · सुब्रह्मण्यसुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे
रुचये नमः पृष्ठे । ब्रह्मभुवे ब्रह्माण्यै नमः उरसि । भुवद्भुवे
भूत्यै नमः गुह्ये । · · यमान्यै नमः शिश्ने । जगद्भुवं जी-
वायै नमः दक्षिणोरौ । सुब्रह्मण्यशुद्धायै नमः वामोरौ । कृ-
त्तिकासुतकृपायै नमः दक्षिणजानुनि । षष्टिकासञ्ज्ञायै नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामजानुनि। जगद्भुवं जगत्यै नमः दक्षिणजंघायाम्। वचद्भुवं वरदायै नमः वामजंघायाम्। स्कन्दविशाखेने कामदायै नमः दक्षिणपादे। हव्यवहाय धारिण्यै नमः वामपादे। षण्मुखश्यामायै नमः इति उरसि विन्यस्य षडक्षरन्यासं कुर्यात्। ओं सौं शं नमश्शिरसि। ओं सौं रं नमः वदने। ओं सौं वं नमः दक्षनेत्रे। ओं सौं णं नमः वामनेत्रे। ओं सौं भं नमः दक्षिणनासिकायाम्। ओं सौं वं नमः वामनासिकायां न्यसेदिति प्रथमम्॥ ओं सौं शं नमः दक्षिणबाहुशिखरे। ओं सौं रं नमः दक्षिणकोर्परे। ओं सौं वं नमः दक्षिणमणिबन्धे। ओं सौं णं नमः दक्षिणहस्ताङ्गुलिमूले। ओं सौं भं नमः दक्षिणहस्ताङ्गुलिमध्ये। ओं सौं वं नमः दक्षिणहस्ताङ्गुल्यग्रे। न्यसेदिति द्वितीयम्॥ ओं सौं शं नमः वामबाहुशिखरे। ओं सौं रं नमः वामकोर्परे। ओं सौं वं नमः वाममणिबन्धे। ओं सौं णं
8a नमः वामहस्ताङ्गुलिमूले। ओं सौं भं नमः वामहस्ताङ्गुलिमध्ये। ओं सौं वं नमः वामहस्ताङ्गुल्यग्रे। न्यसेदिति तृतीयम्। ओं सौं शं नमः दक्षिणोरुमूले। ओं सौं रं नमः दक्षिणजानुनि। ओं सौं वं नमः दक्षिणगुल्फे। ओं सौं णं नमः दक्षपादाङ्गुलिमूले। ओं सौं भं नमः दक्षपादाङ्गुलिमध्ये। ओं सौं वं नमः दक्षपादाङ्गुल्यग्रे न्यसेदिति तुरीयम्॥ ओं सौं शं नमः वामोरुमूले। ओं सौं रं नमः वामजानुनि। ओं सौं वं नमः वामगुल्फे।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं सौं णं नमः वामपादाङ्गुलिमूले । ओं सौं भं नमः वामपा-
दाङ्गुलिमध्ये । ओं सौं वं नमः वामपादाङ्गुल्यग्रे न्यसेदिति
पञ्चमम् ॥ ओं सौं शं नमः हृदये । ओं सौं रं नमः दक्षिणपा-
र्श्वे । ओं सौं वं नमः वामपार्श्वे । ओं सौं णं नमः नाभौ । ओं सौं
भं नमः पृष्ठे । ओं सौं वं नमः लिङ्गे । इति षष्ठमम् । इति षट्-
त्रिंशत्स्थाने न्यसेदिति षडक्षरन्यासः । ध्यानम् — विद्रुमप्रभ
एकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् । देवलोकारिपु-
ष्वामविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥ इति ध्यात्वा । पु-
ष्पाञ्जलिं दत्वा । ब्रह्मरन्ध्रान्तं नीत्वा । ओं ह्रां सौं दिव्यदेहाय
नमः इति पुष्पाञ्जलिगतं विभाव्य । बिम्बमूर्ध्नि विन्यस्य ।
8 b षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः इति नेत्रमुद्रां प्रदर्श्य ।
आवाहनम् । पश्चाद्रेचकया पुष्पैरञ्जलिमापूर्य । हृत्प्रदेशे
निधाय । पूरकं विभाव्य । कुम्भकं भावनया मूलाधारादिना-
भ्यन्तव्याप्तप्राणबीजं हकारं नाभ्यादिहृदयान्तव्याप्तं घो-
षामेधाकलां औकारेण संयोज्य हौकारं हृदयादिकण्ठान्त-
व्याप्तं रसकलां ऊकारेण संयोज्य । हौकारं कण्ठादितालु-
रन्ध्रान्तव्याप्तं विषकलां मकारेण संयोज्य हौंकारस्योपरि
भ्रूमध्यगतबिन्दुकलया ललाटार्धचन्द्रकलया अर्धचन्द्र-
कलान्तमुपरि गतनिरोधिकलया निरोधिकलान्तदूर्ध्वगत-
नादेन नादं च तदुपरि ब्रह्मरन्ध्रान्तव्याप्तारूप अनन्त -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अनाथ अनाश्रुतान्तदुपरि समनाचतुरङ्गुलव्याप्तां तदु-
परि उमनामपि चतुरङ्गुलव्याप्तां सञ्चिन्त्य। प्रासादान्ते द्वा-
दशान्तोपरि षडक्षरेण वाच्यवाचकभावादभिन्नं श्री सुब्र-
9a ह्मण्यं सम्पूज्य पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा सृष्टिमा-
र्गेण भ्रूमध्यान्तमवरोप्य स्फुरत्तारकाकारं स्कन्दं रेचक-
भावनया हृदयस्थिति पुष्पाञ्जलिगतं विभाव्य तेजोरूपं
ध्यात्वा अयं कुमारो जराजयत् दीर्घमायुः' यस्मै त्वं स्तन-
प्रच्छाया युष · · यशो बलम्' इति मन्त्रमुच्चार्य शरवणो-
द्भवाय षण्मुखाय शिखिवाहनाय अभयवरप्रदाय शक्ति-
हस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमाराय ओं ह्रां ह्रीं ह्रूं
सौं शरवणभव हुं फट् स्वाहा इति सुब्रह्मण्यध्वनिमन्त्र-
मुच्चार्य ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवणभव इति मूल-
मन्त्रं दशवारं जप्त्वा तन्मन्त्रेण पुष्पाञ्जलिं बिम्बमूर्ध्नि वि-
न्यस्य श्री सुब्रह्मण्यस्य बिम्बमूर्तिं ब्रह्मरन्ध्रमार्गेण हृ-
दम्बु(ज) प्रविष्टं विभाव्य बिम्बे आवाहित्वा ऊर्ध्वहस्तेन
जगद्भवहृदयेनावाह्य वचद्भुवशिरसेनाधोमुखहस्तेनास्था-
विन्यासं स्थाप्य विश्वभुवशिखोर्ध्वाङ्गुष्ठमुष्टिभ्यां सन्निधा-
न्या सन्निधीकृत्वा रुद्रभुवकवचाङ्गुष्ठमुष्टिभ्यां रूपिण्या
निष्ठुरया सन्निरुध्य ब्रह्मभुवनेत्रेणावकुण्ठ्य ओं गुभुवास्त्रे-
ण धेनुमुद्रामृतीकृत्य स्वागतं ते सुब्रह्मण्येति विज्ञाप्य

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वत्स स्वागतमिति देवोक्तं देवोक्तं विभाव्य 'स्वामिन् सर्व-
१६ जगन्नाथ यावत्पूजावसानकम्। तावत्सम्प्रीतिभावेन बिम्बेऽ-
स्मिन् सन्निधीभव॥' इति विज्ञाप्य स्वागतार्घ्यं दत्वा हृद-
यादिकरान्तस्थानेषु जगद्भवहृदयादि विन्यस्य भूर्भुवास्त्रेण
संरक्ष्य रुद्रभुवकवचेनावकुण्ठ्य तूलेना धेनुमुद्रां महामु-
द्रां दत्त्वा ओं हां सुब्रह्मण्याय नमः पादयोः पाद्यं सुब्रह्मण्या-
य स्वधा इति षडङ्गेष्वाचमनं सुब्रह्मण्याय स्वाहा इति शि-
रष्षड्भ्योऽर्घ्यं दत्त्वा मूलेन स्नानवस्त्रोत्तरीयाभरणयज्ञोप-
वीत गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। अस्य दक्षिणभागे
वल्लीबिम्बस्य ओं ह्लीं वल्ल्यासनाय नमः ओं ह्लीं वल्लीमूर्तये
नमः। ध्यानम् — श्यामामुत्पलधारिणीं मणिलसत्ताटङ्कक-
र्णोत्पलां सव्ये लम्बकरां किरीटमकुटां कुम्भस्तनीकञ्चुकाम्।
अन्योद्वीक्षणसंयुतां शर•वणाभूतस्य सव्ये स्थितां गु-
ञ्जामालधरां प्रवालवदनां वल्लीश्वरीं भावये॥ इति ध्यात्वा
ओं ह्लीं वल्ल्यै नमः इति मूलेनावाहनादि कृत्वा पाद्यादिगन्ध-
पुष्पधूपदीपनैवेद्यं दत्त्वा उत्तरबिम्बे ओं श्रीं देवगजासना-
य नमः ओं श्रीं देवगजमूर्तये नमः। ध्यानम् — पीतामुत्पल-
धारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां पीतालङ्करणां क-
रण्डमकुटां सेनानिवामे स्थिताम्। वामे लम्बकरां महेन्द्र-
तनयां मन्दारमालाधरां देवैरर्चित · · कां शशियुतां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

10 a देवीं त्रिभङ्गीं भजे॥ इति ध्यात्वा ओं श्रीं देवगजायै नमः इति
मूलेनावाहनादि कृत्वा पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा 'शान्त्यतीतकलामूर्ध्ना शान्तिवक्त्रसरोरुहः। विद्या-
विततवक्षोजं प्रतिष्ठां गुह्यमण्डलम्॥ निवृत्तिं जानुजङ्घा-
ङ्घ्रिं मूर्धादिक्रमशः कलाः। वर्णत्वक् मन्त्ररुधिरं पदमांस-
सिराचितम्। तत्वास्थिमज्जाशुक्लादि ध्यानं सद्भोगमोक्ष-
दम्॥ शिवान्ततत्वागर्भाग्ना व्यापिनः सर्वदा गुहम्।' इति
ध्यात्वा पश्चात्पञ्चावरणमभ्यर्च्य। तद्यथा -- ओं सों ईशा-
नाय जगद्भुवाय नम इति ईशानदले। ओं सें तत्पुरु-
षाय वचद्भुवाय नम इति पूर्वदले। ओं सुं अघोराय
विश्वभुवाय नम इति दक्षिणदले। ओं सिं वामदेवाय रुद्र-
भुवाय नमः इत्युत्तरदले। ओं सं सद्योजाताय ब्रह्मभुवाय
नमः इति पश्चिमदले। ओं सौं आव्यभुवाय भुवद्भुवाय
नमः इति नैर्ऋतदले। ओं सों जगद्भुवहृदयाय नमः इति
ईशानदले। ओं सीं वचद्भुवशिरसे नमः इति आग्नेय-
दले। ओं सुं विश्वभुवशिखाय नमः इति नैर्ऋतदले। ओं
सैं रुद्रभुव कवचाय नम इति वायव्यदले। ओं सौं ब्रह्म-
भुवनेत्राय नमः इति इन्द्रेशानमध्यदले। ओं सः भूर्भुव
अस्त्राय नम इति इन्द्राग्निमध्यदले अभ्यर्च्य। इति प्र-
10 b थमावरणम्॥ इन्द्रं ईशान ······· ओं हां जयन्ताय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। अग्निशिखाय नमः। कृत्तिकापुत्राय नमः। भूतपतये
नमः। सेनान्ये नमः। गुहाय नमः। हेमशूलाय नमः। विशालाक्षा-
य नमः। इति द्वितीयावरणम्॥ दक्षिणे वल्ल्यै नमः। उत्तरे देव-
गजायै नमः। प्राच्यां गजेन्द्राय नमः। पश्चिमे मयूराय नमः।
पावके सुदेहाय नमः। नैरृते सुमुखाय नमः। वायौ देव-
सेनापतये नमः। ऐशान्यां सुमित्राय नमः। इति तृतीया-
वरणम्॥ तद्बहिरिन्द्रादिलोकपालांश्चतुर्थावरणम्। वज्रादिप-
ञ्चमावरणम्। इति क्रमेणाभ्यर्च्य। सर्वमन्त्रस्वरूपिणे नमः।
सर्वयन्त्रस्वरूपिणे नमः। सर्वतीर्थस्वरूपिणे नमः। सर्वकर्म-
स्वरूपिणे नमः। सर्वदेवतास्वरूपिणे नमः। ओं श्रीं क्लीं ह्रीं ऐं सौं
नं ळं रं शरवणभवाय साङ्गाय सशक्तिकाय सायुधाय सवा-
हनाय सपरिवाराय श्री सुब्रह्मण्याय नम इत्यभ्यर्च्य पश्चात्
प्राणप्रतिष्ठां कुर्यात्। अस्य श्री प्राणप्रतिष्ठा(महा)मन्त्रस्य रुद्रब्रह्मा-
च्युत ऋषिः। ऋग्यजुस्सामाथर्वाणि छन्दांसि। अखिलचैतन्य-
रूपिणी परा प्राणशक्तिर्देवता। आं बीजं ह्रीं शक्तिः क्रौं कील-
कम्। श्रीवल्ली देवनायकी समेत श्री सुब्रह्मण्येश्वर प्राणक-
ला प्रसादसिद्ध्यर्थे जपे विनियोगः। ओं अं कं खं गं घं ङं आं
॥ a पृथिव्यप्तेजोवाय्वाकाशात्मने त्राङ्गुष्ठाभ्यां नमः। ओं इं चं छं जं
झं ञं ई गन्धरसरूपस्पर्शशब्दात्मने तर्जनीभ्यां नमः।
ओं उं टं ठं डं ढं · · · · · श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मध्यमाभ्यां नमः। ओं एं तं थं दं धं नं ऐं वाक्पादपाणिपायू-
रूपस्थात्मने अनामिकाभ्यां नमः। ओं ओं पं फं बं भं मं औं
वचनदानगमनविसर्गात्मने कनिष्ठिकाभ्यां नमः। ओं अं
यं रं लं वं शं षं सं हं ळं क्षं अः। मनोबुद्ध्यहङ्कारचित्तात्मने
करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः॥ ओं भूर्भु-
वःस्वरोमिति दिग्बन्धः। ओं आं नाभ्यादिपादपर्यन्तं। ओं ह्रीं
हृदयादिनाभिपर्यन्तं। ओं क्रौं मूर्धादिहृदयपर्यन्तम्। न्या-
स्य। हृदये संघट्टमुद्रया। यं रसधातुः। रं रुधिरधातुः। लं मां-
सधातुः। वं मेदोधातुः। शं मज्जाधातुः। षं अस्थिधातुः। इति
सप्तधातून् विन्यस्य। हं प्राणस्सजीव इति समस्तव्यापकं
न्यसेत्। ध्यानम्। 'रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजा-
धिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं
पञ्चबाणान्। बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनव-
क्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः
परा नः॥' इति ध्यात्वा पञ्चोपचारं कृत्वा बिम्बं स्पृष्ट्वा ज-
॥ ६ पेत्। ओं आं ह्रीं क्रौं यरलवशषसहों हंसस्सोऽहमों श्री
श्रीवल्ली देवनायकी समेत श्री सुब्रह्मण्येश्वरस्य प्राणः इह प्रा-
णस्थितः। आं ह्रीं क्रौं यरलवशषसहों हंसस्सोहमों श्री
वल्ली देवनायकी समेत श्री सुब्रह्मण्येश्वरस्य जीव इह
स्थितः। ओं ह्रीं क्रौं यरलवशषसहों हंसस्सोऽहमों श्रीवल्ली-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवनायकीसमेत श्रीसुब्रह्मण्येश्वरस्य जीवतत्वसर्वेन्द्रिया-
णि मनोबुद्ध्यहङ्कारचित्त पृथिव्यप्तेजोवाय्वाकाश शब्द-
स्पर्श रूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पादपाणि-
पायूपस्थ जीवप्राण इहागत्य अस्मिन् बिम्बे श्रीवल्ली -
देवनायकी समेत श्रीसुब्रह्मण्येश्वरं सुखं चिरं तिष्ठन्तु
स्वाहा । क्रों ह्रीं आं हं सस्सोऽहं स्वाहा इति मूलमन्त्रं द्वादश-
वारं जपेत् । ' असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह
नो धेहि भोगं ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया
नः स्वस्ति । पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुन-
रन्तरिक्षम् । पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्या
आं व्या स्वस्ति । ओं श्रीवल्लीदेवकीसमेतश्रीसुब्रह्मण्येश्वरा-
य नमः प्राणान् प्रतिष्ठापयामि । पश्चात्तत्वतत्वेश्वरन्यासं
कुर्यात् । बिम्बस्य मूर्धादिकण्ठपर्यन्तं शिवतत्वस्थानम् ।
कण्ठादिकटिपर्यन्तं विद्यातत्वस्थानम् । कट्यादि पाद -
12 a पर्यन्तं आत्मतत्वस्थानम् । इति ज्ञात्वा समर्चयेत् । तद्यथा —
मूर्धादिकण्ठपर्यन्तं ओं हां शिवतत्वाय नमः । ओं हां शिव-
तत्वाधिपतये शिवाय नमः । ओं हां शक्तितत्वाय नमः । ओं हां
शक्तितत्वाधिपतये शक्तिमते नमः । ओं हां सादाख्यतत्वाय
नमः । ओं हां सादाख्यतत्वाधिपतये ब्रह्मणे नमः । ओं हां
ईश्वरतत्वाय नमः । ओं हां ईश्वरतत्वाधिपतये अनन्ताय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। ओं हां शुद्धविद्यातत्वाय नमः। ओं हां शुद्धविद्यातत्वा-
धिपतये शम्बराय नमः। इति मूर्धादिकण्ठपर्यन्तं शिव-
तत्वपञ्चकं साधिपपञ्चदेवतां समर्चयेत्। कण्ठादिकटि-
पर्यन्तं विद्यातत्वं समर्चयेत्। तद्यथा — ओं हां पुरुषत-
त्वाय नमः। ओं हां पुरुषतत्वाधिपतये सूक्ष्माय नमः। ओं हां
रागतत्वाय नमः। ओं हां रागतत्वाधिपतये कामदाय नमः।
ओं हां नियतितत्वाय नमः। ओं हां नियतितत्वाधिपतये नि-
यामकाय नमः। ओं हां विद्यातत्वाय विद्यातत्वाय नमः। ओं हां
विद्यातत्वाधिपतये ~~...~~ शम्बराय नमः। ओं हां कलातत्वाय
नमः। ओं हां कलातत्वाधिपतये ज्ञानबिन्दवे नमः। ओं हां
कालतत्वाय नमः। ओं हां कालतत्वाधिपतये कालनाम्ने नमः।
12b ओं हां मायातत्वाय नमः। ओं हां मायातत्वाधिपतये ....
.... नमः। इति विद्यातत्वसप्तकमर्चयेत्। कट्यादिपादप-
र्यन्तं आत्मतत्वम्। ओं हां प्रकृतितत्वाय नमः। ओं हां प्रकृति-
तत्वाधिपतये प्रधानकाय नमः। ओं हां अहङ्कारतत्वाय नमः।
ओं हां अहङ्कारतत्वाधिपतये अहङ्कृते नमः। ओं हां चित्त-
तत्वाय नमः। ओं हां चित्ततत्वाधिपतये सिद्धेश्वराय नमः।
ओं हां बुद्धितत्वाय नमः। ओं हां बुद्धितत्वाधिपतये बुद्ध्या-
ढ्याय नमः। ओं हां मनस्तत्वाय नमः। ओं हां मनस्तत्वाधि-
पतये सङ्कल्पाय नमः। ओं हां नासातत्वाय नमः। ओं हां नासा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्वाधिपतये विलुम्बकाय नमः। ओं हां जिह्वातत्वाय नमः।
ओं हां जिह्वातत्वाधिपतये महावक्राय नमः। ओं हां चक्षु-
स्तत्वाय नमः। ओं हां चक्षुस्तत्वाधिपतये प्रकाशाय नमः। ओं
हां त्वक्तत्वाय नमः। ओं हां त्वक्तत्वाधिपतये सर्वाङ्गाय नमः।
ओं हां श्रोत्रतत्वाय नमः। ओं हां श्रोत्रतत्वाधिपतये व्योमच-
राय नमः। ओं हां उपस्थतत्वाय नमः। ओं हां उपस्थतत्वा-
धिपतये घनानन्दाय नमः। ओं हां पायुतत्वाय नमः। ओं हां
पायुतत्वाधिपतये तृण्ठकृते नमः। ओं हां पादतत्वाय नमः।
ओं हां पादतत्वाधिपतये रमणाय नमः। ओं हां पाणितत्वा-
य नमः। ओं हां पाणितत्वाधिपतये सा॰॰मदाय नमः। ओं
हां वाक्तत्वाय नमः। ओं हां वाक्तत्वाधिपतये दुन्दुपतये नमः।
13 a ओं हां गंधतत्वाय नमः। ओं हां गजतत्वाधिपतये गन्धाङ्गाय
नमः। ओं हां रसतत्वाय नमः। ओं हां रसतत्वाधिपतये जले-
शाय नमः। ओं हां रूपतत्वाय नमः। ओं हां रूपतत्वाधिपतये
भानुमते नमः। ओं हां स्पर्शतत्वाय नमः। ओं हां स्पर्शतत्वा-
धिपतये बलवत्तराय नमः। ओं हां शब्दतत्वाय नमः। ओं
हां शब्दतत्वाधिपतये सूक्ष्मनादाय नमः। ओं हां आकाश-
तत्वाय नमः। ओं हां आकाशतत्वाधिपतये सूक्ष्माय नमः।
ओं हां वायुतत्वाय नमः। ओं हां वायुतत्वाधिपतये मातरि-
श्वने नमः। ओं हां तेजस्तत्वाय नमः। ओं हां तेजस्तत्वाधि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पतये त्विषांनिधये नमः। ओं हां अप्तत्वाय नमः। ओं हां अ-
प्तत्वाधिपतये जलेश्वराय नमः। ओं हां पृथिवीतत्वाय नमः।
ओं हां पृथिवीतत्वाधिपतये श्रीकण्ठाय नमः। इति आत्मतत्वं
चतुर्विंशतिनामानि साधिपानि च समर्चयेत्। ततः मूर्तिमूर्ती-
श्वरन्यासं कुर्यात्। मूर्धादि भ्रूमध्यपर्यन्तं आकाशस्थानम्।
भ्रूमध्यादि कण्ठपर्यन्तम् वायुस्थानम्। कण्ठादि हृदयप-
र्यन्तं अग्निस्थानम्। हृदयादि कुदपर्यन्तं अप्स्थानम्।
कुदादि पादपर्यन्तं पृथिवीस्थानम्। ओं हां हूं आकाशमू-
र्तये नमः। आकाशमूर्त्यधिपतये सदाशिवाय नमः। ओं हां
यूं वायुमूर्तये नमः। वायुमूर्त्यधिपतये महेश्वराय नमः।
136 ओं हां हूं तेजोमूर्तये नमः। तेजोमूर्त्यधिपतये रुद्राय
नमः। ओं हां वूं जलमूर्तये नमः। जलमूर्त्यधिपतये विष्ण-
वे नमः। ओं हां लूं पृथिवीमूर्तये नमः। पृथिवीमूर्त्यधिप-
तये ब्रह्मणे नमः। पुनः नाभि हृदय शिरसि स्थानत्रये कु
ओं हां षूं अर्कमूर्तये नमः। अर्कमूर्त्यधिपतये भवाय नमः।
ओं हां सूं इन्दुमूर्तये नमः। इन्दुमूर्त्यधिपतये महादेवाय
नमः। ओं हां हं सः यजमानमूर्तये नमः। यजमानमूर्त्यधि-
पतये पशुपतये नमः। इत्यभ्यर्च्य, पाद्यादि गन्धपुष्प-
धूपदीपं दत्वा। पायसान्न शुद्धान्नं निवेद्य नीराजनं दत्वा
स्तोत्रैः स्तुत्वा दण्डवत्प्रणम्य, पश्चाद्बहिर्मण्टपे उत्तराभि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मुखमुपविश्य, दर्भेष्वासीनः दर्भान्धारयमाणः, शुक्लाम्ब-
रधरमित्यादि प्राणानायम्य, शिवश्शम्भोराज्ञा इत्यादिवि-
शेषेण शुभतिथौ श्रीसुब्रह्मण्यप्रसादसिद्ध्यर्थं श्रीवल्ली-
देवनायकीसमेत श्रीसुब्रह्मण्येश्वरस्य पुनरावृत्ति अष्टब-
न्धनकर्माङ्गत्वेन कुम्भे आवाहनार्थं सर्वेषां महाजनानां
14a राज्ञां च सर्वाभीष्टसिद्ध्यर्थं श्रीवल्ली देवनायकीसमेत-
श्रीसुब्रह्मण्येश्वरस्य सङ्कोचकर्म करिष्ये। इति सङ्कल्प्य,
बिम्बसमीपं गत्वा प्रार्थ्य, 'सुखोषितं चिरं बिम्बे लोका-
नुग्रहकाम्यया। जीर्णोद्धारं दयां कृत्वा प्राप्य कुम्भं सुखं
वस॥' एतद्दिनं समारभ्य यावत्पञ्चादिनान्तकम्। तेष्व-
न्तरे नवीकृत्य पुनस्त्वां स्थापयाम्यहम्॥ इति विज्ञाप्य, त-
दनन्तरं बिम्बस्य दक्षिणभागे उत्तराभिमुखमुपविश्य
14b अष्टपुष्पं मिश्रमर्चयेत्॥ पादादारभ्य जानुपर्यन्तमर्च-
येत्॥ ओं ह्रां निवृत्तिकलायै नमः। ब्रह्मणा कारणेश्वराय नमः।
जाग्रदवस्थाय नमः। वज्रलाञ्छनाय नमः। चतुरश्रमण्डला-
य नमः। पीतवर्णाय नमः। गन्धाय नमः। रसाय नमः। रूपाय
नमः। स्पर्शाय नमः। शब्दाय नमः। " गुणम् नमः। घ्राणाय
नमः। उपस्थाय नमः। " इन्द्रियं उ.। प्राणाय नमः। अपा-
नाय नमः। " वायु उ। पिङ्गलाय नमः। इडाय नमः। "
नाडि उ। लकारबीजाय नमः। अकारबीजाय नमः। " बीजं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हृदयाय नमः। सद्योजाताय नमः। ·· मन्त्रम् ३। शिवाय नमो

नमः। ओं नमो नमः। ओं नमश्शिवाय नमः। सर्वं नमः। सर्वं

नमः। शर्वं नमः। सूक्ष्मसूक्ष्मं नमः। शब्दशब्दं नमः। ज्ञान-

ज्ञानं नमः। पिङ्गपिङ्गं नमः। तुरुतुरुं नमः। साक्षिसाक्षिन्नमः।

15a पूर्वस्थितपूर्वस्थितं नमः। अस्तुत अस्तुतं नमः। अनाचित-

अनाचितं नमः। ब्रह्मविष्णुरुद्रेभ्यो नमः। सर्वसान्निध्यकार-

णाय नमः। सर्वभूतसुखप्रदाय नमः। भवोद्भवं नमः। भवभवं

नमः। शर्वशर्वं नमः। प्रथमप्रथमं नमः। मुञ्जमुञ्जं नमः। यो-

गाधिपाय नमः। महातेजस्काय नमः। सद्भावेश्वराय नमः। म-

हादेवाय नमः। ·· पदम्। क्षकाराय नमः। ·· वर्णम्। कालाग्न-

ये नमः। कूश्माण्डाय नमः। हाटकाय नमः। ब्रह्मणे नमः। विष्ण-

वे नमः। रुद्राय नमः। ·· भुवनम्। कपालीशाय नमः। अजाय

नमः। बुधाय नमः। वज्रदेहाय नमः। प्रमर्दनाय नमः। विभू-

तये नमः। अव्ययाय नमः। शास्त्रे नमः। पिनाकिने नमः। त्रिद-

शाधिपाय नमः। इति पूर्वादिशभुवन। अग्निरुद्राय नमः।

हुताशनाय नमः। पिङ्गलाय नमः। खातकाय नमः। हराय नमः।

15b ज्वलनाय नमः। दहनाय नमः। बभ्रवे नमः। भस्मान्तकाय

नमः। क्षयान्तकाय नमः। इत्याग्नेयदशभुवनम्। याम्याय

नमः। मृत्यवे नमः। हराय नमः। धात्रे नमः। विधात्रे नमः। कर्त्रे

नमः। संयोक्त्रे नमः। वियोक्त्रे नमः। धर्मपतये नमः। धर्माय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। इति याम्ये दशभुवनम्। निऋतये नमः। वारणाय
नमः। हन्त्रे नमः। क्रूरदृष्टये नमः। भयानकाय नमः। ऊर्ध्वरे-
तसे नमः। विरूपाक्षाय नमः। धूम्राय नमः। लोहिताय नमः।
दृष्टवते नमः। इति निऋतिदशभुवनम्। बलाय नमः। अति-
बलाय नमः। पाशहस्ताय नमः। महाबलाय नमः। श्वेताय
नमः। जयभद्राय नमः। दीर्घबाहवे नमः। जलान्तकाय नमः।
मेघनादाय नमः। सुनादाय नमः। इति वारुणदशभुवनम्॥
शीघ्राय नमः। लघवे नमः। वायुवेगाय नमः। सूक्ष्माय नमः।
16 a तीक्ष्णाय नमः। क्षयान्तकाय नमः। पञ्चान्तकाय नमः। पञ्च-
शिखाय नमः। कपर्दिने नमः। मेघवाहनाय नमः। इति वायु-
दशभुवनम्। निधीशाय नमः। रूपवते नमः। धन्याय नमः।
सौम्यदेहाय नमः। जटाधराय नमः। लक्ष्मीधराय नमः। रत्न-
धराय नमः। श्रीधराय नमः। प्रसादाय नमः। प्रकामदाय नमः।
इत्यूर्ध्वे दशभुवनम्॥ विद्याधिपाय नमः। ईशानाय नमः। सर्व-
ज्ञाय नमः। ज्ञानभुजे नमः। वेदपारगाय नमः। सुरेशाय नमः।
सर्वाय नमः। ज्येष्ठाय नमः। भूतपालाय नमः। बलिप्रिया-
य नमः। इतीशानदशभुवनम्॥ वृषाय नमः। वृषधरा-
य नमः। अनन्ताय नमः। क्रोधनाय नमः। मारुताशनाय
नमः। ग्रासनाय नमः। उदुम्बरीशाय नमः। फणीन्द्राय
नमः। वज्रिणे नमः। दंष्ट्रिणे नमः। इत्यधो दशभुवनम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शम्भवे नमः। विभवे नमः। गणाध्यक्षाय नमः। त्र्यक्षाय नमः।
16 b त्रिदशेश्वराय नमः। संवाहनाय नमः। विवाहाय नमः। नभसे नमः। लिप्सवे नमः। त्रिलोचनाय नमः। इत्यूर्ध्वे दश भुवनम्। वीरभद्राय नमः। भद्रकाल्यै नमः। इति ब्रह्माण्डस्योपरि भुवनद्वयम्॥ ब्रह्माण्डस्यान्तर्मध्ये भुवनम्॥ पृथिवीतत्वाय नमः॥ इति निवृत्तिकलान्यासः समाप्तः॥

प्रतिष्ठाकलार्चनाविधिरुच्यते। जानुमारभ्य नाभिपर्यन्तं ओं ह्रीं प्रतिष्ठाकलायै नमः। विष्णवे कारणेश्वराय नमः। स्वप्नावस्थाय नमः। अर्धचन्द्राकाराय नमः। धूम्रवर्णाय नमः। रसाय नमः। रूपाय नमः। स्पर्शाय नमः। शब्दाय नमः। .. गुणम्। रसाय नमः। विषयम्। रसनाय नमः। पायवे नमः। .. इन्द्रियम्। समानाय नमः। उदानाय नमः।
17 a .. वायु। गान्धार्यै नमः। सुषुम्नाय नमः। .. नाभि। वकाराय नमः। मकाराय नमः। .. बीजम्। ओं हिं शिरसे नमः। ओं हिं वामदेवाय नमः। .. मन्त्रम्। महेश्वराय नमः। शर्वाय नमः। परमात्मने नमः। शिवाय नमः। निधनं नमः। निधनोद्भवं नमः। अनिधनाय नमः। वं नमः। भुवं नमः। भूवं नमः। धुधुधुनमः। नानाना नमः। अनादे नमः। अभस्माय नमः। अधूमं नमः। अनग्निं नमः। अरूपन्नरूपं नमः। ज्योतिर्ज्योतिर्नमः। तेजस्तेजं नमः। प्रथमप्रथमं नमः। अरूपं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः।·· पदम्। हं नमः। सं नमः। षं नमः। शं नमः। वं नमः। लं
नमः। रं नमः। यं नमः। मं नमः। भं नमः। बं नमः। फं नमः। पं न-
मः। नं नमः। धं नमः। दं नमः। थं नमः। तं नमः। णं नमः। ढं
नमः। डं नमः। ठं नमः। टं नमः।·· वर्णम्। तदनु अप्तत्वे।
अमरेश्वराय नमः। प्रभासाय नमः। नैमीशाय नमः। पुष्क-
17b राय नमः। आषा ··· नमः। भारभूताय नमः। डिण्डिमुण्डा-
य नमः। लकुलीशाय नमः। अप्तत्वत्तिलभुवनम्। अग्नितत्वे
हरिश्चन्द्राय नमः।·· शैलाय नमः। जल्पेश्वराय नमः। आम्रा-
दिकेश्वराय नमः। मध्येश्वराय नमः। महाकालाय नमः। के-
ताराय नमः। भैरवाय नमः। इति अग्नितत्वद्भिव भुवनम्। वा-
युतत्वे। गयाय नमः। कुरुक्षेत्राय नमः। नाखलाय नमः। नख-
लाय नमः। विमलेश्वराय नमः। अट्टहासाय नमः। महेन्द्राय
नमः। भीमेश्वराय नमः।·· वायुतत्वत्तिल भुवनम्। तन्मात्रान्ते-
षु तत्वेषु। वस्त्रपादाय नमः। रुद्रकोटाय नमः। अविमुक्ता-
य नमः। महाबलाय नमः। गोकर्णाय नमः। भद्रकर्णाय नमः।
स्वर्णाक्षाय नमः। स्थाणवे नमः।·· आकाशतत्वत्तिल भुवनम्॥
तदनु कर्मेन्द्रियपञ्चतत्वे। छगरण्डाय नमः। गण्डाय नमः। द्वि-
18a रण्डाय नमः। महाकोटाय नमः। मण्डलेश्वराय नमः। कालाञ्ज-
नाय नमः।·· अन्तरिक्षभुवनम्। मनस्तत्वे बुद्धीन्द्रियपञ्च-
तत्वत्तिल। शङ्कुकर्णाय नमः। अं ···· तत्वत्तिल। स्थूलेश्वराय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। भुवनम्। गुणतत्वत्तिल। पैशाचाय नमः। राक्षसाय
नमः। यक्षाय नमः। गन्धर्वाय नमः। ऐन्द्राय नमः। सौम्याय
नमः। प्रजेशाय नमः। ओं हां ब्रह्मणे नमः।·· गुणतत्वात्तिल
भुवनम्। प्रकृतितत्वत्तिल। कुम्ताय नमः। अकुम्ताय नमः।
भैरवाय नमः। ब्रह्मणे नमः। वैष्णवाय नमः;कौमाराय नमः।
मायाय नमः। श्रीकण्ठाय नमः।·· प्रकृतितत्वत्तिल भुवनं।
योन्यष्टक भुवनम्। अग्नौ नमः। अग्नये नमः। वायवे नमः।
आकाशाय नमः। गन्धाय नमः। रसाय नमः। रूपाय नमः।
स्पर्शाय नमः। शब्दाय नमः। उपस्थाय नमः। पायवे नमः।
पादाय नमः। पाणये नमः। वाचे नमः। घ्राणाय नमः। जि-
18 b ह्वाय नमः। चक्षुषे नमः। त्वचे नमः। श्रोत्राय नमः। मनसे
नमः। अहङ्काराय नमः। बुद्ध्ये नमः। गुणेभ्यो नमः। ओं हीं प्र-
तिष्ठाकलायै नमः। इति प्रतिष्ठाकलार्चनविधिः। विद्याकला-
र्चनाविधिरुच्यते। ओं हौं विद्याकलायै नमः। रुद्रकारणे-
श्वराय नमः। सुषुप्त्यवस्थाय नमः। रक्तवर्णाय नमः। त्रिको-
णमण्डलाय नमः। रूपाय नमः। शब्दाय नमः। स्पर्शाय नमः।
·· गुणम्। रूपाय नमः ·· विषयम्। चक्षुषे नमः। पादाय
नमः। ·· इन्द्रियम्। नागाय नमः। व्यानाय नमः। ·· वायु।
हस्तिजिह्वाय नमः। पूषाय नमः। ·· नाभि। रेफाय नमः। म-
काराय नमः। ·· बीजम्। ओं हुं शिखाय नमः। ओं हुं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अघोराय नमः। .. मन्त्रम्। व्यापिन्याव्यापिन्नमः। व्योम-
व्योमन्नमः। अचेतनाचेतनाय नमः। परमेश्वराय नमः। ज्यो-
तीरूपाय नमः। सर्वविद्याधिपाय नमः। सर्वयोगविकृताय
19 a नमः। अनिधनाय नमः। गोप्त्रे नमः। गुह्यातिगुह्याय
नमः। ओं हां हौं नमो नमः। ओं हं सद्योजातपाताय नमः।
ओं हिं वामदेवाय (गुह्या) नमः। ओं हुं अघोरहृदयाय नमः। ओं हें
तत्पुरुषवक्त्राय नमः। ओं हों ईशानमूर्ध्ने नमः। ओं शिवाय न-
मः। सर्व · नमः। ओं नमश्शिवाय नमः। ध्यानहराय नमः।
.. पदम्। अं नमः। झं नमः। जं नमः। छं नमः। चं नमः। ङः नमः।
घं नमः। .. वर्णम्। वामाय नमः। भीमाय नमः। उग्राय नमः।
भवाय नमः। ईशानाय नमः। वीराय नमः। पुरुषतत्त्वत्तिल भु-
वनम्। प्रचण्डाय नमः। उमापतये नमः। अजाय नमः। अन-
न्ताय नमः। एकशिखाय नमः। .. रागतत्वत्तिल भुवनम् ..।
क्रोधाय नमः। चण्डाय नमः। .. नियतितत्वत्तिल भुवनम् ..।
ज्योतिषे नमः। संवर्ताय नमः। .. विद्यातत्वत्तिल भुवनम् ..।
शूराय नमः। पञ्चान्तकाय नमः। .. कलातत्वत्तिल भुवनं ..।
एकवीराय नमः। शिखेददाय नमः। .. कालतत्वत्तिल भुवनं ...।
महातेजसाय नमः। वामदेवाय नमः। भवाय नमः। एकपिङ्गेक्ष-
णाय नमः। ईशानाय नमः। भुवनेशाय नमः। अङ्गुष्ठमात्रे नमः।
.. मायातत्वत्तिल भुवनम् ..। विद्यातत्वत्तिल भुवनम् ...।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुरुषाय नमः। रागाय नमः। नियतये नमः। विद्याय नमः।
19 b कलाय नमः। कालाय नमः। मायाय नमः। ·· तत्वम् ·· । ओं हूं
विद्याकलायै नमः॥ इति विद्याकलार्चनाविधिः। अथ ···
लार्चनाविधिरुच्यते। ओं ह्रैं शान्तिकलायै नमः। महेश्वर-
कारणेश्वराय नमः। कृष्णवर्णाय नमः। षट्कोणाय नमः। तुर्या-
वस्थाय नमः। स्पर्शाय नमः। शब्दाय नमः। ·· गुणम् ·· । पा-
णये नमः। त्वचे नमः। ·· इन्द्रियम् ·· । कूर्माय नमः। कृकराय
नमः। ·· वायु ·· । यशाय नमः। अलम्बुषाय नमः। ·· नाडि ·· ।
यकाराय नमः। बिन्दवे नमः। ·· बीजम् ·· । कवचाय नमः। त-
त्पुरुषाय नमः। ·· मन्त्रम् ·· । नित्ययोगिने नमः। योगपीठ-
संस्थिताय नमः। शाश्वताय नमः। ध्रुवाय नमः। अनाश्रुता-
अनाथाय नमः। अनन्ताय नमः। शिवाय नमः। सर्वव्यापिने
नमः। व्योमरूपाय नमः। व्योमव्यापिने नमः। ·· पदम् ·· । गं नमः।
खं नमः। कं नमः। ·· वर्णम् ·· । वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै
नमः। काल्यै नमः। कलविकरण्यै नमः। बलविकरण्यै नमः।
20 a बलप्रमथिन्यै नमः। सर्वभूतदमन्यै नमः। मनोन्मन्यै नमः।
·· शुद्धविद्यातत्वान्तिल भुवनम् ·· । अनन्तेशाय नमः। सूक्ष्माय
नमः। शिवोत्तमाय नमः। एकनेत्राय नमः। एकरुद्राय नमः।
त्रिमूर्तये नमः। श्रीकण्ठाय नमः। शिखण्डिने नमः। ·· ईशान-
तत्वान्तिल भुवनम् ·· । सदाशिवतत्वान्तिल । सदाशिवाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भुवनम् ।। शुद्धविद्यातत्वाय नमः। महेश्वरतत्वाय नमः।
सदाशिवाय नमः।। तत्वम् ।। ओं हैं शान्तिकलायै नमः। इति
ग्रीवादिललाटान्तमर्चयेत्॥ शान्त्यतीतकलार्चनाविधि-
रुच्यते॥ ललाटादिब्रह्मरन्ध्रान्तमर्चयेत् ।ओं हौं शान्त्य-
तीतकलायै नमः। सदाशिवकारणेश्वराय नमः। तुर्यातीता-
वस्थाय नमः। वृत्तमण्डलाय नमः। श्यामवर्णाय नमः। शब्द-
गुणाय नमः। शब्दविषयाय नमः। विषयम् ।। श्रोत्राय नमः।
वाचे नमः।। इन्द्रियम् ।। धनञ्जयाय नमः। देवदत्ताय
नमः।। वायु ।। शंखिन्यै नमः। कुण्डल्यै नमः। हकाराय नमः।
२०b नादाय नमः। अस्त्राय फट् नमः। ओं हों ईशानमूर्ध्ने नमः।
ओं हां सौं शिवाय नमः।। मन्त्रम् ।। ओं नमः।। पदम् ।।
अः नमः। अं नमः। औं नमः। ओं नमः। ऐं नमः। ॡं नमः।
ऌं नमः। ॠं नमः। ऋं नमः। ऊं नमः। उं नमः। ईं नमः। इं नमः।
आं नमः। अं नमः।। वर्णं ।। निवृत्त्यै नमः। प्रतिष्ठायै
नमः। विद्यायै नमः। शान्त्यै नमः। शान्त्यतीतायै नमः।
।। बिन्दुकलाभुवनम् ।। शुद्धिकायै नमः। दीपिकायै नमः।
मोचिकायै नमः। रोचिकायै नमः ऊर्ध्वगामिन्यै नमः।।
नादकलाभुवनम् । व्यापिन्यै नमः। व्योमरूपाय नमः। अ-
नाथाय नमः। अनाश्रिताय नमः। अनन्ताय नमः।। शान्त्य-
तीतकलाभुवनम् ।। शिवतत्वाय नमः। ओं हौं शान्त्यतीत-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कलायै नमः। इति शान्त्यतीतकलार्चनाविधिः॥

21 a पश्चात् नवमूर्तिकन्यासक्रमेण बिम्बस्थशक्तिं कुम्भे
सङ्कृह्य। तद्यथा – अस्य श्रीप्राणप्रतिष्ठामहामन्त्रस्य
ब्रह्मविष्णुरुद्र ऋषिः। ऋग्यजुस्सामाथर्वाणि च्छन्दांसि।
सकलजगत्सृष्टिस्थितिसंहारकारिणी प्राणशक्तिः परा दे-
वता। आं बीजं ह्रीं शक्तिः। क्रों कीलकम्। श्रीवल्ली देवनायकी-
समेत श्रीसुब्रह्मण्येश्वरप्राणप्रतिष्ठार्थे जपे विनियोगः।
ओं ह्रां अङ्गुष्ठाभ्यां नमः। ओं ह्रीं तर्जनीभ्यां नमः। ओं ह्रूं मध्य-
माभ्यां नमः। ओं ह्रैं अनामिकाभ्यां नमः। ओं ह्रौं कनिष्ठिका-
भ्यां नमः। ओं ह्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि-
न्यासः। ओं भूर्भुवःस्वरोमिति दिग्बन्धः। ध्यानम् —
'रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान्।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥'
दर्भमुष्टिना बिम्बस्य मूर्ध्नि संस्पृश्य जपेत्। आं क्रों श्रीं य
रलवशषसहों हंसस्थिताः, श्रीवल्ली देवनायकीसमेत-
21 b श्रीसुब्रह्मण्येश्वरस्य प्राणाः इह प्राणस्थिताः। श्रीसुब्रह्म-
ण्येश्वरस्य जीव इह स्थितः। श्रीवल्ली देवनायकीसमेत-
श्रीसुब्रह्मण्येश्वरस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुश्श्रोत्र-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जिह्वाघ्राण प्राणापानव्यानोदानसमाना इहैवागत्य अस्मिन्
बिम्बे वल्लीदेवनायकीसमेतश्रीसुब्रह्मण्येश्वरं सुखं चिरं
तिष्ठन्तु स्वाहा। क्रोंह्रीं आं। असुनीते मनो अस्मासु धारय
जीवातवे सुवा। धृतिरन्न आयुः। रारन्धीय सूर्यस्यासन्दृशि।
घृतेन त्वन्तन्वन् वर्धयस्व। असुनीते पुनरस्मासु चक्षुः
पुनः प्राणमिहनो धेहि भोगम्। ज्योक्पश्येम सूर्यमुच्चर-
न्तमनुमते मृळयानः स्वस्ति। पुनर्नो असुं पृथिवी ददातु
पुनर्द्यौर्देवी पुनरन्तरिक्षम्। पुनर्नस्सोमस्तन्वं ददातु पुनः
पूषा पथ्या आव्या स्वस्ति। क्रों मूर्धादिहृदयपर्यन्तं ह्रीं हृ-
दयादिनाभिपर्यन्तं आं नाभ्यादिपादपर्यन्तं व्याप्य हृदये
संघट्टमुद्रया यं त्वगात्मने नमः। रं रक्तात्मने नमः। लं मां-
सात्मने नमः। वं मेदात्मने नमः। शं अस्थ्यात्मने नमः। षं
मज्जात्मने नमः। सं शुक्रात्मने नमः। हं जीवात्मने नमः। ळं
प्राणात्मने नमः। क्षं परमात्मने नमः। इति समस्तव्यापकं न्य-
22 a सेत्। मूलमन्त्रम्। आंह्रीं क्रों हंसस्सोऽहम्। इति मन्त्रेण
दशवारं जप्त्वा। न्यासक्रमः। बिम्बस्य दर्भेण सन्ताड्य स-
दर्भाग्रेण बिम्बस्य पादादिशिरःपर्यन्तं स्पृष्ट्वा सूत्रमार्गेण
संयोज्य कुम्भमूर्ध्नि विन्यस्य एवं क्रमेण नवमूर्तिसङ्घ-
हं न्यसेत्। तद्यथा - आं क्रों ह्रीं यरलवशषसहों हंस-
स्सोऽहमोम्। यं अमृतदृत्यागच्छागच्छ। बिम्बस्यामृत-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हृदयं प्रविश्य सजातीमपि सङ्गृह्य । बलादमुष्यायं त्वग्रूप-
मानयानय । बिम्बाद्बहिः प्रवेशय प्रवेशय । स्थापय स्थापय
पुनरागच्छागच्छ । कुम्भस्य स्वस्थाने स्थिरा भव । वौषट्
नमः । इति दर्भाग्रेण बिम्बस्य पादादि मूर्धान्तं स्पृष्ट्वा सूत्र-
मार्गेण संयोज्य । कुम्भमूर्ध्नि विन्यस्य संस्पृश्य । आं क्रों
ह्रीं यरलवशषसहों हंसस्सोऽहमोम् । अमुष्य त्वगात्मनः
प्राण इह प्राणाः अमुष्य जीव इह स्थितः । अमुष्य सर्वेन्द्रि-
याणि मनोबुद्ध्यहङ्कारचित्तैस्सहेहागत्य अस्मिन् कुम्भे
यं त्वगात्मानं सुखं चिरं तिष्ठन्तु स्वाहा । क्लौं स्तम्भय स्त-
म्भय । पश्चाद्बिम्बान्तिकं गत्वा दर्भेण सन्ताड्य सदर्भाग्रेण
बिम्बस्य पादादि मूर्धान्तं संस्पृश्य । मंत्रं आं क्रों ह्रीं रलव
22 b शषसहों हंसस्सोऽहमोम् । रं वैवस्वतमूर्त्यो गच्छागच्छ ।
बिम्बस्य हृदयं प्रविश्य सजातीमपि सङ्गृह्य बलादमुष्य
रं रक्तरूपमानयानय । बिम्बाद्बहिः प्रवेशय प्रवेशय । पुन-
रागच्छागच्छ । कुम्भस्या स्वस्थाने स्थिरा भव । वौषट् नमः ।
इति दर्भाग्रेण बिम्बस्य पादादिमूर्धपर्यन्तं संस्पृश्य सूत्र-
मार्गेण संयोज्य कुम्भमूर्ध्नि विन्यस्य संस्पृश्य । आं क्रों ह्रीं
यरलवशषसहों हंसस्सोऽहमोम् । अमुष्य रक्तात्मनः प्राणा
इह प्राणाः अमुष्य जीव इह स्थितः । अमुष्य तव सर्वेन्द्रि-
याणि मनोबुद्ध्यहङ्कारचित्तैस्सहैवागत्य अस्मिन् कुम्भे रं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुखं
रक्तात्मानं, चिरं तिष्ठन्तु स्वाहा। लौं स्तम्भय स्तम्भय। पश्चात्
बिम्बान्तिकं गत्वा दर्भेण सन्ताड्य सदर्भाग्रेण बिम्बस्य पादा-
दिशिरःपर्यन्तं संस्पृश्य। पूर्ववत्सङ्कल्प्य। ओं क्रों ह्रीं लवश-
षसहों हंसस्सोऽहमोम्। लं जीवदूत्यागच्छागच्छ बिम्बस्य
हृदयं प्रवेशय प्रवेशय। सजातीमपि सङ्कल्प्य बलादमुष्य
लं मांसरूपमानयानय। बिम्बाद्बहिः प्रवेशय प्रवेशय। पुन-
रागच्छागच्छ। कुम्भस्य स्वस्थाने स्थिरा भव। वौषट् नमः।
23 a इति दर्भाग्रेण बिम्बस्य पादादिमूर्धान्तं संस्पृश्य। सूत्रमा-
र्गेण संयोज्य। कुम्भमूर्ध्नि विन्यस्य संस्पृश्य। ओं क्रों ह्रीं य
रलवशषसहोम्। हंसस्सोऽहमोम्। अमुष्य लं मांसात्मनः
प्राण इह प्राणाः अमुष्य जीव इह स्थितः। अमुष्य तत्वसर्वे-
न्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्सह इहैवागत्य सुखं चिरं
तिष्ठन्तु स्वाहा। लौं स्तम्भय स्तम्भय। ततः बिम्बसमीपं गत्वा
दर्भेण सन्ताड्य। सदर्भाग्रेण बिम्बस्य पादादिशिरःपर्यन्तं
संस्पृश्य पूर्ववत्सङ्कल्प्य, ओं क्रों ह्रीं वशषसहों हंसस्सोऽह-
मोम्। वं प्राणदूत्यागच्छागच्छ। बिंबस्य हृदयं प्रविश्य स-
जातीमपि सङ्कल्प्य, बलादमुष्य वं मेदरूपमानयानय।
बिम्बाद्बहिः प्रवेशय प्रवेशय। पुनरागच्छागच्छ। कुम्भस्य
स्वस्थाने स्थिरा भव। वौषट् नमः। इति दर्भाग्रेण बिम्ब-
स्य पादादिमूर्धान्तं संस्पृश्य सूत्रमार्गेण संयोज्य कुम्भ-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूर्ध्नि विन्यस्य । संस्पृश्य आं क्रों ह्रीं । यरलवशषसहोम् ।
हंसस्सोऽहमोम् । अमुष्य वं मेदात्मनः प्राण इह प्राणाः
अमुष्य जीव इह स्थितः । अमुष्य तत्वसर्वेन्द्रियाणि मनो-
बुद्ध्यहङ्कारचित्तैस्सहैवागत्य अस्मिन् कुम्भे वं मेदात्मनः
23 b सुखं चिरं तिष्ठन्तु स्वाहा । लौं स्तम्भय स्तम्भय । पश्चात्
बिम्बसमीपं गत्वा दर्भाग्रेण सन्ताड्य, सदर्भाग्रेण बिम्ब-
स्य पादादिशिरःपर्यन्तं संस्पृश्य पूर्ववत्सङ्गृह्य । आं क्रों ह्रीं
शषसहों हंसस्सोऽहमोम् । शं आकर्षदूत्यागच्छागच्छ,
बिम्बस्य हृदयं प्रवेशय प्रवेशय । सजातीमपि सङ्गृह्य, ब-
लादमुष्य शं अस्थिरूपमानयानय । बिम्बाद्बहिः प्रवेशय
प्रवेशय । पुनरागच्छागच्छ । कुम्भस्य स्वस्थाने स्थिरा भव ।
वौषट् नमः । इति दर्भाग्रेण बिम्बस्य पादादिमूर्धपर्यन्तं
संस्पृश्य सूत्रमार्गेण सङ्गृह्य । कुम्भमूर्ध्नि विन्यस्य संस्पृ-
श्य । आं क्रों ह्रीं यरलवशषसहों हंसस्सोऽहमोम् । अमुष्य
शं अस्थ्यात्मनः प्राण इह प्राणाः अमुष्य जीव इह स्थितः ।
अमुष्य तत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्सहैवाग-
त्य अस्मिन् कुम्भे शं अस्थ्यात्मनः सुखं चिरं तिष्ठन्तु
स्वाहा । लौं स्तम्भय स्तम्भय । पश्चाद्बिम्बसमीपं गत्वा दर्भेण
सन्ताड्य, सदर्भाग्रेण बिम्बस्य पादादिशिरःपर्यन्तं संस्पृ-
श्य पूर्ववत्सङ्गृह्य । आं क्रों ह्रीं [illegible]षसहों हंसस्सोऽहमोम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

24a षं ग्रथिनी दूत्यागच्छागच्छ। बिम्बस्य हृदयं प्रविश्य सजा-
तीमपि सङ्गृह्य। बलादमुष्य षं मज्जारूपमानयानय।
बिम्बाद्बहिः प्रवेशय प्रवेशय। पुनरागच्छागच्छ। कुम्भस्य
स्वस्थाने स्थिरा भव। वौषट् नमः। इति दर्भाग्रेण बिम्बस्य
पादादिमूर्धान्तं संस्पृश्य सूत्रमार्गेण सङ्गृह्य। कुम्भमूर्ध्नि
विन्यस्य स्पृष्ट्वा। आं क्रों ह्रीं यरलवशषसहों हंसस्सोऽहमों।
अमुष्य षं मज्जात्मनः प्राण इह प्राणाः अमुष्य जीव इह
स्थितः। अमुष्य तत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्स-
हैवागत्य अस्मिन् कुम्भे षं मज्जात्मनः सुखं चिरं तिष्ठन्तु
स्वाहा। वौं स्तम्भय स्तम्भय। पश्चाद्बिम्बान्तिकं गत्वा। दर्भेण
सन्ताड्य। सदर्भाग्रेण बिम्बस्य पादादिमूर्धान्तं संस्पृश्य,
पूर्ववत्सङ्गृह्य, आं क्रों ह्रीं सहों हंसस्सोऽहमोम्। सम्प्रभो
दूत्यागच्छागच्छ। बिम्बस्य हृदयं प्रविश्य, सजातीमपि स-
ङ्गृह्य। बलादमुष्य सं शुक्लरूपमानयानय। बिम्बाद्बहिः प्रवे-
शय प्रवेशय। पुनरागच्छागच्छ। कुम्भस्य स्वस्थाने स्थिरा
भव। वौषट् नमः। इति बिम्बस्य पादादिशिरःपर्यन्तं सं-
24b स्पृश्य सूत्रमार्गेण संयोज्य। कुम्भमूर्ध्नि विन्यस्य। स्पृष्ट्वा।
आं क्रों ह्रीं यरलवशषसहों हंसस्सोऽहमोम्। अमुष्य सं शुक्ला-
त्मनः प्राण इह प्राणाः। अमुष्य जीव इह स्थितः। अमुष्य
तत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्सहैवागत्यास्मिन्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुम्भे सं शुक्रात्मनः सुखं चिरं तिष्ठन्तु स्वाहा। ग्लौं स्त-
म्भय स्तम्भय। पश्चाद्बिम्बसमीपं गत्वा। दर्भेण सन्ताड्य
सदर्भाग्रेण बिम्बस्य पादादिमूर्धान्तं संस्पृश्य पूर्ववत्सङ्गृ-
ह्य ओं क्रों ह्रीं हं हंसस्सोऽहमोम्। हं विष्णुलिङ्गिनीदूत्या-
गच्छागच्छ। बिम्बस्य हृदयं प्रविश्य सजातीमपि सङ्गृ-
ह्य बलादमुष्य हं प्राणरूपमानयानय। बिम्बाद्बहिः प्रवे-
शय प्रवेशय। पुनरागच्छागच्छ। कुम्भस्य स्वस्थाने स्थिरा
भव। वौषट् नमः। इति दर्भाग्रेण बिम्बस्य चरणादिशिरःप-
र्यन्तं संस्पृश्य। सूत्रमार्गेण सङ्गृह्य। कुम्भमूर्ध्नि वि-
न्यस्य स्पृष्ट्वा। ओं क्रों ह्रीं यरलवशषसहों अमुष्य हं प्राणा-
त्मनः प्राण इह प्राणाः अमुष्य जीव इह स्थितः। अमुष्य त-
त्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्सहैवागत्य अस्मिन्
कुम्भे हं प्राणात्मनः सुखं चिरं तिष्ठन्तु स्वाहा। ग्लौं स्तम्भय
25 a स्तम्भय। पश्चाद्बिम्बसमीपं गत्वा दर्भेण सन्ताड्य। सदर्भा-
ग्रेण बिम्बस्य पादादिमूर्धान्तं संस्पृश्य, पूर्ववत्सङ्गृह्य। ओं
क्रौं ह्रीं। ळं हं सस्सोऽहमोम्। ळं क्षेत्रवृत्ति हरि दूत्यागच्छाग-
च्छ। बिम्बस्य हृदयं प्रविश्य सजातीमपि सङ्गृह्य बलाद-
मुष्य ळं जीवरूपमानयानय। बिम्बाद्बहिः प्रवेशय प्रवेशय।
पुनरागच्छागच्छ। कुम्भस्य स्वस्थाने स्थिरा भव। वौषट्
नमः। इति दर्भाग्रेण बिम्बस्य पादादिशिरःपर्यन्तं संस्पृश्य

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सूत्रमार्गेण सङ्गृह्य कुम्भमूर्ध्नि विन्यस्य। स्पृष्ट्वा, आं क्रौं ह्रीं
यरलवशषसहों। हंसस्सोऽहमोम्। अमुष्य ॐ जीवात्मनः
प्राण इह प्राणाः अमुष्य जीव इह स्थितः। अमुष्य तत्त्वसः
र्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तैस्सहैवागत्य अस्मिन्
कुम्भे ॐ जीवात्मनः सुखं चिरं तिष्ठन्तु स्वाहा। ग्लौं स्तम्भय
स्तम्भय॥ पश्चाद्धेनुमुद्रां महामुद्रां प्रदर्श्य "शान्त्यतीत-
कलामूर्धा शान्तिवक्त्रसरोरुहम्। विद्यावित्तवक्षोजं प्रति-
ष्ठां गुह्यमण्डलम्॥ निवृत्तिं जानुजंघाङ्घ्रिं पादान्तं क्रमशः
कलाः। वर्णत्वङ्मांसरुधिरं पदमांसासिराचितम्॥ तत्वास्थि-
मज्जाशुक्रादि ध्यानं सद्योगमोक्षदम्। शिवान्ततत्वगर्भा-
ध्वव्यापिनं सर्वदा गुहम्॥" इति प्रार्थ्य पश्चाद्बिम्बसमीपं
25 b गत्वा। बिम्बस्थतत्व पञ्चभूतपञ्चेन्द्रिय मन्त्र भुवन वर्ण-
पद विषय वायु बीज सकलचैतन्यावस्थ सशक्ति सप-
रिवाराणि च सङ्गृहेत्। तद्यथा-बिम्बस्य पादादारभ्य जानु-
पर्यन्तं पृथिवीमण्डलम्। चतुरश्रं वज्रलाञ्छितम्। लंबीज-
युतं आत्मतत्वरूपम्। ब्रह्मदैवत्यं निवृत्तिकलारूपं पीत-
वर्णं सञ्चिन्त्य, ओ ह्रां निवृत्तिकलायै नमः। इति निवृत्ति-
कलाधिष्ठितसकलचैतन्यं संहारमुद्रयाहृत्य स्वहृदयं
पिङ्गलयापूर्य। कुम्भकं भावनया लयमिति विभाव्य पुनः
रेचकेण विनिस्सृत्य पुष्पाञ्जलिना सकलचैतन्यगतं वि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भाव्य आपस्थाने संयोज्य विलीनं विभाव्य ओं ह्वां ह्वीं
निवृत्ति प्रतिष्ठाभ्यां नमः। पृथिवीमप्सु विलापयामि। आप
स्थानम्। जान्वादिनाभिपर्यन्तं अम्मण्डलम्। अर्धचन्द्रा-
कारं सितवर्णं अम्बुजलाञ्छितम्। वं बीजयुतं आत्मतत्व-
रूपं विष्णुदैवत्यं प्रतिष्ठाकलारूपं सञ्चिन्त्य। ओं ह्वीं प्रति-
ष्ठाकलायै नमः इति प्रतिष्ठाकलाधिष्ठित सकलचैतन्यं
संहारमुद्रयाहृत्य स्वात्मानं पिङ्गलापूरकं कृत्वा विलीनं
विभाव्य कुम्भकं कृत्वा पुनः रेचकेण विनिस्सृत्य पुष्पा-
ञ्जलिना सकलचैतन्यगतं विभाव्य वह्निस्थाने संयो-
ज्य अवकुण्ठ्य लयमिति विभाव्य ओं ह्वीं ह्रूं प्रतिष्ठा-
26a विद्याकलाभ्यां नमः। आपस्तेजसि विलापयामि। अग्नि-
स्थानम्। नाभ्यादिहृदयपर्यन्तं तेजोमण्डलं त्रिकोणाकारं
स्वस्तिकलाञ्छितं रक्तवर्णं रं बीजयुतं विद्यातत्वमिश्ररूपं
रुद्रदैवत्यं विद्याकलारूपं सञ्चिन्त्य ओं ह्रूं विद्याकलायै
नमः इति विद्याकलाधिष्ठित सकलचैतन्यं संहारमुद्रया-
हृत्य स्वात्मानं पिङ्गलया पूरकं विभाव्य कुम्भकं भावनया
लयमिति विभाव्य पुनः रेचकेण विनिस्सृत्य पुष्पाञ्जलि-
ना सकलचैतन्यगतं विभाव्य वायुस्थाने संयोज्य संमिश्रं
विभाव्य ओं ह्रूं ह्रैं विद्याशान्तिकलाभ्यां नमः। अग्निं वायौ
विलापयामि॥ वायुस्थानं हृदयादिकण्ठान्तं वायुमण्डलं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

षट्कोणं कृष्णवर्णं षड्बिन्दुलाञ्छितं यं बीजयुतं विद्यातत्व-
रूपं महेश्वरदैवत्यं शान्तिकलारूपं सञ्चिन्त्य ओं हैं शा-
न्तिकलायै नमः इति शान्तिकलाधिष्ठितसकलचैतन्यं
संहारमुद्रयाहृत्य स्वात्मानं पिङ्गलया पूरकं विभाव्य कु-
म्भकं कृत्वा लयमिति विभाव्य पुनः रेचकेण विनिस्सृत्य
पुष्पाञ्जलिना सकलचैतन्यगतं विभाव्य आकाशस्थाने
संयोज्य अवकुण्ठ्य तत्सं विलीनं विभाव्य ओं हैं हौं शा-
न्तिशान्त्यतीतकलाभ्यां नमः वायुमाकाशे विलापयामि॥
26b आकाशस्थानं कण्ठादिब्रह्मरन्ध्रान्तं आकाशमण्डलं वृ-
त्ताकारं शुद्धस्फटिकसन्निभं शून्यं बिन्दुशक्त्या विभूषितं
हं बीजयुतं शिवतत्वस्वरूपं सदाशिवदैवत्यं शान्त्यतीतक-
लारूपं सञ्चिन्त्य ओं हं शान्त्यतीतकलायै नमः इति शा-
न्त्यतीतकलाधिष्ठितसकलचैतन्यं संहारमुद्रयाहृत्य स्वा-
त्मानं पिङ्गलया पूरकं विभाव्य कुम्भकं भावनया लयमि-
ति विभाव्य पुनः रेचकेण विनिस्सृत्य पुष्पाञ्जलिना स-
कलचैतन्यगतं विभाव्य तत्स्थाने संयोज्य अवकुण्ठ्य मूल-
मन्त्रं दशवारं जप्त्वा ध्यात्वा सद्योजातं प्रपद्यामीति । अयं
कुमारो जरां जयतु दीर्घमायुः यस्मै त्वं स्तन प्रप्यायायु-
र्वर्चो यशो बलम् । हंसहंसाय विद्महे परमहंसाय धीमहि
तन्नो हंसः प्रचोदयात् । शरवणोद्भवाय षण्मुखाय शिखि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वाहनाय अभयवरप्रदाय शक्तिहस्ताय कुक्कुटध्वजाय
कुङ्कुमाङ्गाय कुमाराय ओं ह्रां ह्रीं सौं शरवणभव हुं फट्
स्वाहा । इति मन्त्रेण पुष्पाञ्जलिना त्रिः परिभ्राम्य तन्मा-
ल्यं सङ्गृहीत्वा । बिम्बस्थ पृथिव्यप्तेजोवाय्वाकाश शब्द-
स्पर्श रूपरसगन्ध श्रोत्र त्वक्चक्षुर्जिह्वाघ्राण वाक्पाद-
पाणिपायूपस्थ वचनदानगमनविसर्गानन्द मनोबुद्ध्य-
हङ्कारचित्त प्रकृति प्राणापानव्यानोदानसमानादि सशक्ति-
27 a सावरण सपरिवार साङ्गोपाङ्गानि च सङ्गृह्य ससूत्र प्रविष्टं
वाद्यघोष शङ्खघोषपुरस्सरं घण्टारवसहितं सावधानेन
पदे पदे प्रपादयन् ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवणभव
स्वाहा इति मूलमन्त्रं त्रिवारमुच्चार्य, 'षडाननाय विद्महे
शक्तिहस्ताय धीमहि । तन्नः स्कन्दः प्रचोदयात्' इति मन्त्रे-
ण कुम्भमूर्ध्नि पुष्पाञ्जलिं विन्यस्य । मालासमर्पणम् । प-
श्चादावाहनं कृत्वा ऊर्ध्वहस्तेन जगद्भवहृदयाय नमः। आवा-
हितो भव । अधोमुखहस्तेन वचद्भवशिरसे नमः इति -
स्थापितो भव । ऊर्ध्वाङ्गुष्ठमुष्टिभ्यां विश्वभुवशिखाय नमः
सन्निधी भव । अङ्गुष्ठगर्भमुष्टिरूपिण्यां रुद्रभुवकवचाय
नमः । सन्निरुद्धो भव । ब्रह्मभुवनेत्राय नमः त्रिखकुण्ठय
भूर्भुव अस्त्राय नमः धेनुमुद्रामृतीकृत्य ।' स्वामिन् सर्वज-
गन्नाथ यावत्पूजावसानकम् । तावत्सम्प्रीतिभावेन बिम्बे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुम्भेऽस्मिन् सन्निधीभव ॥' इति विज्ञाप्य स्वागतार्घ्यं दत्वा
हृदयादिकरान्तस्थानेषु हृदयाद्यङ्गानि विन्यस्य अस्त्रेण
संरक्ष्य । कवचेनावकुण्ठ्य अमृतमुद्रां दत्वा वौषडन्त-
मूलेन महामुद्रां परमीकृत्य ओं सौं सुब्रह्मण्याय नमः पाद-
योः पाद्यम् ' ओं सौं सुब्रह्मण्याय स्वधा इति वक्त्रेष्वाच-
मनम् । ओं सौं सुब्रह्मण्याय स्वाहा इति शिरष्षट्केभ्योऽ-
र्घ्यं दत्वा । मूलेन स्नानवस्त्रोत्तरीयाभरणयज्ञोपवीत-
27 b गन्धाक्षतपुष्पधूपदीपनैवेद्यं दत्वा ततो दक्षिणवर्धन्यां
ओं ह्रीं वल्ल्यासनाय नमः । ओं ह्रीं वल्लीमूर्तये नमः । इत्यास-
नमूर्तिं विन्यस्य । ध्यानम् – ' श्यामामुत्पलधारिणीं मणि-
लसत्ताटङ्ककर्णोज्ज्वलां सव्ये लम्बकरां किरीटमकुटां कु-
म्भस्तनीकञ्चुकाम् । अन्योन्वीक्षणसंयुतां शरवणोद्भूतस्य
सव्ये स्थितां सरसीमाल्यधरां प्रसन्नवदनां वल्लीश्वरीं
भावये ॥' इति ध्यात्वा ओं ह्रीं वल्लै नमः मूलेनावाह्य ।
पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा । उत्तरवर्धनीं
ओं श्रीं देवगजासनाय नमः । ओं श्रीं देवगजमूर्तये न-
मः । इत्यासनमूर्तिं विन्यस्य । ध्यानम् – पीतामुत्पलधा-
रिणीं शशिमुखीं दिव्याम्बरालङ्कृतां पीतालङ्करणां कर-
ण्डमकुटां सेनानिवामे स्थिताम् । वामे लम्बकरां महेन्द्र-
तनयां मन्दारमालाधरां देवैरर्चितपादुकां शशीयुतां

देवीं त्रिभङ्गीं भजे ॥' इति ध्यात्वा। ओं श्रीं देवगजासना-
यै नमः इति मूलेनावाह्य पाद्यादिगन्धपुष्पधूपदीपनैवे-
द्यं दत्त्वा। इति लयाङ्गमभ्यर्च्य। भोगाङ्गं पूजयेत्। प्रथमा-
वरणं तस्य शिरष्षड्भ्य ईशानमादाय 'स्फटिकाभं
जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम्। सौम्यं प्रसन्नमीशानं त्रि-
शूलाभयपाणिनम् ॥' इति ध्यात्वा। ओं सों ईशानाय
28 a जगद्भवमूर्ध्ने नमः। इतीशानदले समभ्यर्च्य। वक्त्रषड्के-
भ्यो वक्त्रमादाय। 'पीताम्बरोपवीतं च नरं कनकसन्निभम्।
मातुलुङ्गाक्षसूत्रे च दधानं चन्द्रमौलिनम् ॥' इति ध्यात्वा
ओं सें तत्पुरुषाय वचद्भुववक्त्राय नमः इति पूर्वदलेऽभ्य-
र्च्य। हृत्प्रदेशादघोरमादाय। 'खड्गाङ्गखेटं च कपालपाशं
वामे दधानं परशुं त्रिशूलम्। खड्गं च दण्डं विकृतिं च
भीमं ध्यायेदघोरं भुजगादिभूषम् ॥' इति ध्यात्वा। ओं सुं
अघोराय विश्वभुवहृदयाय नमः इति दक्षिणदले ॥ वाम-
देवं गुह्यमण्डलादादाय 'वामं रक्तं सुरक्ताभं मालावस्त्रो-
पवीतिनम्। तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥'
इति ध्यात्वा ओं सिं वामगुह्याय रुद्रभुवाय नमः इत्युत्त-
रदले न्यस्य ॥ पादाद्यङ्गात् सद्योजातमादाय 'सितस्रग्ग-
न्धवस्त्राढ्यं बालाकारं त्रिलोचनम्। सद्योजातं शशिभृतं
वरदाभयपाणिनम् ॥' इति ध्यात्वा ओं सं सद्योजातपादाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ब्रह्मभुवाय नमः इति पश्चिमदले ॥ सर्वाङ्गमाप्यभुवमादाय
'आप्यं च श्वेतवर्णाभं सर्वलोकोपकारकम् । स्थिला रुद्रस्य
मकुटं गङ्गायां प्रणमाम्यहम् ॥' इति ध्यात्वा ओं ह्रीं सौं
आप्यभुवाय भुवद्भवक्त्राय नमः इति नैरृतदले समभ्यर्च्य॥
28 b सर्वज्ञातबीजेभ्यो नेत्रमादाय 'अर्के अग्निस्वरूपाणि वराभ-
यकराणि च । पद्मस्थानीन्दुधारीणि विभो नेत्राणि भावये॥'
इति ध्यात्वा । ओं सौं ब्रह्मभुवनेत्राय नमः । इतीशानस्योत्तर-
भागेऽभ्यर्च्य । सद्भावात्मकं हृदयं हृदयमादाय 'हृदयं
चन्द्रसङ्काशं वराभयकरान्वितम् । पद्मासनं सोमधरं शि-
वस्याभिमुखं भजे ॥' इति ध्यात्वा । ओं सां जगद्भवहृदया-
य नमः इत्याग्नेयदले सम्पूज्य ॥ सर्वगुहतत्त्वलक्षणं शिर-
श्शिरोदेशादादाय । 'शिरश्चामीकरप्रख्यं अभयं वरदं द-
धत् । पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे ॥' इति ध्या-
त्वा । ओं सिं वचद्भवशिरसे नमः । इतीशानदले नेत्रस्योत्तरे
सम्पूज्य । शिखायां शिखयाहृत्य । 'शिखां सिन्धूरवर्णाढ्यां
अभयं बिभ्रतीश्वरम् । पद्मासनमिन्दुधरं गुहस्याभिमुखं
भजे ॥' इति ध्यात्वा । ओं सूं विश्वभुवशिखाय नमः इति
नैरृतदले सम्पूज्य ॥ परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गा-
दादाय । 'कवचं भृङ्गसङ्काशं वरदाभयपाणिनम् । पद्म-
स्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥' इति ध्यात्वा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं सैं रुद्रभुवकवचाय नमः। इति वायव्यदले सम्पूज्य ॥

प्रतापरूपमन्त्रमस्त्रेभ्यो आहृत्य ' दंष्ट्रीपिङ्गलवर्णाढ्यं ज्वलत्केशं भयानकम्। शक्तिशूलधरं भीमं अस्त्रं शत्रुविमर्दनम् ॥' इति ध्यात्वा। ओं सः भूर्भुव अस्त्राय नमः इति पूर्वादिचतुर्दलेषु तत्पुरुषादिभ्यो वामभागे समभ्यर्च्य ॥

29 a एतानि गुहवदावाहनादि पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। ब्रह्मणां धेनुपञ्चशूलमकरस्रुगाख्यमुद्राः अङ्गानां नमस्कारमुद्रां दर्शयेत् ॥ अतो द्वितीयावरणम् ॥

पूर्वादिदलाग्रस्थिताष्टकुम्भेषु पूर्वकुम्भे ओं हां जयन्तासनाय नमः। ओं हां जयन्तमूर्तये नमः। ध्यानम्- 'जयन्ताख्यमेकवक्त्रं अञ्जलीकृतसंयुतम्। वर्मशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥' ओं हां जयन्ताय नमः। इति मूलेनावाहनादि धूपदीपनैवेद्यं दत्त्वा। अग्नये ओं हां अग्निशिखासनाय नमः। ओं हां अग्निशिखमूर्तये नमः।' तेजोरूपमग्निशिखं सर्वाभरणभूषितम्। वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥' ओं हां अग्निशिखाय नम इत्यावाहनादि धूपदीपनैवेद्यं दत्त्वा। याम्ये ओं हां कृत्तिकापुत्रासनाय नमः। ओं हां कृत्तिकापुत्रमूर्तये नमः।' रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम्। कृताञ्जलिपुटं चैव गुहस्याभिमुखं भजे ॥' ओं हां कृत्तिकापुत्राय नमः। आवाहनादिधूप-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीपनैवेद्यं दत्वा । नैऋतकुम्भे ओं हां भूतपत्यासनाय नमः।
ओं हां भूतपतिमूर्तये नमः।' भूतं सिन्धूरवर्णाढ्यं प्रधा-
नं च मुखस्य तु। वज्रशक्तिधरं चैव कृताञ्जलिपुटान्वि-
तम्॥' ओं हां भूतपतये नमः। आवाहनादि धूपदीपनैवे-
द्यं दत्वा। पश्चिमकुम्भे ओं हां सेनान्यासनाय नमः। ओं हां
सेनानिमूर्तये नमः।' देवसेनां चतुर्बाहुं श्वेतवर्णां कृताञ्ज-
29b लिम्। वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे॥' ओं हां
सेनापतये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। वायु-
कुम्भे ओं हां गुहासनाय नमः। ओं हां गुहमूर्तये नमः।
'तेजोरूपं गुहं श्यामं मन्दहास्यं कृताञ्जलिम्। वज्रशक्ति-
धरं चैव गुहस्याभिमुखं भजे॥' ओं हां गुहाय नमः। आ-
वाहनादि धूपदीपनैवेद्यं दत्वा। उत्तरकुम्भे ओं हां हेम-
शूलासनाय नमः। ओं हैं हेमशूलमूर्तये नमः।' हेमशूलं
तथा कृष्णं चतुर्हस्तं कृताञ्जलिम्। रिपुघ्नं क्रूरवदनं गुह-
स्याभिमुखं भजे॥' ओं हां हेमशूलाय नमः। इत्यावाहनादि-
धूपदीपनैवेद्यं दत्वा। ईशानकुम्भे ओं विशालाक्षासनाय
नमः। ओं हां विशालाक्षमूर्तये नमः।' सुप्रसन्नं विशालाक्षं
कृताञ्जलिपुटान्वितम्। पीताम्बरधरं रक्तं गुहस्याभिमुखं
भजे॥' ओं हां विशालाक्षाय नमः। इत्यावाहनादिं धूपदीप-
नैवेद्यं दत्वा॥ पश्चात्तृतीयावरणम्। तद्बहिरावृतेषु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दक्षिणे जयाय नमः। उत्तरे विजयाय नमः। पूर्वे गजेन्द्राय न-
मः। आग्नेय्यां सुमुखाय नमः। याम्ये सुदेहाय नमः। नैरृते
सुबाहवे नमः। पश्चिमे मयूराय नमः। वायौ देवसेनापतये
नमः। सौम्ये सुमित्राय नमः। ईशे क्षेत्रपालाय नमः। तद्बहि-
श्चतुर्थावरणम्। इन्द्रादिलोकपालकान् स्वस्वदिक्षु सुपूजयेत्॥
तद्बहिः पञ्चमावरणम्। वज्रादिदशायुधमर्चयेत्। अन-
न्तरं मूलेन स्कन्दाय पुष्पाञ्जलिं दत्त्वा। धेनुयोनिमहामु-
30a द्रां दत्त्वा। जयन्तादीन्विना सर्वेषां स्कन्देनात्यन्तमैक्यं वि-
भावयेत्। पश्चात्प्राणप्रतिष्ठां कृत्वा। पाद्याचमनार्घ्य धूप-
दीपनैवेद्यं दत्त्वा। स्तोत्रादिभिस्तोषयित्वा। पश्चात्कुण्डान्ति-
कं गत्वा कुण्डमध्ये स्कन्दमासनमूर्तिभिरभ्यर्च्य मूलेनावा-
ह्य साङ्गं सम्पूज्य। उपचारं दत्त्वा। समिदन्नाज्याहुतिमष्टो-
त्तरशतं मूलेनाहुत्या पूर्णां विधाय॥ 'जयादिरभ्याधानं च
राष्ट्रभृच्चक्रमाध्वनेत्। मन्दाहुतिं च शिरसा व्याहृती-
श्च विशेषतः॥' जयादिहोमं कुर्यात्। कर्मसमृद्ध्यर्थं जया-
दिहोमं करिष्ये। ओं चित्तं च स्वाहा। चित्तिश्च स्वाहा। आकू-
तं च स्वाहा। आकूतिश्च स्वाहा। विज्ञातं च स्वाहा विज्ञानं च
स्वाहा। मनश्च स्वाहा शक्वरीश्च स्वाहा। दर्शश्च स्वाहा पूर्णमा-
सश्च स्वाहा। बृहच्च स्वाहा रथन्तरं च स्वाहा। प्रजापतिर्ज-
यानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्समनन्तस्सर्वास उग्रा सहि हव्यो बभूव स्वाहा । अग्नि-
र्भूतानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्या-
माशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा ।
इन्द्रो ज्येष्ठानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे
स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां
स्वाहा । यमः पृथिव्याधिपतिस्समावत्वस्मिन् ब्रह्मन्न-
30 b स्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां
देवहूत्यां स्वाहा । वायुरन्तरिक्षस्याधिपतिस्समावत्वस्मिन्
ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् क-
र्मन्नस्यां देवहूत्यां स्वाहा । सूर्यो दिवोऽधिपतिस्समाव-
त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधाया-
मस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा । चन्द्रमा नक्षत्राणा-
मधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्य-
स्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा । मित्र-
स्सत्यानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे
स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां
स्वाहा । वरुणोऽपामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्यां
क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहू-
त्यां स्वाहा । समुद्रः स्रोत्यानामधिपतिस्समावत्वस्मिन्
ब्रह्मन्नस्यां क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवहूत्यां स्वाहा। अन्नं साम्राज्यानामधिपतिस्समावत्वस्मिन्
ब्रह्मन्नस्यां क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां
देवहूत्यां स्वाहा। सोम ओषधीनामधिपतिस्समावत्वस्मिन्
ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्न-
स्यां देवहूत्यां स्वाहा। सविता प्रसवानामधिपतिस्समाव-
31 a त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायाम-
स्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। रुद्रः पशूनामधिपतिस्स-
मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायाम-
स्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। त्वष्टा रूपाणामधिपति-
स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधा-
यामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। विष्णुः पर्वतानामधि-
पतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पु-
रोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। मरुतो गणाना-
मधिपतयस्ते मावन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्य-
स्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। पितरः पि-
तामहाः परेऽवरे ततास्ततामहा इह मावता। समावत्वस्मिन्
ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्न-
स्यां देवहूत्यां स्वाहा। अप उपस्पृश्य। ऋताषाडृतधामाग्निर्
गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। तस्य मरीचयोऽ-
प्सरसो ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा।... हितो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बिश्वस्सामा। सूर्यो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु। तस्मै
स्वाहा। तस्य मरीचयोऽप्सरसो आयुवो नाम ता इदं ब्रह्म
क्षत्रं पान्तु। ताभ्यः स्वाहा। सुषुम्नस्सूर्यरश्मि चन्द्रमा ......
इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। तस्य नक्षत्राण्यप्सरसो
31 b वेगुर..या..... ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। भु-
ज्यु स .... यज्ञो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै
स्वाहा। तस्य दक्षिणाप्सरसस्तव ... म ता इदं ब्रह्म क्षत्रं
पान्तु ताभ्यः स्वाहा। प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्स
इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। तस्य ऋक्सामान्यप्सर-
सो वह्नयो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। इषि-
रो विश्वव्यचा वातो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै
स्वाहा। तस्यापोऽप्सरसो मुदा नाम ता इदं ब्रह्म क्षत्रं
पान्तु ताभ्यः स्वाहा। भुवनस्य पते तस्य त उपरि गृह इह
च सनो रास्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां स्व-
स्तिं स्वाहा। (तस्य विद्युतो अप्सरसो रूपा नाम) परमेष्ठ्य-
धिपति मृत्युर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु। तस्मै स्वाहा।
तस्य विश्वमप्सरसो भुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु ता-
भ्यः स्वाहा। सुक्षितिसुभूति भद्रकृत्सुवर्वान्। पर्जन्यो गन्ध-
र्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। तस्य विद्युतो
अप्सरसो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। दूरे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रमृडयो मृत्युर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ।
तस्य प्रजाप्सरसो भीरुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु
ताभ्यः स्वाहा । चारुः कृपणकाशी कामो गन्धर्वस्स इदं ब्रह्म
क्षत्रं पातु तस्मै स्वाहा । तस्याधयोऽप्सरसश्शोचयन्तीर्नाम
ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा । स नो भुवनस्य पते
यस्य त उपरि गृहा इह च उरु ब्रह्मणेऽस्मै क्षत्राय महि
32 a शर्म यच्छ स्वाहा । यद्देवा देवहेडनम् देवासश्चकृमा वयम्
आदित्यस्तस्मान्मा मुञ्चत तस्य र्तेन मामुत स्वाहा । देवा जीव-
नकाम्या यच्चाचन्द्रतमोदिमा अग्निर्मा तस्मा येन सो गार्ह-
पत्यः प्रमुञ्चतु । दुरिता यानि चकृमा करोतु मामनेनसं स्वाहा ।
ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वती । ऋता मा मुञ्चतांहसो
यदन्यत्कृतमारिम स्वाहा । सजातं शंसा दुत स्वाजामि शंसा
जायसश्शंसा दुमुत वा कनीयसः अनाज्ञातं देवकृतं यदेनं
तस्मात्त्वमस्मां जातवेदो मुमुग्धि स्वाहा । यच्चाचायन्मनसा
बाहुभ्यामूरुभ्यां मुष्टीवक्त्यां शिश्नैर्यतन्द्रतं चकृमा वयं
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु । दुरिता यानि च
कृमा करोतु मामनेनसं स्वाहा । यद्धस्ताभ्यां चकर किल्बि-
षाण्यक्षाणां वग्नुमुपाजिघ्नुमानः दूरे वश्या च राष्ट्रश्च
तान्यप्सरसावनुयच्छामृणानि स्वाहा । यदैव्यनृणं यदहं च-
कार यच्चादास्यन् सञ्चकार जनेभ्यः अग्निर्मे तस्मादेनसो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गार्हपत्यः प्रमुञ्चतु दुरिता यानि च क्रमा करोतु मामनेन-
सं स्वाहा। यन्मे माता गर्भे सति एनश्चकार यत् पिता ···
····· तस्मादेनसो गार्हपत्यः प्रमुञ्चतु। दुरिता यानि च-
क्रमा करोतुमामनेनसं स्वाहा। यदा पिबेष मातरं पितरं
2 b पु ····· ताय ·· अहिंसितौ पितरौ उमया तत् तद-
····· णो भवामि स्वाहा। यदन्तरिक्षं पृथिवीमुत द्यां य-
न्मातरं पितरं वा ····· अग्निर्मा तस्मादेनसो गार्हपत्यः
प्रमुञ्चतु दुरिता यानि च क्रमा करोतु मामनेनसं स्वाहा।
यदाशसाइँनिजसा यत् पराशसा यदेन ··· मा नूतनं यत्
पुराणं अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता
यानि च क्रमा करोतु मामनेनसं स्वाहा। अतिक्रमामि दुरि-
तं यदेनो जहाति रिपुं परमे सधस्ते यत्र यन्ति सुकृतो
नापि दुष्कृतस्तमारोहामि सुकृतानुलोकं स्वाहा। अतो देवा
अमृजतैतदेनस्तृद एतन्मनुष्येषु मामृजेततो मा यति कि-
ल्बिदानशो अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरि-
ता यानि चक्रमा करोतु मामनेनसं स्वाहा। दिवि जातास्सु
जाता या जाता ओषधीभ्यः अधोया अग्रया आपस्तान शु-
र्जुहुर्जनीभ्यां स्वाहा। यदापोऽनन्तं दुरितं चराम यच्चा[द्या]दि-
वा नूतनं यत्पुराणं हिरण्यवर्णो हृद उत्पनीतन स्वाहा।
इमं मे वरुणा हुतिहवं अन्याच मृड्या त्वामवस्सुराजके

स्वाहा । तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो
हविर्भिः । अहेडमानो वरुणेह बोधि उरुशंसमान आयुः
3a प्रमोषीः स्वाहा । त्वं नो अग्ने वरुणस्य विद्वान् देव सहेडो
वयसीसीष्टाः । यजिष्ठो वह्नितमश्शोशुचानो विश्वा द्वेषांसि
प्रमुमुग्ध्यस्मत् स्वाहा । स त्वं नो अग्ने वमो भवोति नेजिष्ठो
अस्य उषसो वष्टौ । अवलक्ष्मणो वरुणꣳ रयीणो विहि मृ-
डिकं सुहवो न एधि स्वाहा । त्वमग्ने अयास्ययासन् मनसाहि-
तः । अयासन् हव्यमूहिषे यानो धेहि भेषजं स्वाहा । प्रजा-
पते न त्वदेतान्यन्यो विश्वा जातानि परितं बभूव । यत्कामास्ते
जुहुमस्तन्नो अस्तु । वयं स्याम पतयो रयीणाम् स्वाहा ॥ अथ
प्रायश्चित्ताहुतीर्जुहोति । अस्मिन् कर्मणि मध्ये सम्भावित-
समस्तदोषप्रायश्चित्तार्थं महाप्रायश्चित्ताहुतीर्जुहोति । म-
नो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमन्दधातु । या
इष्टा उषसो निमृचश्च तास्सन्दधामि हविषा घृतेन स्वाहा ।
अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्त्वमया असि अयसा
मनसा धृतो यसह हव्यमूहिषे यानो धेहि भेषजं स्वाहा ।
यदस्मिन् कर्मणि ··· काममन्ततः कृतो वानयाहुत्य त-
च्छमयामि । सर्वे तृप्यन्तु देवा नवं तान् घृतेन स्वाहा ।
स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु स्वाहा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

33 b यन्म आत्मनो मिन्द्राभूदग्नि ...... स्वाहा । ज .... वेदो
विचर्षणी स्वाहा । पुनरग्न .. क्षुरदात् पुनरिन्द्रो बृहस्पतिः ।
पुनर्मे अश्विना युवं चक्षुराधत्तम ....... स्वाहा । ओं भूः स्वा-
हा । ओं भुवः स्वाहा । ओं सुवः स्वाहा । ओं भूर्भुवः स्वः स्वाहा । इ-
ष्टेभ्यः स्वाहा । वषडनिष्टेभ्यः स्वाहा । भेषजं दुरिष्ट्यै स्वाहा । नि-
ष्कृत्यै स्वाहा । दौरात्यै स्वाहा । देवीभ्यस्तनूभ्यः स्वाहा । ऋद्ध्यै
स्वाहा । समृद्ध्यै स्वाहा । सर्वसमृद्ध्यै स्वाहा ॥ यत इन्द्र भया-
महे ततो नो अभयं कृधि । मघवन् शग्धि तवतन्न ऊतये
विद्विषो विमृधे जहि स्वाहा । आभिर्गीर्भिर्यततोन ऊनं
आप्यायये हरिपो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजा-
सी भूयिष्ठभाजो अथ ते स्याम स्वाहा । अनाज्ञातं यदाज्ञा-
तं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पया त्वं हि वेत्थ
यथातथं स्वाहा । पुरुषसंहितो यज्ञो यज्ञः पुरुषसंर्जितः । अ-
ग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा । यत् पाक-
त्रा मनसा दीनदक्षाण यज्ञस्य मन्वते मर्ता सह अग्निष्टु-
द्धोता क्रतुविद्विजानन् । यजुषो देवां ऋतुशो यजाति स्वा-
हा । भूरग्नये च पृथिव्यै च महते च स्वाहा । भुवो वायवे
चान्तरिक्षाय च महते च स्वाहा । सुवरादित्याय च दिवे च
महते च स्वाहा । भूर्भुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्य-
34 a श्च महते च स्वाहा । पाहि नो अग्न येनसे स्वाहा । पाहिनो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विश्ववेदसे स्वाहा । यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि
शतक्रतो स्वाहा । पाहि नो अग्न एकया । पाह्युत द्वितीय-
या । पाहि गीर्भिस्तिसृभी रुजांपते । पाहि चतसृभिर्वसो
स्वाहा । सप्त ते अग्ने सप्तयस्सप्तजिह्वास्सप्त ऋषय-
स्सप्त धाम प्रियाणि । सप्तहोत्रा सप्तधा त्वां यजन्ति सप्त-
योनीरावृणस्व घृतेन स्वाहा । पुनस्त्वादित्या रुद्रा वसव-
स्समिन्धताम् । पुनर्ब्रह्माणो वसुनीथयज्ञैः । घृतेन त्वं
तनुवो वर्धय स्वाहा । सत्यास्सन्तु यजमानस्य कामाः स्वा-
हा । गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रम-
स्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पतिः आनः शृण्वन्नूति-
भिस्सीद सादनम् ॥ स्वाहा । त्रियम्बकं यजामहे सुगन्धिं
पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मा-
मृतात् स्वाहा । जातवेदसे सुनवाम सोममरातीयतो निद-
हाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दु-
रितात्यग्निः स्वाहा । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं
समूढमस्य पांसुरे स्वाहा । विष्णोरराटमसि स्वाहा । विष्णो
पृष्ठमसि स्वाहा । विष्णुं नप्त्रे धस्स्वाहा । विष्णो स्यूरसि स्वाहा ।
विष्णो ध्रुवमसि स्वाहा । वैष्णवमसि · · · · स्वाहा । वि-
ष्णोरराटमसि विष्णो पृष्ठमसि विष्णो श्नप्त्रेस्थो विष्णोस्स्यू-
34 b रसि । विष्णो ध्रुवमसि । वैष्णवमसि । विष्णवे · · · · स्वाहा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ब्रह्म ⋯⋯ नसो ब्रह्मवाचः। ब्रह्मजज्ञानं हविषामाज्यस्य
अतिरिक्तं कर्मणो यच्छहीनम्। यज्ञः पर्वाणि प्रतिरक्षेति
⋯⋯ स्वाहा। अस्मिन् कर्मणि मध्ये सम्भावितसम-
स्त मन्त्रलोपतन्त्रलोपक्रियालोपद्रव्यलोपन्यूनातिरिक्त-
विपर्यास विस्मृति समस्तदोषप्रायश्चित्तार्थं महाप्रायश्चित्त-
होमं होष्यामि। ओं भवाय देवाय स्वाहा। इत्यादि। महते
देवाय स्वाहा। ओं ह्रीं भवस्य देवस्य पत्न्यै स्वाहा। इत्यादि।
महतो देवस्य पत्न्यै स्वाहा। ओं सौं भवस्य सुताय स्वाहा।
इत्यादि। महतो देवस्य सुताय स्वाहा। ओं ह्रीं वल्ल्यै स्वाहा।
ओं श्रीं देवगजायै स्वाहा। ओं भूः स्वाहा इत्यादि। ओं भू-
र्भुवःस्वः स्वाहा। पश्चात्पूर्ववत् पूर्णां विधाय पश्चात् ह्रैंओं
सौं शरवणभवाय स्वाहा। इति मूलेन पञ्चविंशतिवारं
हुत्वा। कुण्डमध्ये ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये नमः
इत्यासनमूर्तिं विन्यस्य। ओं सौं स्कन्दाय नमः। इति मूलम-
न्त्रेण कुण्डमध्ये स्कन्दमावाह्य। उपचारैस्सम्पूज्य पञ्चावरण-
मभ्यर्च्य। पाद्यादि गन्ध पुष्प धूप दीप नैवेद्यं दत्वा। ततः परा-
ङ्मुखार्घ्यं दत्वा। तन्मूर्तिं पुष्पाञ्जलिना संहारमुद्रया मूलेन
सङ्गृह्य। कुम्भे संयोज्य। आवाहनादि गन्ध पुष्प धूप दीप-
35 a नैवेद्यं दत्वा। ततः कुण्डसमीपं गत्वा जुषस्वेनेनाभिमन्त्रय
अदितेनुमगँ स्थाः। अनुमतेनुमगँ स्थाः। सरस्वतेनु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मग्गँ स्थाः। देव सवितुः प्रासावीः। इति समन्त्रं परिषिच्य स्वा-
हा इति समिधमेकमग्नौ दत्त्वा। उपस्थानम् – यत्ते अग्ने ते-
जस्तेन अहं तेजस्वी भूयासम्। यत्ते अग्ने हरस्तेन अहं ह-
रस्वी भूयासम्। यत्ते अग्ने वर्चस्तेन अहं वर्चस्वी भूयासम्।
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु। मयि मेधां
मयि प्रजां मयीन्द्र इन्द्रियं दधातु। मयि मेधां मयि प्रजां
मयि सूर्यो भ्राजो दधातु।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यत्कृतं तु मया देव परिपूर्णं तदस्तु मे॥
प्रायश्चित्तान्यशेषाणि तपःकर्मकृतानि वै।
यानि शेषामशेषाणां श्री शिवानुस्मरणं परम्॥

नमस्कृत्वा अभिवादं करोति। ततः स्थित्वा परिस्तरणस्था-
धार समिधादि क्रमेणादहेत्। पश्चात्परिस्तरणस्थ ब्रह्माणं
विसृज्य। ब्रह्मन् ब्रह्मासि। नमस्ते ब्रह्मन् ब्रह्मणे। ब्रह्म-
णे नमः। अस्मात्कूर्चाद्ब्रह्माणं यथास्थानं प्रतिष्ठापयामि।
तत्कूर्चग्रन्थिं विसृज्य। तत्कुण्डावृतपरिस्तरणस्थेन्द्रा-
दीनां क्रमेण बलिं दत्त्वा। विसर्जयेत्। परि .... किञ्चित्
.... दाय वामहस्तेनाग्रं सङ्गृह्य। तन्मूलं सव्यहस्तेन
35 b- सदर्भानाज्यस्थाल्यामग्रं मध्यं मूलानि सिच्य ... हेत्।
पश्चात् प्र ... मोक्षणं कृत्वा प्रणीतापात्रं स्वाग्रे निधाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

किञ्चिज्जलमापूर्य पूर्वादिचतुर्दिक् प्रणीताजलेन कि-
ञ्चित् किञ्चित्सेचयित्वा तज्जलेनात्मानं कुम्भं सम्प्रो-
क्ष्य अग्निमुद्रास्य रक्षां गृहीत्वा। त्रियम्बकेन ललाटे
धृत्वा। ततो बिम्बान्तिकं गत्वा। स्वर्णसूत्रे तन्तुना सह
स्थालिकां विन्यस्य। पूर्ववत् सम्पूज्य। बेरस्य दक्षिण-
हस्ते शक्तीनां वामहस्तेन बद्ध्वा वस्त्रमाच्छाद्य ततः कुम्भ-
समीपं गत्वा कुम्भस्य आधारशक्त्यादि सम्पूज्य। चला-
सनमभ्यर्च्य मूलेनावाह्य। क्रमेण पञ्चावरणमभ्यर्च्य।
पाद्यादिगन्धपुष्पधूपदीपं दत्त्वा। मुद्रान्नपायसान्नं नि-
वेद्य नालिकेरकदलीफलताम्बूलं निवेद्य। धूपदीपादि-
नीराजनं दत्त्वा। भक्तिस्तुत्यादिना देवं सन्तोष्य। स्कन्द-
मूलेनाष्टोत्तरशतं जप्त्वा। यात्रार्थं स्वर्णदानं दत्त्वा। ततः
परिचारकमाहूय नववस्त्रोत्तरीयोष्णीष भस्मरुद्राक्षम-
लङ्कृत्य। तत्परिचारकस्य शिरसि मयूरासनं सम्पूज्य।
कुम्भमारोप्य वर्धनीं गुरुरादाय अष्टविद्येश्वरकुम्भान्
क्रमेणादाय नानादीपैर्नानावाद्यैश्च स्वस्तिवाचनपुरस्स-
रं छत्रचामरसर्वालङ्कारसहितं शनैः प्रदक्षिणक्रमेण
यागगेहं प्रविश्य। वेदिकोपरि अष्टद्रोणैश्च शालिभिः
36a तदर्धं तण्डुलं तदर्धं तिलैश्च माषमुद्गनिष्पावशिम्बा-
टकसर्षपलाजान्युपरि उपरि विन्यस्य। दर्भैः पुष्पैः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परिस्तीर्य । तदूर्ध्वे कुम्भं यथाक्रमेण विन्यस्य आधार-
शक्त्यादि सम्पूज्यावाह्य । पाद्यादि गन्धपुष्पधूपदीप-
नैवेद्यं दत्वा ॥

प्रातस्सवनम् ।

द्वितीयदिवसस्य । अथ देशिकः प्रातरुत्थाय विधिवत्
स्नात्वा । सन्ध्यावन्दनावश्यकं कर्म कृत्वा । मूर्तिपैस्सह
यागशालां प्रविश्य । नित्यवत् प्राणायाम करन्यास भूतशु-
द्धि अङ्गन्यास दण्डभाङ्गिन्यासं मुण्डभाङ्गिन्यास मातृका-
न्यासैकत्रिंशत्कलान्यास षडक्षरन्यासान्तर्यजनस्थ-
लशुद्धि मन्त्रशुद्ध्यादिकं कृत्वा सामान्यार्घ्यं विशेषार्घ्यं
पाद्यार्घ्यं विधिवत्साधयित्वा । सामान्यार्घ्यजलेनात्मान-
मुपकरणद्रव्य मस्त्रेण सम्प्रोक्ष्य कलशपूजां शंखपूजा-
मात्मपूजां च विधाय । विघ्नेश्वरपूजां कृत्वा । सङ्कल्प्य ।
शिवशम्भोराज्ञा इत्यादिविशेषेण श्रीवल्लीदेवनायकी-
समेत श्री सुब्रह्मण्यप्रसादसिद्ध्यर्थं जीर्णोद्धारण पुनरावृ-
त्त्यष्टबन्धनकर्माङ्ग राजराष्ट्र सर्वजनानां क्षेमस्थैर्यवीर्य-
विजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्ष चतु-
र्विधफल पुरुषार्थसिद्ध्यर्थं श्रीमद्वल्लीदेवनायकी-
श्री सुब्रह्मण्यप्रीत्यर्थं मण्टपाराधन कुम्भपूजामग्निकार्य-
कर्म करिष्ये । इति सङ्कल्प्य । पुण्याहं वाचयित्वा अस्त्रेण

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अपो दत्त्वा । पञ्चगव्यं विधिवत् संस्थाप्य । मण्टपपूजा-
मारभेत् । तद्यथा – इन्द्राग्निकुम्भयोर्मध्ये सूर्यकुम्भ-
36 b पूजां कुर्यात् । सामान्यार्घ्यं संसाद्य । आत्मानं भूमिं सम्प्रो-
क्ष्य सूर्यकुम्भस्य पश्चिमभागे सूर्यद्वारार्चनं कुर्यात् ।
द्वारस्य दक्षिणे ओं दण्डिने नमः । उत्तरे पिङ्गलाय नमः ।
ऐशान्यां गणपतये नमः । आग्नेय्यां गुरुभ्यो नमः । मध्ये प्र-
भूताय नमः । आग्नेय्यां दिक्कोणेषु विमलाय नमः । सौराय न-
मः । आराध्याय नमः । परमसुखाय नमः । तदुपरि पद्मास-
नाय नमः । दीप्तायै नमः । सूक्ष्माय नमः । जयायै नमः । भ-
द्रायै नमः । विभूत्यै नमः । अमोघायै नमः । विद्युतायै नमः ।
मध्ये सर्वतोमुख्यै नमः । ओं अं अर्कासनाय नमः । खं खषो-
ल्काय सूर्यमूर्तये नमः । इत्यासनमूर्तिं विन्यस्य । दण्डभङ्गि-
मुण्डभङ्गी न्यस्य । ध्यानम् —

'सौरं कुङ्कुमसङ्काशं सर्वाभरणभूषितम् ।
द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम् ॥
चतुर्भुजसमोपेतं ऊर्ध्वहस्ताम्बुजद्वयम् ।
अभयं वरदोपेतं उषःप्रत्यूषसायकम् ॥'

इति ध्यात्वा । ओं सां सं सां विद्यादेहाय नमः । ओं सौं नेत्रे-
भ्यो नमः । इति विद्यादेहनेत्रं विन्यस्य । ओं श्रीं सां सं सां
शिवसूर्याय नमः । इति मूलेनावाह्य । स्थापनादि कृत्वा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वाहान्तं मूलेन पाद्याचमनार्घ्यं दत्त्वा। गन्धपुष्पधूपदीप-
नैवेद्यं दत्त्वा। भोगाङ्गं पूजार्थं सूर्यं प्रार्थ्य। पूर्वादिद-
लाग्रेषु सोमाय नमः। बुधाय नमः। बृहस्पतये नमः। भार्ग-
वाय नमः। विदिक्षु दलेषु अङ्गारकाय नमः। शनैश्चराय
नमः। राहवे नमः। केतवे नमः। इत्यभ्यर्च्य। दक्षिणे ओं श्रीं
ह्रीं उषादेव्यै नमः। उत्तरे ओं श्रीं प्रत्यूषादेव्यै नमः। सर्वत्र
37 a पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। नमस्कारमुद्रां
दर्शयित्वा। ताम्बूलं दत्त्वा प्रार्थ्य।

देव देव त्रिधामीश जगत्प्रथममङ्गल।
तिष्ठ त्वं स्थापितो भक्त्या मया सूर्य जगत्पते॥

इत्येवं विज्ञाप्य। मूलमन्त्रं यथाशक्ति जप्त्वा। जपफलं देव-
तायै समर्प्य। स्तोत्रं स्तुत्वा पराङ्मुखार्घ्यं दत्त्वा। ऐशान्यां
सूर्यनिर्माल्यदेवाय तेजश्चण्डेश्वराय नमः। इत्यभ्यर्च्य
विसृज्य। एवं सूर्यपूजां निर्वर्त्य। बहिर्निर्गत्वा। पूर्वकृतसौर-
भावनानिवृत्त्यर्थं पादौ प्रक्षाल्याचम्य। भस्मधारणं कृत्वा
पुनर्गत्वा। सकलीकरणं विधाय। सामान्यार्घ्यपात्रहस्तो
मण्डपाद्बाह्ये स्थित्वा पूर्वद्वारमन्त्रेण सम्प्रोक्ष्य। तोरणमध्ये
ओं हां शान्तितोरणासनाय नमः। शान्तितोरणमूर्तये नमः।
ध्यानम् — नीलवस्त्राङ्गरागं च द्विभुजाञ्जलिपङ्कजम्।
करालवदनं श्यामं ध्यायेद्वै शान्तितोरणम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां शान्तितोरणाय नमः। शान्तितोरणाधिपतये भद्राय नमः। तोरणशाखयोः ऋग्वेदासनाय नमः। ऋग्वेदमूर्तये नमः॥

श्यामवर्णं द्विनेत्रं च एकवक्त्रं चतुर्भुजम्।
गन्धाक्षमालाऋग्वेदमञ्जलिं दधतं नमः॥

ओं हां ऋग्वेदाय नमः। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। पूर्वद्वारस्योत्तरे प्रथमकलशे ओं हैं शान्तिकलासनाय नमः। शान्तिकलामूर्तये नमः। ध्यानम् —

चतुर्वक्त्रां चतुर्बाहुं कृष्णवर्णां महाबलाम्।
37 b ध्वजाभयाक्षमालाब्जां शान्तिं सर्वोपवीतिनीम्॥

ओं हैं शान्तिकलायै नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। तदुत्तरकुम्भे ओं हां सुदेहासनाय नमः। सुदेहमूर्तये नमः। ध्यानम् —

सुदेहं श्यामवर्णं तु सर्वाभरणभूषितम्।
कृताञ्जलिपुटं चैव द्विनेत्रं रक्तवाससम्॥

ओं हां सुदेहाय नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। द्वारदक्षिणकुम्भे ओं हां सुमुखासनाय नमः। सुमुखमूर्तये नमः। ध्यानम् —

सुमुखं रक्तवर्णं तु अब्जद्वयकरद्वयम्।
पीताम्बरधरं चैव सर्वाभरणभूषितम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां सुमुखाय नमः। आवाहनपाद्यादि गन्धपुष्प धूपदी-
पनैवेद्यं दत्वा। द्वारस्योत्तरपताकायां प्रशान्तासनाय
नमः। प्रशान्तमूर्तये नमः। ध्यानम् —

प्रशान्तं रक्तवर्णं च द्विभुजं च द्विलोचनम्।
कृताञ्जलिपुटं चैव नानाभरणभूषितम्॥

ओं हां प्रशान्तपताकाय नमः। द्वारदक्षिणपताकायां ओं हां
शशिरासनाय नमः। शशिरमूर्तये नमः। ध्यानम् -

शशिरं धूम्रवर्णं च एकवक्त्रं चतुर्भुजम्।
खड्गखेटकसंयुक्तं कृताञ्जलिपुटं तथा॥

ओं हां शशिराय नमः। पूर्वद्वारोपरि मध्यस्थित ध्वजे ओं हां
कुमुदासनाय नमः। कुमुदमूर्तये नमः। ध्यानम् -

कुमुदं पूर्वदिग्भागे सितवर्णं विभावयेत्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्।

ओं हां कुमुदाय नमः। अग्निकोणध्वजे ओं हां कुमुदाक्षा-
सनाय नमः। कुमुदाक्षमूर्तये नमः।

आग्नेय्यां कुमुदाक्षं च दिशि भानुसमप्रभम्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

38 a ओं हां कुमुदाक्षाय नमः। पाद्यादि गन्धपुष्प धूपदीप नै-
वेद्यं दत्वा। दक्षिणद्वारमन्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां
भूतितोरणासनाय नमः। भूतितोरणमूर्तये नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्विभुजं च द्विनेत्रं च सर्वाभरणभूषितम्।

भूतितोरणमाख्यातं स्थूलग्रीवं महोदरम्॥

ओं हां भूतितोरणाय नमः। भूतितोरणाधिपतये विनायाय नमः।

तोरणशाखयोः ओं हां यजुर्वेदासनाय नमः। यजुर्वेदमूर्तये नमः॥

रक्तवर्णं त्रिणेत्रं च शुक्लयज्ञोपवीतिनम्।

स्रुक्कुण्डिकाञ्जलिभृतं यजुर्वेदं विभावयेत्॥

ओं हां यजुर्वेदाय नमः। पाद्यादि गन्धपुष्प धूपदीप नैवेद्यं दत्त्वा। दक्षिणद्वारस्य पृष्ठे प्रथमकलशे ओं हूं विद्याकलासनाय नमः। विद्याकलामूर्तये नमः॥

शक्त्यभयाक्षमालाब्जां विद्यां ज्वलनसन्निभाम्।

चतुर्वक्त्रां चतुर्बाहुं रक्तवर्णां महाबलाम्॥

ओं हां विद्याकलायै नमः। आवाहनादि कृत्वा। पाद्यादिगन्धपुष्प धूपदीप नैवेद्यं दत्त्वा। तत्पूर्वकुम्भे ओं हां वल्ल्यासनाय नमः। वल्लीमूर्तये नमः॥

वल्लीदेवीं सुरूपां तु सर्वाभरणभूषिताम्।

वामहस्तोत्पलां चैव दक्षहस्ते प्रलम्बिताम्॥

ओं हां वल्ल्यै नमः। आवाहनादि पाद्यादि गन्धपुष्प धूपदीप नैवेद्यं दत्त्वा। द्वारपश्चिमे प्रथमकलशे। ओं हां सेनापत्यासनाय नमः। सेनापतिमूर्तये नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकवक्त्रं चतुर्बाहुं किरीटमकुटान्वितम्।

38b अभयं वरदं चैव शक्तिकुक्कुटधारिणम्॥

ओं हां सेनापतये नमः। आवाहनादि कृत्वा पाद्यादिगन्ध-पुष्पधूपदीपनैवेद्यं दत्वा। तत्पश्चिमकुम्भे ओं हां लक्ष्म्यासनाय नमः। लक्ष्मीमूर्तये नमः॥

लक्ष्मीं कुङ्कुमवर्णां तु पद्मद्वयकरद्वयाम्।

प्रसन्नवदनाम्भोजां सर्वाभरणभूषिताम्॥

ओं हां महालक्ष्म्यै नमः। आवाहनादि कृत्वा पाद्यादिगन्ध-पुष्पधूपदीपनैवेद्यं दत्वा॥ द्वारपूर्वपताकायां ओं हां पर्जन्यासनाय नमः। पर्जनीमूर्तये नमः॥

पर्जन्यं रक्तवर्णं तु द्विभुजं च त्रिलोचनम्।

कृताञ्जलिपुटं चैव नानाभरणभूषितम्॥

ओं हां पर्जन्याय नमः। आवाहनादि कृत्वा। पाद्यादिगन्ध-पुष्पधूपदीपनैवेद्यं दत्वा। द्वारपश्चिमपताकायां ओं हां जयन्तासनाय नमः। जयन्तमूर्तये नमः।

जयन्तं रक्तवर्णं च द्विभुजं च द्विलोचनम्।

कृताञ्जलिपुटं चैव नानाभरणभूषितम्॥

ओं हां जयन्ताय नमः। द्वारोर्ध्वध्वजे ओं हां पुण्डरीकासनाय नमः। पुण्डरीकमूर्तये नमः॥

भृङ्गाभं पुण्डरीकं च दक्षिणे तु प्रदेशके।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

39a ओं हां पुण्डरीकाय नमः ॥ निऋतिकोणध्वजे ओं हां वामना-
सनाय नमः। वामनमूर्तये नमः॥

वामनं नैऋते देशे भिन्नाञ्जनसमद्युतिम्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

ओं हां वामनाय नमः। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं द-
त्वा। पश्चिमद्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां बल-
तोरणासनाय नमः। बलतोरणमूर्तये नमः॥

रक्तवर्णं द्विनेत्रं च नागयज्ञोपवीतिनम्।
कृताञ्जलिपुटोपेतं ध्यायामि बलतोरणम् ॥

ओं हां बलतोरणाय नमः। बलतोरणाधिपतये वज्राय नमः।
तोरणशाखयोः ओं हां सामवेदासनाय नमः। सामवेदमूर्त-
ये नमः॥

श्वेतवर्णं द्विनेत्रं च हेमयज्ञोपवीतिनम्।
ब्रह्मास्त्रं गण्डिकायुक्तं सामवेदं कृताञ्जलिम् ॥

ओं हां सामवेदाय नमः। पाद्यादि गन्धपुष्पधूपदीपनैवे-
द्यं दत्त्वा। पश्चिमद्वारस्य दक्षिणे प्रथमकलशे ओं हां नि-
वृत्तिकलासनाय नमः। निवृत्तिकलामूर्तये नमः।

तप्तचामीकराभासां चतुर्वक्त्रेन्दुभूषिताम्।
वज्राभयाक्षमालाब्जां निवृत्तिं परिकीर्तिताम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

37b ओं हां निवृत्तिकलायै नमः। आवाहनादि कृत्वा पाद्यादिगन्ध-
पुष्पधूपदीपनैवेद्यं दत्त्वा। तद्दक्षिणकुम्भे ओं हां मयूरा-
सनाय नमः। मयूरमूर्तये नमः।

चित्रवर्णं बृहत्पुच्छं भुजङ्गोद्धृतवक्त्रकम्।
महाबलं महाकायं मयूरं प्रणमाम्यहम्॥

ओं हां मयूराय नमः। आवाहनादि कृत्वा। पाद्यादि गन्ध-
पुष्पधूपदीपनैवेद्यं दत्त्वा। तद्दक्षिणकुम्भे ओं हां गजास-
नाय नमः। गजमूर्तये नमः॥

गजानं श्वेतवर्णं तु करभूतसमन्वितम्।
महाबलं महाकायं शूर्पकर्णं विभावयेत्॥

ओं हां गजाय नमः। आवाहनादि कृत्वा। पाद्यादिगन्धपुष्प-
धूपदीपनैवेद्यं दत्त्वा। द्वारस्योत्तरे प्रथमकलशे ओं हां अ-
स्त्रासनाय नमः। अस्त्रमूर्तये नमः॥

द्विभुजं च द्विनेत्रं च सर्वाभरणभूषितम्।
शत्रूणां मर्दनं चैव प्रदीप्ताग्निसमप्रभम्॥

ओं हां अस्त्राय नमः। आवाहनादि कृत्वा। पाद्यादिगन्धपुष्प-
धूपदीपनैवेद्यं दत्त्वा। वायुदक्षिणकुम्भे ओं हां क्षेत्रपा-
लासनाय नमः। क्षेत्रपालमूर्तये नमः॥

चतुर्भुजं द्विणेत्रं च कपालं शूलधारिणम्।
पाशं डमरुकं चैव घोरदंष्ट्रं जटाधरम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां क्षेत्रपालाय नमः। आवाहनादि कृत्वा। पाद्यादिगन्ध-
40a पुष्पधूपदीपनैवेद्यं दत्त्वा। द्वारोत्तरपताकायां ओं हां अमृ-
तासनाय नमः। अमृतमूर्तये नमः॥

अमृतं रक्तवर्णं च द्विभुजं च द्विलोचनम्।
कृताञ्जलिपुटोपेतं नानाभरणभूषितम्॥

ओं हां अमृताय नमः। द्वारदक्षिणपताकायां ओं हां अशोका-
सनाय नमः। अशोकमूर्तये नमः॥ द्वारोर्ध्वध्वजे ओं हां शंखु-
कर्णासनाय नमः। शंखुकर्णमूर्तये नमः॥

वारुण्यां शंखुकर्णं च दिशि नक्षत्रसन्निभम्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

ओं हां शंखुकर्णाय नमः। वायुकोणध्वजे ओं हां सर्वनेत्रास-
नाय नमः। सर्वनेत्रमूर्तये नमः॥

वायव्यां सर्वनेत्रं च दण्डाभयकरान्वितम्।
द्विलोचनं द्विबाहुं च रक्तवर्णं महाबलम्॥

ओं हां सर्वनेत्राय नमः। इत्यावाहनादि कृत्वा पाद्यादिगन्ध-
पुष्पधूपदीपनैवेद्यं दत्त्वा। उत्तरद्वारमस्त्रेण सम्प्रोक्ष्य तोरण-
मध्ये ओं हां आरोग्यतोरणासनाय नमः। आरोग्यतोरणमू-
र्तये नमः॥

द्विभुजं च द्विनेत्रं च पार्श्वयोर्लम्बकेशिनम्।
दंष्ट्राकरालवदनं आरोग्यतोरणं यजे॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां आरोग्यतोरणाय नमः। आरोग्यतोरणाधिपतये नीललोहिताय नमः। तोरणशाखयोः ओं हां अथर्वणवेदासनाय नमः। अथर्वणवेदमूर्तये नमः॥

कृष्णं चतुर्भुजं द्यक्षं कमण्डल्वक्षसूत्रकम्।
अथर्ववेदं हस्ताभ्यामञ्जलिं दधतं यजे॥

40b ओं हां अथर्ववेदाय नमः। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। उत्तरद्वारस्य पश्चिमे प्रथमकलशे ओं हां प्रतिष्ठाकलासनाय नमः। प्रतिष्ठाकलामूर्तये नमः॥

शुद्धस्फटिकसङ्काशां एकवक्त्रां चतुर्भुजाम्।
पाशाभयाक्षमालाब्जां प्रतिष्ठां रत्नभूषिताम्॥

ओं हां प्रतिष्ठाकलायै नमः। आवाहनादि कृत्वा। पाद्यादि-गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। तत्पश्चिमकुम्भे ओं हां देवसेनापत्यासनाय नमः। देवसेनापतिमूर्तये नमः॥

विद्रुमप्रभसंयुक्तं एकवक्त्रं चतुर्भुजम्।
अभयमूरुहस्तं च खड्गखेटकसंयुतम्॥

ओं हां देवसेनापतये नमः। आवाहनादि कृत्वा पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। द्वारस्य पृष्ठे प्रथमकलशे ओं हां सुमित्रासनाय नमः। सुमित्रमूर्तये नमः॥

द्विभुजं चैकवक्त्रं च सर्वाभरणभूषितम्।
उत्पलं दक्षिणे हस्ते ऊरुहस्तं च वामके॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां सुमित्राय नमः। आवाहनादि कृत्वा। पाद्यादि गन्ध-

पुष्पधूपदीपनैवेद्यं दत्त्वा। द्वारपश्चिमपताकायां ओं हां

धनदासनाय नमः। धनदमूर्तये नमः॥

धनदं रक्तवर्णं च द्विभुजं च द्विलोचनम्।

कृताञ्जलिपुटं चैव नानाभरणभूषितम्॥

ओं हां धनदाय नमः। द्वारपूर्वपताकायां ओं हां श्रीप्रदा-

सनाय नमः। श्रीप्रदमूर्तये नमः।

41a श्रीप्रदं रक्तवर्णं च द्विभुजं च द्विलोचनम्।

कृताञ्जलिपुटोपेतं नानाभरणभूषितम्॥

ओं हां श्रीप्रदाय नमः। द्वारोर्ध्वध्वजे ओं हां सुमुखास-

नाय नमः। ओं हां सुमुखमूर्तये नमः॥

सुमुखं षट्पदाभं च कौबेरदिशि संस्थितम्।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

ओं हां सुमुखाय नमः। ईशानकोणध्वजे ओं हां सुप्रतिष्ठा-

सनाय नमः। सुप्रतिष्ठमूर्तये नमः॥

ईशाने सुप्रतिष्ठं च शशाङ्कधवलप्रभम्।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

ओं हां सुप्रतिष्ठाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-

नैवेद्यं दत्त्वा। मध्याकाशोपरि ओं हौं शान्त्यतीतकलास-

नाय नमः। शान्त्यतीतकलामूर्तये नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शुद्धस्फटिकसङ्काशां पञ्चवक्त्रां चतुर्भुजाम् ।

पाशाभयाक्षमालाब्जां शान्त्यतीतां वरप्रदाम् ॥

ओं हौं शान्त्यतीतकलायै नमः। इत्यावाहनादि गन्धपुष्प-
धूपदीपनैवेद्यं दत्त्वा। सर्वेभ्यो द्वारपालेभ्यो नमः। ततः
पश्चिमद्वारे नित्यवत् द्वारार्चनं कुर्यात्। तद्यथा- अर्घ्य-
जलेन पश्चिमद्वारं सम्प्रोक्ष्य। द्वारदक्षिणभागे ओं हां सु-
देहाय नमः। उत्तरभागे ओं हां सुमुखाय नमः। दक्षिण-
शाखायां दीप्तायै नमः। उत्तरशाखायां सूक्ष्मायै नमः। तयो-
र्मध्ये ओं हां महालक्ष्म्यै नमः। अधिष्ठाने आधारशक्त्यै
नमः। उपाने आदिशक्त्यै नमः। जगत्यां क्रियाशक्त्यै
नमः। पद्मे ओं हां ज्योतिश्शक्तये नमः। कुमुदे गुणशक्तये
नमः। पट्टिकायां ज्ञानशक्तये नमः। भित्त्यां रौद्र्यै नमः।
41 b स्तम्भे भोगशक्तये नमः। पालिकायां अनन्त·· ये नमः।
कम्पे वल्ल्यै नमः। कपोते पूतायै नमः। वृत्तमालिकायां रेवत्यै
नमः। नासिकायां कृत्तिकायै नमः। शिखरे शकुन्यै नमः।
स्थूप्यां कौमार्यै नमः। अग्रे स्कन्दशक्तये नमः। इत्यभ्यर्-
च्य। अन्तर्द्वारार्चनं कुर्यात्। ओं हां शान्तिकलाद्वारगायै
नमः। द्वारोर्ध्वे गं गणपतये नमः। तस्य वामभागे सं स-
रस्वत्यै नमः। द्वारस्य दक्षिणे जयाय नमः। उत्तरे विजयाय
नमः। दक्षिणकवाटे वीरबाहवे नमः। उत्तरकवाटे महावीराय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः इत्यभ्यर्च्य । सर्वेभ्यो द्वारपालेभ्यो नमः। पाद्यादि-गन्धपुष्पधूपदीपनैवेद्यं दत्वा । मूलेन दिव्यदृष्ट्या ऊर्ध्व-गतान्विघ्नान् ओं भूर्भुवास्त्रेण नाराचमुद्रया पुष्पक्षेप-णान्तर्गतान्विघ्नान् व्यपोह्य ओं भूर्भुवास्त्रेण पार्ष्णिघात-त्रयेण भूगतान्विघ्नानुत्सार्य । अन्यद्वारमस्त्रेण संरुध्य। पश्चिमद्वाराधो भूम्बरमध्ये ओं हां पाशुपता-स्त्रासनाय नमः। पाशुपतास्त्रमूर्तये नमः॥

चतुर्वक्त्रं चतुर्बाहुं प्रदीप्ताग्निसमप्रभम् ।
दक्षवामक्रमा शक्तिशूलाभयकरान्वितम् ॥

ओं श्रीं पशुं हुं फट् पाशुपतास्त्राय हुं फट् नमः। इत्य-
42a भ्यर्च्य । किञ्चिद्वामशाखां समाश्रयेत् । दक्षपादपुरस्सरं अन्तः प्रविश्य । यागशालां प्रदक्षिणक्रमेण नैरृत्यां स्थित्वा मण्टपं तृणादिनाच्छादितं चेत् कम्बेषु वायुतत्वाय नमः। तृणेषु अप्तत्वाय नमः। बन्धेषु तेजस्तत्वाय नमः। वंशेषु पृथिवीतत्वाय नमः। स्तम्भेषु आकाशतत्वाय नमः। चूलिकायां स्कन्दाय नमः। वितानेषु चन्द्राय नमः। तरङ्गेषु जाह्नव्यै नमः। दर्भमालायां वासुक्यै नमः। अङ्कणे मुद्गराय नमः। दिशासु अस्त्राय नमः। इत्यभ्यर्च्य । पाद्यादि-गन्धपुष्पधूपदीपनैवेद्यं दत्वा । उपवेदि परितः गजाष्टकं पूजयेत् । पूर्वादीशान्तदिक्षु ओं हां ऐरावताय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुण्डरीकाय नमः। वामनाय नमः। कुमुदाय नमः। अञ्जनाय
नमः। पुष्पदन्ताय नमः। सार्वभौमाय नमः। सुप्रतीकाय
नमः। इत्यभ्यर्च्य। पूर्वादीशानपर्यन्तमष्टनागान् समर्च-
येत्। अनन्ताय नमः। वासुक्यै नमः। तक्षकाय नमः। का-
र्कोटकाय नमः। पद्माय नमः। महापद्माय नमः। शंखपाला-
य नमः। गुलिकाय नमः। इत्यष्टनागान् सम्पूज्य। पूर्वादी-
शानपर्यन्तं मङ्गलाष्टकं पूजयेत्। उर्वशीधृतदर्पणे सू-
र्याय नमः। मेनकाधृतपूर्णकुम्भे जलेश्वराय नमः। रम्भा-
धृतमयूरे स्कन्दाय नमः। तिलोत्तमाधृतयुग्मचामरे मा-
तरिश्वने नमः। सुमुखीधृतश्रीवत्से महालक्ष्म्यै नमः। सु-
न्दरीधृतस्वस्तिके सरस्वत्यै नमः। काममुखीधृतशंखे च-
42 b न्द्राय नमः। कामवर्धिनीधृतदीपे ज्वलनाय नमः। इति स-
म्पूज्य। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। सुब्रह्मण्य-
पदव्याप्तिकं मण्टपं विभाव्य। वेदिकादक्षिणतः कूर्मास-
ने व्याघ्राजिनादौ रुचिरासने उदङ्मुख उपविश्य प्राणा-
यामत्रयं कृत्वा कृतभूतशुद्ध्यन्तर्यजनहवनध्यान गुह-
हस्तं कुर्यात्। तद्यथा स्वदक्षिणहस्ततले वामाङ्गुष्ठेन गन्ध-
लेपिते मध्ये ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये न-
मः। इत्यासनमूर्तिं विन्यस्य। अङ्गुष्ठादिकनिष्ठान्तेषु
ओं सों ईशानाय जगद्भुवाय नमः। ओं सें तत्पुरुषाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वचग्भुवाय नमः। ओं सुं अघोराय विश्वभुवाय नमः। ओं
सिं वामदेवाय रुद्रभुवाय नमः। ओं सं सद्योजाताय ब्रह्म-
भुवाय नमः। इति क्रमेण विन्यस्य। आप्यभुवाय भुवङ्गु-
वाय नमः। पुनरनामिकायां न्यस्य विद्यादेहं नेत्रन्यासौ
विधाय। मूलेन स्कन्दमावाह्य। अङ्गानि कनिष्ठिकादिषु
क्रमेण विन्यस्य। परमीकृत्य तेजोरूपं ध्यात्वा। स्वशिरस्याधि-
रोप्य। ब्रह्मरन्ध्रप्रविष्टेन तेजसा बाह्याभ्यन्तरतमःपटल-
माधूय। प्रद्योतितदिगन्तरं सम्भाव्य। ततो लाजचन्दन-
सिद्धार्थभस्मपुष्पकुशाक्षतान् सप्तसंख्यान् शुद्धलाजान्वि-
कराण्यस्त्रेण हुं फडन्तेन सप्तधाभिमन्त्र्य शुद्धपात्रे स-
ङ्गृह्य। नानाप्रहराकाराण्यस्त्रेणान्तरिक्षविघ्नप्रशमनार्थं
43 a विकीर्य। पञ्चगव्यार्घ्यजलैः यागगृहं सम्प्रोक्ष्य भूमिर्भूम्ने-
ति मन्त्रेण स्थानशुद्धिं कुर्यात्। मन्त्रः - 'भूमिर्भूम्ना द्यौर्व-
रुणान्तरिक्षं महित्वा। उपस्थे दे देव्यदिते अग्निमन्नाद्यधा
दधे' इति मन्त्रेण पञ्चगव्येन मण्टपं सम्प्रोक्ष्य। निरीक्ष-
णादिचतुस्संस्कारान् शल्यनिवृत्त्यर्थं विदध्यात्। इति वि-
शेषशुद्धिः। पश्चात् द्वारत्रयमस्त्रेण कवाटमुद्घाट्य। प्रद-
क्षिणक्रमेण ईशानभागे स्थित्वा। स्कन्दकुम्भवर्धनीं स-
म्पूजयेत्। कुम्भस्याधः ओं हां आधारशक्तिकमलासनाय
नमः। अनन्तासनाय नमः। सिंहासनाय नमः। योगासनाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। पद्मासनाय नमः। विमलासनाय नमः। ओं हां स्कन्दा-
सनाय नमः। स्कन्दमूर्तये नमः। इति चलासनमभ्यर्च्य।
ध्यानम् — पद्मसर्वकटिसंयुतवामं
पद्मकान्तिनिभमेकमुखं त्वाम्।
बालषङ्कर॰॰ मीश्वरसूनुं
बालमुन्नतभुजं प्रणतोऽस्मि।
इति ध्यात्वा मूलेनावाह्य। स्थापनादि कृत्वा। तद्वामे वल्लीं
वल्ल्यासनाय नमः। वल्लीमूर्तये नमः॥
वल्लीनां श्यामवर्णां तु सर्वाभरणभूषिताम्।
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम्॥
इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। पाद्यादि-
गन्धपुष्पधूपदीपनैवेद्यं दत्वा। पश्चात् इन्द्रादिलोकपा-
43b लानाराध्य पूर्वद्वारस्य दक्षिणे द्वितीयकलशे ओं हां इन्द्रा-
सनाय नमः। इन्द्रमूर्तये नमः। ध्यानम् —
ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम्।
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत्॥
ओं हां इन्द्राय नमः। इत्यावाहनादिगन्धपुष्पधूपदीपनै-
वेद्यं दत्वा॥
भो भो इन्द्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुहाज्ञया॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति गुहाज्ञां श्रावयेत् ॥ पूर्वद्वारस्य दक्षिणे चतुष्कलशे

ओं हां अग्न्यासनाय नमः। अग्निमूर्तये नमः।

सप्तार्चिषं च बिभ्राणं अक्षमालां कमण्डलुम्।

ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् ॥

ओं हां अग्नये नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-
नैवेद्यं दत्त्वा।

भो भो अग्ने त्वया स्वस्यां दिशि विघ्नप्रशान्तये।

सावधानेन यागान्तं यावत्सेव्यं गुहाज्ञया ॥

इति विज्ञाप्य। दक्षिणद्वारस्य पृष्ठे तृतीयकलशे ओं हां
यमासनाय नमः। यममूर्तये नमः।

कृतान्तं महिषारूढं दण्डहस्तं भयानकम्।

कालपाशधरं कृष्णं ध्यायेद्दक्षिणदिक्पतिम् ॥

ओं हां यमाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-
नैवेद्यं दत्त्वा ॥

भो भो यम त्वया स्वस्यां दिशि विघ्नप्रशान्तये।

सावधानेन यागान्तं यावत्सेव्यं गुहाज्ञया ॥

इति विज्ञाप्य ॥ नैरृतकुम्भे ओं हां नैरृत्यासनाय नमः।
44a नैरृतिमूर्तये नमः।

रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम्।

कृपाणपाणिमस्त्रौघं बिम्बोष्ठं राक्षसेश्वरम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां नैऋतये नमः। इत्यावहनादि गन्धपुष्पधूपदीपनै-
वेद्यं दत्त्वा।

भो भो निऋते त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुर्वाज्ञया॥

इति विज्ञाप्य। पश्चिमद्वारस्योत्तरे द्वितीयकलशे ओं हां
वरुणासनाय नमः। वरुणमूर्तये नमः॥

नागपाशधरं हृष्टं मुक्तौघद्युतिविग्रहम्।
शशाङ्कधवलं ध्यायेद्वरुणं मकरासनम्॥

ओं हां वरुणाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवे-
द्यं दत्त्वा॥

भो भो वरुण त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुर्वाज्ञया॥

इति विज्ञाप्य। पश्चिमद्वारस्योत्तरे चतुष्कलशे ओं हां वायवा-
सनाय नमः। वायुमूर्तये नमः॥

आपीनं हरितच्छायं विलोलध्वजधारिणम्।
प्राणभूतं च भूतानां हरिणस्थं समीरणम्॥

ओं हां वायवे नमः इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं
दत्त्वा — भो भो वायो त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुर्वाज्ञया॥

इति विज्ञाप्य। उत्तरद्वारस्य पूर्वे द्वितीयकलशे ओं हां कुबेरा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सनाय नमः। कुबेरमूर्तये नमः॥

44b कुबेरं मनुजासीनं सगर्वं खड्गविग्रहम्।
स्वर्णच्छायं गदाहस्तं उत्तराशापतिं स्मरेत्॥

ओं हां कुबेराय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-
नैवेद्यं दत्वा॥

भोभो कुबेर त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुह्याज्ञया॥

इति विज्ञाप्य। उत्तरद्वारस्य पूर्वे चतुष्कलशे ओं हां ईशा-
नासनाय नमः। ईशानमूर्तये नमः॥

ईशानं वृषभारूढं त्रिशूलं व्यालधारिणम्।
शरच्चन्द्रवदाकारं चन्द्रमौलिं त्रिलोचनम्॥

ओं हां ईशानाय नमः इत्यावाहनादि गन्धपुष्पधूपदीपनैवे-
द्यं दत्वा॥

भोभो ईशान त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुह्याज्ञया॥

इति विज्ञाप्य। तद्दक्षिणकुम्भे ओं हां ब्रह्मासनाय नमः। ब्रह्म-
मूर्तये नमः।

पीनं पीतं चतुर्बाहुं ब्रह्माणं चतुराननम्।
हंसयानं च बिभ्राणं दण्डाक्षस्त्रक्कमण्डलुम्॥

ओं हां ब्रह्मणे नमः इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दत्त्वा । भो भो ब्रह्मन् त्वया स्वस्यां दिशि विघ्नप्रशान्तये ।

सावधानेन यागान्तं यावत्सेव्यं गुहाज्ञया ॥

45 a इति विज्ञाप्य । नैरृतिपूर्वकुम्भे ओं हां विष्ण्वासनाय नमः।
विष्णुमूर्तये नमः॥

विष्णुश्चतुर्भुजो मौलिं शंखचक्रगदाब्जधृक् ।

नीलाम्बुदप्रतीकाशो गरुडासनसंस्थितः॥

ओं हां विष्णवे नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनै-
वेद्यं दत्त्वा ॥

भो भो विष्णो त्वया स्वस्यां दिशि विघ्नप्रशान्तये ।

सावधानेन यागान्तं यावत्सेव्यं गुहाज्ञया ॥

इति विज्ञाप्य । ततः इन्द्रादिदिक्षु दशायुधानि च पूजयेत् ।
ओं हां वज्रासनाय नमः। वज्रमूर्तये नमः॥

वज्रं तु पुरु·· स्थूलं दृढं कर्कशविग्रहम् ।

बलिनं वज्रमूर्धानं दीप्तं प्राक्पश्चमावृतम् ॥

ओं हां वज्राय हुं फट् नमः। आग्नेय्यां ओं हां शक्त्यासनाय
नमः। शक्तिमूर्तये नमः॥

शक्तिं च योषिदाकारां आग्नेय्यां दिशि लोहिताम् ।

बिभ्राणां शिरसा शक्तिं त्रिकोणस्थामुपाश्रये ॥

ओं हां शक्तये हुं फट् नमः। याम्ये ओं हां दण्डासनाय नमः।
दण्डमूर्तये नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दण्डं च दक्षिणे भागे कृष्णं पुरुषविग्रहम् ।

दण्डाकारं शिरोयुक्तं वन्दे लोहितलोचनम् ॥

ओं हां दण्डाय हुं फट् नमः । नैरृते ओं हां खड्गासनाय नमः ।

खड्गमूर्तये नमः ॥

नैरृत्यां पुरुषाकारं खड्गं श्यामनिभान्वितम् ।

खड्गालङ्कृतमूर्धानं क्रुद्धं क्रूरदृशं भजे ॥

45b ओं हां खड्गाय हुं फट् नमः । पश्चिमे ओं हां पाशासनाय नमः ।

पाशमूर्तये नमः ॥

नाभ्यधो भुजगाकारं तदूर्ध्वे पुरुषाकृतिम् ।

पाशं सप्तफणोपेतं मूर्धानं पश्चिमं भजे ॥

ओं हां पाशाय हुं फट् नमः ॥ वायव्यां ओं हां अङ्कुशासनाय

नमः । अङ्कुशमूर्तये नमः ।

पीताभं पुरुषाकारं व्यावृतास्यं महाभुजम् ।

प्रपद्ये वायुदिग्भागे ध्वजमूर्ध्नि ध्वजान्वितम् ॥

ओं हां अङ्कुशाय हुं फट् नमः ॥ उत्तरे ओं हां गदासनाय न-

मः । गदामूर्तये नमः ॥

कन्यारूपां गदां पीतां आपीनजघनस्थलाम् ।

गदाकारशिरोयुक्तां उत्तरस्यां नतोऽस्म्यहम् ॥

ओं हां गदायै हुं फट् नमः ॥ ईशाने ओं हां त्रिशूलासनाय

नमः । त्रिशूलमूर्तये नमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिशूलं पुरुषाकारं दिव्यं श्यामकलेबरम्।
त्रिशूलं शिरसा शश्वन्नतोऽस्मीशानदिग्गतम्॥

ओं हां त्रिशूलाय हुं फट् नमः॥ तद्दक्षिणे ओं हां पद्मासना-
य नमः। पद्ममूर्तये नमः॥

शंखाभं पद्मकोशाढ्यं मूर्धानं पुरुषाकृतिम्।
नौमि दिव्यं विरिञ्चास्त्रं शुक्लाभं शुभलोचनम्॥

ओं हां पद्माय हुं फट् नमः॥ नैऋते ओं हां चक्रासनाय नमः।
चक्रमूर्तये नमः॥

चक्रं शतारं चक्राङ्कं मूर्धानं पुरुषाकृतिम्।
श्यामदेहं मुकुन्दास्त्रं सेवे नैऋतिकोणके॥

46 a ओं हां चक्राय हुं फट् नमः। इत्यभ्यर्च्य। पाद्यादिगन्धपुष्पधूपदी-
पनैवेद्यं दत्वा। ततोऽस्त्रवर्धनीं गुरुरादाय स्कन्दकुम्भं शि-
ष्येण वाहयित्वा। कुम्भाग्रकामिनी वर्धनी नालोद्गताविच्छि-
न्नजलधारां पदे पदे प्रपादयन्। ओं ज्वीं वज्राय हुं फट्
नमः इति मूलेन ईशानादीशानान्तं भ्रामयित्वा प्रदक्षिणं
स्रावयेत्।

लोकपाला भवद्भिस्तु यज्ञविघ्नप्रशान्तये।
गुहाज्ञयात्र स्थातव्यं तावद्यज्ञं समाप्यते॥

इत्थं विज्ञाप्य। स्वस्थाने कुम्भं वर्धनीं च संस्थाप्य स्थि-
रासनं सम्पूजयेत्। यागेश्वरकुम्भस्याधः ओं हां आधार-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शक्तिकमलासनाय नमः। अनन्तासनाय नमः। सिंहास-
नाय नमः। योगासनाय नमः। पद्मासनाय नमः। विमला-
सनाय नमः। ओं हां स्कन्दासनाय नमः। ओं हां स्कन्द-
मूर्तये नमः। दण्ड भङ्गि मुण्ड भङ्गी न्यस्य। ध्यानम् —

वज्रं त्रिशक्तिसंयुक्तं मूर्धानं पुरुषाकृतिम्।
स्कन्दस्य वामहस्ते तु स्थितं शत्रुविमर्दनम्॥

इति ध्यात्वा। ओं हां विद्यादेहाय नमः। ओं सौं नेत्रेभ्यो
नमः। इति विद्यादेहं नेत्रं विन्यस्य। पश्चात्पुष्पाञ्जलिं
दत्त्वा। ओं हुं हौं सौं वज्राय हुं फट् नमः। इति मूलेन
पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्यस्य। ओं सां जगद्भुवहृद-
याय नमः। आवाहितो भव। ओं सीं वचद्भुवशिरसे स्वा-
466b हा। स्थापितो भव। ओं सुं विश्वभुवशिखाय वौषट्। सन्नि-
धी भव। ओं सैं रुद्रभुवकवचाय हुं फट् सन्निरुद्धो भव।
ओं सौं ब्रह्मभुवनेत्रत्रयाय वौषट् इति अवकुण्ठनम्। ओं
सः भूर्भुव अस्त्राय फट्। इति धेनुमुद्रां महामुद्रां दर्शयि-
त्वा। स्वागतार्घ्यं दत्त्वा। हृदयादिकरान्तस्थानेषु हृदयाद्य-
ङ्गानि विन्यस्य। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा।
ततो वर्धन्यां ओं ह्रीं शक्त्यासनाय नमः। शक्तिमूर्तये नमः॥

शक्तिं च योषिदाकारां रक्तवर्णां महाबलाम्।
त्रिशूलाकृतिसंयुक्तां शक्तिं शत्रुविमर्दनीम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा ओं ह्रीं शक्त्यै हुं फट् नमः। इति मूलेनावाह्य। स्थापनादि कृत्वा। गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। ओं ह्रां वज्राय नमः। शक्तये नमः। ' सावधानेन यागान्तं यावत् स्थेयं गुर्वाज्ञया' इति विज्ञाप्य मूलमन्त्रमष्टोत्तरशतं जप्त्वा। कुम्भे निवेद्य।

मया प्रवर्तितच्छायां यज्वना भवतः क्रतुः।
रक्षणीयं त्वयैवं हि समाप्य यावदस्य हि ॥

इति यज्ञरक्षाङ्करमावेश्य। तत्पात्रं निश्चलं संस्थाप्य पश्चादुत्तरद्वारपश्चिमे तृतीयकलशे ओं ह्रां विनायकासनाय नमः। विनायकमूर्तये नमः॥

त्रिणेत्रो वामनाकारो गजवक्त्रो महोदरः।
पाशाङ्कुशौ स्वदन्तं च पक्वमाम्रफलं वहन् ॥
शुण्डां वामकराभ्यां च रक्ताङ्गो विघ्ननायकः।

ओं ह्रां विनायकाय नमः। मूलेनावाह्य। पाद्यादिगन्धपुष्प-
47 a धूपदीपनैवेद्यं दत्त्वा ॥

यत्सुरेशोऽध्वरोऽस्माभिः पश्चनुग्रहहेतवे।
प्रवर्तितः प्रयात्वन्तमविघ्नं तव सन्निधौ ॥

इति विज्ञाप्य। उत्तरद्वारस्य पूर्वे तृतीयकलशे —

सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम्।
गुहं विष्णुं च धातारं गुरून् सप्त समाश्रये ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां सप्तगुरुभ्यो नमः। इत्यावाहनादि कृत्वा पाद्यादि -

गन्धपुष्पधूपदीपनैवेद्यं दत्वा।

देवदेव जगन्नाथ जगदानन्दकारण।

गुहाध्वरः प्रवृत्तोऽयं अनुज्ञां कुरुते नमः॥

इति सप्त गुरून्विज्ञाप्य॥

॥ इति मण्टपपूजाविधिस्समाप्तः॥

३५७ ८ द्वितीयदिनकुम्भपूजा।

कुम्भपूजां कुर्यात्। वेदिकाया दक्षिणभागे उत्तराभिमुख-
मुपविश्य। अर्घ्यजलेन प्रोक्ष्य। न . . . . . . सृज्य कु-
म्भस्याधः ओं हां आधारशक्तये नमः। तदुपरि। वृत्ताकारं
श्वेतमनन्तासनं सञ्चिन्त्य। पूर्वाद्यष्टदिक्षु ओं हां अनन्ता-
य नमः। वासुकयै नमः। तक्षकाय नमः। कार्कोटकाय नमः।
पद्माय नमः। महापद्माय नमः। शंखपालाय नमः। गुलिकाय
नमः। तन्मध्ये ओं हां अनन्तासनाय नमः। इत्यनन्तासनं
तदुपरि सिंहासनं चतुरश्रं रक्तवर्णं विचिन्त्य। तदाग्नेया-
दिकोणेषु ओं हां धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः।
ऐश्वर्याय नमः। पूर्वादिदिक्षु अधर्माय नमः। अज्ञानाय नमः।
अवैराग्याय नमः। अनैश्वर्याय नमः। दक्षिणोत्तरमध्येषु
राजसाय नमः। तामसाय नमः। सात्विकाय नमः। पीठोर्ध्वे -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मेखलाधोभागे. शयनीयतयाधच्छदने नैऋते अधच्छद-
नाय नमः। तदूर्ध्वच्छदने ईशाने ऊर्ध्वच्छदनाय नमः। मध्ये
ओं हां सिंहासनाय नमः। तदुपरि योगासनं षट्कोणं पीत-
वर्णं विचिन्त्य। आग्नेयादिकोणेषु ओं हां कृतयुगाय नमः।
त्रेतायुगाय नमः। द्वापरयुगाय नमः। कलियुगाय नमः। पूर्वा-
दिषु अव्यक्ताय नमः। नियतये नमः। कलाय नमः। कालाय
नमः। तन्मध्ये केशवाय नमः। ओं हां योगासनाय नमः।
1.48 a तदुपरि पद्मासनं वृत्ताकारं रक्तवर्णं विचिन्त्य। तन्मध्ये
ओं हां कन्दाय नमः। बीजाय नमः। अङ्कुराय नमः। नालाय
नमः। दलेभ्यो नमः। केसरेभ्यो नमः। कर्णिकाय नमः। बीजे-
भ्यो नमः। पद्मासनाय नमः। ततः पूर्वादौ शान्तकेसरेषु ओं
हां शकुन्यै नमः। रेवत्यै नमः। पूतायै नमः। महापूतायै नमः।
निशीथिन्यै नमः। मालिन्यै नमः। शीतलायै नमः। भूत्यै न-
मः। कर्णिकामध्ये विश्वतोमुख्यै नमः। दलाग्रवृत्ते ओं हां
सूर्यमण्डलाय नमः। सूर्यमण्डलाधिपतये ब्रह्मणे नमः। केस-
राग्रवृत्ते ओं हां सोममण्डलाय नमः। सोममण्डलाधिपतये
विष्णवे नमः। कर्णिकाग्रवृत्ते ओं हां वह्निमण्डलाय नमः।
वह्निमण्डलाधिपतये रुद्राय नमः। कर्णिकामध्ये ओं हां
शक्तिमण्डलाय नमः। शक्तिमण्डलाधिपतये स्कन्दाय नमः।
इति सम्पूज्य। तदुपरि विमलासनं षट्कोणं व्याघ्रचर्म-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रूपं विचिन्त्य। ओं हां विमलासनाय नमः। तदुपरि ओं हां
स्कन्दासनाय नमः। ओं हां हं हां स्कन्दमूर्तये नमः इति मूर्तिं
दण्डाकारं रक्तवर्णं विभाव्य। पश्चाद्दण्डभङ्गिन्यासं कुर्यात्।
ओं सों ईशानमूर्धाय जगद्भुवाय नमः इति शिरसि। ओं सें
48 b ···रु वक्त्राय वचद्भुवाय नमः। वक्त्रे ओं सुं अघोरहृदया-
य विश्वभुवाय नमः। हृदये ओं सिं वामदेवगुह्याय रुद्र-
भुवाय नमः। ···ह्ये ओं सं सद्योजातपादाय ब्रह्मभुवाय
नमः। पादे ओं सौं आप्यभुवाय भुवद्भुवसर्वाङ्गाय नमः। इति
सर्वाङ्गे विन्यस्य। ततो मुण्डभङ्गिन्यासं कुर्यात्। ओं सों ई-
शाय जगद्भुवमूर्ध्ने नमः इति ईशानमूर्ध्नि। ओं सें तत्पु-
रुषाय वचद्भुवमूर्ध्ने नमः इति पूर्वमूर्ध्नि। ओं सुं अघोराय
विश्वभुवमूर्ध्ने नमः इति दक्षिणमूर्ध्नि। ओं सिं वामदेवाय
रुद्रभुवमूर्ध्ने नमः इति उत्तरमूर्ध्नि। ओं सं सद्योजाताय
ब्रह्मभुवमूर्ध्ने नमः इति पश्चिममूर्ध्नि। ओं सौं आप्यभुवाय
भुवद्भुवमूर्ध्ने नमः इति नैरृतमूर्ध्नि न्यसेत्। कलाभङ्गि-
न्यासं कुर्यात्। ओं हौं शान्त्यतीतकलायै नमः। इति शिरसि।
ओं हैं शान्तिकलायै नमः। इति वक्त्रे। ओं हूं विद्याकलायै
नमः। इति हृदये। ओं ह्रीं प्रतिष्ठाकलायै नमः। इति गुह्ये।
ओं ह्रां निवृत्तिकलायै नमः इति पादयोर्विन्यस्य। पश्चात्तत्त्व-
न्यासं कुर्यात्। ओं हं आकाशतलाय नमः। आकाशतलाधि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

49a पतये सदाशिवाय नमः। इति शिरसि। ओं यं वायुतत्वाय नमः।
वायुतत्वाधिपतये महेश्वराय नमः। इति वक्त्रे। ओं रं तेज-
स्तत्वाय नमः। तेजस्तत्वाधिपतये रुद्राय नम इति हृदये।
ओं वं अमृततत्वाय नमः। अमृततत्वाधिपतये विष्णवे नम
इति गुह्ये। ओं लं पृथिवीतत्वाय नमः। पृथिवीतत्वाधिप-
तये ब्रह्मणे नम इति पादयोर्विन्यस्य। श्रीतत्वन्यासं कुर्यात्।
ओं हुं शिवतत्वाय नमः। शिवतत्वाधिपतये रुद्राय नम इति
मुखमण्डले। ओं हिं विद्यातत्वाय नमः। विद्यातत्वाधिपतये
विष्णवे नम इति हृदये। ओं हं आत्मतत्वाय नमः। आत्म-
तत्वाधिपतये ब्रह्मणे नम इति पादयोर्विन्यस्य। पश्चान्मातृ-
कान्यासं कुर्यात्। ओं अं नमश्शिरसि। आं नमः मुखमण्डले।
इं नमः दक्षनेत्रे। ईं नमः वामनेत्रे। उं नमः दक्षकर्णे। ऊं नमः
वामकर्णे। ऋं नमः दक्षिणगण्डे। ॠं नमः वामगण्डे। ऌं नमः
ऊर्ध्वनासिकायाम्। ॡं नमः वामनासिकायाम्। एं नमः ऊ-
र्ध्वोष्ठे। ऐं नमः अधरोष्ठे। ओं नमः ऊर्ध्वदन्ते। औं नमः अ-
धोदन्ते। अं नमः जिह्वायाम्। अः नमः तालुरन्ध्रे। इति वि-
न्यस्य। कं नमः दक्षिणबाहुशिखरे। खं नमः दक्षिणकोर्परे।
गं नमः दक्षिणमणिबन्धे। घं नमः दक्षहस्ताङ्गुलिमूले। ङं
नमः दक्षहस्ताङ्गुल्यग्रे। चं नमः वाम शिखरे।
49b छं नमः वामकोर्परे। जं नमः वाममणिबन्धे। झं नमः वाम-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हस्ताङ्गुलिमूले । ञं नमः वामहस्ताङ्गुल्यग्रे । टं नमः दक्षि-
णोरुमूले । ठं नमः दक्षिणजानुनि । डं नमः दक्षिणगुल्फे ।
ढं नमः दक्षपादाङ्गुलिमूले । णं नमः दक्षपादाङ्गुल्यग्रे । तं नमः
वामोरुमूले । थं नमः वामजानुनि । दं नमः वामगुल्फे । धं नमः
वामपादाङ्गुलिमूले । नं नमः वामपादाङ्गुल्यग्रे । पं नमः द-
क्षिणपार्श्वे । फं नमः वामपार्श्वे । बं नमः पृष्ठे । भं नमः ना-
भौ । मं नमः उदरे । यं नमः हृदये । रं नमः दक्षिणदोर्मूले ।
लं नमः वामदोर्मूले । वं नमः पिठरे । शं नमः दक्षिणकक्षे ।
षं नमः वामकक्षे । सं नमः दक्षिणबाहौ । हं नमः वामबाहौ ।
ळं नमः दक्षिणपादे । क्षं नमः वामपादे । न्यसेत् । स्कन्द-
कलान्यासः । जगद्भुवं जयायै नमः । इतीशानमूर्ध्नि । बहु-
तोबलायै नमः पूर्वमूर्ध्नि । हुतं उन्नतायै नमः दक्षिणमूर्ध्नि ।
वचद्भुवं वामायै नमः उत्तरमूर्ध्नि । नमस्तेऽस्तु नान्दिन्यै
नमः ~~नैरृत्य~~ पश्चिममूर्ध्नि । [विश्वभुवे विजयायै नमः नैरृतमूर्ध्नि ।] जगद्भुवोऽधिपति जयायै नमः ईशा-
नवक्त्रे । सेनानी सेनायै नमः पूर्ववक्त्रे । मयूरप्रियायै न-
50 a मः दक्षिणवक्त्रे । षडाननमङ्गानि शान्त्यै नमः उत्तरवक्त्रे ।
सज्वाथाम नमस्तेऽस्तु सत्यै नमः पश्चिमवक्त्रे । सुरं व-
हिसूक्ष्मायै नमः नैरृतवक्त्रे । सुब्रह्मण्यसुमत्यै नमः
हृदये । बृहस्पतये सुरवाय प्रज्ञायै नमः गले । अस्य पद्म-
योनेः अमृतायै नमः दक्षिणबाहौ । यस्याज्ञया यशस्विन्यै

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः नाभौ । सुब्र-
ह्मण्यसुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे रुचये नमः। पृष्ठे।
ब्रह्मभुवे ब्रह्माण्यै नमः उरसि । भुवद्भुवे भूत्यै नमः गुह्ये।
मातृतायमान्यै नमः शिश्ने । जगद्भुवं जीवायै नमः दक्षिणो-
रौ । सुब्रह्मण्यशुद्धायै नमः वामोरौ । कृत्तिकासुतकृपायै
नमः दक्षिणजानुनि । षष्ठिकासत्वरायै नमः वामजानुनि।
जगद्भुवं जगत्यै नमः ~~कामपाद्दे~~ दक्षिणजंघायाम् । बचद्भुवं
वरदायै नमः वामजंघायाम् । स्कन्दविशाखिने कामदायै
नमः दक्षिणपादे । ह०यं यस्ताय धारिण्यै नमः वामपादे ।
षण्मुखश्यामायै नमः उरसि विन्यस्य । पश्चात् —

षडक्षरन्यासः

अस्य श्री सुब्रह्मण्यमहामन्त्रस्य काश्यपऋषिः गायत्री
छन्दः । श्री षण्मुखो देवता । हौं बीजं ह्लीं शक्तिः श्रीं कीलकं
श्री सुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे विनियोगः। सामित्या-
दि कराङ्गन्यासः। ध्यानम् —

506 सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यं ....।
. . . . भयशक्तिकु ........ रक्ताङ्गरागान्वितं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम्॥

पञ्चोपचाराः । न्यासक्रमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं सौं शं नमः इति शिरसि। ओं सौं रं नमः इति दक्षिण-
नेत्रे। ओं सौं वं नमः वामनेत्रे। ओं सौं णं नमः दक्षिणनासि-
कायाम्। ओं सौं भं नमः वामनासिकायाम्। ओं सौं वं नमः
इति शिरसि विन्यस्य। इति प्रथमम्॥ ओं सौं शं नमः द-
क्षिणबाहुशिखरे। ओं सौं रं नमः दक्षिणकोर्परे। ओं सौं वं
नमः दक्षिणमणिबन्धे। ओं सौं णं नमः दक्षिणहस्ताङ्गु-
लिमूले। ओं सौं भं नमः दक्षिणहस्ताङ्गुलिमध्ये। ओं सौं
वं नमः दक्षिणहस्ताङ्गुल्यग्रे विन्यस्य॥ इति द्वितीयम्॥
ओं सौं शं नमः वामबाहुशिखरे। ओं सौं रं नमः वामकोर्प-
रे। ओं सौं वं नमः वाममणिबन्धे। ओं सौं णं नमः वामह-
स्ताङ्गुलिमूले। ओं सौं भं नमः वामहस्ताङ्गुलिमध्ये। ओं
सौं वं नमः वामहस्ताङ्गुल्यग्रे विन्यस्य। इति तृतीयम्॥
ओं सौं शं नमः दक्षिणोरुमूले। ओं सौं रं नमः दक्षिणजा-
नुनि। ओं सौं वं नमः दक्षिणस्फिचि। ओं सौं णं नमः द-
क्षिणपादाङ्गुलिमूले। ओं सौं भं नमः दक्षिणपादाङ्गुलि-
51 a मध्ये। ओं सौं वं नमः दक्षिणपादाङ्गुल्यग्रे विन्यस्य।
इति तुरीयम्॥ ओं सौं शं नमः वामोरुमूले। ओं सौं रं
नमः वामजानुनि। ओं सौं वं नमः वामस्फिचि। ओं सौं णं
नमः वामपादाङ्गुलिमूले। ओं सौं भं नमः वामपादाङ्गुलि-
मध्ये। ओं सौं वं नमः वामपादाङ्गुल्यग्रे विन्यस्य। इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पञ्चमम् । ओं शं नमः हृदये । ओं सौं रं नमः दक्षिणपा-
र्श्वे । ओं सौं वं नमः वामपार्श्वे । ओं सौं णं नमः नाभौ ।
ओं सौं भं नमः पृष्ठे । ओं सौं वं नमः इति लिङ्गे विन्यस्य
इति षष्ठम् ॥ इति षट्त्रिंशत्स्थानेषु विन्यसेत् ॥
ध्यानम् — विद्रुमप्रभमेकमुखं विभुं
वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं
नौमि रुद्रभवं शिखिवाहनम् ॥
इति ध्यात्वा । पुष्पाञ्जलिं ब्रह्मरन्ध्रान्तं नीत्वा । ओं सौं सं
विद्यादेहाय नमः इति पुष्पाञ्जलिगतं विभाव्य । कुम्भे
विन्यस्य । षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः इति नेत्र-
मुद्रां प्रदर्श्य ॥ —— आवाहनम् ——
पश्चाद्रेचकया पुष्पैरञ्जलिमापूर्य हृत्प्रदेशे निधाय ।
पूरकं विभाव्य । कुम्भकं विसृज्य । हौकारं हृदयादिक-
ण्ठान्तव्याप्तं रसकलां ऊकारेण संयोज्य । हौकार ऊकारौ
51 b कण्ठादितालुरन्ध्रान्तं ..... विषकलां मकारेण सं-
योज्य । हौकारस्योपरि भ्रूमध्यगतबिन्दुकलया बिन्दु-
कलां तदुपरि ललाटगतार्धचन्द्रकलया अर्धचन्द्र-
कलां तदुपरि गतनिरोधिकलां निरोधिकलान्तमूर्ध-
गतनादेन नादं च तदुपरि ब्रह्मरन्ध्रान्तव्याप्तनादान्तेन

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संयोज्य। ब्रह्मरन्ध्रान्तदुपरि शक्तिमेकाङ्गुलव्याप्तां तदुपरि
व्यापिनिं त्र्यङ्गुलव्याप्तां तदुपरि व्योमरूप अनन्त अना-
थ अनाश्रितान्तदुपरि समना चतुरङ्गुलव्याप्तां तदुपरि
उन्मनामपि चतुरङ्गुलव्याप्तां सञ्चिन्त्य। प्रासादान्ते द्वा-
दशान्तोपरि षडक्षरेण वाच्यवाचकभावादभिन्नं श्रीसुब्र-
ह्मण्यं सञ्चिन्त्य। पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा।
सृष्टिमार्गेण भ्रूमध्यान्तमवरोप्य स्फुरत्तारकाकारं स्कन्दं
रेचकभावनया हृदयस्थितिपुष्पाञ्जलिगतं विभाव्य।
अयं कुमारो जरां जयतु दीर्घमायुः 'यस्मै त्वं स्तनप्रप्या-
यायुर्वर्चो यशो बलम्।' इति मन्त्रमुच्चार्य। मूलमन्त्रं
दशवारं जप्त्वा। तन्मन्त्रेण पुष्पाञ्जलिं कुम्भमूर्ध्नि वि-
न्यस्य। कुम्भे आवाहिन्या ऊर्ध्वहस्तेन जगद्भवहृदये-
नावाह्य। अधोमुखहस्तेन वचद्भवशिरसे नास्थापिन्या
52a संस्थाप्य। विश्वभुवशिखोर्ध्वाङ्गुष्ठमुष्टिभ्यां सन्निधान्या
सन्निधीकृत्य। रुद्रभुवकवचाङ्गुष्ठगर्भमुष्टिरूपिण्या
निष्ठया सन्निरुध्य ब्रह्मभुवनेत्रेणावकुण्ठ्य ओं भुवास्त्रेण
धेनुमुद्रयामृतीकृत्य। स्वागतं ते सुब्रह्मण्येति विज्ञाप्य,
वत्स स्वागतमिति देवोक्तं विभाव्य।

'स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्सम्प्रीतिभावेन कुम्भेऽस्मिन् सन्निधीभव॥'

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति विज्ञाप्य । स्वागतार्घ्यं दत्त्वा । हृदयादिकरान्तस्था-
नेषु जगद्भुवहृदयादि विन्यस्य । ओं भूर्भुवास्त्रेण संर-
क्ष्य । रुद्रभुवकवचेनावकुण्ठ्य । मूलेन धेनुमुद्रां महा-
मुद्रां दत्त्वा । ओं सां सुब्रह्मण्याय नमः । इति पादयोः पाद्यं
ओं सां सुब्रह्मण्याय स्वाहा इति षड्वक्रेष्वाचमनम् । ओं
सां सुब्रह्मण्याय स्वाहा इति शिरष्षट्केभ्योऽर्घ्यं दत्त्वा ।
स्नानाद्युपचारान्दत्त्वा । गन्धं समर्प्य कुङ्कुमाक्षतान्समर्प्य
अष्टपुष्पैरभ्यर्च्य । ओं हां ज्ञानशक्तिधराय नमः । स्कन्दा-
य नमः । देवसेनापतये नमः । सुब्रह्मण्याय नमः । गजा-
रूढाय नमः । शरकाननसम्भवाय नमः । कार्त्तिकेयाय
नमः । कुमाराय नमः । षण्मुखाय नमः । तारकान्तकाय नमः ।
सेनान्ये नमः । ब्रह्मचारिणे नमः । वल्लीकल्याणसुन्दराय न-
मः । बालाय नमः । क्रौञ्चभेदकाय नमः । शिखिवाहनाय न-
मः इति षोडशनामभिरभ्यर्च्य । धूपदीपं दत्त्वा । नालिकेर-
526 कदलीफलगुलताम्बूलं निवेद्य । ततो दक्षिणवर्धन्यां ओं
ह्रीं वल्ल्यासनाय नमः । ओं ह्रीं वल्लीमूर्तये नमः । इत्यास-
नमूर्तिं विन्यस्य । ध्यानम् ——

श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
सव्ये लम्बकरां किरीटमकुटां कुम्भस्तनीकञ्चुकाम् ।
अन्योन्वीक्षणसंयुतां शरवणोद्भूतस्य सव्ये स्थितां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मुक्तामाल्यधरां प्रसन्नवदनां वल्लीश्वरीं भावये ॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य स्थाप-
नादि कृत्वा। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। उत्तर-
वर्धिनीं ओं श्रीं देवगजासनाय नमः ओं श्रीं देवगजमूर्त-
ये नमः। ध्यानम् —

पीताम्बुत्पलधारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां
पीतालङ्करणां करण्डमकुटां सेनानिवामे स्थिताम्।
वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधरां
देवैरर्चितपादुकां शशियुतां देवीं त्रिभङ्गीं भजे ॥

इति ध्यात्वा। ओं श्रीं देवगजायै नमः। इति मूलेनावाह्य।
स्थापनादि कृत्वा। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा।
प्रार्थ्य॥

शान्त्यतीतकलामूर्ध्नि शान्तिं वक्त्रसरोरुहाम्।
विद्यां विततवक्षोजां प्रतिष्ठां गुह्यमण्डले ॥
निवृत्तिं जानुजंघाङ्घ्रिं मूर्धादिक्रमशः कलाः।
वर्णत्वङ्मन्त्ररुधिरां पदमांससिराचिताम् ॥
तत्त्वास्थिमज्जाशुक्लादि ध्यानं सद्योगमोक्षदम्।
शिवान्ततत्वगर्भाध्वव्यापिनं सर्वदा गुहम् ॥

53 a इति ध्यात्वा। पश्चाद्रोगाङ्गं पूजयेत्। तद्यथा – तस्य शिर-
ष्षट्केभ्य ईशानमादाय॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम् ।
सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ॥

इति ध्यात्वा । ओं सों ईशानाय जगद्भवमूर्ध्ने नमः इतीशानदलेऽभ्यर्च्य । वक्त्रषट्केभ्यो वक्त्रमादाय ॥

पीताम्बरोपवीतं च नरं कनकसन्निभम् ।
मातुलुङ्गाक्षसूत्रं च दधानं चन्द्रमौलिनम् ॥

इति ध्यात्वा । ओं सें तत्पुरुषाय वचद्भववक्त्राय नमः इति पूर्वदले सम्पूज्य । हृत्प्रदेशादघोरमादाय —

खट्वाङ्गखेटं च कपालपाशं वामे दधानं परशुं त्रिशूलम् ।
खड्गं च दण्डं विकृतं च भीमं ध्यायेदघोरं भुजगादिभूषम् ॥

इति ध्यात्वा । ओं सुं अघोराय विश्वभुव हृदयाय नमः । इति दक्षिणदले सम्पूज्य । वामं गुह्यमण्डलादादाय —

वामं रक्तं सुरक्ताभं माल्यवस्त्रोपवीतिनम् ।
कुम्भनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥

इति ध्यात्वा । ओं सिं वामदेवाय रुद्रभुवगुह्याय नमः इत्युत्तरदले सम्पूज्य ॥ पादाद्यङ्गान् सद्योजातमादाय —

सुतस्रुग्गजवस्त्राढ्यं बालाकारं त्रिलोचनम् ।
सद्योजातं शशिभृतं वरदाभयपाणिनम् ॥

इति ध्यात्वा । ओं सं सद्योजाताय ब्रह्मभुवमूर्तये नमः इति पश्चिमदलेऽभ्यर्च्य ॥ सर्वाङ्गमाप्यभुवमादाय —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

53b आप्यं च श्वेतवर्णाढ्यं सर्वलोकोपकारकम् ।

स्थित्वा रुद्रस्य मकुटं गङ्गायां प्रणमाम्यहम् ॥

इति ध्यात्वा । ओं सौं आप्यभुवाय भुवङ्गवसर्वाङ्गाय नमः ।

इति नैरृतदले सम्पूज्य । सर्वज्ञातबीजेभ्यो नेत्रमादाय ॥

चन्द्रार्कवह्निरूपाणि अभयं वरदान्वितम् ।

पद्मस्थानीन्दुधारीणि नेत्राण्येवं विभावयेत् ॥

इति ध्यात्वा ओं सौं ब्रह्मभुवनेत्रेभ्यो नमः इतीशानस्योत्तर-

भागे सम्पूज्य ॥ सद्भावात्मकं हृदयं हृदयमादाय —

हृदयं चन्द्रसङ्काशं वराभयकरान्वितम् ।

पद्मासनं सोमधरं गुहस्याभिमुखं भजे ॥

ओं सां जगद्भवहृदयाय नमः इत्याग्नेयदले ॥

— सर्वे गुहतत्वलक्षणम् —

शिरश्शिरोदेशादादाय —

शिरश्चामीकरप्रख्यं अभयं वरदं दधत् ।

पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा ओं सिं बचद्भवशिरसे नमः इतीशानदले नेत्र-

स्योत्तरे सम्पूज्य ॥ शिखाशिखयाहृत्य —

शिखां सिन्दूरवर्णाढ्यां अभयं बिभ्रतीश्वरम् ।

पद्मासनामिन्दुधरां गुहस्याभिमुखं भजे ॥

इति ध्यात्वा ओं सूं विश्वभुवशिखाय नमः इति नैरृतदले ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादाय —

कवचं भृङ्गसङ्काशं वरदाभयपाणिनम् ।
पद्मस्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा । ओं लैं रुद्रभुवकवचाय नमः इति वायव्यदले सम्पूज्य । प्रतापरूपमस्त्रमस्त्रेभ्य आहृत्य —

दंष्ट्रापिङ्गलवर्णाढ्यं ज्वलत्केशभयानकम् ।
शक्तिशूलं दधद्भीमं अस्त्रं शत्रुविमर्दनम् ॥

इति ध्यात्वा । ओं सः ओं भूर्भुव अस्त्राय नमः इति पूर्वादि-
54a चतुर्दलेषु सम्पूज्य ॥ इति प्रथमावरणम् ॥

द्वितीयावरणम् — पूर्वाद्यष्टघटेषु पूर्वकुम्भे ओं हां जय-न्तासनाय नमः । जयन्तमूर्तये नमः ॥

जयन्ताख्यमेकवक्त्रं अञ्जलीकृतसंयुतम् ।
वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां जयन्ताय नमः आवाहनादि धूपदीपनैवेद्यं दत्त्वा । आग्नेयकुम्भे ओं हां अग्निशिखासनाय नमः । अग्निशिख-मूर्तये नमः ।

तेजोरूपमग्निशिखं सर्वाभरणभूषितम् ।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां अग्निशिखाय नमः । आवाहनादि धूपदीपनैवेद्यं दत्त्वा । याम्ये ओं हां कृत्तिकापुत्रासनाय नमः । कृत्तिकापुत्रमूर्तये नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम् ।

कृताञ्जलिपुटं श्यामं गुहस्याभिमुखं भजे ॥

ओं हां कृत्तिकापुत्राय नमः । आवाहनादि नैवेद्यान्तं दत्त्वा ॥

नैऋतकुम्भे ओं हां भूतपत्यासनाय नमः । भूतपतिमूर्तये

नमः ॥ भूतं सिन्दूरवर्णाढ्यं प्रधानं च मुखस्य तु ।

वज्रशक्तिधरं देवं कृताञ्जलिपुटान्वितम् ॥

ओं हां भूतपतये नमः । इत्यावाहनादि नैवेद्यान्तं दत्त्वा ॥

पश्चिमकुम्भे ओं हां सेनान्यासनाय नमः । सेनानिमूर्तये

नमः ॥ देवसेनं चतुर्बाहुं श्वेतवर्णं कृताञ्जलिम् ।

वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां सेनान्ये नमः । आवाहनादि नैवेद्यान्तं कृत्वा ॥

५८ ८ वायुकुम्भे ओं हां गुहासनाय नमः । गुहमूर्तये नमः ॥

तेजोरूपं गुहव्याघ्रं मन्दहास्यं कृताञ्जलिम् ।

वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां गुहाय नमः । आवाहनादि नैवेद्यान्तं दत्त्वा । उत्तर-

कुम्भे ओं हां हेमशूलासनाय नमः । हेमशूलमूर्तये नमः ॥

हेमशूलं कृष्णवर्णं चतुर्हस्तं कृताञ्जलिम् ।

खड्गखेटकसंयुक्तं गुहस्याभिमुखं भजे ॥

ओं हां हेमशूलाय नमः । आवाहनादि नैवेद्यान्तं कृत्वा । ईशा-

नकुम्भे ओं हां विशालाक्षासनाय नमः । विशालाक्षमूर्तये नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रसन्नं विशालाक्षं अञ्जलीकृतसंयुतम् ।

पीताम्बरधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां विशालाक्षाय नमः। आवाहनादि नैवेद्यान्तं दत्त्वा ॥

पश्चात्तृतीयावरणं पूजयेत् । तद्बहिरावृततेषु दक्षिणे ज-

याय नमः। उत्तरे विजयाय नमः। पूर्वे गजेन्द्राय नमः।

आग्नेय्यां सुदेहाय नमः। याम्ये सुमुखाय नमः। नैरृते देव-

सेनापतये नमः। पश्चिमे मयूराय नमः। वायौ सुरेशाय नमः।

उत्तरे सुमित्राय नमः। ईशाने क्षेत्रपालाय नमः॥ ततः

55 a तुरीयावरणम्॥ तद्बहिरावृत पूर्वाद्यष्टदिक्षु इन्द्राय नमः।

अग्नये नमः। यमाय नमः। नैरृतये नमः। वरुणाय नमः। वा-

यवे नमः। कुबेराय नमः। ईशानाय नमः॥ तद्दक्षिणे ब्रह्मणे

नमः। नैरृते विष्णवे नमः। तद्बहिरावृते वज्रादि दशायुधं

सम्पूज्य। पूर्वाद्यष्टदिक्षु वज्राय नमः। शक्तये नमः। दण्डा-

य नमः। खड्गाय नमः। पाशाय नमः। अङ्कुशाय नमः। गदायै

नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः इति स-

म्पूज्य। पाद्यादि धूपदीपनैवेद्यं दत्त्वा। अनन्तरं गुहाय

मूलेन पुष्पाञ्जलिं दत्त्वा। महामुद्रां दर्शयित्वा। जयन्तादी-

न्विना सर्वेषां गुहेन सार्धमत्यन्तमैक्यं विभावयेत्। प-

श्चात् प्राणप्रतिष्ठां कुर्यात्। अस्य श्री प्राण प्रतिष्ठामहा-

मन्त्रस्य रुद्रब्रह्माच्युत ऋषिः। ऋग्यजुस्सामाथर्वाणि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

छन्दांसि । अखिलचैतन्यरूपिणी परा प्राणशक्ति र्देवता ।
आं बीजं ह्रीं शक्तिः क्रों कीलकम् । श्रीमत्सुब्रह्मण्येश्वरस्य
सशक्ति सपरिवारस्य प्राणकलाप्रसादसिद्ध्यर्थे जपे विनि-
योगः । ह्रामित्यादि कराङ्गन्यासः । ध्यानम् —

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

558 इति ध्यात्वा । पञ्चोपचारान् कृत्वा । कुम्भमूर्ध्नि स्पृष्ट्वा । ओं
आं ह्रीं क्रों यरलवशषसहों हंसस्सोहमोम् । श्रीसुब्रह्मण्ये-
श्वरस्य प्राणाः इह प्राणाः स्थिताः । आं ह्रीं क्रों यरलवशष
सहों हंसस्सोऽहमों श्रीसुब्रह्मण्येश्वरस्य जीव इह स्थि-
तः । ओं ह्रीं क्रों यरलवशषसहों हंसस्सोऽहमोम् । श्रीसुब्र-
ह्मण्येश्वरस्य जीवतत्व सर्वेन्द्रियाणि मनोबुध्यहङ्कारचित्त-
पृथिव्यप्तेजोवाय्वाकाश शब्दस्पर्शरूपरसगन्ध श्रोत्रत्वक्-
चक्षुर्जिह्वाघ्राण वाक्पाणिपादपायूपस्थजीवप्राण इह
आगत्य अस्मिन् कुम्भे श्रीसुब्रह्मण्यस्य शक्ति सपरिवारं
सुखं चिरं तिष्ठन्तु स्वाहा । क्रों ह्रीं आं हंसस्सोऽहं स्वाहा ।
इति मूलेन द्वादशवारं जप्त्वा । पुनः षडङ्गध्यानम् — असुनी
ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्येम सूर्यमुच्चरन्तमनुमते मृळयान:स्वस्ति । पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् । पुनस्सोमस्तन्वं ददातु पुन: पूषा पथ्याँ आ:न्या स्वस्ति । ओं सौं सुब्रह्मण्याय नम: प्राणान् प्रतिष्ठापयामि । इति प्राणप्रतिष्ठां कृत्वा पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । मूलमन्त्रं यथा-

56 a शक्ति जप्त्वा । कुम्भपूजानन्तरं अग्निकार्यं कुर्यात् । प्रद-

—— द्वितीयदिवसस्य होम: ——

क्षिणक्रमेण कुण्डसमीपं गत्वा । इन्द्रेशानयोर्मध्ये यथोक्तलक्षणं षडश्रकुण्डं परिकल्प्य । कुण्डस्य पश्चिमभागे कूर्मासनादौ पूर्वाननमुपविश्य । भस्मधारणाद्यन्तर्यागान्तं कृत्वा । पाद्यार्घ्याचमनीयं संस्थाप्य । यागोपकरणद्रव्यं दिव्यदृष्ट्यावलोक्य । निरीक्षणाद्यष्टादशसंस्कारं कुण्डस्य कृत्वा । तद्यथा – ईशानाय जगद्भुवाय नम: इति निरीक्षणम् । तत्पुरुषाय वचद्भुवाय नम: प्रोक्षणम् । अघोराय विश्वभुवाय नम: कुशैस्ताडनम् । वामदेवाय रुद्रभुवाय नम: अभ्युक्षणम् । सद्योजाताय ब्रह्मभुवाय नम: खननं चोद्धारणम् । आप्यभुवाय भुवद्भुवाय नम: अवकीरणम् । जगद्भुवहृदयाय नम: पूरणम् । वचद्भुवशिरसे नम: समीकरणम् । विश्वभुवशिखाय नम: सेचनम् । रुद्रभुवकवचाय नम: अवकुण्ठनम् । ब्रह्मभुवनेत्राय नम: मार्जनम् । ओं भूर्भुव अस्त्राय नम: समालेपनम् । कुण्डस्य पश्चिमे ओं ह्रां निवृत्तिकलायै

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। उत्तरे ओं ह्रीं प्रतिष्ठाकलायै नमः। याम्ये ओं ह्रैं विद्या-
कलायै नमः। पूर्वे ओं ह्रौं शान्तिकलायै नमः। मध्ये ओं ह्रौं शा-
न्त्यतीतकलायै नमः। इत्यभ्यर्च्य। नाभ्यां बीजमुख्येन त्रि-
सूत्रवेष्टनम्। तस्मिन्मूलेनाभ्यर्च्य। प्रागग्रामुदगग्रां च रेखा-
त्रयं ब्रह्मजज्ञानमन्त्रषट्केन कुर्यात्। तद्यथा - ब्रह्मजज्ञानं प्र-
थमं पुरस्ताद्वि सीमतस्सुरुचो वेन आपः। स बुध्न्या उपमा अ-
56b स्य विष्ठास्सतं च योनितस्य तं च विवः इति कुण्डमध्ये पश्चिमा-
दि पूर्वान्तमुल्लिख्य। 'नागे सुपर्णं अपयत्पदन्तं हृदा वेनन्तो
अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ
शकुनं भुरण्यम्' तद्दक्षिणे पश्चिमादि पूर्वान्तमुल्लि-
ख्य। 'आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा
वाजस्य सङ्गथे' इति कुण्डस्योत्तरे पश्चिमात्पूर्वान्तमु-
ल्लिख्य। 'यो रुद्रो अग्नौ यो अप्सु यो ओषधीषु यो रुद्रो
विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु' इति कुण्ड-
मध्ये दक्षिणादुत्तरान्तमुल्लिख्य। 'इदं विष्णुर्विचक्रमे
त्रेधा निदधे पदं समूळ्हमस्य पांसुरे' इति तत्पश्चिमे
दक्षिणादुत्तरान्तमुल्लिख्य। 'इन्द्रं विश्वा अवीवृधन् स-
मुद्रव्याच सङ्गिरः। रथीतमं रथीनाम्। वाजानां सत्पतिं
पतिम्' कुण्डस्य पूर्वे दक्षिणादुत्तरान्तमुल्लिख्य शकलं
निरस्य। अप उपस्पृश्य कुण्डस्य मध्ये रेखायां ब्रह्मणे-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। दक्षिणरेखायां यमाय नमः। उत्तररेखायां सोमाय नमः। पुनर्मध्यरेखायां रुद्राय नमः। पश्चिमरेखायां विष्णवे नमः। पूर्वरेखायां इन्द्राय नमः इत्यभ्यर्च्य। कुण्डमध्ये ओं भूर्भुव अस्त्राय नमः इत्युभयत्रिशूलाकृतिना कुशाग्रेण वज्रीकरणम्। पूर्वोक्तराग्रकुशद्वयेन चतुष्पथन्यासं कुण्डस्याभ्यन्तरै रक्षवाटं रुद्रभुवककवचाय नमः इति विधाय। तन्नाभौ कुशविष्टरद्वयं जगद्भुवहृदयाय नमः इति नि-

57 a धाय। वागीश्वरं वागीश्वरीं सम्प्रपूजयेत्। तद्यथा —

पश्चिमकूर्चे ओं हां वागीश्वरासनाय नमः वागीश्वरमूर्तये नमः। ध्यानम् —

'पञ्चवक्त्रं त्रिणेत्रं च चतुर्हस्तं द्विपादकम्।
श्वेतवर्णमिति ज्ञेयं अभयं वरदं तथा॥
अक्षमालां च वामे तु दक्षहस्ते तु कूर्चकम्।
वाचं वागीश्वरं चैव बिन्दुनादसमन्वितम्॥'

इति ध्यात्वा ओं हां वागीश्वराय नमः इति मूलेनावाह्य। पाद्याद्युपचारैस्सम्पूज्य। पूर्वकूर्चे ओं ह्रीं वागीश्वर्यासनाय नमः। ओं ह्रीं वागीश्वरीमूर्तये नमः। ध्यानम् —

अतसीपुष्पसङ्काशां नानाभरणभूषिताम्।
द्विभुजां पीनवक्षोजां ऋतुस्नातां सुयौवनाम्॥
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बिन्दुवागीश्वरीं प्रोक्तां नादं वागीश्वरं तथा ॥

इति ध्यात्वा ओं ह्रीं वागीश्वर्यै नमः इति मूलेनावाह्य । पा-
द्याद्युपचारैस्सम्पूज्य । धूपदीपनैवेद्यं दत्वा । सूर्यकान्तं वा-
रणिजं वा श्रोत्रियाग्निं वा ताम्रपात्रेण वा मृच्छरावेण वा गृ-
हीत्वा । कुण्डस्य प्राच्यां दिशि निधाय । तस्मिन्नग्नौ क्रव्यादां-
शं पर्यग्निकरणं नैरृते परिहृत्य । तस्मिन्नग्नौ निरीक्षणादि-
पञ्चशुद्धिं विधाय । पात्रेणैकेन ओं हां हुं वह्निचैतन्याय
नमः इति मन्त्रेण स्वनाभ्यग्निं सङ्गृह्य । ओं हां हं हां हुं वह्नि-
मूर्तये नमः । इति भ्रूमध्ये बैन्दवाग्निना सङ्गृह्य । पात्रस्थेऽग्नौ
संयोज्य । ओं हूं वह्निचैतन्याय नमः इत्यभ्यर्च्य । रुद्रभुव-
57b कवचाय नमः इति निस्सार्य योजयेत् । समग्नित्रयमेकी-
कृतं विभाव्य । ओं सों ईशानाय जगद्भुवाय नमः ओं सें त-
त्पुरुषाय वचद्भुवाय नमः । ओं सुं अघोराय विश्वभुवाय नमः ।
ओं सिं वामदेवाय रुद्रभुवाय नमः । ओं सं सद्योजाताय
ब्रह्मभुवाय नमः । ओं सौं आप्यभुवाय भुवद्भुवाय नमः । इ-
त्यभ्यर्च्य । अयं कुमारो जरां जयतु दीर्घमायुर्यस्मै त्वं स्तन-
पृच्छ्यायायुर्वर्चो यशो बलम् । इत्यभिमन्त्र्य । धेनुमुद्रामृती-
कृत्य ओं भूर्भुव अस्त्राय नमः इति संरक्ष्य । रुद्रभुवकव-
चाय नम इत्यवकुण्ठ्य । स्वयं भूमिष्ठजानुः कुण्डे अग्निं त्रिः
परिभ्राम्य । तं गुहबीजमिति ध्यात्वा । योनिमार्गेण कुण्डमध्ये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वाभिमुखं संस्थाप्य । सदर्भमिन्धनमग्नौ निधाय ततो दर्भा-
ग्रेण हृदयाय नमः इति वागीश्वरेण वागीश्वरीं गर्भे निषि-
च्यमाणं गर्भाधानं विभाव्य । इन्धनेन जगद्भवहृदयाय
नमः इत्यग्निनाभिसमीपे परिसमूह्य । पुनः जगद्भवहृद-
याय नमः प्रतिपरिधानं शौचाचमनं दत्वा । गर्भरक्षार्थं
देव्याः करे शराणाना ओं सः भूर्भुव अस्त्राय नमः इति ग-
र्भकङ्कणं विभाव्य । ओं सं सद्योजाताय गर्भाग्नये नमः इत्य-
ग्निं सम्पूज्य । जगद्भवहृदयेनाहुतित्रयं तिलैर्दत्वा । तृतीये
मासि पुंसवनार्थं ओं सिं वामदेवाय रुद्रभुवाय नमः इति
सम्पूज्य । ओं सिं वचद्भवशिरसे स्वाहा इति त्र्याहुति ति-
58 a लैर्दत्वा । जलबिन्दून्निक्षिप्य । षष्ठे मासि सीमन्तोन्नयनार्थं
ओं सुं अघोराय विश्वभुवाय नमः इति सम्पूज्य । ओं सुं
विश्वभुवशिखाय स्वाहा इति त्र्याहुति तिलैर्दत्वा । ततः ओं
सुं विश्वभुवशिखाय नम इति वक्त्राङ्गकल्पनां विभाव्य दश-
मे मासि गर्भतः उद्भूतमग्निं विभाव्य । जातकर्मार्थं ओं सें
तत्पुरुषाय वचद्भवाय नमः इति सम्पूज्य । ओं सैं रुद्रभुव-
कवचाय स्वाहा इति त्र्याहुति तिलैर्दत्वा । गर्भमलापनुत्त्यै
स्नानार्थं जलेनाग्निं सम्प्रोक्ष्य । देव्याः पाणौ स्वर्णकङ्कणं ज-
गद्भवहृदयाय नमः इति दत्वा । सद्यस्सूतकनाशाय ओं सः
भूर्भुव अस्त्राय नमः इत्यग्निं सम्प्रोक्ष्य । अस्त्रकवचाभ्यां नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति कुण्डबाह्ये जलमभ्युक्ष्य । मेखलायां सदर्भहस्तेनाता-
ड्य । बालाग्निं भावयेत् । ध्यानम् —

द्विमुखं चैकहृदयं चतुश्श्रोत्रं द्विनासिकम् ।
आस्यद्वयं च षण्नेत्रं पिङ्गलं सप्तहस्तकम् ॥
त्रिमेखलं त्रिपादं च सप्तजिह्वं प्रकीर्तितम् ।
चतुश्शृङ्गं वृषारूढं बालादित्यसमप्रभम् ॥
उपवीतसमायुक्तं जटामकुटमण्डितम् ।
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके ॥
स्रुक्स्रुवौ चाक्षमालां च शक्तिं दक्षिणतः करे ।
तोमरं व्यजनं चैव घृतपात्रं तु वामके ॥
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरक्ता बहुरूपा सप्तजिह्वाः प्रकीर्तिताः ॥
हिरण्यादि चतस्रस्तु जिह्वा दक्षिणवक्त्रके ।
तिस्रस्तु सुप्रभादीनां जिह्वा वै वामवक्त्रके ॥
58 b हिरण्या वारुणे जिह्वा कनका मध्यमे स्थिता ।
रक्ता चोत्तरजिह्वायां कृष्णा याम्यदिशि स्थिता ॥
सुप्रभां पूर्वजिह्वास्यां अतिरक्तानले स्थिता ।
बहुरूपामीशजिह्वास्यां जिह्वास्थानं प्रकीर्तितम् ॥
सर्वसिद्धिप्रदं ह्येतद्बालवह्निस्वरूपकम् ।

इति ध्यात्वा । इत्यग्निमध्ये पश्चिमाननासीनं विभाव्य ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तं ईशानाय जगद्भुवाय नमः इति सम्पूज्य। ओं स्वः भू-
र्भुव अस्त्राय स्वाहा इति व्याहुति तिलैर्दत्वा। ओं ह्रां बा-
लाग्नये नमः इति नामकरणं कृत्वा। अस्योपस्थानाय
'जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि वि-
द्वान्। विश्वा अग्ने अभियुजो हविलाइऽश्रूयतामाभरा भो-
जनानि॥' सदर्भमिन्धनमग्नौ निक्षिप्य। अग्निरक्षार्थं
मध्यमेखलायां उत्तरपूर्वाग्रान् कुशविष्टरान् प्रागादिवे-
दादिऋचेनास्तीर्य। 'अग्निमीळे पुरोहितं यज्ञस्य देवमृ-
त्विजं होतारं रत्नधातमम्' इति मध्यमेखलायां पूर्वे। 'इषे
त्वोर्जेत्वा पायवस्थो पायवस्थः देवो वस्सविता प्रार्पयतु श्रे-
ष्ठतमाय कर्मणे' इति दक्षिणे। 'अग्न आयाहि वीतये गृ-
णानो हव्यदातये। निहोता तत्स बर्हिषि' इति पश्चिमे।
'शं नो देवीरभिष्टये आपो भवन्तु वीतये। शं योरभिश्रव-
न्तु नः। इति उत्तरे। पश्चात् अधोमेखलायां प्रागग्रानुद-
गग्रान् दद्या 'देवस्य त्वे' त्यादिमन्त्रेण पूर्वादिदिक्षु संस्ती-
59a र्य। पूर्वे 'देवस्य त्वा सवितुः प्रसुवे अश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां परिस्तरणामि। दक्षिणतः ओं भूर्भुवः
स्सुवः परिस्तरणामि। पश्चिमे 'उद्वयन्तमसस्परि पश्य-
न्तो ज्योतिरुत्तरम्। देवं देवत्रा सूर्यमगन्मज्ज्योतिरुत्तमम्'
परिस्तरणामि। उत्तरतः 'अग्न आयाहि वीतये गृणानो हव्य-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दाशुषे। निहोता तत्सबर्हिषि। परिस्तरणामि। दक्षिणा-
नुत्तरानुत्तरानधरान् कृत्वा। स्वस्य वामभागे त्रिभिर्दर्भैः पा-
त्रासनम्: स्वस्य दक्षिणे त्रिभिः ब्रह्मासनम्। पात्रासनोत्त-
रे प्रणीतासनं च विन्यस्य। पात्रासनमूले आज्यस्थालीं स्रु-
क्स्रुवं च प्रणीतापात्रं चरुस्थालीं प्रोक्षणीं चेध्मान् परि-
धींश्च शान्तिकुम्भं चाधोमुखानि क्रमशस्साधयित्वा दर्भैः
प्रच्छाद्य। अन्यानि सर्वहोमद्रव्याणि तद्वामभागे कुशोपरि
न्यस्य। दर्भद्वयेन द्वादशाङ्गुलायां तिरःपवित्रं कृत्वा। तेषु
पात्रेषु प्रोक्षणीपात्रमादाय स्वाग्रे निधाय तिरःपवित्रमक्ष-
तान्निधाय। जलमापूर्य। हस्तद्वयेनाङ्गुष्ठानामिकाभ्यां अग्नि-
मुखं त्रिरुत्पूय। पात्राण्युत्तानानि कृत्वा। पवित्रेण पाणिना
प्रोक्ष्य। तत्पात्रं सव्ये निधाय। होतुर्दक्षिणतो ब्रह्मासनं च
त्रिदर्भकूर्चं निधाय। अस्मिन् कूर्चे ब्रह्मन् ब्रह्माणि नमस्ते
ब्रह्मन् ब्रह्मणे नमः। ब्रह्माणमावाहयामि। ब्रह्मणे नमः सक-
लाराधनैः स्वर्चितम्। सप्तदर्भकूर्चेन प्रणीताप्रणयनम्।
59.6 प्रणीतापात्र ···· स्वाग्रे निधाय। कूर्चं निक्षिप्य। 'आपो
वा' इति मन्त्रेण जलमापूर्य। पुष्पाक्षतं निक्षिप्य। मूल-
मन्त्रेण त्रिरुत्पूय। ऊर्ध्वयोद ···· न् नासिकान्तमुत्थाप्य
'धरुणोऽसि धृतव्रतो वारुणमसि' इति मन्त्रेण होतुर्वाम-
भागे प्रणीतासनोपरि निधाय। मूलेनाभ्यर्च्य। 'तद्विष्णोः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।
तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्
परमं पदम्। इति मन्त्रेण जप्त्वा। ततः स्रुक्स्रुवौ सकुशा-
वूर्ध्ववदनाधोमुखौ निरीक्षणादिचतुस्संस्कारौ शुद्धौ गृ-
हीत्वा काष्ठत्वङ्निरसनाय हृदयेनाग्नौ प्रताप्य। हुं फडन्ता-
स्त्रेण कुशाग्रं मध्यमूलैः स्रुक्स्रुवाग्रं मध्यमूलानि स्पृष्ट्वा
तत्क्रमेण ओं हुं शिवतत्वाय नमः। ओं हूं शिवतत्वाधिपतये
रुद्राय नमः। ओं हिं विद्यातत्वाय नमः। ओं हिं विद्यातत्वा-
धिपतये विष्णवे नमः। ओं हां आत्मतत्वाय नमः। ओं हां
आत्मतत्वाधिपतये ब्रह्मणे नमः इति सम्पूज्य। तं कुशम-
ग्नौ निक्षिप्य। कवचेन त्रिसूत्रेण कण्ठे संवेष्ट्य। स्वदक्षिणे
कुशोपरि मूलेन संस्थाप्य। स्रुचि वह्निं स्रुवे स्कन्दं न्यस्य।
जगद्भवहृदयाय नमः इति गन्धपुष्पादिना सम्पूजयेत्।
60 a पश्चात् स्थालीपाकार्थं अग्निं विभज्य। तच्चुल्लीं प्रज्वाल्य।
विधिवत् स्थालीपाकं कृत्वा। तदन्नं भागत्रयं विधाय हो-
मबल्यर्थं भागमेकं कुम्भबिम्बमण्डलेषु निवेदनार्थं
भागमेकं आत्मभागमेकं होमबल्यर्थे भागमेकं चरुस्थाल्यां
गृहीत्वा। कुण्डस्य पश्चिमभागे स्वाग्रे निधाय तदुपरि
कूर्चं निक्षिप्य। श्री सुब्रह्मण्याय त्वा जुष्टं निर्वपामि।
त्रिभिः श्री सुब्रह्मण्याय त्वा जुष्टं प्रोक्षयामि इति प्रोक्षणी-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जलेन त्रिः प्रोक्ष्य । स्रुवेणाज्यमादाय । हविरभिघार्य । मेक्ष-
णेनोल्लिख्य ततश्शान्तिकुम्भं गृहीत्वा । स्वाग्रे निधाय त-
न्तुनावेष्ट्य । आपो वा इति मन्त्रेण गन्धतोयेनापूर्य । आम्र-
दलनालिकेरकूर्चं निधाय । कुण्डस्य वामभागे धान्योपरि
संस्थाप्य । ओं हां स्कन्दासनाय नमः स्कन्दमूर्तये नमः इ-
त्यासनमूर्तीरभ्यर्च्य । स्कन्दमूलेनावाह्य । पाद्याद्युपचारैः
सम्पूज्य धूपदीपनैवेद्यं दत्वा । मूलमन्त्रमष्टोत्तरशतं जप्त्वा ।
ततः आज्यस्थालीं गव्यमाज्यमापूर्य कुण्डपश्चिमे मेखलो-
परि विन्यस्य । निरीक्षणादि कृत्वा । स्कन्दरूपं विभाव्य । कु-
ण्डस्योपरि अग्नौ प्रताप्य । कुशाग्रेणाज्यं ' ब्रह्मजज्ञानं प्रथ-
मं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । स बुध्न्या मुपमा अस्य
60b विष्ठाश्शतश्च योनिमसतश्च वीव स्वाहा । ब्रह्मण इदं न मम ।
आज्यमैशान्यामग्नौ प्रताप्य । मेखलोपरि न्यस्त्वा । कुशाग्रे-
णाज्यबिन्दून् । ' इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे स्वाहा । विष्णव इदं न मम । पुनराज्य-
मैशान्यामग्नौ प्रताप्य । नाभौ धृत्वा । कुशाग्रेणाज्यबिन्दून्
' एषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदां निष्क्री-
तोयम् । यज्ञियं भागमेतु रायस्पोषाय यजमानस्य सन्तु '
स्वाहा । ईशानायेदं न मम । ततः दर्भद्वयेनाभिद्योत्य । दर्भाग्र-
द्वयं प्रच्छिद्य । प्रक्षाल्य प्रत्यूह्य । युग्मयुग्मेन दण्डेन त्रिः परि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भ्राम्य क्षिपेत्। प्रादेशमात्रं दर्भाग्रद्वयं निर्मितं मध्यग्र-
न्थिपवित्रकम् अङ्गुष्ठानामिकाभ्यां पुनराधारं त्रिरुत्पूय
पवित्रग्रन्थिं विसृज्य। पवित्रेभ्यः संस्पृश्य। अग्नावनु प्र-
हरति। पुनर्मध्यग्रन्थिपवित्रद्वयं प्रणवेन घृतमध्ये न्य-
स्त्वा। आज्यस्थाल्यामिडापिङ्गळां सुषुम्नां विभाव्य आ-
ज्यं त्रिभागं विभज्य। परिधीनादाय ' स्थविष्ठो मध्यमः
अणीयान्द्राघीयांच्छ्रिन्नोत्तरः। मध्यमं परिधिमुपस्पृश्याग्नौ
ऐशान्यां च। हृदयशिरसाघारौ समिधौ निधाय अनूयाज-
समिधमेकं प्रणीतोर्ध्वं निधाय जुषस्वनेनाभिमन्त्र्य जुषस्व
न समिधमग्नौ अद्य शोचा बृहद्यजतं धूममृण्वन्नुप-
61 a स्पृश दिव्यं सानस्तुवै संरश्मिभिः तत तनु सूर्यस्य इत्य-
भिमन्त्र्य। अदितेनुमन्वस्व। अनुमतेनुमन्वस्व। सरस्वते-
नुमन्वस्व। देव सवितुः प्रसुव। इति समन्त्रं परिषिच्य। ऊर्ध्व-
मेखलायां पूर्वे ओं हां ब्रह्मणे नमः। दक्षिणे विष्णवे नमः। प-
श्चिमे रुद्राय नमः। उत्तरे ईशानाय नमः। तस्य मेखलां पूर्वा-
द्यष्टदिक्षु कुण्डमध्ये अग्नये नमः। पूर्वादिषु जातवेदसे नमः।
सहोजसे नमः। अजिराप्रभवे नमः। वैश्वानराय नमः। नर्यप-
से नमः। पर्जतिराजसे नमः। विसर्पिणे नमः। यज्ञपुरुषाय नमः।
इति सम्पूज्य। मध्यमेखलायां पूर्वाद्यष्टदिक्षु ओं हां जयन्ता-
य नमः। अग्निशिखाय नमः। कृत्तिकापुत्राय नमः। भूतपतये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। सेनान्ये नमः। गुहाय नमः। हेमशूलाय नमः। विशा-
लाक्षाय नम इत्यभ्यर्च्य। अधो मेखलायां पूर्वाद्यष्टदिक्षु ओं
हां इन्द्राय नमः। अग्नये नमः। यमाय नमः। निरृतये नमः। वरु-
णाय नमः। वायवे नमः। कुबेराय नमः। ईशानाय नमः। इति
सम्पूज्य धूपदीपनैवेद्यं दत्वा। 'हे लोकपालाः, विघ्नसङ्घातं
निवार्य बालकं पालयिष्यथ' इति गुह्याज्ञां श्रावयेत्। तत इ-
ध्ममादाय अभिघार्य। एतस्मिन् कर्मण्यकाराद्यैः स्वरैः षोड-
शाङ्गुलानिध्मान् पलाशान् जुहुयात्। घृतं मूलेन व्याहुति
हुत्वा। पश्चादग्नये स्वाहेति व्याहुतीर्हुत्वा। ततः नेत्रोद्घट्ट-
61 b नार्थं स्रुवेणाज्यं दक्षिणाद् गृहीत्वा अग्नये स्वाहेति मनसा
ध्यायन्। उत्तरपरिधिं संस्पृश्य। क्षणया सन्ततं इत्यग्निदक्ष-
नेत्रे हुत्वा। अग्नये इदं न मम। वामभागमाज्यमादाय। सो-
माय स्वाहेत्युपांशु दक्षिणपरिधिसन्धिं संस्पृश्य। वामनेत्रे
हुत्वा। स्रुवेणाज्यं मध्यमादाय। ओं हां अग्नीषोमाभ्यां स्वाहा।
इत्यग्निमध्यनेत्रे हुत्वा। अग्नीषोमाभ्यामिदं। किञ्चिदीशाने।
स्रुवेणाज्यमादाय अग्नये स्विष्टकृते स्वाहा अग्निरीशाने हुत्वा।
अग्नये स्विष्टकृत इदं न मम। शुक्लपक्षे कृष्णपक्षे तु पूर्वं सो-
माय स्वाहा। पश्चादग्नये स्वाहा। विज्ञायते चूडान्तं उपनयन-
संस्कारार्थं अग्निं हृत्पद्मे द्वादशगृहीतेनाज्येन मूलमन्त्रं
हृदा सम्पुटितं वौषडन्तमूलेन पूर्णां दद्यात्। अनुस्रुवेणाज्यं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्रुचि सम्पूर्य तदग्रे पुष्पं दत्वा वामदक्षिणहस्ताभ्यां कुशा-
भ्यां अधोमुखस्रुवां शंखसन्निभमुद्रया गृहीत्वोत्थाय ऋजु-
कायकः समपादसमदृष्टिः खस्थितः दन्तैर्दन्तानधः स्पृशन्
गुरूपदिष्टमार्गेण मन्त्रमुच्चरन् यवप्रमाणेनाविच्छिन्नधारया
समस्तमाज्यं वह्नौ क्षिपेत्। इति पूर्णां विधायोपविश्य प-
श्चादाज्यहोमं जुहोति। सौम्ये ओं सें तत्पुरुषाय वचद्भुवाय
स्वाहा। याम्ये ओं सुं अघोराय विश्वभुवाय स्वाहा। ऐन्द्रे ओं
62 a सूं विश्वभुवायशिखाय स्वाहा। पश्चिमे ओं सैं ब्रह्मभुव-
नेत्रेभ्यः स्वाहा। मध्ये ओं सुं सुब्रह्मण्याय स्वाहा। पश्चात्
मुखाहुतिं जुहोति। युक्तो वह जातवेद पुरस्तादग्ने विद्धि
कर्म क्रियमाणं यथेदं त्वग्भिषक् भेषजस्याधिकर्ता त्वया
गानश्वान् पुरुषान् सनेमि स्वाहा। अग्नये जातवेदसे विच-
र्षिण इदं नमः। चतस्र आशाः प्रवरं त्वग्नय इमं नो यज्ञं नयतु
प्रजानन्। घृतं पिन्वन्नजरं सुवीरं ब्रह्म समुद्भवत्याहुतीनां
स्वाहा। घृतं पिन्वने ब्रह्मण इदं न मम। आनो भद्राः क्र-
तवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिदः। देवा नो
यथा सदमृद्वृधे। आसन्नप्रायुवो रक्षितारो दिवे दिवे स्वा-
हा। अप्रायुभ्यो रक्षेभ्यो देवेभ्य इदं न मम। विरूपाक्ष-
मासि बाधिष्ठा बिबाधिताः निरऋत्यै त्वा पुत्रमाहु सनः क-
र्माणि साधयन् स्वाहा। निरऋतिपुत्राय विरूपाक्षायेदं न

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मम। विरूपाक्षमहं यजे निजंघं शबलोदरम्। यो मा यं प-
रिबाधते। श्रियै पुष्ट्यै च नित्यधा तस्मै स्वाहा। विरूपाक्षा-
य श्रियायेदं न मम। या तिरश्चीनी पर्यसे हं विधरणीति
तां त्वा घृतस्य धारयाग्नौ संराधनीं यजे स्वाहा। अग्नये सं-
राधन्यायेदं न मम। संराधन्यै देव्यै स्वाहा। संराधन्यै दे-
व्यै इदं नमम। प्रसादन्यै देव्यै स्वाहा। प्रसादन्यै देव्यै
62 b इदं नमम। ओं भूः स्वाहा। अग्नय इदं न मम। ओं भुवः स्वा-
हा वायव इदं न मम। ओं सुवः स्वाहा सूर्यायेदं न ममः।
ओं भूर्भुवः सुवः स्वाहा प्रजापतये इदं न मम।' सद्योजातं
प्रपद्यामि सद्योजाताय वै नमः। भवो भवे नादि भवे भज-
स्व मां भवोद्भवाय नमः स्वाहा। सद्योजातायेदं न मम। वाम-
देवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कल-
विकरणाय नमो बलविकरणाय नमो बलप्रमथनाय
नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः स्वाहा।
वामदेवायेदं नमम। अघोरेभ्योऽथ घोरेभ्यो घोरघोर-
तरेभ्यः। सर्वदस्सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यो
नमः स्वाहा। अघोरायेदं न मम। तत्पुरुषाय विद्महे म-
हादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् स्वाहा। तत्पुरु-
षायेदं न मम। ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवों स्वाहा। ईशानायेदं न मम। अग्निर्मूर्धा दिवः ककु-
त्पतिः पृथिव्या अयं अपां रेतांसि जिन्वति स्वाहा। अग्नय
इदं न मम। अग्निर्मे वाचि श्रितः वाक् हृदये हृदयं मयि
अहममृते अमृतं ब्रह्मणि स्वाहा। अग्नय इदं न मम। अ-
ग्निं मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरामृताय जा-
तमग्निं कविं सम्राज मतिथिं जनानामासन्नापात्रं जनय-
न्तु देवाः स्वाहा। मूर्धानायेदं न मम। या ते रुद्र शिवा
तनूरघोरा पापकाशिनी। तया नस्तनुवा शन्तमया गि-
63 a रिशन्ताभिशाकशीहि स्वाहा। रुद्रायेदं न मम। मर्माणि ते
वर्मभिश्छादयामि सोमस्त्वा राजा अमृतो नाभिवस्तां उरो-
र्वरीयो परि वस्ते अस्तु। जयन्तं त्वामनुजन्तु देवाः स्वाहा।
सोमायेदं न मम। त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा। त्रि-
यम्बकायेदं न मम। प्रमुञ्च धन्वनस्त्वं उभयोरग्नियो-
र्ज्याम् याश्च ते अस्तु इषवः पराता भगवो वपा स्वाहा।
रुद्रायेदं न मम। सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु पुरु-
षो वै रुद्रस्सन्महो नमः स्वाहा। रुद्रायेदं न मम। कद्रुद्राय
प्रचेतसे मीढुष्टमाय तव्यसे वेशेम शन्तमं हृदे। सर्वो
ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु स्वाहा। रुद्रायेदं न मम।
द्यौ रीर्मिमाय सलिलानि चक्षत्येकपदी द्विपदी सा चतुष्पदी।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्।
स्वाहा। गौर्यै इदं न मम। अयं कुमारो जरां जयतु दीर्घ-
मायुः यस्मै त्वं स्तनप्रछयायायुर्वर्चो यशो बलं स्वाहा। सु-
ब्रह्मण्यायेदं न मम। ओं ह्रीं वल्ल्यै स्वाहा। वल्ल्या इदं न
मम। ओं श्रीं देवगजायै स्वाहा। ओं सौं आप्यभुवाय भु-
63b वद्भुवाय स्वाहा। ओं सं सद्योजाताय ब्रह्मरूपाय स्वाहा।
ओं सिं वामदेवाय रुद्रभुवाय स्वाहा। ओं सुं अघोराय विश्व-
भुवाय स्वाहा। ओं सें तत्पुरुषाय वचद्भुवाय स्वाहा। ओं सों
ईशानाय जगद्भुवाय स्वाहा। इति प्रत्येकं पञ्च पञ्चाहुती-
र्हुत्वा। वक्त्रसन्धानार्थं ओं हं हिं सद्योजातवामदेवाभ्यां
स्वाहा। ओं हिं हुं वामदेवाघोराभ्यां स्वाहा। ओं हुं हें अ-
घोरतत्पुरुषाभ्यां स्वाहा। ओं हें हों तत्पुरुषेशानाभ्यां स्वाहा।
ओं सों सें जगद्भुववचद्भुवाभ्यां स्वाहा। ओं सें सुं वचद्भुव-
विश्वभुवाभ्यां स्वाहा। ओं सुं सिं विश्वभुवरुद्रभुवाभ्यां स्वाहा।
ओं सिं सं रुद्रभुवब्रह्मभुवाभ्यां स्वाहा। ओं सौं आप्यभुवाय-
भुवद्भुवाभ्यां स्वाहा। इति वक्त्रसन्धानम्। जिह्वासन्धानार्थं
हिरण्याकनकाभ्यां स्वाहा। कनकारक्ताभ्यां स्वाहा। रक्ताकृष्णा-
भ्यां स्वाहा। कृष्णासुप्रभाभ्यां स्वाहा। सुप्रभातिरक्ता-
भ्यां स्वाहा। अतिरक्ताबहुरूपाभ्यां स्वाहा। ओं हं हिं हुं हें
हों सद्योजातवामदेवाघोरतत्पुरुषेशानाभ्यां स्वाहा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हों हें हुं हिं हं ईशानतत्पुरुषाघोरवामदेवसद्योजाता-
भ्यां स्वाहा। ओं हौं हं हिं हुं हें भुवद्भुवब्रह्मभुवरुद्रभुव-
64 a विश्वभुववचद्भुवजगद्भुवाभ्यां स्वाहा। ओं सों सें सुं सिं सं
जगद्भुववचद्भुवविश्वभुवरुद्रभुवब्रह्मभुवभुवद्भुवाभ्यां
स्वाहा। हिरण्याकनकारक्ताकृष्णासुप्रभातिरक्ताबहुरूप-
पाभ्यां स्वाहा। इत्यग्निं दिशो वायुगता नैऋतं ईशानगतां
घृतधारां जुहुयात्। पश्चात् अग्नये स्वाहेति पञ्चविंशत्याहु-
तिभिरन्नप्राशनम्। ओं सं सद्योजाताय ब्रह्मभुवाय स्वाहा
इति नवाहुत्या चौलम्। ओं सिं वामदेवाय रुद्रभुवाय स्वाहे-
ति पञ्चाहुत्या उपनयनम्। ओं सुं अघोराय विश्वभुवाय
स्वाहेति सप्ताहुत्या व्रतम्। ओं सें तत्पुरुषाय वचद्भुवाय स्वा-
हेति त्र्याहुत्या समावर्तनम्। ओं सों ईशानाय जगद्भुवाय
स्वाहेति सप्ताहुत्या वैवाह्यं कुर्यात्। ततो नामकरणार्थं ईशा-
नाय जगद्भुवाय नमः इत्यग्निं सम्पूज्य। ओं सः भूर्भुवअ-
स्नाय स्वाहा इत्याहुतित्रयं दत्वा। गुहाग्नेति नाम कृत्वा।
वागीश्वरं वागीश्वरीं सम्पूज्य। विसृज्य। बालाग्निहृदये गु-
हाग्निं ध्यायेत्। तद्यथा — ओं सां गुहाग्न्यासनाय नमः। गु-
हाग्निमूर्तये नमः। ध्यानम् ——

अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं

स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वरदमनलखेटं ह्यङ्कुशं स्रुचि वामे

दधत वृषभसंस्थं भावयेयं गुहाग्निम्॥

64b ओं हां हीं हूं गुहाग्नये नमः इति मूलेनावाह्य उपचारैस्स-म्पूज्य। 'त्वमग्ने ऐश्वरं तेजः पवमानं परमं यतः' इति मनसा ध्यात्वा। ओं हीं गुहाग्नये स्वाहा इत्याहुतित्रयं हुत्वा। तदावृतदेवानामिन्द्रादीशानान्तं हुत्वा। पश्चात्कुण्डमध्ये ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये नमः। इत्यासनमूर्तिं विन्यस्य। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं

वज्रशक्तिवरदाभयपाणिनम्।

देवलोकरिपुघ्नमविघ्नदं

नौमि रुद्रभवं शिखिवाहनम्॥

इति ध्यात्वा। ओं हां सुं सुब्रह्मण्यशरवणभवाय नमः इति मूलेन कुण्डाग्निमध्ये श्रीसुब्रह्मण्यमावाहयामि इत्यावाह्य। उपचारैस्सम्पूज्य। ओं हीं वल्ल्यै नमः। ओं श्रीं देवगजायै नमः। इति शक्तिद्वयं सम्पूज्य। तदावृतदेवानां जयन्ताय नमः अग्निशिखाय नमः। कृत्तिकापुत्राय नमः। भूतपतये नमः। सेनान्ये नमः। गुहाय नमः। हेमशूलाय नमः। विशालाक्षाय नमः। इत्यावृतदेवानभ्यर्च्य। पाद्याद्युपचारैस्सम्पूज्य। पश्चात्पूर्णां जुहुयात्। तद्यथा — स्रुवेण स्रुग्गर्ते आज्येनापूर्य पुष्करोपर्य-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धोमुखं स्रुवं कृत्वा तदग्रे पुष्पं दत्त्वा। वामदक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां उरःसव्येन संलग्नौ तावुभावुपादाय समपादसमुत्थोर्ध्वकायो नाभ्यां तिर्यग्विधाय। स्रुगग्रादत्तदृष्टिर्वौषडन्तमूलाप्लुतमुच्चरन्। वामस्तनान्तं स्रुङ्कुलमानीय। घृतधारां बिन्दुस्थानाद्विनिस्सृतामृतधारामिति संस्मरन्।
65a यवप्रमाणेनाविच्छिन्नधारया समस्तमाज्यं वह्नौ जुहुयात्। इति पूर्णां दत्त्वा। स्थित्वा —

## — नवकुण्डहोमः —

नवकुण्डे वा पञ्चकुण्डे वा ऋत्विजां होममाचरेत्। गुरोरनुज्ञामासाद्य तत्कुण्डे निवेशयेत्। इन्द्राग्नियमस्थाः उदङ्मुखाः। शेषान् प्राङ्मुखानुपवेश्य। पादौ प्रक्षाल्याचम्य भस्मधारणं कृत्वा। सकलीकृत्य। नित्यवत्कृतभूतशुद्ध्यादि एकत्रिंशत्कलान्यासं मातृकान्यासं यथाहोमादिकरणं देवं हृत्पद्मे सम्पूज्य। अन्तर्यजनं कृत्वा। अर्घ्यपात्रादि संसाध्य। कुण्डसंस्कारं उल्लेखनादिकं कृत्वा। तद्यथा — जगद्भुवाय नमः। निरीक्षणम्। वचद्भुवाय नमः प्रोक्षणम्। विश्वभुवाय नमः कुशैस्ताडनम्। रुद्रभुवाय नमः अभ्युक्षणम्। ब्रह्मभुवाय नमः खननोद्धारणम्। भुवद्भुवाय नमः अवकीरणम्। सद्योजाताय नमः पूरणम्। वामदेवाय नमः समीकरणम्। अघोराय नमः सेचनम्। तत्पुरुषाय नमः अवकुण्ठनम्। ईशानाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः मार्जनम् । मूलेन समालेपनम् । कुण्डस्य पश्चिमे ओं ह्रां
निवृत्तिकलायै नमः । उत्तरे ओं ह्रीं प्रतिष्ठाकलायै नमः । याम्ये
ओं ह्रूं विद्याकलायै नमः । पूर्वे ओं ह्रैं शान्तिकलायै नमः । म-
ध्ये ओं ह्रौं शान्त्यतीतकलायै नमः इत्यभ्यर्च्य । नाभ्यां बीज-
मुख्येन कुण्डस्य त्रिसूत्रवेष्टनम् । कण्ठे संवेष्ट्य । तस्मिन्मूले-
नाभ्यर्च्य । प्रागग्रोदगग्रे खात्रयं ब्रह्मजज्ञानादि मन्त्रषट्केण
65b कुर्यात् । पूर्ववत् उल्लेखनं कृत्वा कुण्डमध्ये पूर्वोत्तराग्रान्
त्रीं स्त्रीन् दर्भान्विन्यस्य । प्रधानकुण्डाग्निं ताम्रपात्रे वा मृच्छ-
रावेण वा गृहीत्वा । पूर्वादिक्रमेण कुण्डमध्ये निक्षिप्य प्रज्वा-
ल्य इन्धनं निक्षिप्य तस्योपस्थानाय 'जुष्टो दमूना अति-
थिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्ने अभियु-
जो विहत्या शत्रूयतामापरा भोजनानि ।' इत्युपस्थानं कृत्वा ।
सदर्भमिन्धनमग्नौ निक्षिप्य । अग्निरक्षार्थं मध्यमेखलायां
उत्तरपूर्वाग्रान् कुशविष्टरान् प्रागादिवेदादिऋचेनास्तीर्य ।
यथा 'अग्निमीळे' इति मन्त्रेण मध्यमेखलायां पूर्वे । 'इषे
त्वोर्जे त्वा' इति मन्त्रेण दक्षिणे । 'अग्न आयाहि वीतये' इति
मन्त्रेण पश्चिमे । 'शं नो देवी' रिति मन्त्रेण उत्तरे । इति क्रमेण
परिस्तीर्य । अधो मेखलायां प्रागग्रानुदगग्रांश्च दर्भान् दश
देव सवेत्यादिमन्त्रेण पूर्वादिदिक्षु संस्तीर्य । दक्षिणानुत्तरा-
नुत्तरानधरान् कृत्वा पश्चात् प्रधानकुण्डसमीपे पूर्वसंस्कार-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृतसर्पिषा दिक्कुण्डहोमार्थं किञ्चित्किञ्चिदादाय पूर्वादि-
क्रमेणाज्यस्थाल्यां नाभौ धृत्वा। ततः जुषस्व न समिधमग्ने
इति जपित्वा। 'अदितेऽनुमन्यस्व' इत्यादि समन्तात्परिषिच्य
ऊर्ध्वमेखलायां पूर्वादीशानान्तं अग्नये नमः जातवेदसे नमः
सहोजसे नमः अजिरांप्रभवे नमः वैश्वानराय नमः नर्यापसे
नमः पङ्क्तिराजसे नमः विश्वमध्यपाणे नमः। यज्ञपुरुषाय नमः।
66a मध्यमेखलायां पूर्वाद्यष्टदिक्षु ओं हां जयन्ताय नमः अग्नि-
शिखाय नमः। कृत्तिकापुत्राय नमः। भूतपतये नमः। सेनान्ये
नमः। गुहाय नमः। हेमशूलाय नमः। विशालाक्षाय नमः इत्य-
भ्यर्च्य। अधोमेखलायां इन्द्राय नमः अग्नये नमः यमाय नमः
निरृतये नमः वरुणाय नमः वायवे नमः सोमाय नमः ईशा-
नाय नमः इति सम्पूज्य। पश्चात् भूरादिभिर्हुत्वा। ततः अष्ट-
कुण्डदेवतानामकरणम्॥

सुब्रह्मण्यः कुमारश्च षण्मुखो ब्रह्मचारिणः।
सेनापतिर्गजारूढो बालश्च शिखिवाहनः॥

पूर्वादीशानपर्यन्तं कुण्डानामधिदेवताः॥

पूर्वकुण्डे ओं हां सुब्रह्मण्यासनाय नमः सुब्रह्मण्यमूर्तये
नमः। ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं

सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सौं सुब्रह्मण्याय नम इति मूलेन अस्मिन् कुण्डाग्निमध्ये सुब्रह्मण्यमावाहयामि स्थापनादि कृत्वा । पाद्याद्युपचारैस्सम्पूज्य । आग्नेयकुण्डे ओं हां कुमारासनाय नमः कुमारमूर्तये नमः । ध्यानम् —

सव्यद्वये निशितशक्तिसमादधानं

वामद्वये भरतकुक्कुटखेटकं च ।

66 b वल्लीपतिं विबुधलोचनपूर्णचन्द्रं

कल्याणदाननिरतं कलये कुमारम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्वा । ओं सां कुमाराय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये श्रीकुमारमावाहयामि । स्थापनादि कृत्वा । पाद्याद्युपचारान् दत्वा । दक्षिणकुण्डे ओं सां षण्मुखासनाय नमः षण्मुखमूर्तये नमः । ध्यानम् —

वन्दे सिन्धूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं

षड्वक्त्रं देवसेनामदनरिपुसुतावल्लभं द्वादशाक्षम् ।

शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते

चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

इति ध्यात्वा पाद्यादिसर्वोपचारैस्सम्पूज्य । नैऋतकुण्डे ओं सां ब्रह्मचार्यासनाय नमः । ब्रह्मचारिमूर्तये नमः । ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कल्पद्रुमं प्रणमतां कमलारुणाभं

स्कन्दं भुजद्वयमनामयमेकवक्त्रम्।

कात्यायनीसुतमहं कटिबद्धवामे

कौपीनदण्डधरदक्षिणहस्तमीडे ॥

इति ध्यात्वा। पुष्पाञ्जलिं दत्त्वा। ओं सां ब्रह्मचारिणे नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये श्रीब्रह्मचारिणमावाह-
67 a यामि। स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा। पश्चिमकु-ण्डे ओं सां सेनापत्यासनाय नमः। सेनापतिमूर्तये नमः।

ध्यानम् —

सौम्यादित्यप्रदीप्तद्वादशनयनं षण्मुखं मन्दहासम्

वामाङ्के सुस्थितायां सरसीरुहधृतालिङ्गितायां सुहस्तम्।

उत्तुङ्गोरस्तनाग्रो विहितकरतलाभीतिखेटादिशूलं

ह्रादिन्युद्दीप्तशक्तिध्वसनवनगता कुक्कुटाब्जेनहस्तम्॥

इति ध्यात्वा। पुष्पाञ्जलिं दत्त्वा। ओं सां देवसेनापतये नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं सेनापतिमावाहया-मि। स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा। वायुकुण्डे ओं सां गजारूढासनाय नमः। गजारूढमूर्तये नमः। ध्यानम् —

एकाननं द्विनयनं वरकुक्कुटौ च

वामद्वये निशितशक्त्यभयौ द्वयेन्ये।

बिभ्राणमीश्वरसुतं तपनायुताभं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नित्यं नमामि गजवाहनमिष्टसिद्ध्यै ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां गजारूढाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं गजारूढमावाहयामि । पाद्याद्युपचारं दत्त्वा । उत्तरकुण्डे ओं सां बालासनाय नमः बालमूर्तये नमः । ध्यानम् —

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम् ।
विप्रप्रियकरं वन्दे बालरूपरविप्रभम् ॥

इति ध्यात्वा । ओं सां बालाय नमः । इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं बालरूपमावाहयामि । पाद्याद्युपचारं दत्त्वा । ईशानकुण्डे ओं सां शिखिवाहनासनाय नमः । शिखि-
67b वाहनमूर्तये नमः । ध्यानम् —

विद्रुमप्रभमेकमुखं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभुवं शिखिवाहनम् ॥

इति ध्यात्वा । ओं सां शिखिवाहनाय नमः इति मूलेनास्मिन्कुण्डाग्निमध्ये ओं शिखिवाहनमावाहयामि । पाद्याद्युपचारं दत्त्वा ॥ — इति नवकुण्डपक्षविधिः —

## — अथ पञ्चाग्निकुण्डविधिः —

पञ्चाग्न्यायतनं चेत् पञ्चकुण्डाधिदैवतं प्रधानकुण्डे मूलबेराकृतिं ध्यात्वा होमयेत् । दिक्कुण्डचतुष्केषु —

सेनानीः कार्तिकेयश्च स्कन्दश्शरवणोद्भवः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वादिषु चतुर्दिक्षु कुण्डानामधिदेवताः ॥

पूर्वकुण्डे ओं सां सेनान्यासनाय नमः । सेनानीमूर्तये नमः ॥

ध्यानम् — अभयलिहितकराङ्कः अङ्कुशं शक्तिशूलान्

वरदकुलिशपाशं पद्महस्तौ गदां च ।

दधत धनुसुबाहुं द्वादशायां तु हस्ते

द्विदशकमलनेत्रं देवसेनानिमीडे ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्त्वा । ओं सां सेनान्ये नमः इति
मूलेनास्मिन् कुण्डाग्निमध्ये ओं सेनानीमावाहयामि ।
पाद्याद्युपचारं दत्त्वा । दक्षिणकुण्डे ओं सां कार्तिकेयास-
नाय नमः । कार्तिकेयमूर्तये नमः । ध्यानम् —

वरदकुलिशखेटं वामहस्तत्रये च

दधतमभयशक्तिं खड्गमन्यत्रये च ।

तरुणरविसमाभं साधुभिः पूज्यमानं

कमलवदनमेकं कार्तिकेयं नमामि ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्त्वा । ओं सां कार्तिकेयाय नमः ।
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं कार्तिकेयमावाह-
68a यामि । पाद्याद्युपचारं दत्त्वा । पश्चिमकुण्डे ओं सां स्कन्दा-
सनाय नमः । स्कन्दमूर्तये नमः । ध्यानम् —

वामे करे च युगले वरकुण्डिकायां

सव्येऽक्षसूत्रमभयं दधतं विशाखम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वल्लीयुतं वनजलोचनमेकवक्त्रं

वन्दामहे वनजसम्भवशासितारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं स्रां स्कन्दाय नमः इति मूले-नास्मिन् कुण्डाग्निमध्ये ओं स्कन्दमावाहयामि। पाद्याद्युपचारं दत्त्वा। उत्तरकुण्डे ओं स्रां शरवणोद्भवासनाय नमः। शरवण-मूर्तये नमः। ध्यानम् —

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटप्रासदण्डौ

टङ्कं बाणं वरदमभयं कार्मुकं च द्विहस्तम्।

पीतं सौम्यं द्विदशनयनं केकिस्याकमीन्द्रैः

सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा ओं स्रां शरवणोद्भवाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शरवणोद्भवमावाह-यामि। स्थापनादि कृत्वा। पाद्यादिसर्वोपचारैस्सम्पूज्य ॥

पञ्चकुण्डविधिः प्रोक्त एककुण्डविधिं शृणु।

एकाग्नि रायतनं चेत् मूलबेराकृतिं यजेत्। यथोचितकु-ण्डस्य यथोचितदेवमाधारशक्त्यादि आसनमूर्तिध्यानपुर-स्सरं सम्पूज्य तत्तन्मन्त्रेणाष्टोत्तरशतमाज्याहुतिं हुत्वा। ततः प्रधानकुण्डादि सर्वत्र कुण्डेषु तत्तन्मूलमन्त्रेण सम्पूज्य तत्त-न्मूलमन्त्रेण समिदन्नाज्याहुतिं द्रव्यं प्रति सहस्रं वा तदर्धं

68 b वा अष्टोत्तरशतं वा हुत्वा। द्रव्यं प्रति व्याहृतिभिर्हुत्वा विशेष-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्रव्यैश्च प्रत्येकं पञ्चविंशतिवारं हुत्वा । तद्यथा —

समिधा सद्यमन्त्रेण आज्यं वामेन हूयते ।
अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु ॥
सिद्धार्थैरीशमन्त्रेण हृदयेन यवं हुनेत् ।
तिलं च शिरसा हुत्वा मुद्गं च शिखया हुनेत् ॥
कवचेन हुनेन्माषं सक्तुर्नेत्रेण हूयते ।
कदलीफलमस्त्रेण अपूपं मूलमन्त्रतः ॥
निष्पावं वल्लिमूलेन गुहास्त्रे चणकं तथा ।
जयन्तं वैणवं हुत्वा कुलत्थं अग्निमन्त्रतः ॥
कृत्तिकापुत्रमन्त्रेण आढकं च हुनेत्क्रमात् ।
भूतनाथं च मन्त्रेण गोधूमं चैव होमयेत् ॥
सेनानीरिति मन्त्रेण प्रियङ्गुं चैव होमयेत् ।
गुहमन्त्रं समुच्चार्य नालिकेरं हुनेत् क्रमात् ॥
हेमशूलं च मन्त्रेण क्षीरेणैव तु होमयेत् ।
विशालाक्षमन्त्रमुच्चार्य ताम्बूलं जुहुयात्क्रमात् ॥
एलादिवासनाद्रव्यं मूलमन्त्रेण होमयेत् ।
शतमर्धं तदर्धं वा तदर्धार्धमथापि वा ॥
द्रव्यान्ते व्याहृतिं हुत्वा सर्वकुण्डानि होमयेत् ॥

ओं शरवणोद्भवाय षण्मुखाय शिखिवाहनाय अभय-
वरप्रदाय शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राय ओं ह्रां ह्रीं सौं शरवणभव हुं फट् स्वाहा। इति महामन्त्रं
पञ्चविंशतिवारं हुत्वा। ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवण-
69 a भव स्वाहा। शकुन्यै स्वाहा। रेवत्यै स्वाहा। पूतायै स्वाहा। म-
हापूतायै स्वाहा। निशीथिन्यै स्वाहा। मालिन्यै स्वाहा। शीत-
लायै स्वाहा। भूत्यै स्वाहा। विश्वतोमुख्यै स्वाहा। इत्येकैक-
वारं हुत्वा। ओं ह्रीं वल्ल्यै स्वाहा। ओं श्रीं देवगजायै स्वाहा।
जयन्ताय स्वाहा। अग्निशिखाय स्वाहा। कृत्तिकापुत्राय स्वाहा।
भूतपतये स्वाहा। सेनान्ये स्वाहा। गुहाय स्वाहा। हेमशू-
लाय स्वाहा। विशालाक्षाय स्वाहा। ओं भूः स्वाहा अग्नय इदं
नमम। भुवः स्वाहा वायव इदं न मम। सुवः स्वाहा सूर्यायेदं
न मम। ओं भूर्भुवः सुवः स्वाहा प्रजापतय इदं न मम। इति
सर्वत्र कुण्डे होमयेत्। हव्यवाहमभिमातिषाहं रक्षोहणं
पृतनासु जिष्णुम्। ज्योतिष्मन्तं दीद्यतं पुरन्धिं अग्निं
स्विष्टकृतमाहुवेमोम्। स्विष्टमग्ने अभि तत् प्रणाहि विश्वा
देवा पृतना अभिष्या। उरुं नः पन्था प्रतिशं विभाहि ज्योति-
ष्मद्धेह्यजरन्न आयुः स्वाहा। अग्नये स्विष्टकृत इदं न मम।
इति सर्वत्र हुत्वा। ततः सर्वत्र पूर्णां जुहुयात्। तद्यथा —
स्रुवेण स्रुग्गर्ते आज्येनापूर्य पुष्करोपर्यधोमुखं स्रुवं न्यस्य
तदग्रे पुष्पं दत्त्वा। वामदक्षिणहस्ताभ्यां शंखवत्संसक्ताभ्यां
69 b उरसन्येन संलग्नौ तावुभावुपादाय समपादमुत्थायोर्ध्व-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कायेनाभ्यां तिर्यग्विधाय स्रुगग्रदत्तदृष्टिः ओं सौं सुब्रह्म-
ण्याय वौषडिति मूलं प्लुतमुच्चार्य वामस्तनान्तं स्रुङ्मूलमा-
नीय अनुद्विग्नः घृतधारां बिन्दुस्थानाद्विनिस्सृतामृतधा-
रामिति संस्मरन् यवप्रमाणेनाविच्छिन्नधारया समस्तमा-
ज्यं वह्नौ क्षिपेत्। इति सर्वत्र पूर्णां विधाय ततस्सर्वत्राज्या-
हुतीर्जुहोति। तद्यथा - तत्तन्मूलमन्त्रेण सहस्रं वा तदर्धं
वाष्टोत्तरशतं वा कुण्डं प्रति जुहुयात्। पश्चात्प्रायश्चित्तार्थं
ओं सुं अघोराय विश्वभुवाय स्वाहा। ओं सः भूर्भुव अस्त्राय
स्वाहा इति प्रत्येकमष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा अ-
नाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथं। अग्ने तद्दस्य क-
ल्पय त्वं वेत्थ यथातथं स्वाहा। अग्नय इदं न मम। (यत् पाक-
त्रा मनसा) पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य
कल्पय। त्वं वेत्थ यथातथं स्वाहा। अग्नये इदं नमम। यत्
पाकत्रा दीनदक्षाणा यज्ञस्य मन्वते मर्तासः। अग्निष्टुद्धोता
क्रतुविद्विजानन् नेजिष्ठो देवां क्रतुशो यजामि स्वाहा। अग्नये
इदं न मम। ततो व्याहृतिभिर्हुत्वा पश्चात्पूर्ववत् पूर्णां विधाय
ततः प्रधानकुण्डं विना। दिक्सर्वत्र कुण्डेषु जुषस्व न समि-
70 a धमग्ने इति जपित्वा। अदिते नु मग्गस्था: इत्यादि समन्त्रं प-
रिषिच्य। परिस्तरणस्थः जयन्तादीनामिन्द्रादीनां चरुणा बलिं
दत्त्वा। नमोऽन्तैरभ्यर्च्य। उद्वास्य पश्चाद्धोमसंख्याया दशगुणं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जप्त्वा उपस्थानं कृत्वा। यत्ते अग्ने तेजस्तेन अहं तेजस्वी भूयासम्। यत्ते अग्ने हरस्तेन अहं हरस्वी भूयासम्। यत्ते अग्ने वर्चस्तेन अहं वर्चस्वी भूयासम्। मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु। मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु। मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।

यत्कृतं तु मया देव परिपूर्णं तदस्तु मे॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्र यानि वै।

यानि शेषामशेषाणां शिवानुस्मरणं परम्॥

अभिवादे नमस्कृत्य। ततः स्थित्वा प्रायश्चित्तार्थं अघोरेणाष्टोत्तरशतं हुत्वा। परिस्तरणं परिहृत्य। तद्भस्म त्रियम्बकेन ललाटे धृत्वा। समित्कुशपुष्पसहितं हस्तप्रासादेन तत्तत्कुण्डाग्निं सङ्गृह्य। ओं हूं अग्नये नमः इति मूलमन्त्रं हृदा सम्पुटितम् प्रधानकुण्डमध्ये अग्निमावाह्य योजयेत्। अवकुण्ठ्य। धेनुमुद्रां दत्त्वा योजनिकार्थं अग्निं सन्दीप्य। पश्चात् पूजाहोमजपफलसिद्ध्यर्थं सार्घ्यजलेन हस्तेन सहृदा मूलमन्त्रेण सर्वैं ऋत्विग्भिः आचार्यहस्ते निवेदयेत्। आचार्यं गृहीत्वा कुम्भाग्रे निवेदयेत्। पश्चादा-
70b चार्यः प्रधानकुण्डस्य पश्चिमभागे पूर्ववत् स्थित्वा। व्याहृतिभिर्हुत्वा। ततः मन्त्रतर्पणदीपनार्थं जुहुयात्। यथा —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलमन्त्रमष्टोत्तरशतं ब्रह्माङ्गानि च तद्दशांशतो हुत्वा। ओं
सौं सुब्रह्मण्याय स्वाहा इत्यष्टोत्तरशतं हुत्वा। इति मन्त्रः।
ओं सों ईशानाय जगद्भवाय स्वाहा। ओं सें तत्पुरुषाय वच-
द्भवाय स्वाहा। ओं सुं अघोराय विश्वभुवाय स्वाहा। ओं सिं
वामदेवाय रुद्रभुवाय स्वाहा। ओं सं सद्योजाताय ब्रह्मभु-
वाय स्वाहा। ओं सौं आप्यभुवाय भुवद्भवाय स्वाहा। ओं
सां जगद्भवहृदयाय स्वाहा। ओं सिं वचद्भवशिरसे स्वाहा।
ओं सुं विश्वभुवशिखाय स्वाहा। ओं सैं रुद्रभुवकवचाय
स्वाहा। ओं सौं ब्रह्मभुवनेत्राय स्वाहा। भूर्भुव अस्त्राय स्वा-
हा। इति मन्त्रं प्रति दशवारं हुत्वा। इति तर्पणम्। ओं सौं
शरवणभवाय स्वाहा। इति पञ्चविंशतिवारं हुत्वा। इति
दीपनम्। एवं मन्त्रतर्पणदीपनम्। ततो देशकालदुर्नि-
मित्तदुस्स्वप्नद्रव्यलोपमन्त्रलोपतन्त्रलोपसमकालसङ्कर-
दोषनिवृत्त्यर्थं प्रासादाहुतिशतं वा पञ्चविंशतिं वा हुत्वा।
पश्चात् नाडीसन्धानं कुर्यात्। तद्यथा — मूलेनाहुतित्रयं
दत्वा। ओं हौं हलूं गुहाग्निभ्यां स्वाहा। इति सन्धाय। मूल-
मन्त्रमुच्चार्य। वह्निस्थगुहनासाविनिर्गतज्योतीरूप-
71 a शिखां यागस्थगुहशिखालीनां रश्मिमात्रावियोगेनावि-
च्छिन्नामुभयत्र सकृदास्पदं ध्यायेत्। एवं कुम्भं यागा-
ग्निगुहमात्मानं सह नाडीसन्धानं कुर्यात्। तद्यथा ——

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुशच्छलेन बिसतन्तुनिभां कुम्भस्थगुहनाडीं पिङ्गलया विनिस्सृत्य स्वनाड्यामिडया प्रविश्य विलीनेति विभाव्य गुहाणुना रेचकेन विनिस्सृत्य। वह्निस्थगुहनाडीं पिङ्गलया प्रविश्य। विलीनं विभाव्य। गुहमूलेन रेचकेन इडया विनिस्सृत्य। स्वनाड्या पिङ्गलया प्रविश्य। विलीनेति विभाव्य। गुहाणुना रेचकेन विनिस्सृत्य। कुम्भस्थगुहहृदयं तत्पूरकेण प्रविश्य। रेचकेन विनिस्सृत्य स्वहृदयं पूरकेण प्रविशेत्। एवं कुम्भं अग्निस्थगुहाभ्यां आत्मना सह नाडीं सन्धाय॥ बहुदिवसपक्षे – नाडीसन्धानं कुर्यात्। एकदिवसपक्षे नाडीसन्धानं विना तत्सन्धानार्थं गुहमूलेन पञ्चविंशतिवारं हुत्वा व्याहृतिभिर्हुत्वा। ततः बहुरूपेण पञ्चास्त्रेण पापभक्षणमन्त्रेण नवात्ममन्त्रेण शम्बरेण असिना प्रत्येकमष्टोत्तरशतं वा पञ्चाशतं पञ्चविंशतिं वा हुत्वा। तद्यथा – बहुरूपमन्त्रः। ओं हुं अघोराय स्वाहा। इति हुत्वा। पञ्चास्त्रमन्त्र कुर्वकै....। ——

71 b शिवास्त्रं क्षुरिकास्त्रं च व्योमास्त्रं पाशुपतास्त्रम्।
अघोरास्त्रं च इत्येतत् पञ्चास्त्रं च इहोच्यते॥

शिवास्त्रमन्त्रः – ओं हैं हर हर शिव शिव शिवास्त्राय स्वाहा। क्षुरिकास्त्रमन्त्रः – ओं छित् छित् क्षुत् क्षुत् क्षुरिकाय स्वाहा। व्योमास्त्रमन्त्रः – षं हं हां हिं हुं व्योमव्यापिने स्वाहा। पाशु-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पताास्त्रमन्त्रः - ओं ह्रः पशुहुं फट् पाशुपतास्त्राय हुं फट् स्वाहा।
अघोरास्त्रमन्त्रः - ओं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर
तनु तनु रूप रूप चट चट प्रचट प्रचट कह कह वम वम ब-
न्धय बन्धय घातय घातय हुं फट् ह्रीं स्वाहा। पापभक्षण-
मन्त्रः - ओं हां हुं हें हों हौं पापभक्षणाय स्वाहा। नवात्म-
मन्त्रः - ओं हं हां हं सस्सो हं सोहहं सः स्वाहा। शाम्बरमन्त्रः-
ओं हां हीं हृदयाय स्वाहा। असिमन्त्रः - ओं हः अस्त्राय
स्वाहा। इत्येवं प्रत्येकमष्टोत्तरशतं वा पञ्चाशत् पञ्चविं-
शतिं वा हुत्वा। पश्चात्पूर्णां दत्त्वा। परिस्तरणस्थदेवानां
बलिं दत्त्वा। स्वाहा इत्येकसमिधमग्नौ दत्त्वा। उपस्थानं कृ-
त्वा। होमसंख्यादशगुणं जप्त्वा। गुह्याय समर्च्य। नैरृत्यां
सोमकुम्भादि द्वादश पालिकायां यथाक्रमेण सम्पूज्य। आ-
चम्य। वेदिकास्थितकुम्भे आधारशक्त्यादि सम्पूज्य।
पाद्याचमनार्घ्यं दत्त्वा। शुद्धान्न मुद्गान्नापूपादि पायसान्नं
निवेद्य। नालिकेरकदलीफलताम्बूलं निवेद्य धूपदीपादि-
72 a दीपाराधनक्रमेणाराध्य। गणिकानृत्त बहुनृत्त सर्ववाद्य-
घोषैर्भक्तस्तुत्यादिदेवं सन्तोष्य। प्रदक्षिणनमस्कारस्तोत्रैः
स्तुत्वा॥ — इति कुमारतन्त्रे कौशिकप्रश्ने महासंहि-
तायां द्वितीयदिवसप्रातर्होमविधिस्समाप्तः॥ श्रीधर्म-
सम्पद्धन्यम्बासमेतश्रीनगरीवरमहाप्रभवे नमः। श्रीगिरि-
निवासाय नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

## ॥ स्थालीपाकः ॥

स्थालीपाकविधिरुच्यते – ततः स्थालीपाकं ताम्रमयीं मृण्मयीं वा व्रणादिदोषरहितां अनुपयुक्तां शस्त्रेण वारिणा प्रक्षाल्य अस्त्रेण त्रिसूत्रकुशाभ्यां कण्ठे संवेष्ट्य। चन्दनादिभिरुपलिप्य। तस्मिन् मूर्तिभूतां स्थालीं न्यस्य क्षित्यादिकुटिलान्तं सम्पूज्य। मूलमन्त्रेण गुहमावाह्य। स्थापनादि कृत्वा। पञ्चावरणपूजान्तं निर्वर्त्य धूपदीपं दत्वा पूजादिकं पुष्पमपनीय। वस्त्रपूतेन गोक्षुरेण प्रासादशतं जप्तेन जलमापूर्य। आग्नेय्यां दिशि पश्चिमाननं चलनोद्धट्टनम्। अष्टसंस्कारोपरि शुष्केन्धनाग्निं प्रज्वाल्य। स्थालीमारोप्य। पञ्चप्रस्थं तण्डुलं सप्तवारं प्रक्षाल्य। जलमापूर्य घृतगुलमिश्रपाकं सुपक्वं पचेत्। सुतप्तो भवति। इति तप्ताभिघारं कुर्यात्। उत्तरे षडुत्थासने अनन्तधर्मज्ञानवैराग्यैश्वर्यपङ्कजैः। धान्यपुञ्जैरलङ्कृते अवतार्य। अम्भो विभज्य। संहितयाभिमन्त्र्य सम्पातहोमं विधाय। सुशीतलो भवति। शीताभिघारं कुर्यात्। पाकस्य मन्दतीव्रगतियुक्तो व्याधिः। तच्छान्त्यर्थं अघोरेणाहुतिशतं हुत्वा। भागत्रयं विधाय। होमबल्यर्थं भागमेकं एकभागं त्रिधा विभज्य। तद्भागमेकं कुम्भबिम्बमण्डलेषु निवेदयेत्। आत्मभागमन्यैः घृतमध्वा-
73a ज्यादिभिः ऋत्विग्भिस्सार्धं पञ्चाङ्गुल्याहृतं प्राणाग्निहोत्रा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नन्तरं कबलत्रयं ग्रासाष्टकं वा भुञ्जीयात्। पादौ हस्तौ प्र-
क्षाल्य। आचम्य। भस्मधारणं कृत्वा वामदेवेन जठरमभि-
मन्त्र्य। पूर्वस्थापितपञ्चगव्येन ऋत्विग्भिस्सार्धं अन्तरा-
न्तरमाचमनम्॥ ॥ इति स्थालीपाकविधिः॥

जपवर्गः॥

श्रीगिरिनिवासाय नमः।

यागकुम्भार्चने काले वेदपारायणं कुरु।
ऋग्वेदं स्कन्दसूक्तं च त्रियम्बकं तथैव च॥
श्रीरुद्रं चमकं चैव पञ्चाक्षरं तथैव च।
षडक्षरं बृहत्साम स्कन्दगायत्रमेव च॥
इत्येवं पूर्वदिग्भागे होमकाले जपेत्ततः।
दक्षिणे च यजुर्वेदं विष्णुसूक्तं तथैव च॥
पञ्चशान्तिमुमासूक्तं शिवसङ्कल्पमेव च।
शिवास्त्रं क्षुरिकास्त्रं च पञ्चाक्षरं तथैव च॥
दशद्वारं जपेत्तत्र होमकाले विशेषतः।
पश्चिमे सामवेदं च रुद्रसूक्तं तथैव च॥
ब्रह्मसूक्तं पावमानं पञ्चाक्षरं तथैव च।
व्योमव्यापि षडर्णं च पश्चिमे तु जपेत्ततः॥
सौम्यं चाथर्वणं चैव पुरुषसूक्तं तथैव च।
गणसूक्तं स्कन्दसूक्तं घोषशान्तिं तथैव च॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीसूक्तं भूमिसूक्तं च पञ्चाक्षरं तथैव च ।
अघोरं पाशुपतास्त्रं च जपेदुत्तरदेशके ॥

73 b ॥ बिम्बशोधनम् ॥

अथातस्सम्प्रवक्ष्यामि बिम्बस्य शोधनं शृणु ।
आचार्यं मूर्तिपानां च ब्राह्मणैश्शिल्पिना सह ॥
गर्भगेहं प्रविश्याथ बिम्बपीठं निरीक्षयेत् ।
दृढं च बलहीनं च ज्ञात्वा ओषधिमेव च ॥
दृढमेवं तु यत्पीठं तत्पीठं चलनं विना ।
व्यपोह्य सुषिरं यद्वा अष्टबन्धनमाचरेत् ॥
पूर्वौषधविजीर्णं स्याद्बिम्बस्य चलनं कुरु ।
सावधानेन संहृत्य शयनाधिवासनं चरेत् ॥

शयनाधिवासः

पश्चात् शयनाधिवासनविधिरुच्यते । विनायकं सम्पूज्य । अधिवासकर्म करिष्ये इति सङ्कल्प्य । पुण्याहं वाचयित्वा । वेद्याग्नेयदिग्भागे वा महामण्टपे वा अधिवासनार्थं अष्टद्रोणपरिमितं धान्यं तदर्धं तण्डुलं तदर्धं तिलं मुद्गमाषमेवं निधाय । उपरि फलकं निधाय । तदुपरि शल्मलीजोन्वतमालतुशेतणत मयूरपिञ्छम् । तदुपरि कृष्णाजिनं व्याघ्रचर्म । चित्रकम्बलं कम्बलं कृष्णवर्णं च श्वेतवस्त्रं तथैव च । दुकूलचित्रवस्त्रं च उपर्युपरि विन्यसेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्राक्शिरस्योर्ध्ववक्त्रं च बिम्बं तथैव शाययेत्।
नववस्त्रं समाच्छाद्य कर्णावधि मुखं विना॥
हिमाम्बुमिश्रितं गन्धं बिम्बं तल्पे ऽर्पयेत्क्रमात्।
पादुका मुकुरं छत्रं चामरं व्यजनं तथा॥
पादस्थाने तु विन्यस्य अधिवासक्रमं तथा।
प्रागाद्यासु चतुर्दिक्षु विदिक्षु च यथाक्रमम्॥
74 a अष्टकुम्भान् प्रतिष्ठाप्य सर्वालङ्कारसंयुतान्।

अधिवासनाङ्गत्वेन पीठार्चनं कुर्यात्। बिम्बस्याधः आधारशक्त्यै नमः मूलप्रकृत्यै नमः अनन्ताय नमः वराहाय नमः। सुधासिन्धवे नमः। रत्नद्वीपाय नमः। कलधौताचलाय नमः। नन्दनोद्यानाय नमः। कल्पवृक्षवाटिकाय नमः। स्वर्णप्राकाराय नमः। चिन्तामणिगृहराजाय नमः। मकरन्दाय नमः। ज्ञाननालाय नमः। वैराग्यपत्राय नमः। ऐश्वर्यकर्णिकाय नमः। सहस्रदलावृतश्वेतपद्मासनाय नमः। ओं हां हरब्रह्मण्यासनाय नमः। ओं हां सुब्रह्मण्यमूर्तये नमः इत्यासनमूर्तिं विन्यस्य। दण्डभङ्गिं मुण्डभङ्गिं न्यस्य। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम्॥

इति ध्यात्वा। ओं हां विद्यादेहाय नमः इति पुष्पाञ्जलिं बिम्बमूर्ध्नि विन्यस्य। ओं सौं नेत्रेभ्यो नमः इति नेत्रमुद्रां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विन्यस्य। पश्चात् पुष्पैरञ्जलिमापूर्य हृत्प्रदेशे निधाय।
पूरकं विभाव्य। कुम्भकं भावनया प्रासादोच्चारेण द्वादशा-
न्तपर्यन्तं नीत्वा सृष्टिमार्गेण भ्रूमध्यान्तमवरोप्य तेजोरूपं
ध्यात्वा। गुहं रेचकभावनया हृदयस्थितपुष्पाञ्जलिगतं
विभाव्य। ओं सौं शरवणभव इति मूलमन्त्रेणोच्चार्य पुष्पा-
ञ्जलिं बिम्बमूर्ध्नि विन्यस्य जगद्भुवादिमन्त्रषट्केण आवा-
हनस्थापनसन्निधानसन्निरोधनावकुण्ठनधेनुमुद्रां दत्त्वा
75b दक्षवामयोः शक्तिबेरद्वयोः क्लीं देवनायकीं तत्तन्मूलम-
न्त्रेणावाह्य पाद्यार्घ्याचमनं दत्त्वा। वस्त्राद्युपचाराणि गन्ध-
पुष्पधूपदीपं फलादि निवेद्य। प्राणप्रतिष्ठां कृत्वा। पश्चात्
पञ्चावरणं पूजयेत्। तद्यथा — बिम्बस्यैशान्ये ओं सों ई-
शानमूर्ध्ने नमः। पूर्वे ओं सें तत्पुरुषवक्त्राय नमः। दक्षिणे
ओं सुं अघोरहृदयाय नमः। उत्तरे ओं हिं वामदेवगुह्या-
य नमः। पश्चिमे ओं सं सद्योजातमूर्तये नमः। नैऋते ओं
सौं आप्यभुवाय नमः। आग्नेय्यां ओं सां जगद्भुवहृदयाय
नमः। नैऋते ओं सिं वचद्भुवाशिरसे नमः। वायौ ओं सुं
विश्वभुवाशिखाय नमः। ईशे ओं सैं रुद्रभुवकवचाय नमः।
तद्दक्षिणे ओं सौं ब्रह्मभुवनेत्राय नमः। नैऋते ओं सः भू-
र्भुव अस्त्राय नमः॥ इति प्रथमावरणम्॥

द्वितीयावरणम् — पूर्वादिदलाग्रस्थिताष्टकुम्भेषु पूर्वे

ओं हां जयन्तासनाय नमः। जयन्तमूर्तये नमः। जयन्ताय
नमः। आग्नेय्यां ओं हां अग्निशिखासनाय नमः। अग्निशि-
खमूर्तये नमः। अग्निशिखाय नमः। दक्षिणे ओं हां कृत्ति-
कापुत्रासनाय नमः। कृत्तिकापुत्रमूर्तये नमः। कृत्तिकापुत्रा-
य नमः। नैऋते ओं हां भूतपत्यासनाय नमः। भूतपतिमू-
र्तये नमः। भूतपतये नमः। पश्चिमे ओं हां सेनान्यासनाय
नमः। सेनानीमूर्तये नमः। सेनान्ये नमः। वायौ ओं हां गुहा-
सनाय नमः। गुहमूर्तये नमः। गुहाय नमः। उत्तरे ओं हां हेम-
75 a शूलासनाय नमः। हेमशूलमूर्तये नमः। हेमशूलाय नमः।
ईशाने ओं हां विशालाक्षासनाय नमः। विशालाक्षमूर्तये न-
मः। विशालाक्षाय नमः। इत्यावाहनादि कृत्वा ॥

ततस्तृतीयावरणम् — बिम्बस्य दक्षिणभागे जयाय नमः।
वामभागे विजयाय नमः। अग्रे मयूराय नमः। पावके सुदे-
हाय नमः। दक्षिणे सुमुखाय नमः। नैऋते सेनापतये नमः।
पश्चिमे सुरेशाय नमः। वायौ कृत्तिकाय नमः। उत्तरे सुमि-
त्राय नमः। ईशे क्षेत्रपालाय नमः॥ ततः इन्द्रादीशानान्तं तु-
रीयावरणम्। वज्रादि पञ्चमावरणम्। सर्वत्र पाद्यादि-
गन्धपुष्पधूपदीपं फलादि निवेद्य ॥ इति शयनाधिवा-
सनविधिः ॥

— घृतशिरोऽर्पणम् —

अथ देवस्य शिरोभागे घृतशिरोऽर्पणकुम्भं प्रतिष्ठाप्य॥

तद्यथा - उपलिप्ते शुचौ देशे धान्यद्रोणं विनिक्षिपेत्।

तदर्धं तण्डुलं चैव तदर्धं तिलमेव च॥

धवलाक्षतसम्पूर्णं स्वर्णपात्रं ततोपरि।

कलशं मधुसर्पिर्भ्यां पूर्णं तस्योपरि न्यसेत्॥

चतुर्दिक्षु न्यसेत्तत्र स्वर्णपात्रचतुष्टयम्।

तत्पूर्वे हेमपुष्पं च दूर्वाग्रं दक्षिणे न्यसेत्॥

मुद्गाङ्कुरं पश्चिमे तु उत्तरे धवलाक्षतान्।

अर्चयेद्ब्रह्ममन्त्रेण गजपुष्पादिना बुधः॥

घृतशिरोऽर्पणप्रयोगो लिख्यते - बिम्बस्य शिरोभागे

चतुरश्रं स्थण्डिलं कृत्वा। तन्मध्ये शरकोष्ठं लिख्य। कोष्ठ-

75 b मध्ये शालितण्डुलतिललाजदर्भैः पुष्पैः परिस्तीर्य। मध्य-

कोष्ठे आज्यप्रस्थं तदर्धं मधुसंमिश्रं कुम्भमेकं तत्पूर्वे

हेमपुष्पस्थलिका न्यस्य दक्षिणे दूर्वाग्रं पश्चिमे मुद्गाङ्कुरं

उत्तरे धवलाक्षतम्। एवं स्थलिकामध्ये न्यस्य। घृतकु-

म्भस्य चूतपत्रं नालिकेरकूर्चं कुम्भवस्त्रकुम्भं रत्नं वि-

न्यस्य। गन्धमाल्यैरलङ्कृत्य। घृतकुम्भस्याधः आधारः

शक्त्यादि सम्पूज्य। पुष्पाञ्जलिं बद्ध्वा। अयं कुमारमन्त्र-

मुच्चार्य स्कन्दमूलमन्त्रेणावाह्य। स्थापनादि कृत्वा पाद्या-

दिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। अयं कुमारो जरां जयत्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीर्घमायुः यस्मै त्वं स्तनष्टछायायायुर्वर्चो यशो बलं इति म-
न्त्रेण दशवारं जप्त्वा । पूर्वादिस्थित पात्रचतुष्केषु जयवि-
जयसुदेहसुमुखान् सम्पूज्य । मूलमन्त्रं जप्त्वा । ततो घृत-
सूक्तं जपेत् । घृतसूक्तं नाम यो ब्रह्मा ब्रह्मण उज्जभारेति
समुद्रादूर्मिर्मधुमां उदारदिति च सूक्तम् ॥

— इति घृतशिरोऽर्पणप्रयोगविधिः —

॥ श्रीगिरिनिवासाय नमः ॥

76 a * द्वितीयदिनरात्रिहोमः *

आचार्यो मूर्तिभिस्सह स्नानानुष्ठानावश्यकं निर्वर्त्य । यागशालां प्रविश्य । सकलीकृत्य । सामान्यार्घ्यं साधयित्वा । विनायकं सम्पूज्य । सङ्कल्प्य । पुण्याहं पञ्चगव्यं संस्थाप्य । अस्त्रेण प्रोक्ष्य । मण्टपपूजादिकुम्भपूजानन्तरं यथाक्रमेण सम्पूज्य । ततो होमं कुर्यात् । तत्कुण्डसमीपे पूर्ववत् स्थित्वा । अग्निं प्रज्वाल्य परिसमूहनं कृत्वा । परिस्तरणादि आज्यसंस्कारान्तं कृत्वा । जुषस्वेति जपित्वा । अदितेनुमन्यस्व इति समन्तात्परिषिच्य । कुण्डमध्ये ओं हूं अग्नये नमः । ऊर्ध्वमेखलायां पूर्वाद्यष्टदिक्षु जातवेदसे नमः सहोजसे नमः अजिराप्रभवे नमः वैश्वानराय नमः । नर्यापसे नमः । पर्ङ्क्तिराजसे नमः । विसर्पिणे नमः । यज्ञपुरुषाय नम इत्यभ्यर्च्य । मध्यमेखलायां पूर्वाद्यष्टदिक्षु जयन्ताय नमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्निशिखाय नमः। कृत्तिकापुत्राय नमः। भूतपतये नमः। से-
नान्ये नमः। गुहाय नमः। हेमशूलाय नमः। विशालाक्षाय नमः।
अधोमेखलायां पूर्वाद्यष्टदिक्षु इन्द्राय नमः अग्नये नमः य-
माय नमः निऋतये नमः वरुणाय नमः वायवे नमः सोमाय
नमः ईशानाय नमः इति सम्पूज्य। हे लोकपालाः विघ्नसम्पातं
निवार्य अग्निं पालयिष्यथ इति गुहाज्ञां श्रावयेत्। इति वि-
ज्ञाप्य। कुण्डमध्ये ओं हां अग्न्यासनाय नमः अग्निमूर्तये नमः

768 ध्यानम् — अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।
वरदमनलखेटं अङ्कुशं स्रुक् च वामे
दधतमृषभसंस्थं भावयेयं गुहाग्निम्॥

इति ध्यात्वा। ओं हूं गुहाग्नये नमः इति मूलेनावाह्य। पाद्यादि-
गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। व्याहृतिभिर्हुत्वा। ततः कुण्डा-
ग्निमध्ये ओं हां आधारशक्तिकमलासनाय नमः अनन्तास-
नाय नमः। सिंहासनाय नमः योगासनाय नमः पद्मासनाय
नमः विमलासनाय नमः। ओं हां स्कन्दासनाय नमः स्कन्दमू-
र्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम्॥

इति ध्यात्वा। ओं सां सुब्रह्मण्याय नमः। ओं ह्रीं वल्ल्यै नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं श्रीं देवगजायै नमः इति मूलेन श्रीसुब्रह्मण्यं गजागज-
वल्लीं कुण्डाग्निमध्ये आवाह्य । पाद्याद्युपचारैस्सम्पूज्य । नव-
कुण्डपक्षे पूर्वकुण्डे ओं हां सुब्रह्मण्यासनाय नमः सुब्रह्मण्य-
मूर्तये नमः । ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं
77 a सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सौं सुब्रह्मण्याय नमः इति
मूलेनास्मिन् कुण्डाग्निमध्ये श्रीसुब्रह्मण्यमावाह्य स्थापनादि
कृत्वा पाद्याद्युपचारैस्सम्पूज्य । दक्षिणकुण्डे ओं सां षण्मुखा-
सनाय नमः षण्मुखमूर्तये नमः । ध्यानम् —

वन्दे सिन्दूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवसेनामदनरिपुसुतावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि (अ?) गदाद्यभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्त्वा । ओं सां षण्मुखाय नम इति
मूलेन कुण्डाग्निमध्ये ओं षण्मुखमावाहयामि स्थापनादि कृ-
त्वा । पाद्याद्युपचारं दत्त्वा । नैऋतकुण्डे ओं हां ब्रह्मचार्यासनाय
नमः ब्रह्मचारिमूर्तये नमः । ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कल्पद्रुमं प्रणमतां कमलारुणा[illegible]भं

स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।

कात्यायनीसुतमहं कटिबद्धवामे

77 b कौपीनदण्डधर · · णहस्तमीडे ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां ब्रह्मचारिणे नमः इति
मूलेनास्मिन् कुण्डाग्निमध्ये श्रीब्रह्मचारिणमावाहयामि ।
स्थापनादि कृत्वा । पाद्याद्युपचारं दत्वा । पश्चिमकुण्डे ओं हां
सेनापत्यासनाय नमः । सेनापतिमूर्तये नमः । ध्यानम् —

नौम्यादित्यप्रदीप्त द्वादशनयनं षण्मुखं मन्दहासं

वामाङ्के सुस्थितायां सरसिरुहयुतालिङ्गितायां स्वहस्तम् ।

उत्तुङ्गोरुस्तनाग्रे विहितकरतलाभीतिखेटादिशूलं

ह्लादित्युद्दीप्तशक्तीध्वसनवनगतं कुक्कुटाब्जेन हस्तम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा ओं सां देवसेनापतये नमः
इति मूलेनास्मिन् कुण्डाग्निमध्ये सेनापतिमावाहयामि ।
स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । वायुकुण्डे ओं हां
गजारूढासनाय नमः गजारूढमूर्तये नमः । ध्यानम् —

एकाननं द्विनयनं वरकुक्कुटौ च

वामद्वये निशितशक्त्यभयौ द्वयेऽन्ये ।

बिभ्राणमीश्वरसुतं तपनायुताभं

नित्यं नमामि गजवाहनमिष्टसिद्ध्यै ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां गजारूढाय नमः इत्य-
स्मिन् कुण्डाग्निमध्ये मूलेन ओं गजारूढमावाहयामि स्थाप-
नादि कृत्वा । पाद्याद्युपचारं दत्त्वा । उत्तरकुण्डे ओं हां बालास-
78 a नाय नमः बालमूर्तये नमः । ध्यानम् —

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम् ।
विप्रप्रियकरं वन्दे बालरूप रविप्रभम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां बालाय नमः इति मू-
लेनास्मिन् कुण्डाग्निमध्ये ओं बालरूपमावाहयामि । स्थाप-
नादि कृत्वा पाद्याद्युपचारं दत्वा । ईशानकुण्डे ओं हां शिखि-
वाहनासनाय नमः । शिखिवाहनमूर्तये नमः । ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां शिखिवाहनाय नमः
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शिखिवाहनमावाह-
यामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा ॥ नवकुण्डपक्षविधिः ॥

— द्वितीयदिने पञ्चकुण्डविधिः —

पञ्चाग्नेरायतनं चेत्पञ्चकुण्डाधिदैवतं प्रधानकुण्डे मूलबे-
राकृतिं ध्यात्वा होमयेत् । दिक्कुण्डचतुष्केषु —

सेनानीः कार्तिकेयश्च स्कन्दश्शरवणोद्भवः ।
पूर्वादिषु चतुर्दिक्षु कुण्डानामधिदेवताः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वकुण्डे ओं हां सेनान्यासनाय नमः। सेनानीमूर्तये नमः।

ध्यानम् — अभयहितकराङ्गः अङ्कुशं शक्तिशूलं

वरदकुलिशपाशं पद्महस्तौ गदां च।

दधत धनुसुबाणं द्वादशायां तु हस्ते

द्विदशकमलनेत्रं देवसेनानिमीडे॥

786 इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां सेनान्ये नमः इति

मूलेनास्मिन् कुण्डाग्निमध्ये ओं सेनानीमावाहयामि। स्था-

पनादि कृत्वा पाद्याद्युपचारं दत्त्वा। तद्दक्षिणकुण्डे ओं हां

कार्तिकेयासनाय नमः कार्तिकेयमूर्तये नमः। ध्यानम् —

वरदकुलिशखेटं वामहस्तत्रये च

दधतमभयशक्ती खड्गमन्यत्रये च।

तरुणरविसमाभं साधुभिः पूज्यमानं

कमलवदनमेकं कार्तिकेयं नमामि॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां कार्तिकेयाय नम इति

मूलेनास्मिन् कुण्डाग्निमध्ये ओं कार्तिकेयमावाहयामि।

स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा। पश्चिमकुण्डे ओं हां

स्कन्दासनाय नमः स्कन्दमूर्तये नमः। ध्यानम् —

वामे करे च युगले वरकुण्डिकायां

सव्येऽक्षसूत्रमभयं दधतं विशाखम्।

वल्लीयुतं वनजलोचनमेकवक्त्रं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वन्दामहे वनजसम्भवशासितारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां स्कन्दाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं स्कन्दमावाहयामि । स्थापनादि कृत्वा । पाद्याद्युपचारं दत्त्वा । उत्तरकुण्डे ओं हां शरवणोद्भवासनाय नमः । शरवणोद्भवमूर्तये नमः । ध्यानम् —

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटं प्रासदण्डौ
79 a टङ्कं बाणं वरदमभयं कार्मुकं चोग्रहस्ते ।
पीतं सौम्यं द्विदशनयनं केकयं साकमीन्द्रैः
स्रग्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां शरवणोद्भवाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शरवणोद्भवमावाहयामि । स्थापनादि कृत्वा । पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा ॥

पञ्चकुण्डविधिः प्रोक्तः एककुण्डविधिं शृणु ।
एकाग्निरायतनं चेन्मूलबेराकृतिं यजेत् ॥

यथोचितकुण्डस्य यथोचितदेवमाधारशक्त्यादि आसनमूर्तिध्यानपुरस्सरं सम्पूज्य । तत्तन्मन्त्रेणाष्टोत्तरशतमाज्याहुतिं हुत्वा । ततः प्रधानकुण्डादि सर्वत्र कुण्डेषु तत्तन्मूलमन्त्रेण सम्पूज्य । तत्तन्मूलमन्त्रेण समिदन्नाज्याहुति सहस्रं वा तदर्धं वाष्टोत्तरशतं वा हुत्वा । द्रव्यं प्रति व्याहृतिभिर्हुत्वा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विशेषद्रव्यैश्च प्रत्येकं पञ्चविंशतिवारं हुत्वा । तद्यथा —

समिधा सद्यमन्त्रेण आज्यं वामेन हूयते ।
अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु ॥
सिद्धार्थैशीशमन्त्रेण हृदयेन यवं हुनेत् ।
तिलं च शिरसा हुत्वा मुद्गं च शिखया हुनेत् ॥
कवचेन हुनेन्माषं सक्तुर्नेत्रेण हूयते ।
कदलीफलमस्त्रेण अपूपं मूलमन्त्रतः ॥
79 (6) निष्पावं वल्लिमूलेन गुहास्त्राच्चणकं तथा ।
जयन्तं वैणवं हुत्वा कुलस्थं त्वग्निमन्त्रतः ॥
कृत्तिकापुत्रमन्त्रेण आढकं च हुनेत्क्रमात् ।
भूतनाथं च मन्त्रेण गोधूमं चैव होमयेत् ॥
सेनानीरिति मन्त्रेण प्रियङ्गुं चैव होमयेत् ।
गुहमन्त्रं समुच्चार्य नालिकेरं हुनेत्क्रमात् ॥
हेमशूलस्य मन्त्रेण क्षीरेणैव तु होमयेत् ।
विशालाक्षमन्त्रमुच्चार्य ताम्बूलं जुहुयात्क्रमात् ॥
एलादिवासनाद्रव्यं मूलमन्त्रेण होमयेत् ।
शतमर्धं तदर्धं वा तदर्धार्धमथापि वा ॥
द्रव्यान्ते व्याहृतिं हुत्वा सर्वकुण्डानि होमयेत् ।

ओं शरवणोद्भवाय षण्मुखाय शिखिवाहनाय अभयवर-
प्रदाय शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमाराय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं ह्रां ह्रीं सौं शरवण भव हुं फट् स्वाहा इति मालामन्त्रं पञ्च-
विंशतिवारं हुत्वा। ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवण भव
स्वाहा इति मूलेन पञ्चविंशतिवारं हुत्वा। ओं ह्रीं वल्ल्यै स्वा-
हा। ओं श्रीं देवगजायै स्वाहा। इति हुत्वा। शकुन्यै स्वाहा।
रेवत्यै स्वाहा। पूतायै स्वाहा। महापूतायै स्वाहा। निशीथिन्यै
स्वाहा मालिन्यै स्वाहा। शीतलायै स्वाहा भूत्यै स्वाहा। विश्वतो-
80 a मुख्यै स्वाहा। इति एकैकवारं हुत्वा। जयन्ताय स्वाहा। अ-
ग्निशिखाय स्वाहा। कृत्तिकापुत्राय स्वाहा। भूतपतये स्वाहा।
सेनान्ये स्वाहा। गुहाय स्वाहा। हेमशूलाय स्वाहा। विशाला-
क्षाय स्वाहा। ओं भूः स्वाहा अग्नये इदं न मम। ओं भुवः स्वा-
हा वायव इदं न मम। ओं सुवः स्वाहा सूर्यायेदं न मम। ओं
भूर्भुवः सुवः स्वाहा प्रजापतये इदं न मम। एवं सर्वत्र कुण्डं
होमयेत्। अस्य वाहमभिमातिषाहं रक्षोहणं प्रतिनासुजिष्णं
ज्योतिष्मन्तं दीयतं पुरन्धिम्। अग्निष्वष्टकृतमाहुवेमोम्।
स्वष्टमग्ने अभि तत् प्रणाहि विश्वा देवा पृतना अभिष्या उरुं
नः पन्था प्रतिशं विभाहि ज्योतिष्मद्धेह्यजरन्न आयुः स्वाहा।
अग्नये स्विष्टकृते इदं न मम। इति सर्वत्र हुत्वा। ततस्सर्वत्र
पूर्णां जुहुयात्। तद्यथा — स्रुवेण स्रुग्गर्ते आज्येनापूर्य
पुष्करोपर्यधोमुखं स्रुवं न्यस्य। तदग्रे पुष्पं दत्त्वा। वाम-
दक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां उरसव्येन संलग्नौ

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तावुभावुपादाय समपादस्समुत्थायोर्ध्वकाये नाभ्यां तिर्य-
ग्विधाय स्रुगग्रदत्तदृष्टिः ओं सौं सुब्रह्मण्याय शरवणभ-
वाय वौषडिति मूलं प्लुतमुच्चार्य वामस्तनान्तं स्रुङ्मूलमानीय
अनुद्विग्नः घृतधारां बिन्दुस्थानाद्विनिस्सृतां धारामिति सं-
स्मरन् यवप्रमाणेनाविच्छिन्नधारया समस्तमाज्यं वह्नौ
40 b क्षिपेत्। इति सर्वत्र पूर्णां विधाय। ततस्सर्व कुण्डेषु आज्या-
हुतीर्जुहोति। तद्यथा – तत्तन्मूलमन्त्रेण सहस्रं वा तदर्धं
वाष्टोत्तरशतं वा कुण्डं प्रति जुहुयात्। पश्चात्प्रायश्चित्तार्थं
ओं सुं अघोराय विश्वभुवाय स्वाहा। ओं सः भूर्भुव अस्मा-
य स्वाहा। इत्यष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा। अनाज्ञातै-
यदाज्ञातैर्यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वं वेत्थ
यथातथं स्वाहा। अग्नये इदं न मम (यत् पाकत्रा मनसा
दीनदक्षाणा यज्ञस्य मन्वते) पुरुषसंमितो यज्ञो यज्ञःपुरु-
षसंमितः। अग्ने तदस्य कल्पय। त्वं वेत्थ यथातथं स्वाहा।
अग्नये इदं न मम। यत्पाकत्रा मनसा दीनदक्षाणा यज्ञस्य
मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन् नेजिष्ठो देवां
ऋतुशो यजामि स्वाहा। अग्नये इदं न मम। ओं भूः स्वाहा अ-
ग्नये इदं नमम। ओं भुवः स्वाहा वायव इदं न मम। ओं सुवः
स्वाहा सूर्यायेदं न मम। ओं भूर्भुवःसुवः स्वाहा प्रजापतये
इदं न मम। पश्चात्पूर्णां विधाय। एवं क्रमेण सर्वत्र कुण्डं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

होमयेत्। पश्चाद्दिक्षु कुण्डहोमं विना प्रधानकुण्डस्य व्याहृति-
भिर्हुत्वा। ततो नाडीसन्धानार्थं मूलेनाहुतित्रयं दत्त्वा। नाडी-
सन्धानं कुर्यात्। तद्यथा – ओं सौं शरवणभवाय स्वाहा।
81 a ओं सौं ह्रूं गुहाग्निभ्यां स्वाहा। इति सन्धाय। विसृज्य। मूल-
मन्त्रमुच्चार्य। वह्निस्थ गुहनासाविनिर्गतज्योतीरूपशिखां
यागस्थगुहशिखालीनां रश्मिमात्रावियोगेनाविच्छिन्नामुभय-
त्र सकृदास्पदं ध्यायेत्। एवं कुम्भं यागगृहैरात्मानं सह नाडीं
सन्धाय। तद्यथा — कुशाच्छलेन बिसतन्तुनिभां कुम्भस्य गुह-
नाडीं पिङ्गलया निस्सृत्य। स्वनाड्यामिडया प्रविश्य। वि-
लीनेति विभाव्य। गुहाणुना रेचकेन विनिस्सृत्य। वह्निस्थ-
गुहनाडीं पिङ्गलया प्रविश्य। विलीनां विभाव्य। मूलेन रेच-
केन इडया विनिस्सृत्य स्वनाड्यामिडया प्रविश्य। विलीनेति
विभाव्य। गुहाणुना रेचकेन विनिस्सृत्य। कुम्भस्थगुहहृदयं
तत्पूरकेण प्रविश्य। लयमिति विभाव्य। मूलेन रेचकेन वि-
निस्सृत्य। स्वहृदयं पूरकेण प्रविशेत्। एवं कुम्भमग्निगु-
हाभ्यामात्मानं सह नाडीं सन्धाय। बहुदिवसपक्षे - नाडी-
सन्धानं कृत्वा एकदिवसपक्षे नाडीसन्धानं विना। पश्चात्
मन्त्रतर्पणदीपनार्थं जुहुयात्। तद्यथा – ओं सौं सुब्रह्म-
ण्याय स्वाहा इत्यष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा। इति
मन्त्रम् - ओं सों ईशानाय जगद्भुवाय स्वाहा। ओं सें तत्पुरुषाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वचद्भुवाय स्वाहा । ओं सुं अघोराय विश्वभुवाय स्वाहा । ओं
सिं वामदेवाय रुद्रभुवाय स्वाहा । ओं सं सयोजाताय ब्रह्म-
भुवाय स्वाहा । ओं सौं आप्यभुवाय भुवद्भुवाय स्वाहा । इति
४।६ मन्त्रं प्रति दशवारं हुत्वा । इति तर्पणम् । ओं सां जगद्भुवहृ-
दयाय स्वाहा । ओं सिं वचद्भुवशिरसे स्वाहा । ओं सुं विश्व-
भुवशिखाय स्वाहा । ओं हैं रुद्रभुवकवचाय स्वाहा । ओं सौं
ब्रह्मभुवनेत्राय स्वाहा । ओं सः भूर्भुव अस्त्राय स्वाहा । इति
दीपनम् । एवं मन्त्रतर्पणदीपनम् । ततो देशकालदुर्निमि-
त्तदुस्स्वप्नद्रव्यलोपमन्त्रलोपतन्त्रलोपसमकालसङ्करदोष-
निवृत्त्यर्थं प्रासादमन्त्रेण शतं वा पञ्चविंशतिं वा हुत्वा प-
श्चात् पञ्चावरणमन्त्रेण मन्त्रं प्रत्येकैकवारं हुत्वा ततः प्रा-
यश्चित्तार्थं बहुरूपेण पञ्चास्त्रेण पापभक्षणमन्त्रेण नवात्म-
मन्त्रेण शम्बरेणासिना प्रत्येकमष्टोत्तरशतं वा पञ्चाशत्पञ्च-
विंशतिं वा हुत्वा । मन्त्रो यथा - बहुरूपमन्त्रः - ओं सुं अघोरा-
य विश्वभुवाय स्वाहा । शिवास्त्रमन्त्रः । ओं हौं हर हर शिव
शिव शिवास्त्राय हुं फट् स्वाहा । क्षुरिकास्त्रमन्त्रः । ओं छिन्
छिन् क्षुत् क्षुत् क्षुरिकास्त्राय हुं फट् स्वाहा । व्योमास्त्रमन्त्रः ।
ओं षं हं हां हं हुं व्योमव्यापिने स्वाहा । पाशुपतास्त्रमन्त्रः ।
ओं सिं परशु हुं फट् पाशुपतास्त्राय स्वाहा । अघोरास्त्रमन्त्रः ।
ओं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनुतनु रूपरूप

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चटचट प्रचट प्रचट कहकह वमवम बन्धय बन्धय घातय

82 a घातय। हुं फट् हूं स्वाहा। पापभक्षणमन्त्रः। ओं हां हिं हुं हैं हें हैं हः पापभक्षणाय शिवाय स्वाहा। नवात्ममन्त्रः। ओं हं हंसस्सोऽहं सोऽहं हंसः स्वाहा। शम्बरमन्त्रः। ओं हां हीं हृदयाय स्वाहा। अस्त्रमन्त्रः। ओं हः अस्त्राय स्वाहा। इत्येवं प्रत्येकं पञ्चविंशतिवारं हुत्वा। पश्चात्पूर्णां दत्वा। परिस्तरणस्थदेवानां बलिं दत्वा इत्येकसमिधमग्नौ दत्वा। उपस्थानं कृत्वा होमसंख्यादशगुणं जप्त्वा। गुहाय समर्प्य। नैरृत्यां सोमकुम्भादि द्वादशपालिकायां यथाक्रमेण सम्पूज्य। आचम्य। वेदिकास्थितकुम्भे आधारशक्त्यादि सम्पूज्य। पाद्याचमनार्घ्यं दत्वा। शुद्धान्न मुद्गान्नापूपादि पायसान्नं निवेद्य। नालिकेरकदलीफलताम्बूलं निवेद्य। धूपदीपादि दीपाराधनक्रमेणाराध्य। गणिकानृत्तबहुनृत्त सर्ववाद्यघोषैर्भक्तस्तुत्यादिभिर्देवं सन्तोष्य। प्रदक्षिणनमस्कारस्तोत्रैः स्तुत्वा॥

इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायां

द्वितीयदिवसरात्रिहोमविधिस्समाप्तः॥

श्रीधर्मसंवर्धन्यम्बासमेतश्रीनगरीश्वरमहाप्रभवे नमः॥

— श्रीगिरिनिवासाय नमः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

83 a

## — तृतीयदिनस्य यागपूजा —

तृतीयदिवसस्य - देशिकः प्रातरुत्थाय स्नात्वा सन्ध्यावन्द-
नाद्यावश्यकं कर्म कृत्वा । मूर्तिपैस्सह यागगेहं प्रविश्य ।
नित्यवत् प्राणायाम करन्यास भूतशुद्ध्यङ्गन्यास दण्डभङ्गि-
न्यास मुण्डभङ्गिन्यास मातृकान्यासं स्कन्दकलान्यास-
षडक्षरन्यासान्तर्याग स्थलशुद्धि मन्त्रशुद्धि सामान्यार्घ्य-
पाद्यार्घ्य विशेषार्घ्यान् कृत्वा । सामान्यार्घ्यजलेनात्मानं पू-
जोपकरणद्रव्य मस्त्रेण सम्प्रोक्ष्य । कलशपूजां शंखपूजा-
मात्मपूजां च कृत्वा विनायकं सम्पूज्य । सङ्कल्प्य । शिवशा-
म्भोराज्ञा इत्यादि विशेषेण श्रीमद्वल्ली देवनायकीसमेत-
श्रीसुब्रह्मण्येश्वरस्य जीर्णोद्धारण पुनरावृत्यष्टबन्धनकर्माङ्गं
राजराष्ट्र सर्वजनानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्याभि-
वृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधफलसिद्ध्यर्थं श्रीमद्वल्ली-
देवनायकीसमेत श्रीसुब्रह्मण्येश्वरप्रसादसिद्ध्यर्थं मण्टपारा-
धनकुम्भपूजां अग्निकार्यकर्म करिष्ये इति सङ्कल्प्य । पुण्याहं
वाचयित्वा । अस्त्रेण प्रोक्ष्य । पञ्चगव्यं विधिवत् स्थाप्य । मण्टप-
पूजामारभेत् ॥

शान्तिं सुदेहं सुमुखं चक्रं पूर्वं समर्चयेत् ।
इन्द्राग्निमध्यमार्ताण्डं वह्निकोणे च पावकम् ॥
याम्ये विद्यामहावल्लीं ततस्सेनापतिं यमम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नैऋते निऋतिं विष्णुं महालक्ष्मीं प्रपूजयेत् ॥

आग्ये निवृत्तिं शिखिनं गजं वरुणमन्त्रकम् ।

83 b वायुं गणेशं क्षेत्रेशं वायव्यां दिशि पूजयेत् ॥

प्रतिष्ठां देवसेनां च सुमित्रं सोममन्तरे ।

ईशानं पितराधारं गुरुं नैऋत्यके यजेत् ॥

इत्यष्टाविंशतिकलशं सम्पूज्य । तद्यथा — इन्द्राग्न्योर्मध्ये सूर्यकुम्भपूजां कुर्यात् । सामान्यार्घ्यजलेन प्रोक्ष्य । सूर्यकुम्भस्य पश्चिमभागे सूर्यद्वारार्चनं कुर्यात् । द्वारस्य दक्षिणे ओं दण्डिने नमः । उत्तरे ओं पिङ्गलाय नमः । ऐशान्यां गं गणपतये नमः । आग्नेय्यां ओं गुरुभ्यो नमः । मध्ये ओं प्रभूताय नमः । आग्नेय्यां दिक्कोणेषु ओं विमलाय नमः ओं सौराय नमः । ओं आराध्याय नमः । ओं परमसुखाय नमः । तदुपरि ओं पद्मासनाय नमः । ओं दीप्ताय नमः । ओं सूक्ष्माय नमः । ओं जयाय नमः । ओं भद्राय नमः । ओं विभूत्यै नमः । ओं अमोघाय नमः । ओं विद्युताय नमः । मध्ये ओं विश्वतोमुख्यै नमः । विस्फुरमुद्रां प्रदर्श्य । ओं अर्कासनाय नमः । खं खषोल्काय नमः । सूर्यमूर्तये नमः । इत्यासनमूर्तिं विन्यस्य । दण्डभाङ्गमुण्डभङ्गौ न्यस्य ।

ध्यानम् — सौरं कुङ्कुमसङ्काशं सर्वाभरणभूषितम् ।

द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम् ॥

चतुर्भुजसमोपेतं ऊर्ध्वहस्ताम्बुजद्वयम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभयं वरदोपेतं उषःप्रत्यूषसायकम् ॥

इति ध्यात्वा । ओं सां संसां विद्यादेहाय नमः। ओं सैं नेत्रेभ्यो
नमः इति विद्यादेहं नेत्रं विन्यस्य । ओं श्रीं सां सं सां शिवसू-
र्याय नमः। इति मूलेनावाह्य । स्थापनादि कृत्वा । स्वाहान्तं
मूलेन पाद्याचमनीयार्घ्यं दत्त्वा । स्नानवस्त्रोत्तरीय गन्धपुष्प -
84 a धूपदीपनैवेद्यं दत्त्वा । उत्तरे ओं ह्रीं उषादेव्यै नमः। दक्षिणे
ओं श्रीं प्रत्यूषादेव्यै नमः। पूर्वादिदलाग्रेषु सोमाय नमः। बु-
धाय नमः। बृहस्पतये नमः। भार्गवाय नमः। विदिक्षु दलेषु।
अङ्गारकाय नमः। शनैश्चराय नमः। राहवे नमः। केतवे नमः।
इत्यभ्यर्च्य सर्वत्र पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा।
नमस्कारमुद्रां दर्शयित्वा । ताम्बूलं दत्त्वा । प्रार्थ्य ॥

देवदेव त्रिलोकेश जगत्प्रथममङ्गल ।
तिष्ठ त्वं स्थापितो भक्त्या मया सूर्य जगत्पते ॥

इत्येवं विज्ञाप्य सूर्यमूलमन्त्रं यथाशक्ति जप्त्वा । जपफलं दे-
वतायै समर्प्य । स्तोत्रैः स्तुत्वा पराङ्मुखार्घ्यं दत्त्वा । ऐशान्यां
सूर्यनिर्माल्यदेवाय तेजश्चण्डेश्वराय नमः। इत्यभ्यर्च्य । वि-
सृज्य । एवं सूर्यपूजां निर्वर्त्य । बहिर्गत्वा । पूर्वत्र तत्तौरभाव-
नानिवृत्त्यर्थं पादौ प्रक्षाल्याचम्य । भस्मधारणं कृत्वा । पुन-
र्गत्वा सकलीकृत्य । सामान्यार्घ्यहस्तौ मण्टपाद्बाह्ये स्थित्वा ।
पूर्वद्वारमन्त्रेण सम्प्रोक्ष्य । तोरणमध्ये ओं हां शान्तितोरणा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सनाय नमः। शान्तितोरणमूर्तये नमः। शान्तितोरणाय नमः।
शान्तितोरणाधिपतये भद्राय नमः। तोरणशाखयोः श्वेताय
नमः। इति सम्पूज्य। पाद्यादि दत्वा। द्वारस्योत्तरे प्रथमकलशे
ओं ह्रैं शान्तिकलासनाय नमः। शान्तिकलामूर्तये नमः।
शान्तिकलायै नमः। पाद्याद्युपचारं दत्वा। तदुत्तरकुम्भे ओं
हां सुदेहासनाय नमः। सुदेहमूर्तये नमः। सुदेहाय नमः इति
84 b सम्पूज्य। द्वारदक्षिणकुम्भे ओं हां सुमुखासनाय नमः। सुमुख-
मूर्तये नमः। सुमुखाय नमः। इति सम्पूज्य। द्वारस्योत्तरप-
ताकायां ओं हां प्रशान्तासनाय नमः। प्रशान्तमूर्तये नमः। प्र-
शान्ताय नमः। द्वारदक्षिणपताकायां ओं हां शशिरासनाय न-
मः। शशिरमूर्तये नमः। शशिराय नमः। द्वारोपरि मध्यस्थित-
ध्वजे ओं हां कुमुदासनाय नमः। कुमुदमूर्तये नमः। कुमु-
दाय नमः। अग्निकोणध्वजे ओं हां कुमुदाक्षासनाय नमः।
कुमुदाक्षमूर्तये नमः। कुमुदाक्षाय नमः। पाद्याद्युपचारं दत्वा।
दक्षिणद्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां भूतितोरणा-
सनाय नमः। भूतितोरणमूर्तये नमः। भूतितोरणाय नमः।
भूतितोरणाधिपतये विजयाय नमः। तोरणशाखयोः यजुर्वे-
दाय नमः। इति सम्पूज्य। पाद्याद्युपचारं दत्वा। दक्षिणद्वारस्य
पूर्वप्रथमकलशे ओं हूं विद्याकलासनाय नमः विद्याकला-
मूर्तये नमः विद्याकलायै नमः। इति सम्पूज्य। तत्पूर्वकुम्भे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां वल्ल्यासनाय नमः। वल्लीमूर्तये नमः। वल्ल्यै नमः। इति
सम्पूज्य। द्वारपश्चिमे प्रथमकलशे ओं हां सेनापत्यासनाय
नमः सेनापतिमूर्तये नमः सेनापतये नमः। इत्यभ्यर्च्य। तत्प-
श्चिमकुम्भे ओं हां लक्ष्म्यासनाय नमः लक्ष्मीमूर्तये नमः। ल-
क्ष्म्यै नमः। इत्यभ्यर्च्य। द्वारपूर्वपताकायां ओं हां पर्जन्यास-
नाय नमः पर्जनीमूर्तये नमः पर्जन्यै नमः। द्वारपश्चिमपता-
कायां ओं हां जयन्तासनाय नमः जयन्तमूर्तये नमः जयन्ता-
85 a य नमः। द्वारोर्ध्वध्वजे ओं हां पुण्डरीकासनाय नमः पुण्डरीक-
मूर्तये नमः। पुण्डरीकाय नमः इत्यभ्यर्च्य। कोणध्वजे ओं हां
वामनासनाय नमः वामनमूर्तये नमः वामनाय नमः। इति स-
म्पूज्य। पश्चिमद्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां बल-
तोरणासनाय नमः बलतोरणमूर्तये नमः बलतोरणाय नमः।
बलतोरणाधिपतये वज्राय नमः। तोरणशाखयोः सामवेदाय नमः।
इति सम्पूज्य। पश्चिमद्वारस्य दक्षिणे प्रथमकलशे ओं हां नि-
वृत्तिकलासनाय नमः निवृत्तिकलामूर्तये नमः निवृत्तिकलायै
नमः। पाद्यादि दत्वा। तद्दक्षिणकुम्भे ओं हां मयूरासनायनमः
मयूरमूर्तये नमः मयूराय नमः। इति सम्पूज्य। तद्दक्षिणकुम्भे
ओं हां गजासनाय नमः गजमूर्तये नमः गजाय नमः। इति सम्पू-
ज्य। द्वारस्योत्तरे प्रथमकलशे ओं हां अस्त्रासनाय नमः अस्त्र-
मूर्तये नमः। अस्त्राय नमः इत्यभ्यर्च्य। वायुदक्षिणकुम्भे ओं हां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षेत्रपालासनाय नमः क्षेत्रपालमूर्तये नमः क्षेत्रपालाय नमः।
इति सम्पूज्य। द्वारोत्तरपताकायां ओं हां अमृतासनाय नमः अ-
मृतमूर्तये नमः अमृताय नमः। द्वारदक्षिणपताकायां ओं हां
अशोकासनाय नमः अशोकमूर्तये नमः अशोकाय नमः। द्वारोर्ध्व-
ध्वजे ओं हां शङ्कुकर्णासनाय नमः शङ्कुकर्णमूर्तये नमः शङ्कु-
कर्णाय नमः। वायुकोणध्वजे ओं हां सर्वनेत्रासनाय नमः सर्व-
85 b नेत्रमूर्तये नमः सर्वनेत्राय नमः। इत्यभ्यर्च्य। उत्तरद्वारमस्त्रेण
सम्प्रोक्ष्य। तोरणमध्ये ओं हां आरोग्यतोरणासनाय नमः आरो-
ग्यतोरणमूर्तये नमः आरोग्यतोरणाय नमः। आरोग्यतोरणा-
धिपतये नीललोहिताय नमः। तोरणशाखयोः अथर्वणवेदा-
य नमः। इति सम्पूज्य। उत्तरद्वारस्य पश्चिमे प्रथमकलशे ओं
हां प्रतिष्ठाकलासनाय नमः प्रतिष्ठाकलामूर्तये नमः। प्रतिष्ठाक-
लायै नमः। इत्यभ्यर्च्य। तत्पश्चिमकुम्भे ओं हां देवसेनापत्या-
सनाय नमः देवसेनापतिमूर्तये नमः देवसेनापतये नमः। इति
सम्पूज्य। द्वारपूर्वे प्रथमकलशे ओं हां सुमित्रासनाय नमः सुमि-
त्रामूर्तये नमः सुमित्राय नमः। इत्यावाहनादिभिः सम्पूज्य। द्वार-
पश्चिमपताकायां ओं हां धनदासनाय नमः धनदमूर्तये नमः
धनदाय नमः। द्वारपूर्वपताकायां ओं हां श्रीप्रदासनाय नमः।
श्रीप्रदमूर्तये नमः श्रीप्रदाय नमः। द्वारोर्ध्वध्वजे ओं हां सुमुखा-
सनाय नमः सुमुखमूर्तये नमः सुमुखाय नमः। ईशानकोणध्वजे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां सुप्रतिष्ठासनाय नमः सुप्रतिष्ठमूर्तये नमः सुप्रतिष्ठायै
नमः। इति सम्पूज्य। सर्वत्र पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा। मध्याकाशोपरि ओं हां शान्त्यतीतकलासनाय नमः शा-
न्त्यतीतकलामूर्तये नमः। शान्त्यतीतकलायै नमः। इत्यावाहनादि-
86a गन्धपुष्पधूपदीपनैवेद्यं दत्वा। सर्वेभ्यो द्वारपालेभ्यो नमः॥
ततः पश्चिमद्वारे नित्यवत् द्वारार्चनं कुर्यात्। तद्यथा - पश्चिम-
द्वारमन्त्रेण सम्प्रोक्ष्य। द्वारदक्षिणभागे ओं हां सुदेहाय नमः। उत्त-
रभागे ओं हां सुमुखाय नमः। दक्षिणशाखायां दीप्तायै नमः। उ-
त्तरशाखायां सूक्ष्मायै नमः। तयोर्मध्ये ओं हां महालक्ष्म्यै नमः।
अधिष्ठाने आधारशक्त्यै नमः। उपाने आदिशक्त्यै नमः। जगत्यां
आधारशक्त्यै नमः। पद्मे ज्योतिशक्तये नमः। कुमुदे गुणशक्तये
नमः। पट्टिकायां ज्ञानशक्तये नमः। भित्त्यां रौद्र्यै नमः। स्तम्भे
भोगशक्तये नमः। पालिकायां अनन्तशक्तये नमः। कम्पे वल्ल्यै
नमः। कपोते पूतायै नमः। पूतमालिकायां रेवत्यै नमः। नासि-
कायां कृत्तिकायै नमः। शिखरे शकुन्यै नमः। स्थूप्यां कौमार्यै
नमः। अग्रे स्कन्दशक्तये नमः। इत्यभ्यर्च्य। अन्तर्द्वारार्चनं कु-
र्यात्। ओं हां शान्तिकलाद्वारायै नमः। द्वारोर्ध्वोदुम्बरे भुवङ्गा-
य नमः। अधोदुम्बरे पतङ्गाय नमः। दक्षिणशाखायां उत्कराय
नमः। उत्तरशाखायां पद्गाय नमः। द्वारोर्ध्वे गं गणपतये न-
मः। तस्य वामभागे सं सरस्वत्यै नमः। द्वारस्य दक्षिणे जयाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। उत्तरे विजयाय नमः। दक्षिणकवाटे वीरबाहवे नमः।
उत्तरकवाटे महावीराय नमः। इत्यभ्यर्च्य। सर्वेभ्यो द्वारपा-
लेभ्यो नमः। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। मूलेन
दिव्यदृष्ट्या ऊर्ध्वगतान्विघ्नान् ओं भूर्भुवास्त्रेण नाराचमुद्रया
86b पुष्पक्षेपणान्तरीगतान्विघ्नान् व्यपोह्य। ओं भूर्भुवास्त्रेण पार्ष्णि-
घातत्रयेण भूगतान्विघ्नानुत्सार्य। अन्यद्वारमस्त्रेण संघट्य। प-
श्चिमद्वाराधोदुम्बरमध्ये ओं हां पाशुपतास्त्रासनाय नमः पाशु-
पतास्त्रमूर्तये नमः। ओं श्लीं पशुं हुं फट् पाशुपतास्त्राय हुं फट्
नमः। इत्यभ्यर्च्य। किञ्चिद्वामशाखां समाश्रयन्। दक्षपादपु-
रस्सरं अन्तः प्रविश्य। यागशालां प्रदक्षिणक्रमेण नैरृत्यां
स्थित्वा। मण्टपं तृणादिनाच्छादितं चेत्। कम्पेषु वायुतत्वाय न-
मः। तृणेषु अप्तत्वाय नमः। बन्धेषु तेजस्तत्वाय नमः। वंशेषु पृ-
थिवीतत्वाय नमः। स्तम्भेषु आकाशतत्वाय नमः। चुलुकायां
स्कन्दाय नमः। वितानेषु चन्द्राय नमः। तरङ्गेषु जाह्नव्यै नमः।
दर्भमालायां वासुक्यै नमः। अङ्कणे मुद्गराय नमः। दिशासु
अस्त्राय नमः। इत्यभ्यर्च्य पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं
दत्वा। उपवेदि परितः गजाष्टकं पूजयेत्। पूर्वादीशान्तदिक्षु
ओं हां ऐरावताय नमः। पुण्डरीकाय नमः। वामनाय नमः।
कुमुदाय नमः। अञ्जनाय नमः। पुष्पदन्ताय नमः। सार्वभौमा-
य नमः। सुप्रतीकाय नमः। इत्यभ्यर्च्य। पूर्वादीशानपर्यन्तं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टनागान् समर्चयेत्। अनन्ताय नमः। वासुक्यै नमः। तक्ष-
काय नमः। कार्कोटकाय नमः। पद्माय नमः। महापद्माय नमः।
शंखपालाय नमः। गुलिकाय नमः। इत्यष्टनागान् सम्पूज्य।
पूर्वादीशानपर्यन्तं मङ्गलाष्टकं पूजयेत्। उर्वशीधृतदर्पणे
87 a सूर्याय नमः। मेनकाधृतपूर्णकुम्भे जलेश्वराय नमः। रम्भा-
धृतमयूरे स्कन्दाय नमः। तिलोत्तमाधृतयुग्मचामरे मार्त-
ण्डाय नमः। सुमुखीधृतश्रीवत्से महालक्ष्म्यै नमः। सुन्दरी-
धृतस्वस्तिके सरस्वत्यै नमः। कञ्जमुखीधृतशंखे चन्द्राय
नमः। कामवर्धनीधृतदीपे ज्वलनाय नमः। इति सम्पूज्य।
पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। श्रीसुब्रह्मण्य-
पदव्याप्तिकं मण्टपं विभाव्य। वेदिकादक्षिणतः कूर्मासने
व्याघ्राजिनादौ रुचिरासने उदङ्मुख उपविश्य। प्राणायाम-
त्रयं कृत्वा। कृतभूतशुद्ध्यन्तर्यजनहवहनध्यान गुहहस्तं
कुर्यात्। तद्यथा - स्वहस्तदक्षिणतले वामाङ्गुष्ठेन गन्ध-
लेपिते मध्ये ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये नमः।
इत्यासनमूर्तिं विन्यस्य। अङ्गुष्ठादिकनिष्ठान्तेषु ओं सों ई-
शानाय जगद्भुवाय नमः। ओं सें तत्पुरुषाय वचद्भुवाय नमः।
ओं सुं अघोराय विश्वभुवाय नमः। ओं सिं वामदेवाय रुद्र-
भुवाय नमः। ओं सं सद्योजाताय ब्रह्मभुवाय नमः। इति
क्रमेण विन्यस्य। ओं सः आप्यभुवाय भुवद्भुवाय नमः। पुन-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रनामिकायां न्यस्य। विद्यादेहं नेत्रन्यासौ विधाय। मूलेन स्क-
न्दमावाह्य। अङ्गानि कनिष्ठिषु क्रमेण विन्यस्य। परमीकृत्य।
तेजोरूपं ध्यात्वा। स्वशिरस्यारोप्य। ब्रह्मरन्ध्रप्रविष्टेन तेजसा
बाह्याभ्यन्तरं तमःपटलमाधूय प्रद्योतितादिगन्तरं सम्भाव्य।
87 a ततो लाजचन्दनसिद्धार्थभस्मपुष्पकुशाक्षतान् सप्तसंख्यान्
शुद्धलाजान् विकिराण्यस्त्रेण हुं फडन्तेन सप्तधाभिमन्त्र्य।
शुद्धपात्रे सङ्गृह्य नानाप्रहराकाराण्यस्त्रेणान्तरिक्षविघ्नप्रशम-
नार्थं विकीर्य। पञ्चगव्यार्घ्यजलेन यागगृहं सम्प्रोक्ष्य। भूमि-
र्भूम्नेति मन्त्रेण स्थानशुद्धिं कुर्यात्। मन्त्रः - भूमिर्भूम्ना द्यौ-
र्वरुणान्तरिक्षं महित्वा। उपस्थे दे देव्यादिते अग्निमन्नाद्यया-
दधे। इति मन्त्रेण पञ्चगव्येन मण्टपं सम्प्रोक्ष्य। निरीक्षणादि-
चतुस्संस्कारान् शल्यनिवृत्त्यर्थं विदध्यात्। इति विशेषशु-
द्धिः। पश्चात् द्वारत्रयमस्त्रेण कवाटमुद्घाट्य प्रदक्षिणक्रमेण
ईशानभागे स्थित्वा स्कन्दकुम्भवर्धनीं सम्पूजयेत्। कुम्भस्याधः
आधारशक्तिकमलासनाय नमः। अनन्तासनाय नमः। सिंहासनाय
नमः। योगासनाय नमः। पद्मासनाय नमः। विमलासनाय नमः।
ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये नमः। इति चलासनम-
भ्यर्च्य। ध्यानम् —

पद्मसर्विकटिसंयुतवामं पद्मकान्तिनिभमेकमुखं त्वाम्।
बालषट्करमीश्वरसूनुं बालमुन्नतभुजं प्रणतोऽस्मि॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा। मूलेनावाह्य। स्थापनादि कृत्वा। तद्वामे वर्धनीं वल्ल्या-
सनाय नमः। वल्लीमूर्तये नमः। ध्यानम् —

वल्लीं .. श्यामवर्णां तु सर्वाभरणभूषिताम्।
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम्॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। पाद्यादि.
88 a गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। पश्चादिन्द्रादिलोकपालाना-
राध्य। पूर्वद्वारस्य दक्षिणे द्वितीयकलशे ओं हां इन्द्रासनाय
नमः इन्द्रमूर्तये नमः। इन्द्राय नमः। पाद्याद्युपचारं दत्त्वा —

भो भो इन्द्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत् स्थेयं गुहाज्ञया॥

इति सर्वत्र गुहाज्ञां श्रावयेत्। पूर्वद्वारस्य दक्षिणे चतुष्क-
लशे ओं हां अग्न्यासनाय नमः। अग्निमूर्तये नमः अग्नये
नमः। पाद्याद्युपचारं दत्त्वा। दक्षिणद्वारस्य पूर्वे तृतीयकलशे
ओं हां यमासनाय नमः यममूर्तये नमः यमाय नमः। पाद्यादि
दत्त्वा। नैरृतकुम्भे ओं हां नैरृत्यासनाय नमः नैरृतिमूर्त-
ये नमः। नैरृताय नमः। पाद्यादि दत्त्वा। पश्चिमद्वारस्योत्तरे
द्वितीयकलशे ओं हां वरुणासनाय नमः वरुणमूर्तये नमः
वरुणाय नमः। पाद्याद्युपचारं दत्त्वा। पश्चिमद्वारस्योत्तरे च-
तुष्कलशे ओं हां वाय्वासनाय नमः वायुमूर्तये नमः वायवे
नमः। पाद्यादि दत्त्वा। उत्तरद्वारस्य पूर्वे द्वितीयकलशे ओं हां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुबेरासनाय नमः कुबेरमूर्तये नमः। कुबेराय नमः। पाद्यादि
दत्वा। उत्तरद्वारस्य पूर्वे चतुष्कलशे ओं हां ईशानासनाय
नमः ईशानमूर्तये नमः ईशानाय नमः। पाद्याद्युपचारं दत्वा।
तद्दक्षिणकुम्भे ओं हां ब्रह्मासनाय नमः ब्रह्ममूर्तये नमः ब्रह्मणे
नमः। पाद्यादि दत्वा। नैरृतपूर्वकुम्भे ओं हां विष्ण्वासनाय
88 b नमः विष्णुमूर्तये विष्णवे नमः। पाद्यादि दत्वा। तत इन्द्रादि-
दिक्षु दशायुधानि च पूजयेत्। ओं हां वज्राय नमः। शक्तये
नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः। अङ्कुशाय नमः।
गदायै नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः। पाद्या-
द्युपचारं दत्वा। ततः अस्त्रवर्धनीं गुरुरादाय। स्कन्दकुम्भं
शिष्येण वाहयित्वा। कुम्भाग्रगामिनी वर्धनी नालोद्गताविच्छिन्न-
जल धारां पदे पदे प्रपातयन् ओं शं वज्राय हुं फट् नमः इति
मूलेन ईशानादीशानान्तं भ्रामयित्वा प्रदक्षिणं स्रावयेत्॥

लोकपाला भवद्भिस्तु यज्ञविघ्नप्रशान्तये।
गुहाज्ञयात्र स्थातव्यं तावद्यज्ञं समाप्यते॥

इत्थं विज्ञाप्य। स्वस्थाने कुम्भं वर्धनीं च संस्थाप्य स्थिरा-
सनं सम्पूजयेत्। यागेश्वरकुम्भस्याधः ओं हां आधारशक्ति-
कमलासनाय नमः। अनन्तासनाय नमः। सिंहासनाय नमः।
योगासनाय नमः। पद्मासनाय नमः। विमलासनाय नमः। ओं
हां स्कन्दासनाय नमः स्कन्दमूर्तये नमः। दण्डभङ्गिं मुण्डभङ्गिं न्यस्य॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्यानम् – वज्रं त्रिवर्तिसंयुक्तं मूर्धानं पुरुषाकृतिम्।

स्कन्दस्य वामहस्ते तु स्थितं शत्रुविमर्दनम्॥

इति ध्यात्वा। ओं हां विद्यादेहाय नमः। ओं सौं नेत्रेभ्यो नमः

इति विद्यादेहं नेत्रं विन्यस्य। पश्चात्पुष्पाञ्जलिं दत्त्वा। ओं

हुं हौं सौं यज्ञाय हुं फण्णमः। इति मूलेन पुष्पाञ्जलिं कुम्भ-

मूर्ध्नि विन्यस्य। ओं हां जगद्भुवाय नमः आवाहितो भव। वच-

89a द्भुवाय नमः स्थापितो भव। विश्वभुवाय नमः सन्निधीभव।

रुद्रभुवाय नमः सन्निरुद्धो भव। ब्रह्मभुवाय नमः त्रिरव-

कुण्ठनं कृत्वा। भूर्भुवाय नमः धेनुमुद्रां महामुद्रां दर्शयित्वा।

स्वागतार्घ्यं दत्त्वा। हृदयाद्यङ्गानि विन्यस्य। पाद्यादिगन्ध-

पुष्पधूपदीपनैवेद्यं दत्त्वा। ततो वर्धन्यां ओं ह्रीं शक्त्यास-

नाय नमः शक्तिमूर्तये नमः। ध्यानम् —

शक्तिं च योषिदाकारां रक्तवर्णां महाबलाम्।

त्रिशूलाकृतिसंयुक्तां शक्तिं शत्रुविमर्दनीम्॥

इति ध्यात्वा। ओं ह्रीं शक्त्यै हुं फट् नमः। इति मूलेनावाह्य।

स्थापनादि कृत्वा। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा।

ओं वज्राय नमः शक्तये नमः॥

सावधानेन यागान्तं यावत् स्थेयं गुहाज्ञया।

इति विज्ञाप्य। मूलमन्त्रमष्टोत्तरशतं जप्त्वा। कुम्भे निवेद्य॥

मया प्रवर्तितच्छायां यन्त्रणा भवतः क्रतुः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रक्षणीयस्त्वयैवं हि समाप्तिर्यावदस्य हि ॥

इति यज्ञरक्षाध्वरमावेद्य । तत्पात्रं निश्चलं संस्थाप्य पश्चा-
दुत्तरद्वारस्य पश्चिमे तृतीयकलशे ओं हां विनायकासनाय
नमः विनायकमूर्तये नमः विनायकाय नमः । पाद्यादि दत्त्वा ।

यत्सुरेशोऽध्वरोऽस्माभिः परवनुग्रहहेतवे ।
प्रवर्तितः प्रयात्वन्तं अविघ्नं तव सन्निधौ ॥

89b इति विज्ञाप्य । उत्तरद्वारस्य पूर्वे तृतीयकलशे —

ओं सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् ।
गुहं विष्णुं च धातारं गुरून् सप्त समाश्रये ॥

ओं हां सप्तगुरुभ्यो नमः इत्यावाहनादि सर्वोपचारैस्सम्पूज्य ।

देवदेव जगन्नाथ जगदानन्दकारण ।
गुह्याध्वरः प्रवृत्तोऽयमनुज्ञां कुरु ते नमः ॥

इति सप्तगुरून् विज्ञाप्य ।

— इति मण्डपपूजाविधिः —

90a

## * तृतीयदिनकुम्भपूजा *

कुम्भपूजामारभेत् । वेदिकाया दक्षिणभागे उत्तराभिमुखमुप-
विश्य । अर्घ्यजलेन प्रोक्ष्य । निर्माल्यं विसृज्य । कुम्भस्याधः
आधारशक्तये नमः । मूलप्रकृत्यै नमः । महामण्डूकाय नमः । अ-
नन्ताय नमः । सुधासिन्धवे नमः । रत्नद्वीपाय नमः । मणि -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मण्टपाय नमः। नन्दनोद्यानाय नमः। कल्पवृक्षवाटिकाय नमः।
चिन्तामणिगृहराजाय नमः। रत्नसिंहासनाय नमः। तन्मध्ये
सहस्रदलसंयुक्तं शुद्धविद्यामयं पद्मासनाय नमः। गं गण-
पतये नमः। सं सरस्वत्यै नमः। ओं ह्रीं मदोङ्कार ब्रह्मविश्व-
जगदाधारशक्त्यै नमः। विश्वज्योतिर्महामण्डूकाय नमः। वि-
श्वतोमुखशिखादीप्यमानकालाग्निरुद्राय नमः। विश्वजग-
न्मूलप्रकृत्यै नमः। विश्वम्भरादिकूर्माय नमः। भोगिभूषण-
फणामणिस्फुरदनन्ताय नमः। हरिहयादिहरिदीश्वरसामन्त-
चक्रहेमहिमगिरिधृतवसुन्धराय नमः। कुन्दसुन्दरशर-
च्चन्द्रिकासान्द्रकल्लोलसुधासमुद्राय नमः। चिन्तामण्यादि-
दिव्यमणिगणरमणीयमणिद्वीपाय नमः। हरिचन्दनमन्दा-
रादिदिव्यतरुबृन्दसुन्दरकल्पवृक्षमहोद्यानाय नमः। नव-
रत्नप्राकारेभ्यो नमः। पुरसुन्दरहरिन्मुखीभवचन्द्रकान्त-
कवाटतोरणाय नमः। नवरत्नविचित्रितगोपुरशिखरेभ्यो नमः।
स्वर्णरत्नमेखलोपरिस्थितमणिकुट्टिमभूचिन्तामणिगृहराज-
106 कक्ष्यान्तरान्तररत्नस्तम्भशतसहस्रजातज्योतिर्जातरूपसा-
लभञ्जिकापुञ्जमञ्जुलशतसहस्रस्वर्णस्तम्भमण्टपाय
नमः। तन्मध्ये अष्टगजविधृतेन्द्रविमानाय नमः। तन्मध्ये
रत्नसिंहासनाय नमः। शुभ्रवर्णाय सिंहरूपाय वैराग्याय
वायव्यङ्घ्रये नमः। हरिद्वर्णाय सिंहरूपाय ऐश्वर्याय ऐशान्यांघ्रये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। राजावर्तनिभाय नराकृतये अधर्माय पूर्वफलकाय नमः।
राजावर्तनिभाय नराकृतये अज्ञानाय दक्षिणफलकाय नमः। रा-
जावर्तनिभाय नराकृतये अवैराग्याय पश्चिमफलकाय नमः।
राजावर्तनिभाय नराकृतये अनैश्वर्याय उत्तरफलकाय नमः।
मध्ये लक्ष्मीपतिफलकाय नमः। तदुपरि ओं हां स्कन्दासनाय
नमः। ओं हां हं हां स्कन्दमूर्तये नमः इति मूर्तिं दण्डाकारं रक्त-
वर्णं विभाव्य। पश्चाद्दण्डभङ्गिन्यासं कुर्यात्। ओं सों ईशान-
मूर्धाय जगद्भुवाय नमः इति शिरसि। ओं सें तत्पुरुषाय वच-
द्भुवाय नमः वक्त्रे। ओं सुं अघोरहृदयाय विश्वभुवाय नमः हृ-
दये। ओं सिं वामदेवगुह्याय रुद्रभुवाय नमः गुह्ये। ओं सं स-
द्योजातपादाय ब्रह्मभुवाय नमः पादे। ओं सौं आप्यभुवाय भु-
91 a वद्भुवाय नमः इति सर्वाङ्गे न्यसेत्॥ ततः मुण्डभङ्गिन्यासं
कुर्यात्। ओं सों ईशाय जगद्भुवमूर्ध्ने नमः इतीशानमूर्ध्नि।
ओं सें तत्पुरुषाय वचद्भुवमूर्ध्ने नमः पूर्वमूर्ध्नि। ओं सुं अघोराय
विश्वभुवमूर्ध्ने नमः दक्षिणमूर्ध्नि। ओं सिं वामदेवाय रुद्रभुव-
मूर्ध्ने नमः उत्तरमूर्ध्नि। ओं सं सद्योजाताय ब्रह्मभुवमूर्ध्ने नमः
पश्चिममूर्ध्नि। ओं सौं आप्यभुवाय भुवद्भुवमूर्ध्ने नमः इति नै-
ऋतमूर्ध्नि न्यसेत्। कलाभङ्गिन्यासं कुर्यात्। ओं हौं शान्त्यती-
तकलायै नमः। इति शिरसि। ओं हैं शान्तीशकलायै नमः।
वक्त्रे। ओं हूं विद्याकलायै नमः हृदये। ओं सिं प्रतिष्ठाकलायै

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः गुह्ये । ओं ह्रां निवृत्तिकलायै नमः इति पादयोर्विन्यस्य।
पञ्चतत्वन्यासं कुर्यात् । ओं हं आकाशतत्वाय नमः। आकाश-
तत्वाधिपतये सदाशिवाय नमः। इति शिरसि। ओं यं वायुत-
त्वाय नमः। वायुतत्वाधिपतये महेश्वराय नमः वक्त्रे। ओं रं
तेजस्तत्वाय नमः। तेजस्तत्वाधिपतये रुद्राय नमः हृदये। ओं वं
अमृततत्वाय नमः अमृततत्वाधिपतये विष्णवे नमः गुह्ये।
ओं लं पृथिवीतत्वाय नमः पृथिवीतत्वाधिपतये ब्रह्मणे नमः
इति पादयोर्विन्यस्य। त्रितत्वन्यासं कुर्यात्। ओं हुं शिवतत्वा-
य नमः। ओं हं शिवतत्वाधिपतये रुद्राय नमः। इति मुख-
मण्डले। ओं सिं विद्यातत्वाय नमः। ओं हिं विद्यातत्वाधिप-
तये विष्णवे नमः इति हृदये। ओं हं आत्मतत्वाय नमः। ओं हं
९१८ आत्मतत्वाधिपतये ब्रह्मणे नमः इति पादयोः विन्यस्य। पश्चा-
न्मातृकान्यासं कुर्यात्। ओं अं नमः शिरसि। आं नमः मुखवृत्ते।
इं नमः दक्षिणनेत्रे। ईं नमः वामनेत्रे। उं नमः दक्षकर्णे। ऊं नमः
वामकर्णे। ऋं नमः दक्षिणगण्डे। ॠं नमः वामगण्डे। लृं नमः
दक्षिणनासिकायां। ॡं नमः वामनासिकायाम्। एं नमः ऊर्ध्वोष्ठे।
ऐं नमः अधरोष्ठे। ओं नमः ऊर्ध्वदन्ते। औं नमः अधोदन्ते।
अं नमः जिह्वायाम्। अः नमः तालुरन्ध्रे विन्यस्य। कं नमः दक्षि-
णबाहुशिखरे। खं नमः दक्षिणकोर्परे। गं नमः दक्षिणमणि-
बन्धे। घं नमः दक्षिणहस्ताङ्गुलिमूले। ङं नमः दक्षिणहस्ता-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ङ्गुल्यग्रे न्यसेत् । चं नमः वामबाहुशिखरे । छं नमः वामकोर्परे ।
जं नमः वाममणिबन्धे । झं नमः वामहस्ताङ्गुलिमूले । ञं नमः वा-
महस्ताङ्गुल्यग्रे न्यसेत् । टं नमः दक्षिणोरुमूले । ठं नमः दक्षजा-
नुनि । डं नमः दक्षिणगुल्फे । ढं नमः दक्षपादाङ्गुलिमूले । णं नमः
दक्षिणपादाङ्गुल्यग्रे न्यसेत् । तं नमः वामोरुमूले । थं नमः वाम-
जानुनि । दं नमः वामगुल्फे । धं नमः वामपादाङ्गुलिमूले । नं न-
मः वामपादाङ्गुल्यग्रे न्यसेत् । पं नमः दक्षिणपार्श्वे । फं नमः
92a वामपार्श्वे । बं नमः पृष्ठे । भं नमः नाभौ । मं नमः उदरे । यं नमः
हृदये । रं नमः दक्षिणदोर्मूले । लं नमः वामदोर्मूले । वं नमः
पिठरे । शं नमः दक्षिणकक्षे । षं नमः वामकक्षे । सं नमः दक्षिण-
बाहौ । हं नमः वामबाहौ । ळं नमः दक्षिणपादे । क्षं नमः वामपादे
न्यसेत् । स्कन्दकलान्यासः । जगद्भुवं जयायै नमः इतीशान-
मूर्ध्नि । बहुतो बलायै नमः पूर्वमूर्ध्नि । हुतं उन्नतायै नमः द-
क्षिणमूर्ध्नि । वचद्भुवं वामदेवाय नमः उत्तरमूर्ध्नि । नमस्ते अस्तु
नन्दिन्यै नमः पश्चिममूर्ध्नि । विश्वभुवे विजयायै नमः नैरृत-
मूर्ध्नि । जगद्भुवोऽधिपतिर्जयायै नमः ईशानवक्त्रे । सेनानिसे-
नायै नमः पूर्ववक्त्रे । मयूरप्रियायै नमः दक्षिणवक्त्रे । षडानन-
मङ्गानि शान्त्यै नमः उत्तरवक्त्रे । सन्ध्यायाम नमस्तोऽस्तु सत्यै
नमः पश्चिमवक्त्रे । सुरवं वह्निसूक्ष्मायै नमः नैरृतवक्त्रे । सुब्र-
ह्मण्य सुमत्यै नमः हृदये । बृहस्पतये सुखाय प्रज्ञायै नमः गले ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्य पद्मयोनेरमृतायै नमः दक्षिणबाहौ । यस्यात्माय यश-
स्विन्यै नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः नाभौ । सु-
ब्रह्मण्य सुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे रुचये नमः पृष्ठे । ब्र-
ह्मभुवे ब्रह्मण्यै नमः उरसि । भुवद्भुवे भृत्यै नमः गुह्ये । मानु-
926 तायमान्यै नमः शिश्ने । जगद्भुवं जीवायै नमः दक्षिणोरौ । सुब्र-
ह्मण्य शुद्दायै नमः वामोरौ । कृत्तिकासुतकृपायै नमः दक्षिण-
जानुनि । षष्ठिकासत्वरायै नमः वामजानुनि । जगद्भुवं जगत्यै
नमः दक्षिणजंघायाम् । वचद्भुवं वरदायै नमः वामजंघायाम् ।
स्कन्दविशाखिने कामदायै नमः दक्षिणपादे । हव्यं यस्नाध
धारिण्यै नमः वामपादे । षण्मुखश्यामायै नमः उरसि विन्यस्य ॥
पश्चात् षडक्षरन्यासः । अस्य श्रीसुब्रह्मण्यमहामन्त्रस्य
काश्यपऋषिः । गायत्री छन्दः श्रीषण्मुखो देवता । सौं बीजम् ।
ह्रीं शक्तिः श्रीं कीलकम् । श्रीसुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे
विनियोगः । सामित्यादि कराङ्गन्यासः । ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

पञ्चोपचाराः ॥ न्यासक्रमः ॥

ओं सौं शं नमः इति शिरसि । ओं सौं रं नमः दक्षनेत्रे । वं नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामनेत्रे । णं नमः दक्षिणनासिकायाम् । भं नमः वामनासिकायां,
वं नमः इति शिरसि विन्यस्य । इति प्रथमम् ॥ शं नमः दक्षिण-
बाहुशिखरे । रं नमः दक्षिणकोर्परे । वं नमः दक्षिणमणिबन्धे ।
णं नमः दक्षिणहस्ताङ्गुलिमूले । भं नमः दक्षिणहस्ताङ्गुलिम-
ध्ये । वं नमः दक्षिणहस्ताङ्गुल्यग्रे न्यसेत् । इति द्वितीयम् ॥
93a शं नमः वामबाहुशिखरे । रं नमः वामकोर्परे । वं नमः वामम-
णिबन्धे । णं नमः वामहस्ताङ्गुलिमूले । भं नमः वामहस्ताङ्गुलि-
मध्ये । वं नमः वामहस्ताङ्गुल्यग्रे न्यसेत् । इति तृतीयम् ॥
शं नमः दक्षिणोरुमूले । रं नमः दक्षिणजानुनि । वं नमः दक्षिण-
स्फिचि । णं नमः दक्षिणपादाङ्गुलिमूले । भं नमः दक्षिणपादा-
ङ्गुलिमध्ये । वं नमः दक्षपादाङ्गुल्यग्रे विन्यस्य । इति तुरीयम् ॥
शं नमः वामोरुमूले । रं नमः वामजानुनि । वं नमः वामस्फिचि ।
णं नमः वामपादाङ्गुलिमूले । भं नमः वामपादाङ्गुलिमध्ये । वं
नमः वामपादाङ्गुल्यग्रे न्यसेत् ॥ इति पञ्चमम् ॥ शं नमः हृदये ।
रं नमः दक्षिणपार्श्वे । वं नमः वामपार्श्वे । णं नमः नाभौ । भं नमः
पृष्ठे । वं नमः इति लिङ्गे विन्यस्य । इति षष्ठम् ॥ इति षट्-
त्रिंशत्स्थाने विन्यस्य । ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुध्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं ब्रह्मरन्ध्रान्तं नीत्वा ओं सां सं विद्या-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देहाय नमः इति पुष्पाञ्जलिगतं विभाव्य। कुम्भे विन्यस्य।
षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः। इति नेत्रमुद्रां प्रदर्श्य।
आवाहनम्। पश्चाद्रेचकया पुष्पैरञ्जलिमापूर्य। हृत्प्रदेशे नि-
93b धाय। पूरकं विभाव्य। कुम्भकं भावनया मूलाधारादिनाभ्य-
न्तव्याप्त प्राणबीजं हकारं नाभ्यादिहृदयान्तव्याप्तं घोषामेषा-
कलां औकारेण संयोज्य। हौकारं हृदयादिकर्णान्तव्याप्तं रस-
कलां ऊकारेण संयोज्य। हौकारऊकारौ कर्णादितालुरन्ध्रान्त-
व्याप्तं विषकलां मकारेण संयोज्य। हौंकारस्योपरि भ्रूमध्य-
गतबिन्दुकलया बिन्दुकलां तदुपरि ललाटगतार्धचन्द्रक-
लयार्धचन्द्रकलां तदुपरिगतनिरोधिकलया निरोधिकलां
तदूर्ध्वगतनादेन नादं च तदुपरि ब्रह्मरन्ध्रान्तव्याप्तं नादा-
न्तेन संयोज्य। ब्रह्मरन्ध्रान्तादुपरि शक्तिमेकाङ्गुलव्याप्तां
तदुपरि व्यापिनि त्र्यङ्गुलव्याप्तां तदुपरि व्योमरूप अन-
न्त अनाथ अनाश्रितान्तदुपरि समना चतुरङ्गुलव्याप्तां त-
दुपरि उन्मनामपि चतुरङ्गुलव्याप्तां सञ्चिन्त्य। प्रासादान्ते
द्वादशान्तोपरि षडक्षरेण वाच्यवाचकभावादभिन्नं श्रीसुब्र-
ह्मण्यं सञ्चिन्त्य। पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा। सूक्ष्म-
मार्गेण भ्रूमध्यान्तमवरोप्य स्फुरत्तारकाकारं स्कन्दं रेचक-
94a भावनया हृदयस्थितपुष्पाञ्जलिगतं विभाव्य। अयं कुमारो
जरां जयतु दीर्घमायुः यस्मै त्वं स्तनप्रच्छ्यायायुर्वर्चो यशो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बलं इति मन्त्रमुच्चार्य मूलमन्त्रं दशवारं जप्त्वा। तन्मन्त्रेण पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्यस्य। कुम्भे आवाहिन्या ऊर्ध्वहस्तेन जगद्भवहृदयेनावाह्य। अधोमुखहस्तेन वचद्भवशिरसेन स्थापिन्या संस्थाप्य। विश्वभुवशिखोर्ध्वाङ्गुष्ठमुष्टिभ्यां सन्निधान्या सन्निधीकृत्य। रुद्रभुवकवचेनाङ्गुष्ठगर्भमुष्टिरूपिण्या निष्ठुरया सन्निरुध्य। ब्रह्मभुवनेत्रेणावकुण्ठ्य। ओं भूर्भुवास्त्रेण धेनुमुद्रयामृतीकृत्य स्वागतं ते सुब्रह्मण्येति विज्ञाप्य। वत्स स्वागतमिति देवोक्तं विभाव्य॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्त्वम्प्रीतिभावेन कुम्भेऽस्मिन् सन्निधीभव॥

इति विज्ञाप्य। स्वागतार्घ्यं दत्त्वा। हृदयादिकरान्तस्थानेषु जगद्भवहृदयादि विन्यस्य। ओं भूर्भुवास्त्रेण संरक्ष्य। रुद्रभुवकवचेनावकुण्ठ्य। मूलेन धेनुमुद्रां महामुद्रां दत्त्वा। ओं सां सुब्रह्मण्याय नमः इति पादयोः पाद्यम्। ओं सां सुब्रह्मण्याय स्वाहा इति षड्वक्त्रेष्वाचमनम्। ओं हां सुब्रह्मण्याय स्वाहा इति शिरष्षट्केभ्योऽर्घ्यं दत्त्वा। आपोहिष्ठेति स्नानार्थमर्घ्यजलेन प्रोक्ष्य। दुकूलचित्रवस्त्रं सन्धार्य गन्धद्वारेति गन्धं
94b कुङ्कुमाक्षतं समर्प्य। अष्टपुष्पैरभ्यर्च्य ओं हां ज्ञानशक्तिधराय नमः स्कन्दाय नमः देवसेनापतये नमः। सुब्रह्मण्याय नमः गजारूढाय नमः। शरकाननसम्भवाय नमः। कार्ति-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

केयाय नमः। कुमाराय नमः षण्मुखाय नमः तारकान्तकाय
नमः सेनान्ये नमः। ब्रह्मचारिणे नमः वल्लीकल्याणसुन्दराय
नमः बालाय नमः क्रौञ्चभेदनाय नमः। शिखिवाहनाय
नमः। इति षोडशनामभिरभ्यर्च्य। शरवणभवाय नमः शैलूषा? शय-
लुषुभवाय नमः। परिपुरभवाय नमः। पकलोलिभवाय नमः
त्रिपुरभवाय नमः। तिकलोलिभवाय नमः। शरवणोद्भवाय
नमः षण्मुखाय नमः शिखिवाहनाय नमः। अभयवरप्रदाय
नमः शक्तिहस्ताय नमः। कुक्कुटध्वजाय नमः। कुङ्कुमाङ्गाय
नमः। कुमाराय नम इत्यभ्यर्च्य। धूपदीपं दत्त्वा। नालिकेर-
कदलीफलगुलताम्बूलं निवेद्य। ततो दक्षिणवर्धन्यां ओं ह्रीं
वल्ल्यासनाय नमः। ओं ह्रीं वल्लीमूर्तये नमः। इत्यासनमूर्तिं
विन्यस्य। ध्यानम् —

श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
सव्ये लम्बकरां किरीटमकुटां कुम्भस्तनीकञ्चुकाम्।
अन्योद्वीक्षणसंयुतां शरवणोद्भूतस्य सव्ये स्थितां
मुक्तामाल्यधरां प्रसन्नवदनां वल्लीश्वरीं भावयेत्॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। स्थाप-
नादि कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। उत्तर-
95 a वर्धनीं ओं ह्रीं देवगजासनाय नमः। देवगजमूर्तये
नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पीतामुत्पलधारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां

पीतालङ्करणां करण्डमकुटां सेनानिवामे स्थिताम् ।

वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधरां

देवैरर्चितपादुकां शशिसुतां देवीं त्रिभङ्गीं भजे ॥

इति ध्यात्वा । ओं ह्रीं देवगजायै नमः इति मूलेनावाह्य । स्थापनादि कृत्वा । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा । पश्चाद्रोगाङ्ग पूजयेत् । तद्यथा – कुम्भमूर्तिषु तस्य शिरष्षट्केभ्य ईशानमादाय ॥

स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम् ।

सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ॥

इति ध्यात्वा ओं सों ईशानाय ~~[illegible]~~ जगद्भवमूर्ध्ने नमः इति इतीशानदले सम्पूज्य । वक्त्रषट्केभ्यो वक्त्रमादाय ।

पीताम्बरोपवीतं च नरं कनकसन्निभम् ।

मातुलुङ्गाक्षसूत्रं च दधानं चन्द्रमौलिनम् ॥

इति ध्यात्वा ओं सें तत्पुरुषाय वचद्भवाय नमः इति पूर्वदले सम्पूज्य । हृत्प्रदेशादघोरमादाय —

खट्वाङ्गखेटं च कपालपाशं वामे दधानं परशुं त्रिशूलम् ।

खड्गं च दण्डं विकृतं च भीमं ध्यायेदघोरं भुजगादिभूषम् ॥

इति ध्यात्वा ओं सुं अघोराय विश्वभुवहृदयाय नमः इति

95 b दक्षिणदले सम्पूज्य । वामदेवं गुह्यमण्डलादादाय —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामं रक्तं सुरक्ताभं माल्यवस्त्रोपवीतिनम् ।

तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥

इति ध्यात्वा ओं सिं वामदेवाय रुद्रभुवगुह्याय नमः इत्यु-

त्तरदलेऽभ्यर्च्य । पादाद्यङ्गात् सद्योजातमादाय —

सितस्रगन्धवस्त्राढ्यं बालाकारं त्रिलोचनम् ।

सद्योजातं शशिभृतं वरदाभयपाणिनम् ॥

इति ध्यात्वा ओं सं सद्योजाताय ब्रह्मभुवमूर्तये नमः इति

पश्चिमदले सम्पूज्य । सर्वाङ्गादाप्यभुवमादाय —

आप्यं च श्वेतवर्णाढ्यं सर्वलोकोपकारकम् ।

स्थित्वा रुद्रस्य मकुटे गङ्गायां प्रणमाम्यहम् ॥

इति ध्यात्वा ओं सौं आप्यभुवाय भुवद्भुव सर्वाङ्गाय नमः

इति नैरृते दले सम्पूज्य । सर्वज्ञातबीजेभ्यो नेत्रमादाय ।

चन्द्रार्कवह्निरूपाणि अभयं वरदान्वितम् ।

पद्मस्थानिन्दुधारी च नेत्रं चैव विभावयेत् ॥

इति ध्यात्वा ओं सौं ब्रह्मनेत्रेभ्यो नमः इतीशानस्योत्तर-

भागे सम्पूज्य । सद्भावात्मकं हृदयं हृदयमादाय —

हृदयं चन्द्रसङ्काशं वराभयकरान्वितम् ।

पद्मासनं सोमधरं गुहस्याभिमुखं भजे ॥

ओं सां जगद्भवहृदयाय नमः इत्याग्नेयदले ॥

सर्वगुहतत्वलक्षणम् — शिरश्शिरोदेशादादाय —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिरश्चामीकरप्रख्यं अभयं वरदं दधत् ।

96 a पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा ओं सिं वचद्भुवशिरसे नमः इतीशानदले नेत्र-
स्योत्तरे सम्पूज्य । शिखं शिखयाहृत्य ॥

शिखं सिन्धूरवर्णाढ्यं अभयं बिभ्रदीश्वरम् ।
पद्मासनं इन्दुधरं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा । ओं सूं विश्वभुवशिखाय नमः इति नैरृतदले ।
परं रभेद्यं तेजोरूपं कवचं सर्वाङ्गादादाय —

कवचं भृङ्गसङ्काशं वरदाभयपाणिनम् ।
पद्मस्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा । ओं सैं रुद्रभुवकवचाय नमः इति वायव्य-
दले सम्पूज्य । प्रतापरूपमस्त्रमस्त्रेभ्य आहृत्य —

दंष्ट्रा पिङ्गलवर्णाढ्यं ज्वलत्केश भयानकम् ।
शक्तिशूलं दधद्भीमं अस्त्रं शत्रुविमर्दनम् ॥

इति ध्यात्वा ओं सः भूर्भुव अस्त्राय नमः इति पूर्वादि-
चतुर्दलेषु सम्पूज्य । इति प्रथमावरणम् ॥

ततो द्वितीयावरणमारभ्य पूर्वाद्यष्टघटेषु पूर्वकुम्भे
ओं ह्रां जयन्तासनाय नमः जयन्तमूर्तये नमः ॥

जयन्ताख्यं एकवक्त्रं अञ्जलीकृतसंयुतम् ।
वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां जयन्ताय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।
आग्नेयकुम्भे ओं हां अग्निशिखासनाय नमः अग्निशिखमूर्तये नमः॥

966 तेजोरूपमग्निशिखं सर्वाभरणभूषितम्।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे।

ओं हां अग्निशिखाय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। याम्ये ओं हां कृत्तिकापुत्रासनाय नमः कृत्तिकापुत्रमूर्तये नमः॥

रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम्।
कृताञ्जलिपुटं श्यामं गुहस्याभिमुखं भजे॥

ओं हां कृत्तिकापुत्राय नमः। आवाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। नैऋतकुम्भे ओं हां भूतपत्यासनाय नमः। भूतपतिमूर्तये नमः।

भूतं सिन्धूरवर्णाढ्यं गुहस्याभिमुखस्य तु।
वज्रशक्तिधरं देवं कृताञ्जलिपुटान्वितम्॥

ओं हां भूतपतये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा॥
पश्चिमकुम्भे ओं हां सेनान्यासनाय नमः सेनानीमूर्तये नमः॥

देवसेनां चतुर्बाहुं श्वेतवर्णं कृताञ्जलिम्।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे॥

ओं हां सेनान्ये नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दत्त्वा । वायुकुम्भे ओं हां गुहासनाय नमः। गुहमूर्तये नमः॥

तेजोरूपं गुहस्यात्मं मन्दहासं कृताञ्जलिम् ।
वज्रशक्तिधरं देवं गुहस्याभिमुखं भजे ॥

ओं हां गुहाय नमः। आवाहनादि नैवेद्यान्तं दत्त्वा । उत्तरकुम्भे
97 a ओं हां हेमशूलासनाय नमः हेमशूलमूर्तये नमः॥

हेमशूलं कृष्णवर्णं चतुर्हस्तं कृताञ्जलिम् ।
खड्गखेटकसंयुक्तं गुहस्याभिमुखं भजे ॥

ओं हां हेमशूलाय नमः। आवाहनादि नैवेद्यान्तं दत्त्वा । ईशान-
कुम्भे ओं हां विशालाक्षासनाय नमः विशालाक्षमूर्तये नमः॥

सुप्रसन्नं विशालाक्षं अञ्जलीकृतसंयुतम् ।
पीताम्बरधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां विशालाक्षाय नमः आवाहनादि गन्धपुष्प धूपदीपनैवेद्यं दत्त्वा । पश्चात्तृतीयावरणं पूजयेत् ॥ तद्बहिरावृतेषु द्वारस्य दक्षिणे जयाय नमः। उत्तरे विजयाय नमः। पूर्वे गजेन्द्राय नमः। आग्नेय्यां सुदेहाय नमः। याम्ये सुमुखाय नमः। नैरृते देव-सेनापतये नमः। पश्चिमे मधुराय नमः। वायौ सुरेशाय नमः। उत्तरे सुमित्राय नमः। ईशाने क्षेत्रपालाय नमः॥ इति तृतीयावरणम् ॥ तद्बहिरावृतपूर्वाद्यष्टदिक्षु इन्द्राय नमः अग्नये नमः यमाय नमः नैरृताय नमः वरुणाय नमः वायवे नमः। कुबेराय नमः ईशानाय नमः। तद्दक्षिणे ब्रह्मणे नमः। नैरृते

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विष्णवे नमः। तद्बहिरावृते पूर्वाद्यष्टदिक्षु वज्राय नमः शक्त-
ये नमः दण्डाय नमः खड्गाय नमः पाशाय नमः अङ्कुशाय नमः
गदायै नमः त्रिशूलाय नमः पद्माय नमः चक्राय नमः इति
97 b सम्पूज्य। पाद्यादि गन्धपुष्पधूपदीपं दत्वा। अनन्तरं गुहा-
य मूलेन पुष्पाञ्जलिं दत्वा। महामुद्रां दर्शयित्वा। जयन्ता-
दीन्विना सर्वेषां गुहेन सार्धमत्यन्तमैक्यं विभावयेत्। प-
श्चात्प्राणप्रतिष्ठां कुर्यात्। अस्य श्री प्राणप्रतिष्ठामहामन्त्र-
स्य रुद्रब्रह्माच्युता ऋषयः। ऋग्यजुस्सामाथर्वाणि च्छन्दांसि।
अखिलचैतन्यरूपिणी परा प्राणशक्तिर्देवता। आं बीजं ह्रीं
शक्तिः क्रों कीलकम्। श्रीमत्सुब्रह्मण्येश्वरस्य सशक्तिकस्य
सपरिवारस्य प्राणकलाप्रसादसिद्ध्यर्थे जपे विनियोगः। ह्रा-
मित्यादि कराङ्गन्यासः। ध्यानम् —

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढैः कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्च बाणान्।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

इति ध्यात्वा। पञ्चोपचारान् कृत्वा। कुम्भमूर्ध्नि स्पृष्ट्वा। ओं आं
ह्रीं क्रों यरलवशषसहों। हंसस्सोहमोम्। श्री सुब्रह्मण्येश्व-
रस्य प्राणाः इह प्राणाः स्थिताः। आं ह्रीं क्रों यरलवशषसहोम्।
98 a हंसस्सोहमोम्। श्रीसुब्रह्मण्येश्वरस्य जीव इह स्थितः। आं ह्रीं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रों यरलवशषसहों हंसस्सोहमों श्री सुब्रह्मण्येश्वरस्य जीव-
तत्व सर्वेन्द्रियाणि मनोबुध्यहङ्काराचित्त पृथिव्यप्तेजोवाय्वा-
काश शब्दस्पर्श रूपरसगन्ध श्रोत्रत्वक्चक्षुर्जिह्वा घ्राण वाक्-
पादपाणि पायूपस्थ जीवप्राण इहागत्य अस्मिन् कुम्भे श्री-
सुब्रह्मण्यस्य सशक्ति सपरिवारं सुखं चिरं तिष्ठन्तु स्वाहा। क्रों
ह्रीं आं हंसस्सोऽहं स्वाहा इति मूलेन द्वादशवारं जप्त्वा। पुन-
षडङ्गध्यानम्। असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो
धेहि भोगं ज्योक्पश्येम सूर्यमुच्चरन्तं अनुमते मृळया नः
स्वस्ति। पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षं
पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां याः स्वस्ति।
ओं सौं सुब्रह्मण्याय नमः प्राणान् प्रतिष्ठापयामि। इति प्राण-
प्रतिष्ठां कृत्वा। पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। मूल-
98 b मन्त्रं यथाशक्ति जप्त्वा। मूर्तिभिस्सह आचार्यः तत्तत्कुण्डसमी-
पं पूर्ववत् स्थित्वा। अग्निं प्रज्वाल्य परिसमूहनं कृत्वा। परि-
स्तरणाद्याज्यसंस्कारान्तं कृत्वा। जुषस्वनेति जपित्वा। अदिते-
नुमन्यस्व इत्यादि परिषिच्य। कुण्डमध्ये ओं ह्रौं अग्नये नमः।
ऊर्ध्वमेखलायां पूर्वाद्यष्टदिक्षु जातवेदसे नमः सहोजसे नमः।
अजिराप्रभवे नमः। वैश्वानराय नमः। नर्यापसे नमः। पङ्क्ति-
राजसे नमः। विसर्पिणे नमः। यज्ञपुरुषाय नमः। मध्यमेखलायां
पूर्वाद्यष्टदिक्षु ओं हां जयन्ताय नमः। अग्निशिखाय नमः।

॥ तृतीयदिनहोमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृत्तिकापुत्राय नमः। भूतपतये नमः सेनान्ये नमः। गुहाय नमः।
हेमशूलाय नमः। विशालाक्षाय नमः इत्यभ्यर्च्य। अधोमेखलायां
पूर्वाद्यष्टदिक्षु ओं हां इन्द्राय नमः इत्यादि ईशानाय नम इति
सम्पूज्य। धूपदीपनैवेद्यं दत्वा। 'हे लोकपालाः, विघ्नसंघातं
निवार्य अग्निं पालयिष्यथ' इति गुहाज्ञां श्रावयेत्। इति वि-
ज्ञाप्य। कुण्डमध्ये ओं हां अग्न्यासनाय नमः अग्निमूर्तये
नमः। ध्यानम् —

अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।
99 a वरदमनलखेटं ह्यङ्कुशं स्रुक्च वामे
दधतमृषभसंस्थं भावयेयं गुहाग्निम्॥

इति ध्यात्वा। ओं हूं गुहाग्नये नमः। इति मूलेनावाह्य। पाद्यादि-
गन्धपुष्पधूपदीपनैवेद्यं दत्वा। व्याहृतिभिर्हुत्वा। ततः कुण्डा-
ग्निमध्ये ओं हां आधारशक्तिकमलासनाय नमः इत्यादि। ओं
हां गुहासनाय नमः गुहमूर्तये नमः इत्यासनमूर्तिं विन्यस्य।
ध्यानम् - विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवराभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम्॥
इति ध्यात्वा ओं सौं सुब्रह्मण्याय शरवणभवाय नमः इति
मूलेन कुण्डाग्निमध्ये श्री सुब्रह्मण्यमावाहयामि इत्यावाह्य।
उपचारैस्सम्पूज्य। ओं ह्लीं वल्ल्यै नमः ओं श्रीं देवगजायै नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति शक्तिद्वयं सम्पूज्य । तदावृतदेवानां जयन्ताय नमः अग्नि-
शिखाय नमः। कृत्तिकापुत्राय नमः भूतपतये नमः। सेनान्ये नमः
गुहाय नमः। हेमशूलाय नमः विशालाक्षाय नमः। इत्यर्घ्यं प-
श्चात्पूर्णां विधाय । पूर्ववत् स्थित्वा ॥

— नवकुण्डम् —

नवकुण्डं वक्ष्ये । पूर्वकुण्डे ओं हां सुब्रह्मण्यासनाय नमः।
सुब्रह्मण्यमूर्तये नमः। ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
99 b. र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सौं सुब्रह्मण्याय नमः।
इति मूलेनास्मिन् कुण्डाग्निमध्ये सुब्रह्मण्यमावाहयामि । स्था-
पनादि कृत्वा । पाद्याद्युपचारैस्सम्पूज्य । आग्नेयकुण्डे ओं हां
कुमारासनाय नमः कुमारमूर्तये नमः। ध्यानम् —

सव्यद्वये निशितशक्ति समादधानं
वामद्वये भरतकुक्कुटखेटकं च ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदाननिरतं कलये कुमारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां कुमाराय नमः इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलेनास्मिन् कुण्डाग्निमध्ये श्रीकुमारमावाहयामि । स्थापना-
दि कृत्वा पाद्याद्युपचारं दत्त्वा । दक्षिणकुण्डे ओं सां षण्मुखास-
नाय नमः षण्मुखमूर्तये नमः। ध्यानम् —

वन्दे सिन्धूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्रं देवसेनामदनरिपुसुतावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
100 a चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा ओं सां षण्मुखाय नमः इति
मूलेनास्मिन् कुण्डाग्निमध्ये श्रीषण्मुखमावाहयामि । स्था-
पनादि कृत्वा । पाद्याद्युपचारं दत्त्वा । नैऋतकुण्डे ओं हां ब्रह्म-
चार्यासनाय नमः ब्रह्मचारिमूर्तये नमः। ध्यानम् —

कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्रम् ।
कात्यायनीसुतमहं कटिबद्धवामे
कौपीनदण्डधर दक्षिणहस्तमीडे ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां ब्रह्मचारिणे नमः । इति
मूलेनास्मिन् कुण्डाग्निमध्ये श्रीब्रह्मचारिणमावाहयामि । स्था-
पनादि कृत्वा पाद्याद्युपचारं दत्त्वा । पश्चिमकुण्डे ओं हां सेना-
पत्यासनाय नमः सेनापतिमूर्तये नमः। ध्यानम् —

सौम्यादित्यप्रदीप्त द्वादशनयनं षण्मुखं मन्दहासम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामाङ्के सुस्थितायां सरसिरुहधृतालिङ्गितायां सुहस्तम्।
उत्तुङ्गोरुस्तनाग्रो विहितकरतलाभीति खेटादि शूलं
ह्लादिन्युद्दीप्तशक्तीष्वसनवनगतं कुक्कुटाब्जेनहस्तम्॥
इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां देवसेनापतये नमः।
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं देवसेनापतिमावाह-
100 b यामि। स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा। वायुकुण्डे
ओं सां गजारूढासनाय नमः गजारूढमूर्तये नमः। ध्यानम् —

एकाननं द्विनयनं वरकुक्कुटौ च
वामद्वये निशितशक्त्यभयौ द्वयेऽन्ये।
बिभ्राणमीश्वरसुतं तपनायुताभं
नित्यं नमामि गजवाहनमिष्टसिद्धौ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां गजारूढाय नमः।
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं गजारूढमावाहयामि।
स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा। उत्तरकुण्डे ओं ह्रां
बालासनाय नमः बालमूर्तये नमः। ध्यानम् —

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम्।
विप्रप्रियकरं वन्दे बालरूपं रविप्रभम्॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां बालाय नमः इति मू-
लेनास्मिन् कुण्डाग्निमध्ये ओं बालरूपमावाहयामि। स्थाप-
नादि कृत्वा पाद्याद्युपचारं दत्त्वा। ईशानकुण्डे ओं सां शिखि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वाहनासनाय नमः शिखिवाहनमूर्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नविघ्नदं नौमि रुद्रभवं शिखिवाहनम्॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां शिखिवाहनाय नमः
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शिखिवाहनमावा-
101 a हयामि। स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा॥

## ॥ इति नवकुण्डविधिः॥

## — पञ्चकुण्डम् —

पञ्चाग्नेरायतनं चेत् पञ्चकुण्डाधिदेवतम्। प्रधानकुण्डे मूलबेराकृतिं ध्यात्वा होमयेत्। दिक्कुण्डचतुष्केषु पूर्वकुण्डे ओं हां सेनापत्यासनाय नमः सेनापतिमूर्तये नमः। ध्यानम् —

अभयसितकराङ्कं ह्यङ्कुशं शक्तिशूलं
वरदकुलिशपाशं पद्महस्तौ गदां च।
दधत धनुसुबाणं द्वादशायां तु हस्ते
द्विदशकमलनेत्रं देवसेनानिमीडे॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां सेनान्ये नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं सेनानीमावाहयामि। स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा। दक्षिणकुण्डे ओं सां कार्तिकेयासनाय नमः कार्तिकेयमूर्तये नमः। ध्यानम् —

वरदकुलिशखेटं वामहस्तत्रये च

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दधतमभयशक्तिं खड्गमन्यत्रये च ।
तरुणरविसमाभं साधुभिः पूज्यमानं
कमलवदनमेकं कार्तिकेयं नमामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां कार्तिकेयाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं कार्तिकेयमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । पश्चिमकुण्डे ओं सां स्कन्दासनाय नमः स्कन्दमूर्तये नमः । ध्यानम् —

वामे करे च युगले वरकुण्डिकायां
101 b सव्येऽक्षसूत्रमभयं दधतं विशाखम् ।
वल्लीयुतं वनजलोचनमेकवक्त्रं
वन्दामहे वनजसम्भवशासितारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां स्कन्दाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं स्कन्दमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । उत्तरकुण्डे ओं सां शरवणोद्भवासनाय नमः शरवणोद्भवमूर्तये नमः । ध्यानम् —

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटं प्रासदण्डौ
टङ्कं बाणं वरदमभयं कार्मुकं चोर्ध्वहस्ते ।
पीतं सौम्यं द्विदशनयनं केकयं साकमिन्द्रैः
सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां शरवणोद्भवाय नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शरवणोद्भवमावाहयामि।

स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा।

पञ्चकुण्डविधिः प्रोक्त एककुण्डविधिं शृणु।

एकाग्निरायतनं चेज्जीर्णबेराकृतिं यजेत्॥

यथोचितकुण्डस्य यथोचितदेवं आधारशक्त्यादि आसनमूर्तिं ध्यानपुरस्सरं सम्पूज्य। तत्तन्मन्त्रेणाष्टोत्तरशतमाज्याहुतिं हुत्वा। प्रधानकुण्डादि सर्वत्र कुण्डेषु तत्तन्मूलमन्त्रेण समिद-न्नाज्याहुतिं द्रव्यं प्रतिसहस्रं वा तदर्धं वाष्टोत्तरशतं वा हुत्वा

102 a द्रव्यं प्रति व्याहृतिभिर्हुत्वा विशेषद्रव्यैश्च प्रत्येकं पञ्चविंशति-वारं हुत्वा। तद्यथा —

समिधा सद्यमन्त्रेण आज्यं वामेन हूयते।

अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु॥

सिद्धार्थैरीशमन्त्रेण हृदयेन यवं हुनेत्।

तिलं च शिरसा हुत्वा मुद्गं च शिखया हुनेत्॥

कवचेन हुनेन्माषं सक्तुर्नेत्रेण हूयते।

कदलीफलमस्त्रेण अपूपं मूलमन्त्रतः॥

निष्पावं वल्लिमूलेन गुहास्त्रं चणकं तथा।

वैणवं जयमन्त्रेण कुलस्थमग्निमन्त्रतः॥

कृत्तिकापुत्रमन्त्रेण आढकं च हुनेत्क्रमात्।

भूतनाथस्य मन्त्रेण गोधूमं चैव होमयेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सेनानीरिति मन्त्रेण प्रियङ्गुं चैव होमयेत् ।
गुहमन्त्रं समुच्चार्य नालिकेरं हुनेत्क्रमात् ॥
हेमशूलस्य मन्त्रेण क्षीरेणैव तु होमयेत् ।
विशालाक्षमन्त्रमुच्चार्य ताम्बूलं जुहुयात्क्रमात् ॥
एलादिवासनाद्रव्यं मूलमन्त्रेण होमयेत् ।
शतमर्धं तदर्धं वा तदर्धार्धमथापि वा ॥
द्रव्यान्ते व्याहृतिं हुत्वा सर्वकुण्डानि होमयेत् ।

ओं शरवणोद्भवाय षण्मुखाय शिखिवाहनाय अभयवर-
प्रदाय शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमाराय
ओं ह्रां ह्रीं सौं शरवणभव हुं फट् स्वाहा । इति मालामन्त्रं प-
ञ्चविंशतिवारं हुत्वा । ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवण-
भव स्वाहा । ओं ह्रीं वल्ल्यै स्वाहा । ओं श्रीं देवगजायै स्वाहा ।
102b इति मूलेन प्रत्येकं अष्टोत्तरशतं हुत्वा । शकुन्यै स्वाहा ।
रेवत्यै स्वाहा । पूतनायै स्वाहा । महापूतनायै स्वाहा । निशीथिन्यै
स्वाहा । मालिन्यै स्वाहा । शीतलायै स्वाहा । भूत्यै स्वाहा । विश्व-
तोमुख्यै स्वाहा । इत्येकैकवारं हुत्वा । जयन्ताय स्वाहा । अग्नि-
शिखाय स्वाहा । कृत्तिकापुत्राय स्वाहा । भूतपतये स्वाहा । से-
नान्ये स्वाहा । गुहाय स्वाहा । हेमशूलाय स्वाहा । विशालाक्षाय
स्वाहा । ओं भूः स्वाहा अग्नये इदं न मम । ओं भुवः स्वाहा वायवे
इदं न मम । सुवः स्वाहा सूर्यायेदं न मम । ओं भूर्भुवस्स्वः स्वाहा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रजापतये इदं न मम। इति सर्वत्र कुण्डं होमयेत्। हव्यवाह-
मभिमातिषाहं रक्षोहणं पृतना अभिष्या ऊरुं नः पन्थाः प्रति-
ष्ठां वि भाहि ज्योतिष्मद्धेह्यजरं न आयुः स्वाहा। अग्नये स्विष्ट-
कृते इदं न मम। इति सर्वत्र हुत्वा। ततस्सर्वत्र पूर्णां जुहु-
यात्। तद्यथा — स्रुवेण स्रुग्गर्तं आज्येनापूर्य। पुष्करोप-
र्यधोमुखं स्रुवं न्यस्य। तदग्रे पुष्पं दत्वा वामदक्षिणह-
103 a स्ताभ्यां शंखवत्संसक्ताभ्यां उरसव्येन संलग्नौ तावुभावुपा-
दाय। समपादस्समुत्थायोर्ध्वकायो नाभ्यां तिर्यग्विधाय।
स्रुगग्रदत्तदृष्टिः ओं सौं शरवणभवौषडिति मूलं प्लुतमुच्चा-
र्य। वामस्तनान्तं स्रुङ्मूलमानीय अनुद्विग्नः घृतधारां बिन्दु-
स्थानाद्विनिस्सृतामृतधारामिति संस्मरन् यवप्रमाणे-
नाविच्छिन्नधारया समस्तमाज्यं वह्नौ क्षिपेत्। इति सर्वत्र पूर्णां
विधाय। ततः सर्वत्र कुण्डेषु आज्याहुतीर्जुहोति। तद्यथा —
तत्तन्मूलमन्त्रेण सहस्रं वा तदर्धं वाष्टोत्तरशतं वा पञ्चविंश-
तिं हुत्वा। अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु अग्ने
तदस्य कल्पय। त्वं वेत्थ यथातथं स्वाहा। अग्नय इदं न मम।
पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अ-
ग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा। अग्नय इदं न मम।
यत्पाकत्रा मनसा दीनदक्षाणा यज्ञस्य मन्वते मर्तासः अग्नि-
ष्टुद्धोता क्रतुविद्विजानन्। नेजिष्ठो देवां ऋतुशो यजामि स्वाहा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्नय इदं न मम। ओं भूः स्वाहा अग्नये इदं न मम। ओं भुवः
स्वाहा वायव इदं नमम। ओं सुवः स्वाहा सूर्यायेदं न मम। ओं
भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम। पश्चात्पूर्णां विधाय
एवं क्रमेण सर्वत्र कुण्डं होमयेत्। दिक्षु कुण्डहोमं विना प्र-
धानकुण्डस्य व्याहृतीभिर्हुत्वा। ततो नाडीसन्धानार्थं मूलेना-
हुतित्रयं दत्वा। नाडीसन्धानं कुर्यात्। तद्यथा – ओं सौं सु-
1036 ब्रह्मण्याय स्वाहा। ओं हूं गुहाग्निभ्यां स्वाहा। इति सन्धाय।
निस्सृत्य। मूलमन्त्रमुच्चार्य। वह्निस्थगुहनासाविनिर्गतज्योती-
रूपशिखां यागस्थगुहशिखालीनां रश्मिमात्रावियोगेनाविच्छि-
न्नामुभयत्र सकृदास्पदं ध्यायेत्। एवं कुम्भं यागाग्निगुहैः-
रात्मानं सह नाडीसन्धानं कुर्यात्। यथा कुशच्छलेन विस-
तन्तुनिभां कुम्भस्य गुहनाडीं पिङ्गलया विनिस्सृत्य स्वनाड्या-
मिडया प्रविश्य। विलीनेति विभाव्य। गुहाणुना रेचकेण वि-
निस्सृत्य। वह्निस्थगुहनाडीं पिङ्गलया प्रविश्य विलीनं विभा-
व्य। मूलेन रेचकेण इडया विनिस्सृत्य। स्वनाड्यां पिङ्गलया
प्रविश्य। विलीनेति विभाव्य। गुहाणुना रेचकेण विनिस्सृत्य।
कुम्भस्थगुहहृदयं तत्पूरकेण प्रविश्य। लयमिति विभाव्य।
मूलेन रेचकेण विनिस्सृत्य। स्वहृदयं पूरकेण प्रविशेत्। कुम्भं
अग्निगुहाभ्यामात्मानं सह नाडीं सन्धाय पश्चान्मन्त्रतर्पण-
दीपनार्थं जुहुयात्। तद्यथा - ओं सौं सुब्रह्मण्याय स्वाहा। ओं सें

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्पुरुषाय वचद्भुवाय स्वाहा । ओं सुं अघोराय विश्वभुवाय
स्वाहा । ओं सिं वामदेवाय रुद्रभुवाय स्वाहा । ओं सं सद्योजा-
ताय ब्रह्मभुवाय स्वाहा । ओं सौं आप्यभुवाय भुवद्भुवाय स्वा-
104 a हा । इति मन्त्रं प्रतिदशवारं हुत्वा । इति तर्पणम् । ओं सां जग-
द्भुवहृदयाय स्वाहा । ओं सिं वचद्भुवशिरसे स्वाहा । ओं सुं
विश्वभुवशिखाय स्वाहा । ओं सैं रुद्रभुवकवचाय स्वाहा । ओं
सौं ब्रह्मभुवनेत्राय स्वाहा । ओं सः भूर्भुव अस्त्राय स्वाहा । इति
दीपनम् । एवं मन्त्रतर्पणदीपनम् । ततो देशकालदुर्निमि-
त दुःस्वप्न द्रव्यलोप मन्त्रलोप तन्त्रलोप समकालसङ्कर दोषनि-
वृत्त्यर्थं प्रासादेन शतं वा पञ्चविंशतिं वा हुत्वा । पश्चात्प्राय-
श्चित्तार्थं बहुरूपेण पञ्चास्त्रेण पापभक्षणमन्त्रेण नवात्म-
मन्त्रेण शम्बरेणासिना प्रत्येकमष्टोत्तरशतं पञ्चदश पञ्चविं-
शतिं वा हुत्वा । मन्त्रो यथा — बहुरूपमन्त्रः । ओं हुं अघोरा-
य स्वाहा । शिवास्त्रमन्त्रः - ओं हौं हर हर शिव शिव शिवा-
स्त्राय स्वाहा । क्षुरिकास्त्रमन्त्रः - ओं छित् छिन् क्षुत् क्षुत्
क्षुरिकास्त्राय स्वाहा । व्योमास्त्रमन्त्रः - ओं ह्रीं स्फुर स्फुर ।
प्रस्फुर प्रस्फुर घोर घोर तनु तनु रूपरूप चट चट प्रचट
प्रचट कह कह वम वम बन्धय बन्धय घातय घातय हुं
फट् हूं स्वाहा । पापभक्षणमन्त्रः — ओं हां हिं हुं हें हों हैं
पापभक्षणाय शिवाय स्वाहा । नवात्ममन्त्रः - ओं हं हंस -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

104b स्सोहं सोऽहं हंसः स्वाहा। शम्बरमन्त्रः - ओं हां हिं हृदयाय स्वाहा। असिमन्त्रः - ओं हः अस्त्राय स्वाहा। इत्येवं प्रत्येकमष्टोत्तरशतं वा पञ्चाशत् पञ्चविंशतिं वा हुत्वा॥

— तृतीयदिनविशेषहोमः —

पश्चात्तृतीयदिवसविशेषहोमं कुर्यात्। तद्यथा — गणपतिमन्त्रः - ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपते वरदवरद सर्वजनं मे वशमानय स्वाहा। शिवमन्त्रः - ओं हौं शिवाय स्वाहा। गौरीमन्त्रः - ओं ह्लीं गौर्यै स्वाहा। सदाशिवमन्त्रः - ओं हौं हं सदाशिवाय स्वाहा। महेश्वरमन्त्रः - ओं हां महेश्वराय स्वाहा। रुद्रमन्त्रः - ओं रैं रुद्राय स्वाहा। चन्द्रशेखरमन्त्रः - ओं हौं चन्द्रशेखराय स्वाहा। सोमास्कन्दमन्त्रः - ओं हां हें मं रं रैं सोमास्कन्देश्वराय स्वाहा। प्रत्यङ्गिरास्त्रमन्त्रः - ओं आं ईं ऊं रुद्रास्थिशृंखले ह्रीं सर्वतोभद्रे कुटिले रुद्रवचनविधारिणि रक्ष मां प्रत्यङ्गिरे धाम धाम ज्योति ज्योति सुवस्सुवः। पाद्यमृतोऽहं देहं सत्यहं त्रिभिदं पादजुषां लक्ष्मी नमो वहः करिकेयं करोति तन्नमो वायों विशन्तु महादेवा सुवृत्ते नमोऽस्तु। नमः स्वाहा। विद्याङ्गास्त्रम् - ओं फट् अमृतं अमृताय फट् स्वाहा। सावित्रीमन्त्रः - व्योमव्योमाय विद्महे सूक्ष्मसूक्ष्मायै

105a धीमहि। तन्नो रुद्रः प्रचोदयात् स्वाहा। गायत्रीमन्त्रः - तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि तन्नो रुद्रः प्रचोदयात्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलप्रासादमन्त्रः - ओं हां हौं शिवाय स्वाहा। पञ्चब्रह्ममन्त्रः -
ओं हों हें हुं हिं हं ईशानतत्पुरुषाघोरवामदेवसद्योजाताय
स्वाहा। षडङ्गमन्त्रः - ओं हां हीं हूं हैं हौं हः हृदय शिरसि शिख
कवच नेत्रास्त्राभ्यां स्वाहा। विष्णुमन्त्रः - ओं नमो नारायणाय
स्वाहा। ब्रह्ममन्त्रः - ओं ब्रां ब्रह्मणे स्वाहा। सूर्यमन्त्रः - ओं ह्रां
ह्रीं ह्रूं सः शिवसूर्याय स्वाहा। शरवणभवमन्त्रः - ओं सौं शर-
वणभवाय स्वाहा। षण्मुखमन्त्रः - ओं षं षां षण्मुखाय स्वाहा।
सुब्रह्मण्यमन्त्रः - ओं सुं सुब्रह्मण्याय स्वाहा। जगद्भुवादि-
मन्त्रः - जगद्भुव वचद्भुव विश्वभुव रुद्रभुव ब्रह्मभुव भूर्भुवः
स्वाहा। शक्तिपञ्चाक्षरमन्त्रः - ओं ह्रीं नमश्शिवाय स्वाहा। नट-
राजमन्त्रः - ओं हौं आं आनन्दनटेश्वराय स्वाहा। चण्डेश्वरमन्त्रः
ओं हां ध्वनिचण्डेश्वराय स्वाहा। चण्डेश्वरीमन्त्रः - ओं स्त्रीं पौ-
ष्ण्यै स्वाहा। क्षेत्रपालमन्त्रः - ओं क्षेत्रपालाय विद्महे नतदंष्ट्रा-
105 b य धीमहि तन्नो रुद्रः प्रचोदयात् स्वाहा। क्षेत्रपालमूलमन्त्रः।
ओं क्षां क्षेत्रपालाय स्वाहा। वृषभमूलमन्त्रः - ओं वृं वृषभाय
स्वाहा। वृषभगायत्रीमन्त्रः - तीक्ष्णशृङ्गाय विद्महे वेदपादाय
धीमहि तन्नो वृषः प्रचोदयात् स्वाहा। मयूरमन्त्रः - ओं मं
मयूराय स्वाहा। दक्षिणामूर्तिमन्त्रः - ओं नमो भगवते दक्षिणा-
मूर्तये। मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा। वीरभद्रमन्त्रः -
ओं श्रीं ह्रीं जय जय वीरभद्राय स्वाहा। त्र्यक्षरमन्त्रः - ओं जैं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समं मृत्योः पालय पालय सं ज्रूं ओं ओं नमः स्वाहा । बीजमुख्य-
मन्त्रः - ओं भ्रूं ज्रूं क्ष्रूं बीजमुख्याय स्वाहा । शरण्यमन्त्रः - ओं
ह्रां ह्लां ह्रां स्वाहा । द्वादशाक्षरमन्त्रः - ओं षं हं हां हिं हुं व्योम-
व्यापिने स्वाहा । पराशक्तिमन्त्रः - ओं रं पराशक्त्यै स्वाहा । भुव-
नेश्वरीमन्त्रः - ओं ह्रीं भुवनेश्वर्यै स्वाहा । मनोन्मनीमन्त्रः -
ओं ह्रीं मनोन्मन्यै स्वाहा । उमामन्त्रः - ओं ह्रीं श्रीं उमादेव्यै
स्वाहा । स्वयम्बरमन्त्रः - ओं ह्रीं योगिनि योगिनि योगेश्वरि यो-
गभयङ्करि सकलस्थावरजङ्गमस्य मुखहृदयं मम वशं
आकर्षय आकर्षय स्वाहा । प्रत्यङ्गिरसुमूलमन्त्रः - ओं ह्रीं
भक्ष ज्वलाजिह्वे करालदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट् स्वाहा ।
106a सरस्वतीमन्त्रः - ओं ऐं क्लीं सौं सरस्वत्यै स्वाहा । लक्ष्मीमन्त्रः -
ओं श्रीं महालक्ष्म्यै स्वाहा । शास्तामन्त्रः - पुष्कलपूर्णनायकीसमेत-
हरिहरपुत्राय पुत्रलाभाय शत्रुनाशाय मदगजवाहनाय महा-
शास्ताय स्वाहा । भद्रकालीमन्त्रः - काली कङ्काली कल्याणम-
नोहरि तव मभ्यमन्यकविता सौभाग्यं देहि शुभे परमन्त्र-
भाषिणि परयन्त्रभाषिणि परतन्त्रभाषिणि परविद्याच्छेदिनि
जगत्क्षोभिणि स्वाहा । रक्तकालीमन्त्रः - ओं जुं सः सः जुं ओं मृ-
त्युं जय त्र्यक्षरि कङ्कद्वयाय स्वाहा । इं इरुणाय स्वाहा । शं श-
क्रदेव्यै स्वाहा । सं सोमाय स्वाहा । कं कृत्तिकायै स्वाहा । रं रोहि-
ण्यै स्वाहा । सं साम्बपरमेश्वर त्रिषष्टिभक्तजनेभ्यः स्वाहा । ज्वर-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवमन्त्रः – ज्वरराजाय विद्महे त्रिशिरस्काय धीमहि तन्नो
ज्वरहरः प्रचोदयात् स्वाहा । मूलमन्त्रः – ज्वरो शान्त ज्वरदेव
गङ्गाचन्द्रसहित शीतलाय ज्वरहराय स्वाहा । महामारीमन्त्रः –
ओं ह्रीं महामार्यै स्वाहा । महिषमर्दनीमन्त्रः – ओं ह्रीं श्रीं महि-
षमर्दिन्यै स्वाहा । शरभमन्त्रम् – ओं खें खां खट् खट् प्राण-
106b ग्रहासि हुं फट् सर्वशत्रुसंहरणाय शरभसालुवाय पक्षिराजाय
हुं फट् स्वाहा । कालभैरवमन्त्रः – ह्रीं ओं नमो भगवते का-
लभैरवाय सर्वदुष्टग्रहं रिपुं नाशय हुं फट् स्वाहा । शिव-
नामत्रयम् । शिवशम्भो महादेवाय स्वाहा । विष्णुनामत्रयं ।
अच्युतानन्तगोविन्दाय स्वाहा । धन्वन्तरिमन्त्रः – ओं नमो
भगवते धन्वन्तरये अमृतकलशहस्ताय सर्वामयविनाशा-
य त्रैलोक्यनाथाय विष्णवे स्वाहा । स्थूलपञ्चाक्षरम् –
ओं नमश्शिवाय स्वाहा । सूक्ष्मपञ्चाक्षरम् – ओं ह्रां ह्रीं ह्रूं नम-
श्शिवाय स्वाहा । प्रासादपञ्चाक्षरम् – ओं ह्रौं शिवाय स्वाहा ।
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोद-
यात् स्वाहा । नारायणाय विद्महे वासुदेवाय धीमहि तन्नो
विष्णुः प्रचोदयात् स्वाहा । गणनाथाय विद्महे वक्रतुण्डाय
धीमहि तन्नो दन्तिः प्रचोदयात् स्वाहा । षडाननाय विद्महे
शक्तिहस्ताय धीमहि तन्नः स्कन्दः प्रचोदयात् स्वाहा । तत्पुरु-
षाय विद्महे सुवर्णपक्षाय धीमहि तन्नो गरुडः प्रचोदयात्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वाहा । कात्यायनायै विद्महे कन्यकुमारि च धीमहि तन्नो
दुर्गिः प्रचोदयात् स्वाहा । गणाम्बिकायै विद्महे महातपायै
107 a धीमहि तन्नो गौरी प्रचोदयात् स्वाहा । अश्वध्वजाय वि-
द्महे पद्महस्ताय धीमहि तन्नः सूर्यः प्रचोदयात् स्वाहा ।
हंसहंसाय विद्महे परमहंसाय धीमहि तन्नो हंसः प्रचो-
दयात् स्वाहा । झषध्वजाय विद्महे वीणहस्ताय धीमहि
तन्नो वीरः प्रचोदयात् स्वाहा । सर्पराजाय विद्महे सहस्रफ-
णाय धीमहि तन्नो उरगः प्रचोदयात् स्वाहा । ओं नागराजाय
स्वाहा । ओं नागेश्वर्यै स्वाहा । गजध्वजाय विद्महे सृणिहस्ता-
य धीमहि तन्नः शास्ता प्रचोदयात् स्वाहा । हंसध्वजाय वि-
द्महे कूर्चहस्ताय धीमहि तन्नो ब्रह्मा प्रचोदयात् स्वाहा ।
इति मन्त्रेण जुहुयात् । पश्चात् व्याहृतिभिर्हुत्वा पूर्णां वि-
धाय । प्रायश्चित्तार्थं बहुरूपेणासिना मूलमन्त्रेण प्रत्येकम-
ष्टोत्तरशतवारं वा तदर्धं वा पञ्चविंशतिं वा हुत्वा । पश्चात्
मूर्तिपानां तत्तत्कुण्डं निवेश्य । अग्निं प्रज्वाल्य व्याहृतिभि-
र्हुत्वा । प्रधानकुण्डादि सर्वत्र कुण्डं पूर्णां विधाय । पश्चात्
अधिवासहोमं कुर्यात् ॥

— अधिवासहोमः —

तद्यथा - प्रधानकुण्डसमीपे पूर्वस्थितशान्तिकुम्भस्य पूर्व-
वद्धृदमूलेन सम्पूज्य धूपदीपनैवेद्यं दत्वा । मूलमन्त्र -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मष्टोत्तरशतवारं जप्त्वा । आचार्यो मूर्तिपैस्सह शान्तिकुम्भ-
107 b हस्तः बिम्बसमीपं गत्वा । शान्तिकुम्भजलेन प्रोक्ष्य । बिम्बस्या-
धः ओं आधारशक्त्यै नमः मूलप्रकृत्यै नमः आदिकूर्माय नमः
अनन्ताय नमः वराहाय नमः सुधासिन्धवे नमः रत्नद्वीपाय
नमः कलधौताचलाय नमः । कल्पवृक्षवाटिकाय नमः । स्वर्णप्रा-
काराय नमः धर्मकन्दाय नमः ज्ञाननालाय नमः । वैराग्य-
पत्राय नमः । ऐश्वर्यकर्णिकाय नमः । ओं सां सुब्रह्मण्यासना-
य नमः । सुब्रह्मण्यमूर्तये नमः इत्यासनमूर्तिं विन्यस्य ततः
प्रतिखण्डदर्शनार्थं बेरस्य कटिकर्णप्रदेशे पुष्पमालाप्रति-
सरं बद्ध्वा । मूर्धादिगलपर्यन्तं शिवतत्वस्थानम् । रुद्रभागं
कर्णादिकटिपर्यन्तं विद्यातत्वस्थानं विष्णुभागम् । कट्यादि-
पादपर्यन्तं आत्मतत्वस्थानं ब्रह्मभागम् । इति ज्ञात्वा । बिम्ब-
स्य मूर्धादिकण्ठपर्यन्तं शिवतत्वस्थानं समर्चयेत् । ओं हां
शिवतत्वाय नमः शिवतत्वाधिपतये शिवाय नमः । शक्तित-
त्वाय नमः । शक्तितत्वाधिपतये शक्तिमते नमः । सदाशिवतत्वा-
य नमः सदाशिवतत्वाधिपतये ब्रह्मणे नमः । ईश्वरतत्वाय
नमः । ईश्वरतत्वाधिपतये अनन्ताय नमः । शुद्धविद्यातत्वाय
नमः शुद्धविद्यातत्वाधिपतये शम्बराय नमः । इति मूर्धादि-
कुण्डपर्यन्तं शिवतत्वपञ्चकं साधिपदेवपञ्चकमर्चयेत् ।
कर्णादिकटिपर्यन्तं विद्यातत्वसप्तकमर्चयेत् । ओं हां माया-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्त्वाय नमः। मायातत्त्वाधिपतये गहनेशाय नमः। कालतत्त्वाय
108 a नमः कालतत्त्वाधिपतये कालनाम्ने नमः। कलातत्त्वाय नमः कला-
तत्त्वाधिपतये ज्ञानबिन्दवे नमः। विद्यातत्त्वाय नमः विद्यात-
त्त्वाधिपतये विज्ञानाय नमः। नियतितत्त्वाय नमः नियतित-
त्त्वाधिपतये नियामकाय नमः। रागतत्त्वाय नमः। रागतत्त्वाधि-
पतये कामदाय नमः। पुरुषतत्त्वाय नमः पुरुषतत्त्वाधिप-
तये सूक्ष्मदेहाय नमः। इति विद्यातत्त्वसप्तकं साधिपं च
समर्चयेत्। कट्यादिपादपर्यन्तं आत्मतत्त्वं चतुर्विंशति। ओं
हां प्रकृतितत्त्वाय नमः प्रकृतितत्त्वाधिपतये प्रधानाय नमः।
चित्ततत्त्वाय नमः चित्ततत्त्वाधिपतये त्रिदेहाय नमः। अहङ्कार-
तत्त्वाय नमः अहङ्कारतत्त्वाधिपतये अहङ्कृते नमः। बुद्धितत्त्वाय
नमः बुद्धितत्त्वाधिपतये बुद्ध्याङ्गाय नमः। मनस्तत्त्वाय नमः मन-
स्तत्त्वाधिपतये सङ्कल्पाय नमः। नासातत्त्वाय नमः नासातत्त्वाधि-
पतये विलम्बकाय नमः। जिह्वातत्त्वाय नमः जिह्वातत्त्वाधिप-
तये महावक्राय नमः। चक्षुस्तत्त्वाय नमः चक्षुस्तत्त्वाधिपतये
प्रकाशाय नमः। त्वक्तत्त्वाय नमः त्वक्तत्त्वाधिपतये सर्वाङ्गाय नमः।
श्रोत्रतत्त्वाय नमः श्रोत्रतत्त्वाधिपतये व्योमचराय नमः। उपस्थ-
तत्त्वाय नमः उपस्थतत्त्वाधिपतये घनानन्दाय नमः। पायुतत्त्वाय
नमः पायुतत्त्वाधिपतये तूर्णीकृताय नमः। पाणितत्त्वाय नमः पाणि-
तत्त्वाधिपतये रमणाय नमः। पादतत्त्वाय नमः पादतत्त्वाधिपतये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सामदाय नमः। वाक्तत्वाय नमः वाक्तत्वाधिपतये दुन्दुपतये न-
108b मः। शब्दतत्वाय नमः शब्दतत्वाधिपतये सूक्ष्मनादाय नमः। स्प-
र्शतत्वाय नमः स्पर्शतत्वाधिपतये बलवत्तराय नमः। रूपतत्वाय
नमः रूपतत्वाधिपतये भानुमते नमः। रसतत्वाय नमः रसत-
त्वाधिपतये जलेशाय नमः। गन्धतत्वाय नमः गन्धतत्वाधि-
पतये गन्धाङ्गाय नमः। आकाशतत्वाय नमः आकाशतत्वा-
धिपतये सूक्ष्माय नमः। वायुतत्वाय नमः वायुतत्वाधिपतये
मातरिश्वने नमः। तेजस्तत्वाय नमः तेजस्तत्वाधिपतये त्विषां
निधये नमः। अप्तत्वाय नमः अप्तत्वाधिपतये जलेश्वराय नमः।
पृथिवीतत्वाय नमः। पृथिवीतत्वाधिपतये श्रीकण्ठाय नमः। इति.
आत्मतत्वचतुर्विंशतिनामानि साधिपानि च समर्चयेत्॥

॥ इति तत्वतत्वेश्वरन्यासस्समाप्तः॥

पश्चात् मूर्तिमूर्तीश्वरन्यासं कुर्यात्। मूर्धादि भ्रूमध्यपर्यन्तं
आकाशस्थानम्। भ्रूमध्यादि कण्ठपर्यन्तं वायुस्थानम्। कण्ठा-
दिहृदयपर्यन्तं अग्निस्थानम्। हृदयादिगुदपर्यन्तं अप्स्थानं।
गुदादिपादपर्यन्तं पृथिवीस्थानम्। इति ज्ञात्वा तत्तत्स्थाने
समर्चयेत्। तद्यथा- ओं हां हुं आकाशमूर्तये नमः। ओं हां हुं
आकाशमूर्त्यधिपतये सदाशिवाय नमः। ओं हां युं वायुमूर्तये
नमः ओं हां युं वायुमूर्त्यधिपतये ईश्वराय नमः। ओं हां रुं
तेजोमूर्तये नमः ओं हां रुं तेजोमूर्त्यधिपतये रुद्राय नमः। ओं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

109 a हां वृं जलमूर्तये नमः ओं हां वृं जलमूर्त्यधिपतये विष्णवे नमः। ओं हां लूं पृथिवीमूर्तये नमः ओं हां लूं पृथिवीमूर्त्यधिपतये ब्रह्मणे नमः। पुनः नाभिहृदयशिरस्थानत्रयेषु ओं हां षूं अर्कमूर्तये नमः ओं हां षूं अर्कमूर्त्यधिपतये भवाय नमः। ओं हां सूं इन्दुमूर्तये नमः। ओं हां सूं इन्दुमूर्त्यधिपतये महादेवाय नमः। ओं हां हंसः यजमानमूर्तये नमः ओं हां हंसः यजमानमूर्त्यधिपतये पशुपतये नमः॥

॥ इति मूर्तिमूर्तीश्वरन्यासस्समाप्तः॥

इत्यभ्यर्च्य। पश्चाद्बिम्बस्य पूर्वादिदिक्षु मूर्तिपांश्च स्वस्वदिक्षु स्थित्वा। कुशमूलेन ब्रह्मभागं संस्पृश्य मूलजपमष्टोत्तरशतं पृथक्पृथग् जप्त्वा। पश्चात् यागशालां प्रविश्य स्वस्वकुण्डे पूर्ववत् स्थित्वा व्याहृतिभिर्हुत्वा तत्तन्मूलमन्त्रेण पञ्चविंशतिवारं हुत्वा। ततः ओं हुं आत्मतत्वाय स्वाहा। ओं हुं आत्मतत्वाधिपतये ब्रह्मणे स्वाहा। ओं हां लूं पृथिवीमूर्तये स्वाहा ओं हां लूं पृथिवीमूर्त्यधिपतये प्रजापतये स्वाहा। पश्चाद्व्याहृतिभिर्हुत्वा। ततः सर्वत्र पूर्णां विधाय। पश्चाद्बिम्बसमीपं गत्वा। स्वस्वदिक्षु स्थित्वा। बिम्बस्य शान्तिकुम्भजलेन प्रोक्ष्य। कुशमूलेन ब्रह्मभागं संस्पृश्य। मूलमन्त्रेण होमसंख्यां जप्त्वा। वर्मणावकुण्ठ्य। निरुध्य। आत्मतत्वाधिपमाज्ञां श्रावयेत्॥

109 b

आत्मतत्वाधिप ब्रह्मन् यावद्दोषसमृद्धिकम्।
मुषितम्

बिम्बं तावत्त्वयात्रैव स्थातव्यं सावधानतः ॥

इति संश्राव्य । ओं हुं आत्मतत्त्वाय नमः । ओं लूं यूं हांहां वं क्ष्मा-
मूर्तये नमः । एवं विन्यस्य । पश्चाद्विष्णुभागे शान्तिकुम्भज-
लेन प्रोक्ष्य । मूर्तिपांश्च स्वस्वदिक्षु स्थित्वा । कुशमध्येन विष्णु-
भागं संस्पृश्य । मूलमन्त्रमष्टोत्तरशतं पृथक्पृथग्जप्त्वा । प-
श्चाद्यागशालां प्रविश्य । स्वस्वकुण्डे पूर्ववत् स्थित्वा । व्याहृति-
भिर्हुत्वा तत्तन्मूलमन्त्रेण पञ्चविंशतिवारं हुत्वा । ओं हां हिं
आत्मविद्यातत्त्वाभ्यां स्वाहा । ओं हिं विद्यातत्त्वाय स्वाहा । ओं हिं
विद्यातत्त्वाधिपतये विष्णवे स्वाहा । ओं हां वूं जलमूर्त्यै स्वाहा ।
ओं हां वूं जलमूर्त्यधिपतये केशवाय स्वाहा । ओं हां रूं तेजोमू-
र्त्यै स्वाहा । ओं हां रूं तेजोमूर्त्यधिपतये रुद्राय स्वाहा । ओं
हां षूं आकाशमूर्तये स्वाहा । ओं हां षूं आकाशमूर्त्यधिपतये शि-
वाय स्वाहा । ओं हां सूं इन्दुमूर्तये स्वाहा । ओं हां सूं इन्दुमूर्त्य-
धिपतये शम्भवे स्वाहा । ततो व्याहृतिभिर्हुत्वा सर्वत्र पूर्णां
विधाय । पश्चाद्बिम्बसमीपं गत्वा । स्वस्वदिक्षु स्थित्वा । बिम्ब-
स्य शान्तिकुम्भजलेन प्रोक्ष्य । ओं हां हिं आत्मतत्त्वविद्यात-
त्त्वाभ्यां ~~स्वाहा~~ नमः । ओं हिं विद्यातत्त्वाय नमः । ओं हिं विद्यातत्त्वाधि-
110 a पतये विष्णवे नमः । ओं हां वूं जलमूर्तये नमः ओं हां वूं जल-
मूर्त्यधिपतये केशवाय नमः । ओं हां रूं तेजोमूर्तये नमः । ओं
हां रूं तेजोमूर्त्यधिपतये रुद्राय नमः । ओं हां षूं आकाश-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूर्त्यधिपतये शिवाय नमः। ओं हां सूं इन्दुमूर्तये नमः। ओं हां सूं इन्दुमूर्त्यधिपतये शम्भवे नमः इत्यभ्यर्च्य। कुशमध्येन विष्णुभागं संस्पृश्य। मूलमन्त्रेण होमसंख्यां जह्वा। वर्मणावकुण्ठ्य। निरुध्य। विद्यातत्त्वाधिपमाज्ञां श्रावयेत् —

विद्यातत्त्वाधिप विष्णो यावद्दोषसमुत्थितम्।
बिंबं तावत्त्वयात्रैव स्थातव्यं सन्निधानतः॥

इति संश्राव्य। ओं हिं विद्यातत्त्वाय नमः इति विन्यस्य। पश्चाद्रुद्रभागे शान्तिकुम्भ मूलेन प्रोक्ष्य। मूर्तिपांश्च स्वस्वदिक्षु स्थित्वा। कुशाग्रेण रुद्रभागं संस्पृश्य। मूलमन्त्रमष्टोत्तरशतं पृथक्पृथग्जह्वा। पश्चाद्यागशालां प्रविश्य। स्वस्वकुण्डे पूर्ववत् स्थित्वा। व्याहृतिभिर्हुत्वा मूलमन्त्रेण पञ्चविंशतिवारं हुत्वा। ओं हीं हां विद्यातत्त्वशिवतत्त्वाभ्यां स्वाहा। ओं हां शिवतत्त्वाय स्वाहा। ओं हां शिवतत्त्वाधिपतये रुद्राय स्वाहा। ओं हां यूं वायुमूर्तये स्वाहा। ओं हां यूं वायुमूर्त्यधिपतये महेश्वराय स्वाहा। ओं हां हुं आकाशमूर्तये स्वाहा। ओं हुं आकाशमूर्त्यधिपतये सदाशिवाय स्वाहा।
110b ओं हां हं हः यजमानमूर्तये स्वाहा। ओं हां हं हः यजमानमूर्त्यधिपतये महादेवाय स्वाहा। ततो व्याहृतिभिर्हुत्वा सर्वत्र पूर्णां हुत्वा। ततो बिम्बसमीपं गत्वा स्वस्वदिक्षु स्थित्वा। बिम्बस्य शान्तिकुम्भ जलेन प्रोक्ष्य। ओं हीं हां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विद्यातत्त्वशिवतत्त्वाभ्यां नमः। ओं हां शिवतत्त्वाय नमः। ओं हां शिवतत्त्वाधिपतये रुद्राय नमः। ओं हां यूं वायुमूर्तये नमः ओं हां यूं वायुमूर्त्यधिपतये महेश्वराय नमः। ओं हां हुं आकाशमूर्तये नमः। ओं हां हुं आकाशमूर्त्यधिपतये सदाशिवाय नमः। ओं हां हं हः यजमानमूर्तये नमः। ओं हां हं हः यजमानमूर्त्यधिपतये महादेवाय नमः। इत्यभ्यर्च्य कुशाग्रेण रुद्रभागं संस्पृश्य। मूलमन्त्रेण होमसंख्यां जप्त्वा। वर्मणावकुण्ठ्य निरुध्य शिवतत्त्वाधिपाज्ञां श्रावयेत्॥

शिवतत्त्वाधिपो रुद्रो यावद्दोषसमुत्थितम्।
बिम्बं तावत्त्वयात्रैव स्थातव्यं सन्निधानतः॥

इति संश्राव्य। ओं हां शिवतत्त्वाय नमः एवं विन्यस्य। पश्चाद्बिम्बस्य दण्डभङ्गिं मुण्डभङ्गीं न्यस्य। ध्यात्वा विद्यादेहं नेत्रं विन्यस्य। मूलेनावाह्य। शक्तिबिम्बे तत्तन्मूलेनावाह्य। पाद्याद्युपचारं दत्त्वा। मृगमदहिमाम्बुमिश्रितगन्धे-

||| a न नेत्ररहितं सर्वाङ्गं लेपयित्वा। मल्लिकादिसुगन्धपुष्पेण वर्षयेत्। धूपदीपं दत्त्वा। फलादि निवेद्य। पश्चात्पञ्चावरणं विना निद्राकुम्भाष्टौ च पूर्ववत् जयन्तादियथाक्रमेण सम्पूज्य। बिम्बस्य कण्ठादिपादपर्यन्तं नववस्त्रेणाच्छाद्य पश्चाद्बिम्बावृतप्राकारत्रयं भस्मदर्भतिलान् बहिर्विदध्यात्। पश्चान्मङ्गलवाद्यपुरस्सरं यागशालां प्रविश्य प्रदक्षिणक्रमेण

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रधानकुण्डादीन् तत्तत्कुण्डमासाद्य व्याहृतिभिर्हुत्वा । शिवतत्त्व-
विद्यातत्त्वात्मतत्त्वेभ्यः स्वाहा । कुण्डं प्रति तत्तन्मूलमन्त्रेणाष्टोत्तर-
शतं हुत्वा । सर्वत्र पूजां विधाय । ततः प्रधानकुण्डं विनादि-
कसर्वत्र कुण्डेषु जुषस्वनः समिधमग्ने इति जप्त्वा । अदितेनु
मन्यस्वा । इत्यादि देव सवितः प्रासावीः इति परिषिच्य । परि-
धिविष्टरस्थदेवानां बलिं दत्त्वा । तद्यथा – ऊर्ध्वमेखलायां
पूर्वे ब्रह्मणे स्वाहा । दक्षिणे विष्णवे स्वाहा । पश्चिमे रुद्राय
स्वाहा । उत्तरे ईशानाय स्वाहा । एवं बलिं दत्त्वा । पश्चान्मध्य-
मेखलायां पूर्वाद्यष्टदिक्षु जयन्ताय स्वाहा । इत्यादि विशा-
लाक्षाय स्वाहा । अधोमेखलायां पूर्वाद्यष्टदिक्षु इन्द्रादीशाना-
न्तं बलिं दत्त्वा । नमोऽन्तैरभ्यर्च्य । उद्वास्य । पश्चाद्धोमसंख्या-
॥ ८ या दशगुणं जप्त्वा । स्वाहा इत्येकसमिधमग्नौ दत्त्वा । उपस्थानं
कृत्वा उत्थाय । यत्ते अग्ने तेजस्तेन अहं तेजस्वी भूयासम् । यत्ते
अग्ने हरस्तेन अहं हरस्वी भूयासम् । यत्ते अग्ने वर्चस्तेन
अहं वर्चस्वी भूयासम् । मयि मेधां मयि प्रजां मय्यग्निस्तेजो
दधातु । मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु ।
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यत्कृतं तु मया देव परिपूर्णं तदस्तु मे ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मयानि वै ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यानि शेषामशेषाणां शिवानुस्मरणं परम् ॥

नमस्कृत्वा । अभिवादये । ततः स्थित्वा प्रायश्चित्तार्थं अघोरेणाष्टोत्तरशतं हुत्वा । परिस्तरणं परिहृत्य । तद्भस्म त्रियम्बकेन ललाटे धृत्वा । समित्कुशपुष्पसहितं हस्तप्रासादेन तत्कुण्डाग्निं सङ्गृह्य । ओं लूं अग्नये नमः । इति मूलमन्त्रेण हृदा सम्पुटितं प्रधानकुण्डाग्निमध्ये आवाह्य योजयेत् । अवकुण्ठ्य धेनुमुद्रां दत्वा । योजनीकार्थं अग्निं सन्दीप्य । पश्चात् पूजाहोमजपफलसिद्ध्यर्थं सार्घ्यजलहस्तेन सहृदा मूलमन्त्रेण सर्वऋत्विग्भिः आचार्यहस्ते निवेदयेत् । आचार्यं सङ्गृ-
॥२॰॥ हीत्वा । कुम्भाग्नौ निवेदयेत् । पश्चात् आचार्यः कुण्डसमीपे पूर्ववत् स्थित्वा । व्याहृतिभिर्हुत्वा । अयं कुमारमन्त्रेण पञ्चविंशतिवारं हुत्वा । गुहमूलेनाष्टोत्तरशतं वा तदर्धं वा तदर्धार्धं वा हुत्वा । वल्लीदेवनायकीमूलेन प्रत्येकं पञ्चविंशतिवारं हुत्वा । पूर्णां विधाय । परिस्तरणस्थदेवानां क्रमेण बलिं दत्वा । स्वाहा इत्येकसमिधमग्नौ दत्वा । उपस्थानं कृत्वा होमसंख्यादशगुणं जप्त्वा कुम्भाग्नौ समर्प्य । नैरृत्यां सोमकुम्भादि द्वादशपालिकायां यथाक्रमेण सम्पूज्य । आचम्य । वेदिकास्थितकुम्भे आधारशक्त्यादि सम्पूज्य । पाद्याचमनार्घ्यं दत्वा । शुद्धान्नमुद्गान्नापूपादि पायसान्नं निवेद्य । नालिकेरकदलीफलताम्बूलं निवेद्य । धूपदीपादि दीपाराधनक्रमेण

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आराध्य। गणिकानृत्त बहुनृत्त सर्ववाद्यघोषैर्भक्तस्तुत्यादिभिर्देवं सन्तोष्य। प्रदक्षिणनमस्कारस्तोत्रैः स्तुत्वा।

इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायां

तृतीयदिनप्रातर्होमविधिस्समाप्तः॥

श्री धर्मसंवर्धन्यम्बासमेत श्रीनगरीश्वर महाप्रभवे नमः॥

॥ श्रीगिरिनिवासाय नमः॥

112 b — बिम्बशुद्धि कुम्भपूजा —

यागशालां नैऋत्यां वा ऐशान्यां वा गोमयालेपनं कुरु। प्राक्सूत्रपञ्चकमुदक्सूत्रपञ्चकं विधाय। एवं षोडशपदानि भवन्ति। तत्र पदेषु शालितण्डुलतिललाज दर्भैः पुष्पैः परिस्तीर्य विघ्नेश्वरं सम्पूज्य। सङ्कल्प्य। शिवशम्भोराज्ञा इत्यादिविशेषेण श्रीमद्वल्ली देवनायकी समेत सुब्रह्मण्यस्य जीर्णोद्धारणपुनरावृत्त्यष्टबन्धनकर्माङ्गत्वेन तद्बिम्बशुद्ध्यर्थं तत्तद्द्रव्यसहितचतुर्दशकुम्भार्चनकर्म करिष्ये तदङ्गं शुद्धिपुण्याहं वाचयिष्ये। इति सङ्कल्प्य। पदस्यैशान्येकपदे पुण्याहकुम्भं प्रतिष्ठाप्य। वरुणमावाह्य। पुण्याहं वाचयित्वा। तत्प्रोक्ष्य। नैऋतपदे पञ्चगव्यं विधिवत्संस्थाप्य। विशिष्टचतुर्दशपदेषु कुम्भचतुर्दशमस्त्रेण प्रक्षाल्य। धूपधूमेणापूर्य। तन्तुनावेष्ट्य। यथास्थाने संस्थाप्य॥ वृषशृङ्गे च सुक्षेत्रे ~~...~~ समुद्रे गजदन्तके। पर्वते च नदीतीरे वल्मीके कर्कटावटे॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं मृद्भिस्समायुक्तं मृदम्भः परिकीर्तितम् ॥

காளைக்கொம்புமண், புண்யக்ஷேத்ரமண், சமுத்ர-
த்திமண், ஆனைக்கொம்புமண், பர்வதத்துமண், நதீ-
தீரத்துமண். புத்துமண். நண்டுக்குளிமண், கூட்டுமேடு
திகை [illegible]. அங்குமபம

चन्दनं कृष्णगन्धं च मुस्तकोशीरकुङ्कुमम् ।
श्रीबेराणि च कर्चोलं कोष्ठं जातीफलं मुरम् ॥
उदकेन समायुक्तं गन्धोदकमिहोच्यते ॥

விலாக்காயக் கட்டைச் சந்தன கிலக் கட்டைச்
சந்தனம். கொரங்கிளங்கு. லாமிச்சம் வேர்
குங்குமம் வெட்டி வேர் பூலாங்கிளங்கு. கொட்டம்
சாதிக்காய் எ. திரவியம். கந்தோதக கும்பம்।

पनसं नालिकेरं च मातुलुङ्गद्वयं तथा ।
नारङ्गं लिकुचं चैव चूतमेतत् फलोदकम् ॥

பலாப்பழம்। தேங்காய்। நல்லமாதுளம் பழம்। இம்மட்டு
மாதுளம் பழம் நார்த்தம் பழம்। எலுமிச்சம் பழம்।
மாம்பழம் எ. திரவியம் கும்பம்

पलाशोदुम्बराश्वत्थमधूकप्लक्षपाटली ।
जम्बूत्वग्भिस्समायुक्तं कषायोदकमुच्यते ॥

புரசம் பட்டை அத்திப் பட்டை அரசம் பட்டை

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

இருப்பம்பட்டை, இத்திப்பட்டை, பாதிரிப்பட்டை

நாவல்பட்டை ஏ. திரவியம் கஷாயோதக கும்பம்

पुन्नागं नागकुरवं नन्द्यावर्तं च धूर्धुरम् ।

श्वेतार्कं बकुलैर्युक्तं पुष्पोदकमिहोच्यते ॥

புன்னம் பூ, நாவல் பூ, சிவத பாடாமலர்

கைப் பூ, நந்தியாவட்டப்பூ, பொன்னூமத்தம் பூ.

வெள்ளை எருக்கம் பூ ஏ. திரவியம் புஷ்போதக

கும்பம்

कुटजं कुष्ठजं मेघं चन्दनं कुङ्कुमं तथा ।

कर्पूरोशीरसंयुक्तं शान्त्योदकमिहोच्यते ॥

113 b வெப்பாலரிசி கொட்டம் கொங்கிலிங்கி சந்தனம்

குங்குமம் பச்சைக் கர்ப்பூரம் லாமிச்சம் வேர்

ஏ. திரவியம் சாந்தியோதக கும்பம்

सूर्यकान्तं चन्द्रकान्तं अयःकान्तं तथैव च ।

कान्तत्रयसमायुक्तं आद्योदकमिहोच्यते ॥

சிவத்தக் காக்கப் பொன், வெள்ளைக் காக்கப் பொன்,

வெங்கல நிமிள், பொன்னிமிள், சந்தனம். ஏ. திரவிய

கும்பம்.

शंखिनी सहदेवी च विष्णुक्रान्ती च मल्लिका ।

धात्रीचूर्णसमायुक्तं मार्जनोदकमुच्यते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

வெள்ளைக் கிலுகிலுப்பை சீதேவி யார செங்கழுநீர்
விஷ்ணுக் கிராந்தி மல்லிகைப் பூ நெல்லிப் பருப்பு ஈ. திர
வியம் மார்ஜனோதக கும்பம்.

दूर्वाग्रं च कुशाग्रं च स्थलपाटलसर्षपम् ।
भद्री च द्रोणपुष्पं च परिमार्जनमुच्यते ॥

அருக்கு நுனி தர்ப்பை நுனி பாதிரிப்பூ கடுகு
தும்பைப் பூ ஈ. திரவியம் பரிமார்ஜனோதக கும்பம்

माणिक्यमिन्द्रनीलं च मरतकं मौक्तिकं तथा ।
गोमेदं पुष्यरागं च वज्रं वैडूर्यमेव च ॥
प्रवालं च स एतानि रत्नोदकमिहोच्यते ॥

சிகப்பு, இந்திர நீலம், மரகதப் பச்சை, முத்து,
114a கோமேதகம், புஷ்பராகம், வைரம், வைடூர்யம்,
பவளம் ஈ. திரவியம் ரத்னோதக கும்பம்.

अञ्जनं च हरितालं श्यामं चैव मनश्शिला ।
गैरिकं रोचनायुक्तं धात्रोदकमिहोच्यते ॥

அஞ்ஜனக்கல், பொன்னரிதாரம், கரிய, ம-
னோசிலை, காவிக்கல். கோரோசனை ஈ. திரவியம்
யாதோதக கும்பம்.

सौवर्णं रजतं ताम्रं अयसं त्रपु सीसकम् ।
कांस्यं लोहोदकं प्रोक्तं सर्वदेवप्रियावहम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

தங்கம், வெள்ளி, தாம்பரம், இரும்பு, பித்தள், ஈயம்,
வெங்கலம், [illegible] லோஹோதகம்.

व्रीहि गोधूमं माषं मुद्गं यवं नीवारम् ।
श्यामं प्रियङ्गुं तिलं सर्षपं धान्योदकमुच्यते ॥

நெல்லு, கோதுமை, உளுந்து, சிறுபயறு, வால-
~~[illegible]~~ [illegible] நெல்லு, [illegible] நெ-
ல்லு, சாமை, தினை, எள்ளு, கடுகு, [illegible]
[illegible]. एवं मृत्सोदक, गजोदक, फलोदक, कषायोदक,
पुष्पोदक, शान्त्योदक, कान्तोदक, आढ्योदक, मार्जनोदक,
परिमार्जनोदक, रत्नोदक, धान्योदक, लोहोदक, धात्रोदक,
एवं चतुर्दशकुम्भान् चतुर्दशपदेषु धान्यतण्डुलतिलो-
परि संस्थाप्य जलपूर्णां आम्रदलनालिकेरकुम्भरत्नकुम्भ-
वस्त्रकूर्चगन्धाद्यैरलङ्कृत्य स्कन्दमासनमूर्तिरभ्यर्च्य मू-
115b लेनावाह्य पञ्चब्रह्मषडङ्गैर्जगद्भुवादिमन्त्रैरभ्यर्च्य धूप-
दीपनैवेद्यं दत्वा ॥ इति बिम्बशुद्धिकुम्भपूजाविधिः
समाप्तः ॥ श्रीधर्मसंवर्धन्यम्बासमेत श्रीनगरीश्वरमहा-
प्रभवे नमः ॥

— तृतीयदिवसस्य रात्रिहोमः —

सायाह्नसमये आचार्यः मूर्तिपैस्सह स्नानानुष्ठानावश्यकं
निर्वृत्य । यागगेहं प्रविश्य । कूर्मासने सुखासनमुपविश्य

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्राणायामाद्यन्तर्यागान्तं कृत्वा सामान्यार्घ्यविशेषार्घ्यपाद्यार्घ्यं॥
साधयित्वा। सामान्यार्घ्यजलेनात्मानं पूजोपकरणद्रव्यमस्त्रेण
सम्प्रोक्ष्य। कलशपूजां शंखपूजामात्मपूजां विधाय। विना-
यकं सम्पूज्य। सङ्कल्प्य। पुण्याहं पञ्चगव्यं विधिवत्कृत्वा।
सम्प्रोक्ष्य। मण्टपपूजां यथाक्रमेण सौरादिगुरुपर्यन्तं पूर्ववत्
सम्पूज्य। कुम्भं पूर्ववद्यथाक्रमेण पूजयेत्। ततो होमं कुर्यात्।
मूर्तिपैस्सहाचार्यः तत्तत्कुण्डं निवेश्य। अग्निं प्रज्वाल्य। प्रात-
वत् होमं विशेषहोमं स्पर्शाहुतिं पूर्णाहुतिं च कृत्वा। वेदिका-
स्थितकुम्भे दीपाराधनसर्वोपचारैस्सम्पूज्य। इति तृतीय-
दिनरात्रिहोमविधिः। श्री धर्मसंवर्धन्यम्बासमेत श्रीनगरी-
श्वरमहाप्रभवे नमः॥ श्रीगिरिनिवासाय नमः॥ * * * *॥

115 a ॥ चतुर्थदिनमण्टपपूजा ॥

तुरीयदिवसस्य। अथ देशिकः प्रातरुत्थाय मूर्तिपैस्सह
विधिवत् स्नात्वा। सन्ध्यावन्दनावश्यकं कर्म कृत्वा। यागगेहं
प्रविश्य पूर्ववत् प्राणायामं करन्यासभूतशुद्ध्यङ्गन्यासदण्ड-
भङ्गिमुण्डभङ्गिमातृकान्यासैकत्रिंशत्कलान्यासषडक्षरन्या-
सान्तर्यागस्थलशुद्धिमन्त्रशुद्ध्यादिकं कृत्वा। सामान्यार्घ्यं
पाद्यार्घ्यं विशेषार्घ्यं क्रमेण साधयित्वा। सामान्यार्घ्यजलेना-
त्मानं पूजोपकरणमस्त्रेण सम्प्रोक्ष्य। कलशपूजां शंखपूजा-
मात्मपूजां च कृत्वा। विनायकं सम्पूज्य सङ्कल्प्य। शिवशम्भो-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्यादिविशेषेण श्रीमद्वल्ली देवनायकीसमेतश्रीसुब्रह्मण्येश्वर-
प्रसादसिद्ध्यर्थं जीर्णोद्धारण पुनरावृत्यष्टबन्धनकर्माङ्गं राज-
राष्ट्र सर्वजनानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्यादिवृद्ध्य-
र्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थं श्रीमद्व-
ल्ली देवनायकीसमेतश्रीसुब्रह्मण्येश्वरप्रीत्यर्थं मण्टपाराधन-
कुम्भपूजामग्निकार्यकर्म करिष्ये इति सङ्कल्प्य। पुण्याहं वा-
चयित्वा। अस्त्रेण प्रोक्ष्य। पञ्चगव्यं संस्थाप्य। मण्टपपूजामार-
॥5 b भेत्॥ शान्तं सुदेहं सुमुखं वह्निं पूर्वं समर्चयेत्।

इन्द्राग्निमध्यमार्ताण्डं वह्निकोणे च पावकम्॥
याम्ये विद्यामहावल्लीं ततस्सेनापतिं यमम्।
नैरृते निरृतिं विष्णुं महालक्ष्मीं प्रपूजयेत्॥
आप्ये निवृत्तिं शिखिनं गजं वरुणमस्त्रकम्।
वायुं गणेशं क्षेत्रेशं वायव्यां दिशि पूजयेत्॥
प्रतिष्ठां देवसेनां च सुमित्रं सोममुत्तरे।
ईशाने पितराधारं गुरुरीशानके यजेत्॥

इत्यष्टविंशतिकलशं सम्पूज्य। तद्यथा – इन्द्राग्न्योर्मध्ये सूर्य-
कुम्भपूजां कुर्यात्। वायुकुम्भस्य पश्चिमभागे सूर्यद्वारार्चनं
कुर्यात्। द्वारस्य दक्षिणे ओं दण्डिने नमः। उत्तरे पिङ्गलाय नमः।
ऐशान्यां गणपतये नमः। आग्नेय्यां गुरुभ्यो नमः। मध्ये प्रभू-
ताय नमः। आग्नेयादिकोणेषु विमलाय नमः सौराय नमः। आ-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राध्याय नमः। परमसुखाय नमः। तन्मध्ये पद्मासनाय नमः।
दीप्ताय नमः। सूक्ष्माय नमः। जयाय नमः। भद्राय नमः। विभूत्यै
नमः। अमोघाय नमः। विद्युताय नमः। सर्वतोमुख्यै नमः।
ओं अं अर्कासनाय नमः खं खषोल्काय सूर्यमूर्तये नमः। इ-
त्यासनमूर्तिं विन्यस्य। दण्डभङ्गिः मुण्डभङ्गी न्यस्य। ध्यानम्॥

सौरं कुङ्कुमसङ्काशं सर्वाभरणभूषितम्।
द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम्॥
चतुर्भुजसमोपेतं ऊर्ध्वहस्ताम्बुजद्वयम्।
अभयं वरदोपेतं उषःप्रत्युषसायकम्॥

116 a इति ध्यात्वा। ओं सां सं सां विद्यादेहाय नमः। ओं सौं नेत्रेभ्यो
नमः। इति विद्यादेहं नेत्रं विन्यस्य। ओं श्रीं सां सं सां शिवसू-
र्याय नमः। इति मूलेनावाह्य। स्थापनादि कृत्वा स्वाहान्तमूलेन
पाद्याचमनार्घ्यं दत्वा। गन्धपुष्पधूपदीपनैवेद्यं दत्वा। भोगा-
ङ्गपूजार्थं सूर्यं प्रार्थ्य। पूर्वादिदलाग्रेषु सोमाय नमः बुधाय
नमः बृहस्पतये नमः भार्गवाय नमः। विदिक्षु दलेषु अङ्गारकाय
नमः। शनैश्चराय नमः। राहवे नमः केतवे नमः। इत्यभ्यर्च्य।
दक्षिणे ओं ह्रीं उषादेव्यै नमः। उत्तरे ओं श्रीं प्रत्युषादेव्यै नमः।
सर्वत्र पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। नमस्कारमुद्रां
दर्शयित्वा। ताम्बूलं दत्वा। प्रार्थ्य —

देवदेव त्रिधामेश जगत्प्रथममङ्गल।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तिष्ठ त्वं स्थापितो देव मया सूर्य जगत्पते ॥

इत्येवं विज्ञाप्य मूलमन्त्रं यथाशक्ति जप्त्वा । जपफलं देवतायै समर्प्य । स्तोत्रैः स्तुत्वा । पराङ्मुखार्घ्यं दत्वा । ऐशान्यां सूर्यनिर्माल्यदेवतायै तेजश्चण्डेश्वराय नमः । इत्यभ्यर्च्य । विसृज्य । एवं सूर्यपूजां निर्वर्त्य । बहिर्निर्गत्य । पूर्वकृतसौरभावनानिवृत्त्यर्थं पादौ प्रक्षाल्याचम्य । भस्मधारणं कृत्वा । पुनर्गत्वा ।

॥६८ सकलीकरणं विधाय । सामान्यार्घ्यहस्तो मण्डपाद्बाह्ये स्थित्वा । पूर्वद्वारेणमस्त्रेण सम्प्रोक्ष्य । तोरणमध्ये ओं हां शान्तितोरणासनाय नमः ओं हां शान्तितोरणमूर्तये नमः । ध्यानम् —

नीलवस्त्राङ्गरागं च द्विभुजाञ्जलिपङ्कजम् ।
करालवदनं श्यामं ध्यायेद्वै शान्तितोरणम् ॥

ओं हां शान्तितोरणाय नमः । शान्तितोरणाधिपतये रुद्राय नमः । तोरणशाखयोः ऋग्वेदाय नमः ऋग्वेदमूर्तये नमः ॥

श्यामवर्णं द्विनेत्रं च एकवक्त्रं चतुर्भुजम् ।
गण्डाक्षमालाऋग्वेदं अञ्जलिं दधतं नमः ॥

ओं हां ऋग्वेदाय नमः । पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा । पूर्वद्वारस्योत्तरे प्रथमकलशे ओं हैं शान्तिकलासनाय नमः । शान्तिकलामूर्तये नमः । ध्यानम् —

चतुर्वक्त्रं चतुर्बाहुं कृष्णवर्णं महाबलम् ।
ध्वजाभयाक्षमालाब्जं शान्तिं सर्पोपवीतिनम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं ह्रीं शान्तिकलायै नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा। तदुत्तरकुम्भे ओं हां सुदेहासनाय नमः ओं हां सुदेह-
मूर्तये नमः। ध्यानम् —

सुदेहं श्यामवर्णं च सर्वाभरणभूषितम्।
कृताञ्जलिपुटं चैव द्विनेत्रं रक्तवाससम्॥

ओं हां सुदेहाय नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीपनैवे-
द्यं दत्वा। द्वारदक्षिणकुम्भे ओं हां सुमुखासनाय नमः सुमुख-
117 a मूर्तये नमः। ध्यानम् —

सुमुखं रक्तवर्णं च अब्जद्वयकरद्वयम्।
पीताम्बरधरं चैव सर्वाभरणभूषितम्॥

ओं हां सुमुखाय नमः। आवाहनपाद्यादि गन्धपुष्प धूपदीप-
नैवेद्यं दत्वा। द्वारस्योत्तरपताकायां ओं हां प्रशान्तासनाय
नमः प्रशान्तमूर्तये नमः। ध्यानम् —

प्रशान्तं रक्तवर्णं च द्विभुजं च द्विनेत्रकम्।
कृताञ्जलिपुटं चैव नानाभरणभूषितम्॥

ओं हां प्रशान्तपताकाय नमः। द्वारदक्षिणपताकायां ओं हां श-
शिरपताकासनाय नमः शशिरपताकमूर्तये नमः। ध्यानम् —

शशिरं धूम्रवर्णं च एकवक्त्रं चतुर्भुजम्।
खड्गखेटकसंयुक्तं कृताञ्जलिपुटं तथा॥

ओं हां शशिरपताकाय नमः। पूर्वद्वारस्योपरि मध्यस्थित-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्वजे ओं हां कुमुदासनाय नमः। कुमुदमूर्तये नमः। ध्यानम् –

कुमुदं पूर्वदिग्भागे सितवर्णं विभावयेत्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

ओं हां कुमुदाय नमः। अग्निकोणध्वजे ओं हां कुमुदाक्षासनाय नमः कुमुदाक्षमूर्तये नमः। ध्यानम् —

आग्नेय्यां कुमुदाक्षं च दिशि भानुसमप्रभम्।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम्॥

ओं हां कुमुदाक्षाय नमः। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। दक्षिणद्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां भूतितोरणासनाय नमः भूतितोरणमूर्तये नमः॥ ध्यानम् —

117b द्विभुजं च द्विनेत्रं च सर्वाभरणभूषितम्।
भूतितोरणमाख्यातं स्थूलग्रीवं महोदरम्॥

ओं हां भूतितोरणाय नमः। भूतितोरणाधिपतये विजयाय नमः। तोरणशाखयोः ओं हां यजुर्वेदासनाय नमः यजुर्वेदमूर्तये नमः। ध्यानम् —

रक्तवर्णं त्रिणेत्रं च शुक्लयज्ञोपवीतिनम्।
स्रुक्कुण्डिकाञ्जलिभृतं यजुर्वेदं विभावयेत्॥

ओं हां यजुर्वेदाय नमः। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। दक्षिणद्वारस्य पूर्वे प्रथमकलशे ओं हूं विद्याकलासनाय नमः विद्याकलामूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शक्त्या भयाक्षमालाब्जां विद्यां ज्वलनसन्निभाम्।
चतुर्वक्त्रां चतुर्बाहुं रक्तवर्णां महाबलाम्॥

ओं हूं विद्याकलायै नमः। आवाहनपाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। (द्वारपश्चिमे प्रथमकलशे) तत्पूर्वकुम्भे ओं हां वल्ल्यासनाय नमः। वल्लीमूर्तये नमः। ध्यानम् —

वल्ली देवीस्वरूपं तु सर्वाभरणभूषितम्।
वामहस्तोत्पलं चैव दक्षहस्ते प्रलम्बिताम्॥

ओं हां वल्ल्यै नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। द्वारपश्चिमे प्रथमकलशे ओं हां सेनापत्यासनाय नमः सेनापतिमूर्तये नमः। ध्यानम् —

एकवक्त्रं चतुर्बाहुं किरीटमकुटान्वितम्।
अभयं वरदं चैव शक्तिकुक्कुटधारिणम्॥

118 a ओं हां सेनापतये नमः। आवाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। तत्पूर्वकुम्भे ओं हां महालक्ष्म्यासनाय नमः। महालक्ष्मीमूर्तये नमः। ध्यानम् —

लक्ष्मीं कुङ्कुमवर्णां तु पद्मद्वयकरद्वयाम्।
प्रसन्नवदनाम्भोजां सर्वाभरणभूषिताम्।

ओं हां महालक्ष्म्यै नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। द्वारपूर्वपताकायां ओं हां पर्जन्यासनाय नमः। पर्जनीमूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पर्जन्यं रक्तवर्णं च द्विभुजं च द्विलोचनम् ।

कृताञ्जलिपुटं चैव नानाभरणभूषितम् ॥

ओं ह्रां पर्जन्याय नमः । द्वारपश्चिमपताकायां ओं ह्रां जयन्तासनाय नमः जयन्तमूर्तये नमः । ध्यानम् —

जयन्तो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।

कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

ओं ह्रां जयन्ताय नमः । द्वारोर्ध्वध्वजे ओं ह्रां पुण्डरीकासनाय नमः पुण्डरीकमूर्तये नमः । ध्यानम् —

भृङ्गाभं पुण्डरीकं च दक्षिणे तु प्रदेशके ।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

ओं ह्रां पुण्डरीकाय नमः । नैऋतकोणध्वजे ओं ह्रां वामनासनाय नमः वामनमूर्तये नमः । ध्यानम् —

वामनं नैऋते देशे भिन्नाञ्जनसमद्युतिम् ।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

118 b ओं ह्रां वामनाय नमः । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा । पश्चिमद्वारमस्त्रेण सम्प्रोक्ष्य । तोरणमध्ये ओं ह्रां बलतोरणासनाय नमः । बलतोरणमूर्तये नमः । ध्यानम् —

रक्तवर्णं द्विनेत्रं च नागयज्ञोपवीतिनम् ।

कृताञ्जलिपुटोपेतं ध्यायामि बलतोरणम् ॥

ओं ह्रां बलतोरणाय नमः बलतोरणाधिपतये वज्राय नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तोरणशाखयोः ओं हां सामवेदासनाय नमः सामवेदमूर्तये नमः।

श्वेतवर्णं द्विनेत्रं च हेमयज्ञोपवीतिनम्।
ब्रह्मास्त्रं गण्डिकायुक्तं सामवेदं कृताञ्जलिम्॥

ओं हां सामवेदाय नमः। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा।
पश्चाद्द्वारस्य दक्षिणे प्रथमकलशे ओं हां निवृत्तिकलासनाय नमः
निवृत्तिकलामूर्तये नमः। ध्यानम् —

तप्तचामीकराभासां चतुर्वक्त्रेन्दुभूषिताम्।
वज्राभयाक्षमालाब्जां निवृत्तिं परिकीर्तिताम्॥

ओं हां निवृत्तिकलायै नमः। आवाहनादिगन्धपुष्पधूपदीपनै-
वेद्यं दत्वा। तद्दक्षिणकुम्भे ओं हां मयूरासनाय नमः मयूर-
मूर्तये नमः। ध्यानम् —

चित्रवर्णं बृहत्पुच्छं भुजङ्गोद्धृतवक्त्रकम्।
महाबलं महाकायं मयूरं प्रणमाम्यहम्॥

॥१a ओं हां मयूराय नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा। तद्दक्षिणकुम्भे ओं हां गजासनाय नमः गजमूर्तये
नमः। ध्यानम् - गजाख्यं श्वेतवर्णं च करभूतसमन्वितम्।
महाबलं महाकायं शूर्पकर्णं विभावयेत्॥

ओं हां गजाय नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा।
द्वारस्योत्तरे प्रथमकलशे ओं हां अस्त्रासनाय नमः। अस्त्र-
मूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्विभुजं च द्विनेत्रं च सर्वाभरणभूषितम् ।
शत्रूणां मर्दनं चैव प्रदीप्ताग्निसमप्रभम् ॥

ओं हां अस्त्राय नमः। आवाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। वायुदक्षिणकुम्भे ओं हां क्षेत्रपालासनाय नमः क्षेत्र-पालमूर्तये नमः। ध्यानम् —

चतुर्भुजं त्रिणेत्रं च कपालं शूलपाणिनम् ।
पाशं डमरुकं चैव घोरदंष्ट्रं जटाधरम् ॥

ओं हां क्षेत्रपालाय नमः। आवाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। द्वारोत्तरपताकायां ओं हां अमृतासनाय नमः अमृत-मूर्तये नमः। ध्यानम् —

अमृतं रक्तवर्णं च द्विभुजं च द्विलोचनम् ।
कृताञ्जलिपुटोपेतं नानाभरणभूषितम् ॥

ओं हां अमृताय नमः। द्वारदक्षिणपताकायां ओं हां अशो-
॥१८ कासनाय नमः अशोकमूर्तये नमः। ध्यानम् —

अशोकं श्यामवर्णं च द्विबाहुं च द्विलोचनम् ।
नानाभरणसंयुक्तं कृताञ्जलिपुटान्वितम् ॥

ओं हां अशोकाय नमः। द्वारोर्ध्वध्वजे ओं हां शङ्कुकर्णास-नाय नमः शङ्कुकर्णमूर्तये नमः। ध्यानम् —

वारुण्यां शङ्कुकर्णं च दिशि नक्षत्रसन्निभम् ।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां शङ्कुकर्णाय नमः। वायुकोणध्वजे ओं हां सर्वनेत्रास-
नाय नमः सर्वनेत्रमूर्तये नमः। ध्यानम् —

वायव्यां सर्वनेत्रं च दण्डाभयकरान्वितम्।
द्विलोचनं द्विबाहुं च रक्तवर्णं महाबलम्॥

ओं हां सर्वनेत्राय नमः। इत्यावाहनादि धूपदीपनैवेद्यं दत्वा।
उत्तरद्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां आरोग्यतोर-
णासनाय नमः आरोग्यतोरणमूर्तये नमः। ध्यानम् —

द्विभुजं च द्विनेत्रं च पार्श्वयोर्लम्बकेशिनम्।
दंष्ट्राकरालवदनं आरोग्यतोरणं यजे॥

ओं हां आरोग्यतोरणाय नमः। आरोग्यतोरणाधिपतये
नीललोहिताय नमः। तोरणशाखयोः ओं हां अथर्वणवेदा-
सनाय नमः अथर्वणवेदमूर्तये नमः। ध्यानम् —

कृष्णं चतुर्भुजं द्व्यक्षं कमण्डल्वक्षसूत्रकम्।
अथर्वं च द्विहस्ताभ्यां अञ्जलिं दधतं यजे॥

ओं हां अथर्वणवेदाय नमः। पाद्यादिगन्धपुष्पधूपदीपनै-
120 a वेद्यं दत्वा। उत्तरद्वारस्य पश्चिमे प्रथमकलशे ओं हां प्रति-
ष्ठाकलासनाय नमः प्रतिष्ठाकलामूर्तये नमः। ध्यानम् —

शुद्धस्फटिकसङ्काशां एकवक्त्रां चतुर्भुजाम्।
पाशाभयाक्षमालाब्जां प्रतिष्ठां रत्नभूषिताम्॥

ओं हां प्रतिष्ठाकलायै नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीप-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नैवेद्यं दत्वा । तत्पश्चिमकुम्भे ओं हां देवसेनापत्यासनाय नमः

देवसेनापतिमूर्तये नमः। ध्यानम् —

विद्रुमप्रभसंयुक्तं एकवक्त्रं चतुर्भुजम् ।

अभयं ऊरुहस्तं च खड्गखेटकसंयुतम् ॥

ओं हां देवसेनापतये नमः। आवाहनपाद्यादि गन्धपुष्पधूपदीप-

नैवेद्यं दत्वा । द्वारस्य पूर्वे प्रथमकलशे ओं हां सुमित्रासनाय

नमः सुमित्रमूर्तये नमः। ध्यानम् —

द्विभुजं एकवक्त्रं च सर्वाभरणभूषितम् ।

उत्पलं दक्षिणे हस्ते ऊरुहस्तं च वामके ॥

ओं हां सुमित्राय नमः। आवाहनपाद्यादि गन्धपुष्पधूपदीप-

नैवेद्यं दत्वा । द्वारपश्चिमपताकायां ओं हां धनदासनाय नमः

धनदमूर्तये नमः। ध्यानम् —

धनदं रक्तवर्णं च द्विभुजं च द्विलोचनम् ।

कृताञ्जलिपुटं चैव नानाभरणभूषितम् ॥

ओं हां धनदाय नमः। द्वारपूर्वपताकायां ओं हां श्रीप्रदासनाय

नमः श्रीप्रदमूर्तये नमः। ध्यानम् —

श्रीप्रदं रक्तवर्णं च सर्वाभरणभूषितम् ।

कृताञ्जलिपुटोपेतं द्विभुजं च द्विलोचनम् ॥

ओं हां श्रीप्रदाय नमः। द्वारतोरणध्वजे ओं हां सुमुखासनाय

नमः सुमुखमूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुमुखं षट्पदाभं च कौबेरदिशि संस्थितम् ।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

ओं हां सुमुखाय नमः । ईशानकोणध्वजे ओं हां सुप्रतिष्ठास-
नाय नमः सुप्रतिष्ठमूर्तये नमः । ध्यानम् —

ईशाने सुप्रतिष्ठं च शशाङ्कधवलप्रभम् ।

द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

ओं हां सुप्रतिष्ठाय नमः । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा । मध्याकाशोपरि ओं हां शान्त्यतीतकलासनाय नमः
शान्त्यतीतकलामूर्तये नमः । ध्यानम् —

शुद्धस्फटिकसङ्काशां पञ्चवक्त्रां चतुर्भुजाम् ।

पाशाभयाक्षमालाब्जां शान्त्यतीतां वरप्रदाम् ॥

ओं हां शान्त्यतीतकलायै नमः । पाद्यादिगन्धपुष्पधूपदीपनै-
वेद्यं दत्वा । ततः पश्चिमद्वारे नित्यवद् द्वारार्चनं कुर्यात् ।
तद्यथा — अर्घ्यजलेन पश्चिमद्वारं सम्प्रोक्ष्य । द्वारदक्षिण-
भागे ओं हां सुदेहाय नमः । उत्तरभागे ओं हां सुमुखाय
नमः । दक्षिणशाखायां दीप्तायै नमः । उत्तरशाखायां सूक्ष्मा-
य नमः । तयोर्मध्ये ओं हां महालक्ष्म्यै नमः । अधिष्ठाने
आधारशक्त्यै नमः । उपाने आदिशक्तये नमः । जगत्यां क्रिया-
शक्त्यै नमः । पद्मे ज्योतिश्शक्तये नमः । कुमुदे गुहशक्तये
121a नमः । पट्टिकायां ज्ञानशक्तये नमः । भित्त्यां रौद्रै नमः । स्तम्भे

भोगशक्तये नमः। पालिकायां अनन्तशक्तये नमः। कम्पे वल्लयै नमः। कपोते पूतायै नमः। पूतमालिकायां रेवत्यै नमः। नासिकायां कृत्तिकायै नमः। शिखरे शकुन्यै नमः। स्थूप्यां कौमार्यै नमः। अग्रे स्कन्दशक्तये नमः। इत्यभ्यर्च्य। अन्तर्द्वाराचेनं कुर्यात्। ओं हां शान्तिकलाद्वारायै नमः। द्वारोर्ध्वोदुम्बरे भुवङ्गाय नमः। अधोदुम्बरे पतङ्गाय नमः। दक्षिणशाखायां उत्कराय नमः। उत्तरशाखायां पतगाय नमः। द्वारोर्ध्वे गं गणपतये नमः। तस्य वामभागे सं सरस्वत्यै नमः। द्वारस्य दक्षिणे जयाय नमः। उत्तरे विजयाय नमः। दक्षिणकवाटे वीरबाहवे नमः। उत्तरकवाटे महावीराय नमः। इत्यभ्यर्च्य। सर्वेभ्यो द्वारपालेभ्यो नमः। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। मूलेन दिव्यदृष्ट्या ऊर्ध्वगतान्विघ्नान् ओं भूर्भुवास्त्रेण नाराचमुद्रया पुष्पक्षेपणान्तरगतान् विघ्नान् व्यपोह्य। ओं भूर्भुवास्त्रेण पार्ष्णिघातत्रयेण भूगतान्विघ्नान् उत्सार्य। अन्यद्वारमस्त्रेण सङ्कल्प्य। पश्चिमद्वाराधोदुम्बरमध्ये ओं हां पाशुपतास्त्रासनाय नमः पाशुपतास्त्रमूर्तये नमः। ध्यानम् —

121b चतुर्वक्त्रं चतुर्बाहुं प्रदीप्ताग्निसमप्रभम्।
दक्षवामकमाच्छक्तिशूलाभयकरान्वितम्॥

ओं श्लीं पशुं हुं फट् पाशुपतास्त्राय हुं फण्ण मम। इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभ्यर्च्य । किञ्चिद्वामशाखासमाश्रयत् दक्षपादपुरस्सरं अ-
न्तःप्रविश्य । यागशालां प्रदक्षिणक्रमेण नैरृत्यां स्थित्वा म-
ण्टपं तृणादिनाच्छादितं चेत् कम्पेषु वायुतत्वाय नमः तृणेषु
अप्तत्वाय नमः। बन्धेषु तेजस्तत्वाय नमः। वंशेषु पृथिवी-
तत्वाय नमः। स्तम्भेषु आकाशतत्वाय नमः। चुलुकायां स्क-
न्दाय नमः। वितानेषु चन्द्राय नमः। तरङ्गेषु जाह्नव्यै नमः।
दर्भमालायां वसुमत्यै नमः। अङ्कणे मुद्गराय नमः। दिशासु
अस्त्राय नमः। इत्यभ्यर्च्य पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं
दत्वा । उपवेदिपरितः गजाष्टकं पूजयेत् । पूर्वादीशानान्त-
दिक्षु ओं हां ऐरावताय नमः। पुण्डरीकाय नमः। वामनाय
नमः। कुमुदाय नमः। अञ्जनाय नमः। पुष्पदन्ताय नमः।
सार्वभौमाय नमः। सुप्रतीकाय नमः इत्यभ्यर्च्य । पूर्वादीशान-
पर्यन्तं अष्टनागान् समर्चयेत् । अनन्ताय नमः वासुक्यै नमः
तक्षकाय नमः कार्कोटकाय नमः पद्माय नमः महापद्मायनमः
शंखपालाय नमः गुलिकाय नमः। इत्यष्टनागान् सम्पूज्य ।
पूर्वादीशानपर्यन्तं मङ्गलाष्टकं पूजयेत् । उर्वशीधृतदर्पणे
122 a सूर्याय नमः। मेनकाधृतपूर्णकुम्भे जलेश्वराय नमः। रम्भा-
धृतमयूरे स्कन्दाय नमः। तिलोत्तमाधृतयुग्मचामरे मातरि-
श्वने नमः। सुमुखीधृतश्रीवत्से महालक्ष्म्यै नमः। सुन्दरीधृत-
स्वस्तिके सरस्वत्यै नमः। कामुखीधृतशंखे चन्द्राय नमः।काम-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्धनीधृतदीपे ज्वलनाय नमः। इति सम्पूज्य। पाद्या-
दिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। सुब्रह्मण्यपदन्यासिकं म-
ण्टपं विभाव्य। वेदिकादक्षिणतः धर्मासने व्याघ्राजिनादौ रु-
चिरासने उदङ्मुखमुपविश्य। प्राणायामत्रयं कृत्वा। कृतभूत-
शुद्ध्यन्तर्यजनहवनध्यान गृहहस्तं कुर्यात्। तद्यथा — स्व-
दक्षिणहस्ततले वामाङ्गुष्ठेन गन्धलेपिते मध्ये ओं हां
स्कन्दासनाय नमः स्कन्दमूर्तये नमः। इत्यासनमूर्तिं विन्य-
स्य। अङ्गुष्ठादि कनिष्ठान्तेषु ओं सों ईशानाय जगद्भुवाय
नमः। ओं सें तत्पुरुषाय वचद्भुवाय नमः। ओं सुं अघोराय
विश्वभुवाय नमः। ओं सिं वामदेवाय रुद्रभुवाय नमः। ओं सं
सद्योजाताय ब्रह्मभुवाय नमः। इति क्रमेण विन्यस्य। ओं सौं
आव्यभुवाय भुवद्भुवाय नमः। पुनरनामिकायां विन्यस्य।
विद्यादेहनेत्रन्यासौ विधाय। मूलेन स्कन्दमावाह्य। अङ्गानि
कनिष्ठिकादिषु क्रमेण विन्यस्य। परमीकृत्य। तेजोरूपं ध्या-
122b त्वा। स्वशिरस्यधिरोप्य। ब्रह्मरन्ध्रप्रविष्टेन तेजसा बाह्या-
भ्यन्तरं तमःपटलमाधूय। प्रत्यो दिगन्तरं विभाव्य। ततो
लाजचन्दनसिद्धार्थभस्मपुष्पकुशाक्षतान् सप्तसंख्यान्
शुद्धलाजान्विकराण्यस्त्रेण हुम्फडन्तेन सप्तधाभिमन्त्र्य।
शुद्धपात्रे सङ्गृह्य। नानाप्रहराकाराण्यस्त्रेणान्तारिक्षविघ्न-
प्रशमनार्थं विकीर्य। पञ्चगव्यार्घ्यजलैः यागगृहं सम्प्रोक्ष्य।

भूमिर्भूम्नेति मन्त्रेण स्थानशुद्धिं कुर्यात्। मन्त्रः - भूमिर्भूम्ना द्यौर्वरुणान्तरिक्षं महित्वा। उपस्थे दे देव्यदिते अग्निमन्नाद्यायादधे। इति मन्त्रेण पञ्चगव्येन मण्टपं सम्प्रोक्ष्य। निरीक्षणादिचतुस्संस्कारान् शल्यनिवृत्यर्थं विदध्यात्। इति विशेषशुद्धिः। पश्चाद्द्वारत्रयमस्त्रेण कवाटमुद्घाट्य। प्रदक्षिणक्रमेण ईशानभागे स्थित्वा। स्कन्दकुम्भवर्धनीं सम्पूजयेत्। कुम्भस्याधः ओं हां आधारशक्तिकमलासनाय नमः। अनन्तासनाय नमः सिंहासनाय नमः। योगासनाय नमः पद्मासनाय नमः। विमलासनाय नमः। ओं हां स्कन्दासनाय नमः। स्कन्दमूर्तये नमः इति चलासनमभ्यर्च्य। ध्यानम् ——

पद्मसव्यकटिसंयुतवामं
पद्मकान्तिनिभमेकमुखं त्वाम्।
बालषड्कर · · मीश्वरसूनुं
बालमुन्नतभुजं प्रणतोऽस्मि ॥

इति ध्यात्वा। मूलेनावाह्य। स्थापनादि कृत्वा। तद्वामे वर्धनीं
123a ओं ह्रीं वल्ल्यासनाय नमः वल्लीमूर्तये नमः। ध्यानम् ॥

वल्लीं च श्यामवर्णां च सर्वाभरणभूषिताम्।
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम् ॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः। इति मूलेनावाह्य। पाद्यादि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । पश्चादिन्द्रादिलोकपालाना-
राध्य । पूर्वद्वारस्य दक्षिणे द्वितीयकलशे ओं हां इन्द्रासनाय
नमः इन्द्रमूर्तये नमः । ध्यानम् —

ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम् ।
सहस्रनयनं शक्रं वज्रपाणिं विभावये ॥

ओं हां इन्द्राय नमः इत्यावाहनादि गन्धपुष्पधूपदीपनैवे-
द्यं दत्त्वा ॥

भो भो इन्द्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये ।
सावधानेन यागान्तं यावत् स्थेयं गुर्वाज्ञया ॥

इति सर्वत्राज्ञां श्रावयेत् । पूर्वद्वारस्य दक्षिणे चतुष्कलशे
ओं हां अग्न्यासनाय नमः अग्निमूर्तये नमः ॥ ध्यानम् —

सप्तार्चिषं च बिभ्राणं अक्षमालां कमण्डलुम् ।
ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् ॥

ओं हां अग्नये नमः । इत्यावाहनादिगन्धपुष्पधूपदीपनैवेद्यं
दत्त्वा । दक्षिणद्वारस्य पूर्वे तृतीयकलशे ओं हां यमासनाय
नमः यममूर्तये नमः । ध्यानम् —

कृतान्तं महिषारूढं दण्डहस्तं भयानकम् ।
कालपाशधरं कृष्णं ध्याये दक्षिणदिक्पतिम् ॥

123 b ओं हां यमाय नमः इत्यावाहनादिगन्धपुष्पधूपदीपनैवेद्यं
दत्त्वा । नैरृतकुम्भे ओं हां नैरृत्यासनाय नमः नैरृतिमूर्तये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। ध्यानम् —

रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम्।
कृपाणपाणिमस्त्रौघं बिम्बोष्ठं राक्षसेश्वरम्॥

ओं हां नैर्ऋतये नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। पश्चिमद्वारोत्तरे द्वितीयकलशे ओं हां वरुणासनाय नमः वरुणमूर्तये नमः। ध्यानम् —

नागपाशधरं हृष्टं मुक्तौघद्युतिविग्रहम्।
शशाङ्कधवलं ध्यायेद्वरुणं मकरासनम्॥

ओं हां वरुणाय नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीप-नैवेद्यं दत्वा। पश्चिमद्वारस्योत्तरे चतुष्कलशे ओं हां वाय्वासनाय नमः वायुमूर्तये नमः। ध्यानम् —

आपीनं हरितच्छायं विलोलध्वजधारिणम्।
प्राणभूतं च भूतानां हरिणस्थं समीरणम्॥

ओं हां वायवे नमः। आवाहनपाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। उत्तरद्वारस्य पूर्वे द्वितीयकलशे ओं हां कुबेरासनाय नमः कुबेर-मूर्तये नमः। ध्यानम् —

कुबेरं मनुजासीनं सगर्वं खड्गविग्रहम्।
स्वर्णच्छायं गदाहस्तं उत्तराशापतिं स्मरेत्॥

ओं हां कुबेराय नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। उत्तरद्वारस्य पूर्वे चतुष्कलशे ओंहां ईशानासनाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

124 a ईशानमूर्तये नमः। ध्यानम् —

ईशानं वृषभारूढं त्रिशूलव्यालधारिणम्।
शरच्चन्द्रवदाकारं चन्द्रमौलिं त्रिलोचनम्॥

ओं हां ईशानाय नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। तद्दक्षिणकुम्भे ओं हां ब्रह्मासनाय नमः ब्रह्ममूर्तये नमः। ध्यानम् —

पीनं पीतं चतुर्बाहुं ब्रह्माणं चतुराननम्।
हंसयानं च बिभ्राणं दण्डाक्षस्रुक्कमण्डलुम्॥

ओं हां ब्रह्मणे नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। नैरृतपूर्वकुम्भे ओं हां विष्ण्वासनाय नमः विष्णुमूर्तये नमः। ध्यानम् —

विष्णुं चतुर्भुजं मौलिं शंखचक्रगदाब्जधृक्।
नीलाम्बुदप्रतीकाशं गरुडासनसंस्थितम्॥

ओं हां विष्णवे नमः। आवाहनपाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। तत इन्द्रादिदिक्षु दशायुधानि च पूजयेत्। पूर्वे ओं हां वज्रासनाय नमः वज्रमूर्तये नमः। ध्यानम् —

वज्रं तु पुरुषं स्थूलं दृढं कर्कशविग्रहम्।
बलिनं पञ्चमूर्धानं दीप्तं प्राक्पञ्चमाकृतौ॥

ओं हां वज्राय हुं फण्णमः। आग्नेय्यां ओं हां शक्त्यासनाय नमः शक्तिमूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शक्तिं च योषिदाकारामाग्नेय्यां दिशि लोहिताम्।

बिभ्राणां शिरसा शक्तिं त्रिकोणस्थामुपाश्रये ॥

ओं हां शक्तये हुं फट् नमः। याम्ये ओं हां दण्डासनाय नमः।

दण्डमूर्तये नमः। ध्यानम् —

124 b दण्डं च दक्षिणे भागे कृष्णं पुरुषविग्रहम्।

दण्डाकारशिरोयुक्तं वन्दे लोहितलोचनम् ॥

ओं हां दण्डाय हुं फट् नमः। नैरृते ओं हां खड्गासनाय नमः

खड्गमूर्तये नमः। ध्यानम् —

नैरृत्यां पुरुषाकारं खड्गं श्यामनिभान्वितम्।

खड्गालंकृतमूर्धानं क्रुद्धं क्रूरदृशं भजे ॥

ओं हां खड्गाय हुं फट् नमः। पश्चिमे ओं हां पाशासनाय नमः।

पाशमूर्तये नमः। ध्यानम् —

नाभ्यधोभुजगाकारं तदूर्ध्वे पुरुषाकृतिम्।

पाशं सप्तफणोपेतं मूर्धानं पश्चिमं भजे ॥

ओं हां पाशाय हुं फट् नमः। वायव्यां ओं हां अङ्कुशासनाय

नमः अङ्कुशमूर्तये नमः। ध्यानम् —

पीताभं पुरुषाकारं व्यावृतास्यं महाभुजम्।

प्रपद्ये वायुदिग्भागे ध्वजमूर्धध्वजान्वितम् ॥

ओं हां अङ्कुशाय हुं फट् नमः। उत्तरे ओं हां गदासनाय

नमः गदामूर्तये नमः। ध्यानम् —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कन्यारूपां गदां पीतां आपीनजघनस्थलाम् ।
गदाकारशिरोयुक्तां उत्तरस्थां नतोऽस्म्यहम् ॥

ओं हां गदायै हुं फट् नमः । ईशाने ओं हां त्रिशूलासनाय नमः त्रिशूलमूर्तये नमः । ध्यानम् —

त्रिशूलं पुरुषाकारं दिव्यं श्यामकलेवरम् ।
त्रिशूलं शिरसा शश्वन्नतोऽस्मीशानदिग्गतम् ॥

ओं हां त्रिशूलाय हुं फट् नमः । तद्दक्षिणे ओं हां पद्मासनाय नमः पद्ममूर्तये नमः । ध्यानम् ——

शंखं च पद्मकोशाढ्यं मूर्धानं पुरुषाकृतिम् ।
नौमि दिव्यं विरिञ्चास्त्रं शङ्खाभं शुभलोचनम् ॥

125 a ओं हां पद्माय हुं फट् नमः । नैरृते ओं हां चक्रासनाय नमः । चक्रमूर्तये नमः । ध्यानम् —

चक्रं शतारं चक्राङ्कं मूर्धानं पुरुषाकृतिम् ।
श्यामदेहं मुकुन्दास्त्रं सेवे नैरृतकोणके ॥

ओं हां चक्राय हुं फट् नमः । इत्यभ्यर्च्य । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा । ततः अस्त्रवर्धनीं गुरुरादाय स्कन्दकुम्भं शिष्येण वाहयित्वा । कुम्भागकामिनी वर्धनी नालोद्भूताविच्छिन्नजलधारां पदे पदे प्रपातयन् ओं श्लीं वज्राय हुं फट् नमः इति मूलेन ईशानादीशानान्तं भ्रामयित्वा प्रदक्षिणं स्रावयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लोकपाला भवद्भिस्तु यज्ञविघ्नप्रशान्तये ।

गुहाज्ञयात्र स्थातव्यं तावद्यज्ञः समाप्यते ॥

इत्थं विज्ञाप्य स्वस्थाने कुम्भं वर्धनीं च संस्थाप्य । स्थिरासनं सम्पूजयेत् । यागेश्वरकुम्भस्याधः ओं हां आधारशक्तिकमलासनाय नमः । अनन्तासनाय नमः । सिंहासनाय नमः । योगासनाय नमः । पद्मासनाय नमः । विमलासनाय नमः । ओं हां स्कन्दासनाय नमः स्कन्दमूर्तये नमः । दण्डभाङ्गी मुण्डभङ्गी न्यस्य । ध्यानम् —

वज्रं त्रिवर्तिसंयुक्तं मूर्धानं पुरुषाकृतिम् ।

स्कन्दस्य वामहस्ते तु स्थितं शत्रुविमर्दनम् ॥

125 b इति ध्यात्वा । ओं हां विद्यादेहाय नमः । ओं सौं नेत्रेभ्यो नमः । इति विद्यादेहं नेत्रं विन्यस्य । पश्चात्पुष्पाञ्जलिं दत्वा । ओं हुं हौं सौं वज्राय हुं फट् नमः । इति मूलेन पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्यस्य । जगद्भुवाय नमः आवाहितो भव । वचद्भुवाय नमः । स्थापितो भव । विश्वभुवाय नमः सन्निधीभव । रुद्रभुवाय नमः सन्निरुद्धो भव । ब्रह्मभुवाय नमः अवकुण्ठनम् । भूर्भुवाय नमः धेनुमुद्रां महामुद्रां प्रदर्श्य । स्वागतार्घ्यं दत्वा । हृदयादिकरान्तस्थानेषु हृदयाद्यङ्गानि विन्यस्य । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा । ततो वर्धन्यां ओं हूं शक्त्यासनाय नमः शक्तिमूर्तये नमः ।

शक्तिं च योषिदाकारां रक्तवर्णां महाबलाम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिशूलाकृतिसंयुक्तां शक्तिं शत्रुविमर्दिनीम् ॥

इति ध्यात्वा । ओं ह्रीं शक्त्यै हुं फट् नमः । इति मूलेनावाह्य । स्थापनादि कृत्वा । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । ओं हां वज्राय नमः शक्त्ये नमः ॥ 'सावधानेन यागान्तं यावत्स्थेयं गुहाज्ञया' इति विज्ञाप्य । मूलमन्त्रमष्टोत्तरशतवारं जप्त्वा । कुम्भे निवेद्य ॥ मया प्रवर्तितच्छायां यज्वना भवतः क्रतुः ।

रक्षणीयस्त्वयैवं हि समाप्तिर्यावदस्य हि ॥

इति यज्ञरक्षाधुरमावेश्य । तत्पात्रं निश्चलं संस्थाप्य । पश्चादुत्तरद्वारस्य पश्चिमे तृतीयकलशे ओं हां विनायकासनाय नमः विनायकमूर्तये नमः ॥ ध्यानम् —

त्रिणेत्रो वामनाकारो गजवक्त्रो महोदरः ।

126 a पाशाङ्कुशौ स्वदन्तं च पक्वमाम्रफलं वहन् ॥

शुण्डां वामकराभ्यां च रक्ताङ्गो विघ्ननायकः ।

ओं हां विनायकाय नमः । इति मूलेनावाह्य । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा ॥

यत्सुरेशाध्वरोऽस्माभिः पश्वनुग्रहहेतवे ।

प्रवर्तितो म यावन्तमविघ्नं तव सन्निधौ ॥

इति विज्ञाप्य । उत्तरद्वारस्य पूर्वे तृतीयकलशे ॥ ओं 'सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् । गुहं विष्णुं च धातारं गुरून् सप्त समाश्रये ॥' ओं हां सप्तगुरुभ्यो नमः ॥ इत्यावाहनपाद्यादिगन्ध-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुष्पधूपदीपनैवेद्यं दत्त्वा ॥

देवदेव जगन्नाथ जगदानन्दकारण ।
गुहाध्वरः प्रवृत्तोऽयमनुज्ञां कुरु ते नमः ॥

इति सप्त गुरून्विज्ञाप्य ॥ इति मण्टपपूजाविधिस्समाप्तः ॥

126 b

## * तुरीयदिनकुम्भपूजा *

कुम्भपूजामारभेत् । वेदिकाया दक्षिणभागे उत्तराभिमुख-मुपविश्य अर्घ्यजलेन प्रोक्ष्य निर्माल्यं विसृज्य कुम्भस्याधः ओं हां आधारशक्तये नमः । तदुपरि वृत्ताकारं श्वेतमनन्तासनं सञ्चिन्त्य । पूर्वादिदिक्षु ओं हां अनन्ताय नमः वासुक्यै नमः तक्षकाय नमः कार्कोटकाय नमः पद्माय नमः महापद्माय नमः शंखपालाय नमः गुलिकाय नमः । तन्मध्ये ओं हां अनन्तासनाय नमः इत्यनन्तासनं तदुपरि सिंहासनं चतुरश्रं रक्तवर्णं विचिन्त्य । तदाग्नेयादिकोणेषु ओं हां धर्माय नमः ज्ञानाय नमः वैराग्याय नमः ऐश्वर्याय नमः । पूर्वादिदिक्षु अधर्माय नमः अज्ञानाय नमः अवैराग्याय नमः अनैश्वर्याय नमः । दक्षिणोत्तरमध्येषु राजसाय नमः तामसाय नमः सात्विकाय नमः । पीठोर्ध्वमेखलाधोभागे शयनीयतयाधरच्छदने नैरृते ओं हां अधरच्छदनाय नमः । तदूर्ध्वच्छदने ईशाने ऊर्ध्वच्छदनाय नमः । मध्ये ओं हां सिंहासनाय नमः । तदुपरि योगासनं

षट्कोणं पीतवर्णं विचिन्त्य। आग्नेयादिकोणेषु ओं हां कृतयुगा-
य नमः त्रेतायुगाय नमः द्वापरयुगाय नमः कलियुगाय नमः।
पूर्वादिषु अव्यक्ताय नमः। नियतये नमः। कलाय नमः काला-
य नमः। तन्मध्ये केशवाय नमः। ओं हां योगासनाय नमः।
तदुपरि पद्मासनं वृत्ताकारं रक्तवर्णं विचिन्त्य तन्मध्ये ओं
127 a हां कन्दाय नमः बीजाय नमः अङ्कुराय नमः नालाय नमः।
दलेभ्यो नमः केसरेभ्यो नमः कर्णिकाय नमः। बीजेभ्यो नमः।
पद्मासनाय नमः। ततः पूर्वादीशान्तकेसरेषु ओं हां शकुन्त्यै
नमः रेवत्यै नमः पूतायै नमः महापूतायै नमः। निशीथिन्यै
नमः मालिन्यै नमः। शीतलायै नमः भूत्यै नमः। कर्णिकामध्ये
विश्वतोमुख्यै नमः। दलाग्रवृत्ते ओं हां सूर्यमण्डलाय नमः।
सूर्यमण्डलाधिपतये ब्रह्मणे नमः। केसराग्रवृत्ते ओं हां सोम-
मण्डलाय नमः। सोममण्डलाधिपतये विष्णवे नमः। कर्णिका-
ग्रवृत्ते ओं हां वह्निमण्डलाय नमः वह्निमण्डलाधिपतये रुद्रा-
य नमः। कर्णिकामध्ये ओं हां शक्तिमण्डलाय नमः शक्तिमण्ड-
लाधिपतये स्कन्दाय नमः इति सम्पूज्य। तदुपरि विमलास-
नम् षट्कोणं व्याघ्रचर्मरूपं विचिन्त्य। ओं हां विमलासनाय
नमः। तदुपरि ओं हां स्कन्दासनाय नमः। ओं हां हं हां स्कन्दमूर्त-
ये नमः। इति मूर्तिं दण्डाकारं रक्तवर्णं विभाव्य। पश्चाद्दण्डभङ्गि-
न्यासं कुर्यात्। ओं सों ईशानमूर्धाय जगद्भुवाय नमः इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिरसि। ओं सें तत्पुरुषवक्त्राय वचद्भुवाय नमः इति वक्त्रे। ओं सुं
अघोरहृदयाय विश्वभुवाय नमः इति हृदये। ओं सिं वामदेव-
गुह्याय रुद्रभुवाय नमः इति गुह्ये। ओं सं सद्योजातपादाय
127 b ब्रह्मभुवाय नम इति पादे। ओं सौं आप्यभुवाय भुवद्भुवसर्वा-
ङ्गाय नमः इति सर्वाङ्गे विन्यस्य। ततः मुण्डभङ्गिन्यासः। ओं
सों ईशानाय जगद्भुवमूर्ध्ने नमः इतीशानमूर्ध्नि। ओं हां
तत्पुरुषाय वचद्भुवमूर्ध्ने नमः इति पूर्वमूर्ध्नि। ओं सुं अघोराय
विश्वभुवमूर्ध्ने नमः इति दक्षिणमूर्ध्नि। ओं सिं वामदेवाय
रुद्रभुवमूर्ध्ने नमः इत्युत्तरमूर्ध्नि। ओं सिं सद्योजाताय ब्रह्म-
भुवमूर्ध्ने नमः इति पश्चिममूर्ध्नि। ओं सौं आप्यभुवाय भुव-
द्भुवमूर्ध्ने नमः इति नैऋतमूर्ध्नि न्यसेत्। कलाभङ्गिन्यासं
कुर्यात्। ओं हौं शान्त्यतीतकलायै नमः इति शिरसि। ओं हैं
शान्तिकलायै नम इति वक्त्रे। ओं हूं विद्याकलायै नमः इति
हृदये। ओं हिं प्रतिष्ठाकलायै नमः इति गुह्ये। ओं हां निवृत्ति-
कलायै नमः इति पादयोः विन्यस्य। पश्चात्तत्वन्यासं कुर्यात्।
ओं हां आकाशतत्वाय नमः। आकाशतत्वाधिपतये सदाशिवाय
नमः। इति शिरसि। ओं यं वायुतत्वायनमः। वायुतत्वाधिपतये
महेश्वराय नमः। इति वक्त्रे। ओं रं तेजस्तत्वाय नमः। तेजस्त-
त्वाधिपतये रुद्राय नम इति हृदये। ओं वं अप्तत्वाय नमः।
अप्तत्वाधिपतये विष्णवे नमः। इति गुह्ये। ओं लं पृथिवी-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्त्वाय नमः। पृथिवीतत्त्वाधिपतये ब्रह्मणे नमः। इति पादयोर्वि-
न्यस्य। ततस्त्रितत्त्वन्यासः॥ ओं हुं शिवतत्त्वाय नमः शिवतत्त्वा-
128 a धिपतये रुद्राय नमः। इति मुखमण्डले। ओं हिं विद्यातत्त्वाय
नमः। विद्यातत्त्वाधिपतये विष्णवे नमः। इति हृदये। ओं हां
आत्मतत्त्वाय नमः। आत्मतत्त्वाधिपतये ब्रह्मणे नमः। इति पाद-
योर्विन्यस्य॥ पश्चात् मातृकान्यासः॥

— मातृकान्यासः —

न्यस्येदाननवृत्तदृक्छ्रवण॰॰ गण्डोष्ठदन्तद्वयी-
मूर्धास्ये च करांघ्रिसन्धिषु सहाग्रेषु क्रमान्मातृकाम्।
पार्श्वद्वन्द्वसपृष्ठनाभिजठरे हृत्कक्षपश्चाङ्गले
सव्ये कक्षतले करोरुयुगले सन्धाननो मन्त्रवित्॥

इति मातृकान्यासं क्रमेण विन्यस्य॥

— स्कन्दकलान्यासः —

जगद्भुवं जयायै नमः इतीशानमूर्ध्नि। बहुतो बलायै नम इति
पूर्वमूर्ध्नि। हुतं उन्नतायै नमः इति दक्षिणमूर्ध्नि। वचद्भुवं
वामायै नमः इत्युत्तरमूर्ध्नि। नमस्ते अस्तु नन्दिन्यै नम इति
पश्चिममूर्ध्नि। विश्वभुवे विजयायै नमः इति नैरृतमूर्ध्नि न्य-
स्येत्। जगद्भुवोऽधिपतिर्जयायै नम इति ~~[illegible]~~ ईशानवक्त्रे।
सेनानि सेनायै नमः पूर्ववक्त्रे। मयूरप्रियायै नमः दक्षिणवक्त्रे। षडा-
ननमङ्गानि शान्त्यै नम इत्युत्तरवक्त्रे। सन्ध्याया नमस्तेऽस्तु सत्यै

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः पश्चिमवक्त्रे । सुखं वह्नि सूक्ष्मायै नमः नैऋतवक्त्रे । सुब्रह्म-
ण्यसुमत्यै नमः हृदये । बृहस्पतये सुखाय प्रज्ञायै नमः गले ।
अस्य पद्मयोनेः अमृतायै नमः दक्षिणबाहौ । यस्यात्माय यशः-
स्विन्यै नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः नाभौ । सु-
128 b ब्रह्मण्यसुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे रुचये नमः पृष्ठे । ब्रह्म-
भुवे ब्रह्मण्यै नमः उरसि । भुवद्भुवे भूत्यै नमः गुह्ये । मातृता-
यमान्यै नमः शिश्ने । जगद्भुवं जीवायै नमः दक्षिणोरौ । सुब्रह्मण्य-
शुद्धायै नमः वामोरौ । कृत्तिकासुतकृपायै नमः दक्षिणजानुनि ।
षष्टिकासत्वरायै नमः वामजानुनि । जगद्भुवं जगत्यै नमः दक्षिण-
जंघायाम् । वचद्भुवं वरदायै नमः वामजङ्घायाम् । स्कन्दीशशाखि-
ने कामदायै नमः दक्षिणपादे । हव्यं यस्नाय धारिण्यै नमः वाम-
पादे । षण्मुखश्यामायै नमः इत्युरसि विन्यस्य ।

— षडक्षरन्यासः —

पश्चात् षडक्षरन्यासः । अस्य श्री सुब्रह्मण्यमहामन्त्रस्य का-
श्यपऋषिः गायत्रीच्छन्दः । श्री षण्मुखो देवता । सौं बीजम् ।
ह्रीं शक्तिः । श्रीं कीलकम् । श्री सुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे
विनियोगः । सामित्यादि कराङ्गन्यासः । ध्यानम् —

सिन्धूराऽरुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

पञ्चोपचाराः। न्यासक्रमः। ओं सौं शं नमः इति शिरसि। रं नमः
दक्षिणनेत्रे। वं नमः वामनेत्रे। णं नमः दक्षिणनासिकायाम्।
129 a भं नमः वामनासिकायाम्। वं नमः शिरसि विन्यस्य। शं नमः
दक्षिणबाहुशिखरे। रं नमः दक्षिणकोर्परे। वं नमः दक्षिणमणि-
बन्धे। णं नमः दक्षिणहस्ताङ्गुलिमूले। भं नमः दक्षिणहस्ता-
ङ्गुलिमध्ये। वं नमः दक्षिणहस्ताङ्गुल्यग्रे विन्यस्य। शं नमः
वामबाहुशिखरे। रं नमः वामकोर्परे। वं नमः वाममणिबन्धे।
णं नमः वामहस्ताङ्गुलिमूले। भं नमः वामहस्ताङ्गुलिमध्ये।
वं नमः वामहस्ताङ्गुल्यग्रे विन्यस्य। शं नमः दक्षिणोरुमूले।
रं नमः दक्षिणजानुनि। वं नमः दक्षिणस्फिचि। णं नमः दक्षि-
णपादाङ्गुलिमूले। भं नमः दक्षिणपादाङ्गुलिमध्ये। वं नमः
दक्षिणपादाङ्गुल्यग्रे विन्यस्य। शं नमः वामोरुमूले। रं नमः वाम-
जानुनि। वं नमः वामस्फिचि। णं नमः वामपादाङ्गुलिमूले।
भं नमः वामपादाङ्गुलिमध्ये। वं नमः वामपादाङ्गुल्यग्रे विन्य-
स्य। शं नमः हृदये। रं नमः दक्षिणपार्श्वे। वं नमः वामपार्श्वे।
णं नमः नाभौ। भं नमः पृष्ठे। वं नम इति लिङ्गे विन्यस्य।
इति षट्त्रिंशत्स्थाने विन्यसेत्। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा पुष्पाञ्जलिं ब्रह्मरन्ध्रान्तं नीत्वा । ओं सं सां विद्या-
देहाय नमः । इति पुष्पाञ्जलिगतं विभाव्य । कुम्भे विन्यस्य ।
1296 षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः इति नेत्रमुद्रां प्रदर्श्य ।

## * आवाहनम् *

आवाहनम् । पश्चाद्रेचकया पुष्पैरञ्जलिमापूर्य । हृत्प्रदेशे नि-
धाय । पूरकं विभाव्य । कुम्भकं भावनया मूलाधारादिनाभ्यास-
व्याप्त प्राणबीजं हकारं नाभ्यादिहृदयान्तव्याप्तं घोषामेधाकलां
औकारेण संयोज्य । हौकारं हृदयादिकण्ठान्तव्याप्तं रसकलां ऊ-
कारेण संयोज्य । हौकारऊकारौ कण्ठादितालुरन्ध्रान्तव्याप्तं
विषकलां मकारेण संयोज्य । हौङ्कारस्योपरि भ्रूमध्यगताबि-
न्दुकलया बिन्दुकलां तदुपरि ललाटगतार्धचन्द्रकलया अर्ध-
चन्द्रकलां तदुपरि गतनिरोधिकलया निरोधिकलां तदूर्ध्व-
गतनादेन नादं च तदुपरि ब्रह्मरन्ध्रान्तव्याप्तां नादान्तेन संयोज्य
ब्रह्मरन्ध्रं तदुपरि शक्तिमेकाङ्गुलव्याप्तां तदुपरि व्यापिनी त्र्य-
ङ्गुलव्याप्तां तदुपरि व्योमरूप अनन्त अनाथ अनाश्रितां तदु-
परि समनाचतुरङ्गुलव्याप्तां तदुपरि उन्मनामपि चतुरङ्गुल-
व्याप्तां सञ्चिन्त्य । प्रासादान्ते द्वादशान्तोपरि षडक्षरेण वाच्य-
वाचकभावादभिन्नं श्रीसुब्रह्मण्यं सञ्चिन्त्य । पुष्पाञ्जलिं द्वाद-
शान्तपर्यन्तं नीत्वा । सृष्टिमार्गेण भ्रूमध्यान्तमवरोप्य । स्फुरत्तार-
काकारं स्कन्दं रेचकभावनया हृदयस्थितपुष्पाञ्जलिगतं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

130 a विभाव्य। 'अयं कुमारो जरां जयद्दीर्घमायुः यस्मै त्वं स्तनपृच्छ्या-
यायुर्वर्चो यशो बलम्' इति मन्त्रमुच्चार्य मूलमन्त्रं दशवारं ज-
प्त्वा। तन्मन्त्रेण पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्यस्य। कुम्भे आवा-
हिन्या ऊर्ध्वहस्तेन जगद्भवहृदयेनावाह्य। अधोमुखहस्तेन
वचद्भवशिरसेन स्थापिन्या संस्थाप्य। विश्वभुवशिखोर्ध्वाङ्गुष्ठ-
षष्टिभ्यां सन्निधान्या सन्निधीकृत्य। रुद्रभुवकवचाङ्गुष्ठगर्भमुष्टि-
रूपिण्या निष्ठुरया सन्निरुध्य। ब्रह्मभुवनेत्रेणावकुण्ठ्य ओं भूर्भु-
वास्त्रेण धेनुमुद्रया अमृतीकृत्य। स्वागतं ते सुब्रह्मण्येति विज्ञाप्य
वत्स स्वागतमिति देवोक्तं विभाव्य॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्सम्प्रीतिभावेन कुम्भेऽस्मिन् सन्निधीभव॥

इति विज्ञाप्य स्वागतार्घ्यं दत्वा। हृदयादिकरान्तस्थानेषु जग-
द्भवहृदयादि विन्यस्य। ओं भूर्भुवास्त्रेण संरक्ष्य। रुद्रभुवकव-
चेनावकुण्ठ्य। मूलेन धेनुमुद्रां महामुद्रां दत्वा। ओं सां सुब्र-
ह्मण्याय नमः इति पादयोः पाद्यं ओं सां सुब्रह्मण्याय स्वाहा इति
130 b षडङ्गेष्वाचमनं ओं सां सुब्रह्मण्याय स्वाहा इति शिरष्षडङ्गेभ्योऽ-
र्घ्यं दत्वा स्नानं समर्पयामि। वस्त्रोत्तरीयं समर्पयामि। गन्धद्वारेति
गन्धं समर्पयामि। कुङ्कुमाक्षतं समर्पयामि। पश्चादष्टपुष्पैरभ्यर्च्य।
ओं सां ज्ञानशक्तिधराय नमः स्कन्दाय नमः देवसेनापतये नमः।
सुब्रह्मण्याय नमः गजारूढाय नमः। शरकाननसम्भवाय नमः।

कार्तिकेयाय नमः कुमाराय नमः षण्मुखाय नमः तारकान्तकाय नमः
सेनान्ये नमः ब्रह्मचारिणे नमः वल्लीकल्याणसुन्दराय नमः बालाय
नमः क्रौञ्चभेत्रे नमः शिखिवाहनाय नमः इत्यभ्यर्च्य। धूपदीपं
दत्वा। नालिकेरकदलीफलगुलताम्बूलं निवेद्य। ततो दक्षिण-
वर्धन्यां ओं ह्रीं वल्ल्यासनाय नमः वल्लीमूर्तये नमः। इत्यासन-
मूर्तिं विन्यस्य। ध्यानम् —

श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
सव्ये लम्बकरां किरीटमकुटां तुङ्गस्तनीकञ्चुकाम्।
अन्योन्यी(ी!)क्षणसंयुतां शरवणोद्भूतस्य सव्ये स्थितां
मुक्तामाल्यधरां प्रसन्नवदनां वल्लीश्वरीं भावये॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। स्थापनादि
कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। उत्तरवर्धनीं ओं
श्रीं देवगजासनायै नमः देवगजमूर्तये नमः। ध्यानम् —

पीतामुत्पलधारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां
131 a पीतालङ्करणां करण्डमकुटां सेनानिवामे स्थिताम्।
वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधरां
देवैरर्चितपादुकां शशियुतां देवीं त्रिभङ्गीं भजे॥

इति ध्यात्वा। ओं श्रीं देवगजायै नमः इति मूलेनावाह्य। स्थाप-
नादि कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा॥ प्रार्थ्य —

शान्त्यतीतकलामूर्ध्ना शान्तिवक्त्रसरोरुहम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विद्यावितितवक्षोजं प्रतिष्ठां गुह्यमण्डलम्।

निवृत्तिं जानुजङ्घाङ्घ्रिं मूर्धादिक्रमशः कलाः।

वर्णत्वङ्मन्त्ररुधिरं पादमांससिराचितम्।

तत्वास्थिमज्जाशुक्रादि ध्यानं सद्योगमोक्षदम्॥

शिवान्ततत्वगर्भाध्वव्यापिनं सर्वदा गुहम्।

इति ध्यात्वा पश्चाद्योगाङ्गं पूजयेत्। तद्यथा — तस्य शिरष्षट्के-भ्य ईशानमादाय॥

स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम्।

सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम्॥

इति ध्यात्वा। ओं सों ईशानाय जगद्भवमूर्ध्ने नमः इतीशानदलेऽ-भ्यर्च्य। वक्त्रषट्केभ्यो वक्त्रमादाय॥

पीताम्बरोपवीतं च नरं कनकसन्निभम्।

मातुलुङ्गाक्षसूत्रं च दधानं चन्द्रमौलिनम्॥

इति ध्यात्वा। ओं सें तत्पुरुषाय वचद्भववक्त्राय नमः। इति पूर्व-दले सम्पूज्य। हृत्प्रदेशादघोरमादाय॥

खट्वाङ्गखेटं च कपालपाशं वामे दधानं परशुं त्रिशूलम्।

खड्गं च दण्डं विकृतं च भीमं ध्यायेदघोरं भुजगादिभूषम्॥

131 b इति ध्यात्वा ओं स्तुं अघोराय विश्वभुवहृदयाय नमः। इति दक्षिणदले सम्पूज्य। वामदेवं गुह्यमण्डलादादाय॥

वामं रक्तं सुरक्ताभं माल्यवस्त्रोपवीतिनम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥

ओं सिं वामदेवाय रुद्रभुवगुह्याय नमः इत्युत्तरदले सम्पूज्य।
पादाद्यङ्गात्सद्योजातमादाय —

घृतस्रुग्गन्धवस्त्राढ्यं बालाकारं त्रिलोचनम्।
सद्योजातं शशिभृतं वरदाभयपाणिनम् ॥

इति ध्यात्वा। ओं सं सद्योजाताय ब्रह्मभुवमूर्तये नमः इति
पश्चिमदलेऽभ्यर्च्य ॥ सर्वाङ्गमाप्यभुवमादाय —

आप्यं च श्वेतवर्णाढ्यं सर्वलोकोपकारकम्।
स्थित्वा रुद्रस्य मकुटं गङ्गायां प्रणमाम्यहम् ॥

इति ध्यात्वा। ओं सौं आप्यभुवाय भुवङ्गुवसर्वाङ्गाय नमः इति
नैरृतदले सम्पूज्य। सर्वज्ञातबीजेभ्यो नेत्रमादाय —

चन्द्रार्कवह्निरूपाणि अभयं वरदान्वितम्।
पद्मस्थानीन्दुधारीणि नेत्राणि च विभावयेत्॥

इति ध्यात्वा। ओं सौं ब्रह्मभुवनेत्रेभ्यो नमः इतीशानस्योत्तरे
भागे सम्पूज्य। सद्भावात्मकं हृदयं हृदयमादाय —

हृदयं चन्द्रसङ्काशं वराभयकरान्वितम्।
पद्मासनं सोमधरं गुहस्याभिमुखं भजे ॥

ओं सां जगद्भुवहृदयाय नमः इत्याग्नेयदले सम्पूज्य ॥ सर्वगुह-
तत्वलक्षणं शिरश्शिरोदेशादादाय —

शिरश्चामीकरप्रख्यं अभयं वरदं दधत्।

132 a

पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे ॥

ओं सिं वचङ्कुवशिरसे नमः इतीशानदले सम्पूज्य नेत्रंस्योत्तरे। शिखाशिखयाहृत्य ॥

शिखं सिन्धूरवर्णाढ्यं अभयं बिभ्रदीश्वरम्।
पद्मासनं इन्दुधरं गुहस्याभिमुखं भजे ॥

ओं सूं विश्वभुवशिखाय नमः इति नैऋतदले सम्पूज्य। परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादादाय —

कवचं भृङ्गसङ्काशं वरदाभयपाणिनम्।
पद्मस्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥

ओं सैं रुद्रभुवकवचाय नमः इति वायव्यदले सम्पूज्य। प्रतापरूपमस्त्रमस्त्रेभ्य आहृत्य ॥

दंष्ट्रापिङ्गलवर्णाढ्यं ज्वलत्केशं भयानकम्।
शक्तिशूलं दधद्भीमं अस्त्रं शत्रुविमर्दनम् ॥

इति ध्यात्वा। ओं सः भूर्भुव अस्त्राय नमः इति पूर्वादिचतुर्दलेषु सम्पूज्य ॥ इति प्रथमावरणम् ॥ ततो द्वितीयावरणम् —

पूर्वाद्यष्टघटेषु पूर्वकुम्भे ओं हां जयन्तासनाय नमः जयन्तमूर्तये नमः। ध्यानम् —

जयन्तारण्यमेकवक्त्रं अञ्जलीकृतसंयुतम्।
वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां जयन्ताय नमः। आवाहनादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आग्नेयकुम्भे ओं हां अग्निशिखासनाय नमः अग्निशिखमूर्तये नमः॥

तेजोरूपं अग्निशिखं सर्वाभरणभूषितम्।
वज्रशक्तिधरं क्रूरं गुहस्याभिमुखं भजे।

132 b ओं हां अग्निशिखाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-नैवेद्यं दत्वा। याम्ये ओं हां कृत्तिकापुत्रासनाय नमः कृत्तिकापुत्र-मूर्तये नमः। ध्यानम् —

रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम्।
कृताञ्जलिपुटं सौम्यं गुहस्याभिमुखं भजे॥

ओं हां कृत्तिकापुत्राय नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनै-वेद्यं दत्वा। नैऋतकुम्भे ओं हां भूतनाथासनाय नमः भूतनाथ-मूर्तये नमः। ध्यानम् —

भूतं सिन्धूरवर्णाढ्यं उग्रदंष्ट्रं महोदरम्।
खड्गखेटकसंयुक्तं कृताञ्जलिपुटान्वितम्॥

ओं हां भूतपतये नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा।
पश्चिमकुम्भे ओं हां सेनान्यासनाय नमः सेनानीमूर्तये नमः॥

देवसेनां चतुर्बाहुं श्वेतवर्णं कृताञ्जलिम्।
वज्रशक्तिधरं शान्तं गुहस्याभिमुखं भजे॥

ओं हां सेनान्ये नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा। वायुकुम्भे ओं हां गुहासनाय नमः गुहमूर्तये नमः॥

तेजोरूपं गुहस्यात्मं मन्दहास्यं कृताञ्जलिम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां गुहाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीपनैवेद्यं दत्वा।
उत्तरकुम्भे ओं हां हेमशूलासनाय नमः हेमशूलमूर्तये नमः ॥

हेमशूलं कृष्णवर्णं चतुर्हस्तं कृताञ्जलिम्।
खड्गखेटकसंयुक्तं गुहस्याभिमुखं भजे ॥

ओं हां हेमशूलाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-
133 a नैवेद्यं दत्वा। ईशानकुम्भे ओं हां विशालाक्षासनाय नमः वि-
शालाक्षमूर्तये नमः। ध्यानम् —

सुप्रसन्नं विशालाक्षं अञ्जलीकृतसंयुतम्।
पीताम्बरधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां विशालाक्षाय नमः। इत्यावाहनादि गन्धपुष्पधूपदीप-
नैवेद्यं दत्वा। पश्चात्तृतीयावरणं पूजयेत्। तद्बहिरावृतेषु दक्षि-
णे जयाय नमः उत्तरे विजयाय नमः। पूर्वे गजेन्द्राय नमः आ-
ग्नेय्यां सुदेहाय नमः याम्ये सुमुखाय नमः नैऋते देवसेनाप-
तये नमः। पश्चिमे मयूराय नमः वायौ सुरेशाय नमः। उत्तरे
सुमित्राय नमः ईशाने क्षेत्रपालाय नमः। इति तृतीयावरणम् ॥
पश्चात्तुरीयावरणमारभेत्। तद्बहिरावृते पूर्वाद्यष्टदिक्षु ओं
हां इन्द्राय नमः अग्नये नमः यमाय नमः निऋतये नमः वरुणाय
नमः वायवे नमः कुबेराय नमः ईशानाय नमः। तद्दक्षिणे ब्रह्मणे
नमः नैऋते विष्णवे नमः। इति तुरीयावरणम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तद्बहिरावृतेषु वज्रादि दशायुधमर्चयेत् । पूर्वाद्यष्टदिक्षु व-
ज्राय नमः शक्तये नमः दण्डाय नमः खड्गाय नमः पाशाय नमः
अङ्कुशाय नमः गदायै नमः त्रिशूलाय नमः पद्माय नमः चक्राय
नमः । इति सम्पूज्य । पाद्यादि धूपदीपनैवेद्यं दत्त्वा । अनन्तरं
गुहाय मूलेन पुष्पाञ्जलिं दत्त्वा । महामुद्रां दर्शयित्वा जयन्ता-
दीन्विना सर्वेषां गुहेन सार्धमत्यन्तमैक्यं विभावयेत् ।
133b पश्चात् प्राणप्रतिष्ठां कुर्यात् । अस्य श्रीप्राणप्रतिष्ठामहाम-
न्त्रस्य रुद्रब्रह्माच्युता ऋषयः । ऋग्यजुस्सामाथर्वाणि छ-
न्दांसि । अखिलचैतन्यरूपिणी परा प्राणशक्तिर्देवता । आं
बीजं ह्रीं शक्तिः क्रों कीलकम् । श्रीमत्सुब्रह्मण्येश्वरस्य सशक्ति-
सपरिवारस्य प्राणकलाप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामि-
त्यादि कराङ्गन्यासः । ध्यानम् —

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

इति ध्यात्वा । पञ्चोपचारान् कृत्वा । कुम्भमूर्ध्नि स्पृष्ट्वा । ओं आं
ह्रीं क्रों यरलवशषसहोम् । हंसस्सोऽहमोम् । श्रीसुब्रह्मण्ये-
श्वरस्य प्राणाः इह प्राणास्थिताः । आं ह्रीं क्रों यरलवशषसहों
हंसस्सोऽहमोम् । श्रीसुब्रह्मण्येश्वरस्य जीव इह स्थितः । आं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ह्रीं क्रों यरलवशषसहों हंसस्सोऽहमोम्। श्री सुब्रह्मण्येश्वरस्य
जीवतत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्त पृथिव्यप्तेजोवाय्वा-
134 a काश शब्दस्पर्शरूपरसगन्ध श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण वाक्पाणि
पादपायूपस्थ जीवप्राण इहागत्य अस्मिन् कुम्भे श्री सुब्रह्म-
ण्यस्य सशक्तिसपरिवारं सुखं चिरं तिष्ठन्तु स्वाहा। क्रों ह्रीं
आं हंसस्सोऽहं स्वाहा इति मूलेन द्वादशवारं जप्त्वा पुनश्च-
(?) ध्यानम्। असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो
धेहि भोगम्। ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृडयानः
स्वस्ति। पुनर्नो असुं पृथिवी ददातु। पुनर्द्यौर्देवी पुनरन्त-
रिक्षम्। पुनस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां या
स्वस्ति। ओं सौं सुब्रह्मण्याय नमः प्राणान् प्रतिष्ठापयामि।
इति प्राणप्रतिष्ठां कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं
दत्वा। मूलमन्त्रं यथाशक्ति जप्त्वा।

134 b

## * चतुर्थदिवसहोमः *

मूर्तिभिस्सहाचार्यः तत्तत्कुण्डसमीपे पूर्ववत् स्थित्वा। अग्निं
प्रज्वाल्य। परिसमूहनं कृत्वा। परिस्तरणाद्याज्यसंस्कारान्तं
कृत्वा। जुषस्वेनेति जपित्वा। अदितेनुमन्यस्व इत्यादि परिषिच्य।
कुण्डमध्ये ओं लूं अग्नये नमः। ऊर्ध्वमेखलायां पूर्वाद्यष्टदिक्षु
जातवेदसे नमः सहोजसे नमः अजिराप्रभवे नमः वैश्वानराय
नर्यापसे नमः पङ्क्तिराजसे नमः विसर्पिणे नमः यज्ञपुरुषाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मध्यमेखलायां पूर्वाद्यष्टदिक्षु जयन्ताय नमः अग्निशिखाय नमः।
कृत्तिकापुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय नमः
हेमशूलाय नमः विशालाक्षाय नमः। अधोमेखलायां पूर्वाद्यष्ट-
दिक्षु इन्द्राय नमः। इत्यादि ईशानाय नमः इति सम्पूज्य हे
लोकपालाः! विघ्नसंघातं निवार्य अग्निं पालयिष्यथ' इति गुहा-
ज्ञां श्रावयेत्। इति विज्ञाप्य कुण्डमध्ये ओं हां अग्न्यासनाय
नमः अग्निमूर्तये नमः। ध्यानम् —

अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।
वरदमनलखेटं ह्यङ्कुशं हा द्वि वामे
दधतमृषभसंस्थं भावयेयं गुहाग्निम्॥

इति ध्यात्वा। ओं हूं गुहाग्नये नमः इति मूलेनावाह्य। पाद्या-
135a दिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। व्याहृतिभिर्हुत्वा ततः कुण्डा-
ग्निमध्ये आधारशक्तिकमलासनाय नमः इत्यादि। ओं हां गुहा-
सनाय नमः गुहमूर्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम्॥

इति ध्यात्वा। ओं सौं सुब्रह्मण्याय शरवणभवाय नमः इति
मूलेन कुण्डाग्निमध्ये सुब्रह्मण्यमावाहयामि इत्यावाह्य। उप-
चारैस्सम्पूज्य। ओं ह्रीं वल्ल्यै नमः ओं श्रीं देवगजायै नमः इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शक्तिद्वयं सम्पूज्य । तदावृतदेवानां जयन्ताय नमः अग्निशिखाय
नमः कृत्तिकापुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय नमः
हेमशूलाय नमः विशालाक्षाय नमः इत्यभ्यर्च्य पश्चादाज्याहुतिं
हुत्वा । ओं सौं सुब्रह्मण्याय स्वाहा । ओं ह्रीं वल्ल्यै स्वाहा । ओं श्रीं
देवगजायै स्वाहा । जयन्ताय स्वाहा । जयन्ताय स्वाहा इत्यादि वि-
शालाक्षाय स्वाहा । पश्चात्पूर्णां विधाय । नवकुण्डपक्षे पूर्वकुण्डे
ओं हां सुब्रह्मण्यासनाय नमः सुब्रह्मण्यमूर्तये नमः । ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभिः
दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यमम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सौं सुब्रह्मण्याय नमः इति मू-
135 b लेनास्मिन् कुण्डाग्निमध्ये श्रीसुब्रह्मण्यमावाहयामि । स्थापनादि
कृत्वा पाद्याद्युपचारैस्सम्पूज्य । आग्नेयकुण्डे ओं सां कुमारास-
नाय नमः कुमारमूर्तये नमः । ध्यानम् —

सव्ये द्वये निशितशक्ति समादधानं
वामद्वये भरतकुक्कुटखेटकं च ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदाननिरतं कलये कुमारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं हां कुमाराय नमः इति मूलेन

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्मिन् कुण्डाग्निमध्ये श्रीकुमारमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । दक्षिणकुण्डे ओं सां षण्मुखासनाय नमः षण्मुखमूर्तये नमः । ध्यानम् —

वन्दे सिन्धूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवसेनामदनरिपुसुतावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां षण्मुखाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये षण्मुखमावाहयामि । स्थापनादि कृत्वा । पाद्याद्युपचारं दत्वा । नैऋतकुण्डे ओं हां ब्रह्मचार्यासनाय नमः ब्रह्मचारिमूर्तये नमः । ध्यानम् —

136 a कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।
कात्यायनीसुतमहं कटिबद्धवामे
कौपीनदण्डधरदक्षिणहस्तमीडे ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां ब्रह्मचारिणे नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये श्रीब्रह्मचारिणमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । पश्चिमकुण्डे ओं हां सेनापत्यासनाय नमः सेनापतिमूर्तये नमः । ध्यानम् —

सौम्यादित्यप्रदीप्तद्वादशनयनं षण्मुखं मन्दहासं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामाङ्के सुस्थितायां सरसिरुहधृतालिङ्गितायां सहस्तम् ।

उत्तुङ्गोरुस्तनाग्रे विहितकरतलाभीतिखेटादिशूलं

ह्लादिन्युद्दीप्तशक्तीध्वसनवनगतं कुक्कुटाब्जेन हस्तम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां देवसेनापतये नमः इति

मूलेनास्मिन् कुण्डाग्निमध्ये ओं देवसेनापतिमावाहयामि ।

स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा । वायुकुण्डे ओं सां गजा-

रूढासनाय नमः गजारूढमूर्तये नमः । ध्यानम् —

एकाननं द्विनयनं वरकुक्कुटौ च

वामे द्वये निशितशक्त्यभयौ द्वयेऽन्ये ।

बिभ्राणमीश्वरसुतं तपनायुताभं

नित्यं नमामि गजवाहनमिष्टसिद्ध्यै ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां गजारूढाय नमः इति

मूलेनास्मिन् कुण्डाग्निमध्ये श्री गजारूढमावाहयामि । स्थापना-

136 b दि कृत्वा । पाद्याद्युपचारं दत्त्वा । उत्तरकुण्डे ओं सां बालासनाय

नमः बालमूर्तये नमः । ध्यानम् —

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम् ।

विप्रप्रियकरं वन्दे बालरूपं रविप्रभम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा । ओं सां बालाय नमः इति मूलेना-

स्मिन् कुण्डाग्निमध्ये श्री बालरूपमावाहयामि । स्थापनादि कृत्वा

पाद्याद्युपचारं दत्त्वा । ईशानकुण्डे ओं सां शिखिवाहनासनाय नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिखिवाहनमूर्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्भवं शिखिवाहनम्॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां शिखिवाहनाय नमः इ-
त्यस्मिन् कुण्डाग्निमध्ये मूलेन ओं शिखिवाहनमावाहयामि।
स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा॥ इति नवकुण्डविधिः॥

— पञ्चकुण्डम् —

पञ्चाग्नेरायतनं चेत् पञ्चकुण्डाधिदैवतम्। प्रधानकुण्डे मूल-
बेराकृतिं ध्यात्वा। होमयेत्। दिक्कुण्डचतुष्के पूर्वकुण्डे ओं हां
सेनान्यासनाय नमः सेनानीमूर्तये नमः। ध्यानम् —

अभयसितकराङ्कं त्वङ्कुशं शक्तिशूलं
वरदकुलिशपाशं पञ्चहस्तौ गदां च।
दधत धनुस्सुबाणं द्वादशायां तु हस्ते
द्विदशकमलनेत्रं देवसेनानिमीडे॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां सेनान्ये नमः इति मूले-
137 a नास्मिन् कुण्डाग्निमध्ये ओं सेनानीमावाहयामि। स्थापनादि
कृत्वा पाद्याद्युपचारं दत्त्वा। दक्षिणकुण्डे ओं हां कार्तिकेयासना-
य नमः कार्तिकेयमूर्तये नमः। ध्यानम् —

वरदकुलिशखेटं वामहस्तत्रये च
दधतमभयशक्तिं खड्गमन्यत्रये च।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तरुणरविसमाभं साधुभिः पूज्यमानं

कमलवदनमेकं कार्तिकेयं नमामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां कार्तिकेयाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं कार्तिकेयमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । पश्चिमकुण्डे ओं सां स्कन्दासनाय नमः स्कन्दमूर्तये नमः । ध्यानम् —

वामे करे च युगले वरकुण्डिकायां

सव्येऽक्षसूत्रमभयं दधतं विशाखम् ।

वल्लीयुतं वनजलोचनमिन्दुवक्त्रं

वन्दामहे वनजसम्भवशासितारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां स्कन्दाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं स्कन्दमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । उत्तरकुण्डे ओं हां शरवणोद्भवासनाय नमः शरवणोद्भवमूर्तये नमः । ध्यानम् —

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटप्रासदण्डं

टङ्कं बाणं वरदमभयं कार्मुकं चोर्ध्वहस्ते ।

पीतं सौम्यं द्विदशनयनं केकयं साकमिन्द्रै-

स्सिद्धैः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

138 b इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां शरवणोद्भवाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शरवणोद्भवमावाहयामि ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा । पञ्चकुण्डविधिः प्रोक्त एक-
कुण्डविधिं शृणु । एकाग्निरायतनं चेत् जीर्णबेराकृतिं यजेत् ।
यथोचितकुण्डस्य यथोचितदेवं आधारशक्त्यादि आसनमूर्ति-
ध्यानपुरस्सरं सम्पूज्य । तत्तन्मन्त्रेणाष्टोत्तरशतमाज्याहुतिं
हुत्वा । प्रधानकुण्डादि सर्वत्र कुण्डेषु तत्तन्मूलमन्त्रेण समिद-
न्नाज्याहुतिं द्रव्यं प्रति सहस्रं वा तदर्धं वाष्टोत्तरशतं वा हुत्वा ।
द्रव्यं प्रति व्याहृतीभिर्हुत्वा विशेषद्रव्यैश्च प्रत्येकं पञ्चविंशति-
वारं हुत्वा । तद्यथा — समिधं सद्योजाताय स्वाहा । आज्यं
वामदेवाय स्वाहा । चरुं अघोराय स्वाहा । लाजं तत्पुरुषाय स्वाहा ।
सर्षपं ईशानाय स्वाहा । यवं जगद्भुवहृदयाय स्वाहा । तिलं व-
चद्भुवशिरसे स्वाहा । मुद्गं विश्वभुवशिखाय स्वाहा । माषं रुद्र-
भुवकवचाय स्वाहा । सक्तुं ब्रह्मभुवनेत्राय स्वाहा । कदलीफलं
भूर्भुव अस्त्राय स्वाहा । अपूपं ओं सौं सुब्रह्मण्याय स्वाहा ।
निष्पावं वल्ल्यै स्वाहा । चणकं गुहास्त्राय स्वाहा । वैणवं जयन्ता-
य स्वाहा । कुलस्थं अग्निशिखाय स्वाहा । आढकं कृत्तिकापु-
138 a त्राय स्वाहा । गोधूमं भूतनाथाय स्वाहा । प्रियङ्गुं सेनान्ये स्वाहा ।
नालिकेरं गुहाय स्वाहा । क्षीरं हेमशूलाय स्वाहा । ताम्बूलं वि-
शालाक्षाय स्वाहा । एलादिवासनाद्रव्यं ओं शरवणभवाय
स्वाहा । शतमर्धं तदर्धं वा तदर्धार्धमथापि वा ।
द्रव्यान्ते व्याहृतिं हुत्वा सर्वकुण्डानि होमयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं शरवणोद्भवाय षण्मुखाय शिखिवाहनाय अभयवरप्रदाय
शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमाराय ओं ह्रां ह्रीं
सौं शरवणभव हुं फट् स्वाहा। इति मालामन्त्रं पञ्चविंशति-
वारं हुत्वा। ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवणभवाय स्वाहा।
ओं ह्रीं वल्ल्यै स्वाहा। ओं श्रीं देवगजायै स्वाहा। इति मूलेन प्र-
त्येकमष्टोत्तरशतं हुत्वा। शकुन्यै स्वाहा। रेवत्यै स्वाहा। पूतायै
स्वाहा। महापूतायै स्वाहा। निशीथिन्यै स्वाहा। मालिन्यै स्वा-
हा। शीतलायै स्वाहा। भूत्यै स्वाहा। विश्वतोमुख्यै स्वाहा इत्ये-
कैकवारं हुत्वा। जयन्ताय स्वाहा। अग्निशिखायै स्वाहा। कृत्ति-
कापुत्राय स्वाहा। भूतपतये स्वाहा। सेनान्ये स्वाहा। गुहाय स्वा-
हा। हेमकुण्डलाय स्वाहा। विशालाक्षाय स्वाहा। ओं भूः स्वाहा
अग्नय इदं न मम। ओं भुवः स्वाहा वायव इदं न मम। ओं सुवः
स्वाहा सूर्यायेदं न मम। ओं भूर्भुवः स्वः स्वाहा प्रजापतय इदं
138 b न मम। इति सर्वत्र कुण्डं होमयेत्। हव्यवाहमभिमातिषाहं
रक्षोहणं प्रतिनासुजिष्णुं ज्योतिष्मन्तं दीद्यतं पुरन्धिं अग्निं
स्विष्टकृतमाहुवेमां स्वष्टमग्ने अभितस्पृणाहि। विश्वा देवा
पृतना अभिष्य। ऊरुं नः पन्था प्रदिशं विभाहि ज्योतिष्मद्धे-
ह्यजरं न आयुः स्वाहा। अग्नये स्विष्टकृते इदं न मम। इति
सर्वत्र हुत्वा। ततः सर्वत्र पूर्णां जुहुयात्। तद्यथा — स्रुग्गतं
आज्येनापूर्य। पुष्करोपर्यधोमुखं एवं न्यस्य तदग्रे पुष्पं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दत्त्वा। वामदक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां उरसव्येन
संलग्नौ तावुभावुपादाय समपादस्समुत्थायोर्ध्वकायो नाभ्यां
तिर्यग्विधाय स्रुगग्रदत्तदृष्टिः ओं सौं शरवणभ(वाय)वौषडिति
मूलं प्लुतमुच्चार्य। वामस्तनान्तं स्रुङ्मूलमानीय अनुद्विग्नः घृ-
तधारां बिन्दुस्थानाद्विनिस्सृतामृतधारामिति संस्मरन् यव-
प्रमाणेनावच्छिन्नधारया समस्तमाज्यं वह्नौ क्षिपेत्। इति सर्वत्र
पूर्णां विधाय। ततस्सर्वत्र कुण्डेषु आज्याहुतीर्जुहोति। तद्यथा।
तत्तन्मूलमन्त्रेण सहस्रं वा तदर्धं वाष्टोत्तरशतं वा पञ्चविंशतिं
वा हुत्वा। अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तद-
तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा। अग्नय इदं न मम। पुरु-
षसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वं वेत्थ
139 a यथातथं स्वाहा। अग्नय इदं न मम। यत्पाकत्रा मनसा दीनद-
क्षाणा यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्
नेजिष्ठो देवां ऋतुशो यजामि स्वाहा। अग्नय इदं न मम। पश्चा-
द्व्याहृतिभिर्हुत्वा। पश्चात्पूर्णां विधाय। एवं क्रमेण सर्वत्र कुण्डं
होमयेत्। दिक्कुण्डहोमं विना प्रधानकुण्डस्य व्याहृतिभिर्हुत्वा
ततो नाडीसन्धानार्थं मूलमन्त्रेणाहुतित्रयं दत्त्वा। नाडीसन्धानं
कुर्यात्। तद्यथा - ओं सौं सुब्रह्मण्याय स्वाहा। ओं हूं गुहाग्नि-
भ्यां स्वाहा। इति सन्धाय। निस्सृत्य। मूलमन्त्रमुच्चार्य वह्निस्थ-
गुहनासाविनिर्गतज्योतीरूपशिखां यागस्थगुहशिखालीनां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रश्मिमात्रावियोगे नाविच्छिन्नामुभयत्र सकृदास्पदं ध्यायेत्। एवं
कुम्भं यागाग्निगुहै रात्मानं सह नाडीसन्धानं कुर्यात्। यथा
कुशच्छलेन बिसतन्तुनिभां कुम्भस्य गुहनाडीं पिङ्गलया
विनिस्सृत्य स्वनाड्यामिडया प्रविश्य विलीनेति विभाव्य। गु-
हाणुना रेचकेन विनिस्सृत्य वह्निस्थगुहनाडीं पिङ्गलया प्रवि-
श्य। विलीनं विभाव्य। मूलेन रेचकेण इडया विनिस्सृत्य स्व-
नाड्या पिङ्गलया प्रविश्य। विलीनेति विभाव्य। गुहाणुना रेच-
केन विनिस्सृत्य। कुम्भस्थगुहहृदयं तत्पूरकेन प्रविश्य। लय-
1396 मिति विभाव्य। मूलेन रेचकेण विनिस्सृत्य स्वहृदयं पूरकेण
प्रविशेत्। एवं कुम्भमग्निगुहाभ्यामात्मानं सह नाडीं सन्धाय।
पश्चान्मन्त्रतर्पणदीपनार्थं जुहुयात्। तद्यथा - ओं सौं सुब्र-
ह्मण्याय स्वाहा इत्यष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा। इति मन्त्रः।
ओं सों ईशानाय जगद्भुवाय स्वाहा। ओं सें तत्पुरुषाय वचद्भुवाय
स्वाहा। ओं सुं अघोराय विश्वभुवाय स्वाहा। ओं सिं वामदेवाय
रुद्रभुवाय स्वाहा। ओं सं सद्योजाताय ब्रह्मभुवाय स्वाहा। ओं
सौं आप्यभुवाय भुवद्भुवाय स्वाहा। इति मन्त्रं प्रति दशवारं
हुत्वा। इति तर्पणम्। ओं सां जगद्भु~~व~~हृदयाय स्वाहा। ओं
सीं वचद्भुवशिरसे स्वाहा। ओं सुं विश्वभुवशिखाय स्वाहा।
ओं सैं रुद्रभुवकवचाय स्वाहा। ओं सौं ब्रह्मभुवनेत्राय स्वाहा।
ओं सः भूर्भुव अस्त्राय स्वाहा। इति दीपनम्। एवं मन्त्रतर्पण-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीपनम्। ततो देशकालदुर्निमित्तदुस्स्वप्नद्रव्यलोपमन्त्रलोप-
तन्त्रलोपसमकालसङ्करदोषनिवृत्त्यर्थं प्रासादेन शतं वा ~~वर्द्धं~~
~~क~~ पञ्चविंशतिं वा हुत्वा पश्चात्प्रायश्चित्तार्थं बहुरूपेण पञ्चा-
स्त्रेण पापभक्षणमन्त्रेण नवात्मकेन शम्बरेणासिना प्रत्येकमष्टो-
त्तरशतं पञ्चदश पञ्चविंशतिं वा हुत्वा। मन्त्रो यथा — बहुरूप-
140 a मन्त्रः। ओं हुं अघोराय स्वाहा। शिवास्त्रमन्त्रः ओं हौं हरहर
शिवशिव शिवास्त्राय स्वाहा। क्षुरिकास्त्रमन्त्रः छित् छित् क्षुत्
क्षुत् क्षुरिकास्त्राय स्वाहा। व्योमास्त्रमन्त्रः - ओं षं हं हां हिं हुं व्यो-
मव्यापिने स्वाहा। पाशुपतास्त्रमन्त्रः - ओं श्लीं पशुं हुं फट्
पाशुपतास्त्राय स्वाहा। अघोरास्त्रमन्त्रः - ओं ह्रीं स्फुर स्फुर प्र-
स्फुर प्रस्फुर। घोरघोर तनु तनु रूप रूप चट चट प्रचट प्रचट
कह कह वमवम बन्धय बन्धय घातय घातय हुं फट् ह्रीं
स्वाहा। पापभक्षणमन्त्रः - ओं हां हीं हूं हें हैं हों हौं हः पापभ-
क्षणाय शिवाय स्वाहा। नवात्ममन्त्रः - ओं हं हंसस्सोऽहं स्वाहा।
शम्बरमन्त्रः - ओं हां हीं हृदयाय स्वाहा। असिमन्त्रः - ओं हः
अस्त्राय स्वाहा। इत्येवं प्रत्येकमष्टोत्तरशतं वा पञ्चाशत् पञ्च-
विंशतिं वा हुत्वा। पश्चाच्चतुर्थदिवसविशेषहोमं कुर्यात्॥

— तुरीयदिनविशेषहोमः —

तद्यथा — ओं ग्लौं गं गणपतये स्वाहा। चिदम्बरध्वनिमन्त्रः —
ओं शिवशिवचरणम् शिवानन्दं शिवशिव शिवाय शिवाय स्वाहा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं नमश्शिवाय स्वाहा । ओं हौं शिवाय स्वाहा । ओं ह्रीं गौर्यै स्वाहा । ओं शक्तिहस्ताय कुङ्कुमवर्णाय कुमाराय षण्मुखाय शिखिवाहनाय अभयवरप्रदाय ओं सौं सुब्रह्मण्याय स्वाहा । वल्ल्यै

1406 स्वाहा । देवगजायै स्वाहा । पश्चादृषिहोमः — कौशिकाय स्वाहा । काश्यपाय स्वाहा । भारद्वाजाय स्वाहा । आत्रेयाय स्वाहा । गौतमाय स्वाहा । वसिष्ठाय स्वाहा । वामदेवाय स्वाहा । अगस्त्याय स्वाहा । विश्वामित्राय स्वाहा । बोधायनाय स्वाहा । निरामयाय स्वाहा । पुलस्त्याय स्वाहा । सनकाय स्वाहा । सनातनाय स्वाहा । सनन्दनाय स्वाहा । सनत्कुमाराय स्वाहा । आङ्गिरसाय स्वाहा । आपस्तम्बाय स्वाहा । वैखानसाय स्वाहा । परमेष्ठिने स्वाहा । ऋषिपत्नीभ्यः स्वाहा । यक्षेभ्यः स्वाहा । सिद्धेभ्यः स्वाहा । मुनिभ्यः स्वाहा । राक्षसेभ्यः स्वाहा । असुरेभ्यः स्वाहा । भूतेभ्यः स्वाहा । पिशाचेभ्यः स्वाहा । नवग्रहेभ्यः स्वाहा । राशिभ्यः स्वाहा । नक्षत्रेभ्यः स्वाहा । चतुर्युगेभ्यः स्वाहा । वर्षेभ्यः स्वाहा । कलिभ्यः स्वाहा । तिथिभ्यः स्वाहा । ओं हौं शिवाय स्वाहा । ओं ह्रीं गौर्यै स्वाहा । ओं सुं सुब्रह्मण्याय स्वाहा । ओं ह्रीं वल्ल्यै स्वाहा । ओं श्रीं देवगजायै स्वाहा । इति मन्त्रेण जुहुयात् । व्याहृतिभिर्हुत्वा । पूर्णां विधाय । पश्चादधिवासहोमं कुर्यात् ॥

— अधिवासहोमः —

तद्यथा — प्रधानकुण्डसमीपे पूर्वास्थितशान्तिकुम्भस्य पूर्ववत्

गुहमूलेन सम्पूज्य। धूपदीपनैवेद्यं दत्वा। प्रायश्चित्तार्थं बहु-
रूपेणास्त्रेण मूलमन्त्रेण प्रत्येकमष्टोत्तरशतं वा तदर्धं वा पञ्चविं-
141 a शतिर्वा हुत्वा। पश्चान्मूर्तिपानां तत्तत्कुण्डं निवेश्य। अग्निं प्र-
ज्वाल्य व्याहृतिभिर्हुत्वा। प्रधानकुण्डादिसर्वत्र कुण्डं पूर्णां वि-
धाय। पश्चादाचार्यो मूर्तिपैस्सह शान्तिकुम्भहस्तः मङ्गलवाद्य-
पुरस्सरं बिम्बसमीपं गत्वा। शान्तिकुम्भजलेन प्रोक्ष्य। बिम्ब-
स्याधः आधारशक्त्यै नमः मूलप्रकृत्यै नमः। आदिकूर्माय नमः।
अनन्ताय नमः वराहाय नमः। सुधासिन्धवे नमः रत्नद्वीपाय नमः।
कलधौताचलाय नमः। कल्पवृक्षवाटिकाय नमः। स्वर्णप्राकाराय
नमः धर्मकन्दाय नमः। ज्ञाननालाय नमः वैराग्यपत्राय नमः ऐ-
श्वर्यकर्णिकाय नमः। ओं सां सुं सुब्रह्मण्यासनाय नमः। सुब्रह्मण्यमू-
र्तये नमः इत्यासनमूर्तिं विन्यस्य। ततः प्रतिखण्डदर्शनार्थं बेर-
स्य कटिकर्णप्रदेशे पुष्पमाल्यप्रतिसरं बद्ध्वा। मूर्धादिगल-
पर्यन्तं शिवतत्वस्थानम्। रुद्रभागम्। कर्णादिकटिपर्यन्तं वि-
द्यातत्वस्थानं विष्णुभागम्। कट्यादिपादपर्यन्तं आत्मतत्वस्था-
नं ब्रह्मभागम्। इति ज्ञात्वा। बिम्बस्य मूर्धादिकण्ठपर्यन्तं शि-
वतत्वस्थानं समर्चयेत्। ओं हां शिवतत्वाय नमः। शिवतत्वा-
धिपतये शिवाय नमः। शक्तितत्वाय नमः शक्तितत्वाधिपतये
शक्तिमते नमः। सदाशिवतत्वाय नमः सदाशिवतत्वाधिपतये
ब्रह्मणे नमः। ईश्वरतत्वाय नमः ईश्वरतत्वाधिपतये अनन्ताय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। शुद्धविद्यातत्वाय नमः शुद्धविद्यातत्वाधिपतये शम्ब-
141b रायनमः। इति मूर्धादिकण्ठपर्यन्तं शिवतत्वपञ्चकं साधिप-
देवपञ्चकमर्चयेत्। कण्ठादिकटिपर्यन्तं विद्यातत्वकमर्चयेत्।
ओं हां मायातत्वाय नमः मायातत्वाधिपतये गहनेशाय नमः।
कालतत्वाय नमः कालतत्वाधिपतये कालनाम्ने नमः। कलात-
त्वाय नमः कलातत्वाधिपतये ज्ञानबिन्दवे नमः। विद्यातत्वाय
नमः विद्यातत्वाधिपतये विज्ञानाय नमः। नियतितत्वाय नमः
नियतितत्वाधिपतये नियामकाय नमः। रागतत्वाय नमः राग-
तत्वाधिपतये कामदाय नमः। पुरुषतत्वाय नमः पुरुषतत्वाधि-
पतये सूक्ष्मदेहाय नमः। इति विद्यातत्वसप्तकं सधिपं च स-
मर्चयेत्। कट्यादिपादपर्यन्तं आत्मतत्वं चतुर्विंशति। ओं हां
प्रकृतितत्वाय नमः प्रकृतितत्वाधिपतये प्रधानकाय नमः। चित्त-
तत्वाय नमः चित्ततत्वाधिपतये त्रिदेहाय नमः। अहङ्कारतत्वाय
नमः। अहङ्कारतत्वाधिपतये अहङ्कृते नमः। बुद्धितत्वाय नमः।
बुद्धितत्वाधिपतये बुद्धाङ्गाय नमः। मनस्तत्वाय नमः मनस्तत्वा-
धिपतये सङ्कल्पाय नमः। नासातत्वाय नमः नासातत्वाधिपतये
विलम्बकाय नमः। जिह्वातत्वाय नमः। जिह्वातत्वाधिपतये महा-
वक्त्राय नमः। चक्षुस्तत्वाय नमः चक्षुस्तत्वाधिपतये प्रकाशाय
नमः। त्वक्तत्वाय नमः त्वक्तत्वाधिपतये सर्वाङ्गाय नमः। श्रोत्रतत्वाय
नमः श्रोत्रतत्वाधिपतये व्योमचराय नमः। उपस्थतत्वाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

142a उपस्थतत्वाधिपतये घनानन्दाय नमः। पायुतत्वाय नमः पायु-
तत्वाधिपतये तूर्णकृते नमः। पाणितत्वाय नमः पाणितत्वाधिपतये
रमणाय नमः। पादतत्वाय नमः पादतत्वाधिपतये सामदाय नमः।
वाक्तत्वाय नमः वाक्तत्वाधिपतये दुन्दुपतये नमः। शब्दतत्वाय
नमः शब्दतत्वाधिपतये सूक्ष्मनादाय नमः। स्पर्शतत्वाय नमः।
स्पर्शतत्वाधिपतये बलवत्तराय नमः। रूपतत्वाय नमः रूपत-
त्वाधिपतये भानुमते नमः। रसतत्वाय नमः रसतत्वाधिपतये
जलेशाय नमः। गन्धतत्वाय नमः गन्धतत्वाधिपतये गन्धाङ्गा-
य नमः। आकाशतत्वाय नमः आकाशतत्वाधिपतये सूक्ष्माय
नमः। वायुतत्वाय नमः वायुतत्वाधिपतये मातरिश्वने नमः।
तेजस्तत्वाय नमः तेजस्तत्वाधिपतये त्विषांनिधये नमः। अप्-
त्वाय नमः अप्तत्वाधिपतये जलेश्वराय नमः। पृथिवीतत्वाय नमः।
पृथिवीतत्वाधिपतये श्रीकण्ठाय नमः। इत्यात्मतत्व चतुर्विंशति-
नामानि साधिपानि च समर्चयेत्॥

॥ इति तत्वतत्वेश्वरन्यासस्समाप्तः॥

पश्चान्मूर्तिमूर्तीश्वरन्यासं कुर्यात्। मूर्धादि भ्रूमध्यपर्यन्तं
आकाशस्थानम्। भ्रूमध्यादिकण्ठपर्यन्तं वायुस्थानम्। कण्ठा-
दिहृदयपर्यन्तं अग्निस्थानम्। हृदयादि गुदपर्यन्तमप्स्था-
142b नम्। गुदादिपादपर्यन्तं पृथिवीस्थानम्। इति ज्ञात्वा तत्तत्स्थाने
समर्चयेत्। तद्यथा — ओं हां हूं आकाशमूर्तये नमः। ओं हां हूं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आकाशतत्वाधिपतये सदाशिवाय नमः। ओं हां यूं वायुमूर्तये नमः।
ओं हां यूं वायुमूर्त्यधिपतये महेश्वराय नमः। ओं हां रूं तेजो-
मूर्तये नमः। ओं हां रूं तेजोमूर्त्यधिपतये रुद्राय नमः। ओं हां
वूं जलमूर्तये नमः। ओं हां वूं जलमूर्त्यधिपतये विष्णवे नमः।
ओं हां लूं पृथिवीमूर्तये नमः ओं हां लूं पृथिवीमूर्त्यधिप-
तये ब्रह्मणे नमः। पुनः नाभिहृदयशिरसि स्थानत्रयेषु
ओं हां षूं अर्कमूर्तये नमः ओं हां षूं अर्कमूर्त्यधिपतये
भवाय नमः। ओं हां सूं इन्दुमूर्तये नमः ओं हां सूं इन्दुमू-
र्तये नमः ओं हां सूं इन्दुमूर्त्यधिपतये महादेवाय नमः। ओं
हां हं सः यजमानमूर्तये नमः ओं हां हं सः यजमानमूर्त्यधि-
पतये पशुपतये नमः॥ इति मूर्तिमूर्तीश्वरन्यासस्समाप्तः॥
इत्यभ्यर्च्य। पश्चाद्बिम्बस्य पूर्वादिदिक्षु मूर्तिपांश्च स्वस्व-
दिक्षु स्थित्वा। कुशमूलेन ब्रह्मभागं संस्पृश्य मूलजपमष्टो-
त्तरशतं पृथक् पृथग्जप्त्वा। पश्चाद्यागशालां प्रविश्य। स्वस्व-
कुण्डे पूर्ववत् स्थित्वा। व्याहृतिभिर्हुत्वा। तत्तन्मूलमन्त्रेण
पञ्चविंशतिवारं हुत्वा। ततः ओं हूं आत्मतत्वाय स्वाहा। ओं हूं
143a आत्मतत्वाधिपतये ब्रह्मणे स्वाहा। ओं लूं पृथिवीमूर्तये स्वाहा।
ओं लूं पृथिवीमूर्त्यधिपतये प्रजापतये स्वाहा। पश्चाद्व्याहृतिभि-
र्हुत्वा। ततस्सर्वत्र पूर्णां विधाय। पश्चाद्बिम्बसमीपं गत्वा स्वस्व-
दिक्षु स्थित्वा। बिम्बस्य शान्तिकुम्भजलेन प्रोक्ष्य। कुशमूलेन

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ब्रह्मभागं संस्पृश्य । मूलमन्त्रेण होमसंख्यां जप्त्वा । वर्मणावकुण्ठ्य
निरुध्य । आत्मतत्त्वाधिपमाज्ञां श्रावयेत् ।

आत्मतत्त्वाधिप ब्रह्मन् यावद्दोषसमुत्थितम् ।
बिम्बं तावत्त्वयात्रैव स्थातव्यं सन्निधानतः ॥

इति संश्राव्य । ओं हूं आत्मतत्त्वाय नमः । ओं लूं यूं हां हां वं
क्ष्मामूर्तये नमः एवं विन्यस्य । पश्चाद्विष्णुभागे शान्तिकु-
म्भजलेन प्रोक्ष्य । मूर्तिपांश्च स्वस्वदिक्षु स्थित्वा । कुशमध्येन
विष्णुभागं संस्पृश्य । मूलमन्त्रमष्टोत्तरशतं पृथक् पृथग्जप्त्वा ।
पश्चाद्यागशालां प्रविश्य । स्वस्वकुण्डे पूर्ववत् स्थित्वा व्याहृति-
भिर्हुत्वा । तत्तन्मूलमन्त्रेण पञ्चविंशतिवारं हुत्वा ओं हां हिं
आत्मविद्यातत्त्वाभ्यां स्वाहा । ओं हिं विद्यातत्त्वाय स्वाहा । ओं
हिं विद्यातत्त्वाधिपतये विष्णवे स्वाहा । ओं हां वूं जलमूर्तये
143b स्वाहा । ओं हां वूं जलमूर्त्यधिपतये केशवाय स्वाहा । ओं हां रूं
तेजोमूर्तये स्वाहा । ओं हां रूं तेजोमूर्त्यधिपतये रुद्राय स्वाहा ।
ओं हां षूं अर्कमूर्तये स्वाहा । ओं हां षूं अर्कमूर्त्यधिपतये शि-
वाय स्वाहा । ओं हां सूं इन्दुमूर्तये स्वाहा । ओं हां सूं इन्दुमू-
र्त्यधिपतये शम्भवे स्वाहा । ततः व्याहृतिभिर्हुत्वा । सर्वत्र
पूर्णां विधाय । पश्चाद्बिम्बसमीपं गत्वा स्वस्वदिक्षु स्थित्वा ।
बिम्बस्य शान्तिकुम्भजलेन प्रोक्ष्य । ओं हां आत्मविद्यातत्त्वाभ्यां
नमः । ओं हिं विद्यातत्त्वाय नमः । विद्यातत्त्वाधिपतये विष्णवे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। ओं हां वूं जलमूर्तये नमः। ओं हां वूं जलमूर्त्यधिपतये के-
शवाय नमः। ओं हां रूं तेजोमूर्तये नमः। ओं हां रूं तेजोमूर्त्य-
धिपतये रुद्राय नमः। ओं हां षूं अर्कमूर्तये नमः। ओं हां षूं
अर्कमूर्त्यधिपतये शिवाय नमः। ओं हां सूं इन्दुमूर्तये नमः।
ओं हां सूं इन्दुमूर्त्यधिपतये शम्भवे नमः। इत्यभ्यर्च्य। कुशा-
मध्येन विष्णुभागं संस्पृश्य। मूलमन्त्रेण होमसंख्यां जप्त्वा।
वर्मणावकुण्ठ्य, निरुध्य। विद्यातत्वाधिपमाज्ञां श्रावयेत् —

विद्यातत्वाधिप विष्णो यावद्दोषसमुत्थितम्।
बिम्बं तावत्त्वयात्रैव स्थातव्यं सन्निधानतः॥

144a इति संश्राव्य। ओं हिं विद्यातत्वाय नमः इति विन्यस्य। पश्चा-
द्रुद्रभागे शान्तिकुम्भजलेन प्रोक्ष्य। मूर्तिपांश्च स्वस्वदिक्षुस्थि-
त्वा। कुशाग्रेण रुद्रभागं संस्पृश्य। मूलमन्त्रमष्टोत्तरशतं पृथ-
क्पृथग्जप्त्वा। पश्चाद्यागशालां प्रविश्य स्वस्वकुण्डे पूर्ववत्स्थित्वा।
व्याहृतिभिर्हुत्वा। मूलमन्त्रं पञ्चविंशतिवारं हुत्वा। ओं हीं हां
विद्यातत्त्वशिवतत्वाभ्यां स्वाहा। ओं हां शिवतत्वाय स्वाहा। ओं
हां शिवतत्वाधिपतये रुद्राय स्वाहा। ओं हां यूं वायुमूर्तये
स्वाहा। ओं हां यूं वायुतत्वाधिपतये महेश्वराय स्वाहा। ओं हां
हूं आकाशमूर्तये स्वाहा। ओं हां हूं आकाशमूर्त्यधिपतये सदा-
शिवाय स्वाहा। ओं हां हंसः यजमानमूर्तये स्वाहा। ओं हां हूं
यजमानमूर्त्यधिपतये महादेवाय स्वाहा। ततो व्याहृतिभिर्हुत्वा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वत्र पूर्णां विधाय। ततो बिम्बसमीपं गत्वा स्वस्वदिक्षु स्थित्वा।
बिम्बस्य शान्तिकुम्भजलेन प्रोक्ष्य। ओं ह्रीं हां विद्यातत्त्वशिवत-
त्त्वाभ्यां नमः। ओं हां शिवतत्त्वाय नमः। ओं हां शिवतत्त्वाधिप-
तये रुद्राय नमः। ओं हां यूं वायुमूर्तये नमः। ओं हां यूं वायुमू-
र्त्यधिपतये महेश्वराय नमः। ओं हां हूं आकाशमूर्तये नमः ओं
हां हूं आकाशमूर्त्यधिपतये सदाशिवाय नमः। ओं हां हं सः यज-
144b मानमूर्तये नमः। ओं हां हं सः यजमानमूर्त्यधिपतये महादेवा-
य नमः। इत्यभ्यर्च्य। कुशाग्रेण रुद्रभागं संस्पृश्य। मूलमन्त्रेण
होमसंख्यां जप्त्वा। वर्मणावकुण्ठ्य निरुध्य। शिवतत्त्वाधिप-
माज्ञां श्रावयेत् ——

शिवतत्त्वाधिपो रुद्रो यावद्दोषसमुत्थितम्।
बिम्बं तावत्त्वयात्रैव स्थातव्यं सन्निधानतः॥

इति संश्राव्य। ओं हां शिवतत्त्वाय नमः। एवं विन्यस्य पश्चात्
बिम्बस्य दण्डभङ्गिं मुण्डभङ्गीं न्यस्य। ध्यात्वा, विद्यादेहं नेत्रं
विन्यस्य। मूलेनावाह्य। शक्तिबिम्बे तत्तन्मूलेनावाह्य। पाद्या-
द्युपचारं दत्वा। मृगहिमाम्बुमिश्रितगन्धेन नेत्ररहितं सर्वाङ्गं
लेपयित्वा। मल्लिकादिसुगन्धपुष्पेण वर्षयेत्। धूपदीपं दत्वा।
फलानि निवेद्य। पश्चात् पञ्चावरणं विना निद्राकुम्भाष्टौ च
पूर्ववत् जयन्तादियथाक्रमेण सम्पूज्य। बिम्बस्य कण्ठादिपाद-
पर्यन्तं नववस्त्रेणाच्छाद्य। पश्चाद्बिम्बावृतप्राकारत्रयं भस्म-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दर्भतिलान् बहिर्विदध्यात् । पश्चान्मङ्गलवाद्यपुरस्सरं याग-
शालां प्रविश्य । प्रदक्षिणक्रमेण प्रधानकुण्डादीन् तत्तत्कुण्ड-
मासाद्य । व्याहृतिभिर्हुत्वा । शिवतत्त्वविद्यातत्त्वात्मतत्त्वेभ्यः
स्वाहा । कुण्डं प्रति तत्तन्मूलमन्त्रेणाष्टोत्तरशतं हुत्वा सर्वत्र पू-
र्णां विधाय । ततः प्रधानकुण्डं विना दिक्सर्वत्र कुण्डेषु 'जुष-
स्वन समिधमग्ने' इति जप्त्वा । अदितेनुमग्ग्ं स्थाः इत्यादि ।
145 a 'देव सवितः प्रासावीः' इति परिषिच्य । परिधिविष्टरस्थदेवा-
नां बलिं दत्वा । तद्यथा — ऊर्ध्वमेखलायां पूर्वे ब्रह्मणे स्वाहा ।
दक्षिणे विष्णवे स्वाहा । पश्चिमे रुद्राय स्वाहा । उत्तरे ईशा-
नाय स्वाहा । एवं बलिं दत्वा । पश्चान्मध्यमेखलायां पूर्वाद्यष्ट-
दिक्षु जयन्ताय स्वाहा इत्यादि विशालाक्षाय स्वाहा । अधोमे-
खलायां पूर्वाद्यष्टदिक्षु इन्द्रादीशानान्तं बलिं दत्वा । नमोऽ-
न्तैरभ्यर्च्य । उद्वास्य । पश्चाद्धोमसंख्यादशगुणं जप्त्वा । स्वाहा
इत्येकसमिधमग्नौ दत्वा । उपस्थानम् । उत्थाय । 'यत्ते अग्ने
तेजस्तेन अहं तेजस्वी भूयासम् । यत्ते अग्ने हरस्तेन अहं
हरस्वी भूयासम् । यत्ते अग्ने वर्चस्तेन अहं वर्चस्वी भूयासम्'
'मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि मेधां मयि
प्रजां मयीन्द्र इन्द्रियं दधातु । मयि मेधां मयि प्रजां मयि सूर्यो
भ्राजो दधातु ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यत्कृतं तु मया देव परिपूर्णं तदस्तु मे ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।

यानि शेषामशेषाणां शिवानुस्मरणं परम् ॥

नमस्कृत्वा । अहं भो अभिवादये । ततः स्थित्वा प्रायश्चित्तार्थ-
मघोरेणाष्टोत्तरशतं हुत्वा । परिस्तरणं परिस्तीर्य हृत्य । त-
द्भस्म त्रियम्बकेन ललाटे धृत्वा । समित्कुशपुष्पसहितं हस्त-
प्रासादेन तत्तत्कुण्डाग्निं सङ्गृह्य । ओं हूं अग्नये नमः इति
145 b मूलमन्त्रेण हृदा संपुटितं प्रधानकुण्डाग्निमध्ये आवाह्य ।
योजयेत् । अवकुण्ठ्य धेनुमुद्रां दत्वा । योजनिकार्थं अग्निं
सन्दीप्य । पश्चात्पूजाहोमजपफलसिद्ध्यर्थं सार्घ्यजलहस्तेन
सहृदा मूलमन्त्रेण सर्वे ऋत्विजः आचार्यहस्ते निवेदयेयुः । आ-
चार्यं गृहीत्वा कुम्भागे निवेदयेत् । पश्चादाचार्यः कुण्डसमीपे
पूर्ववत् स्थित्वा व्याहृतिभिर्हुत्वा । अयं कुमार इति मन्त्रेण
पञ्चविंशतिवारं हुत्वा । गुहमूलेनाष्टोत्तरशतं वा तदर्धं वा
तदर्धं वा हुत्वा । वल्ली देवनायकी मूलेन प्रत्येकं पञ्चविंशति-
वारं हुत्वा । पूर्णां विधाय । परिस्तरणस्थदेवानां क्रमेण बलिं
दत्वा । स्वाहा इत्येकसमिधमग्नौ दत्वा । उपस्थानं कृत्वा होम-
संख्यादशगुणं जप्त्वा । कुम्भागे समर्प्य । नैरृत्यां सोमकु-
म्भादि द्वादशपालिकायां यथाक्रमेण सम्पूज्य । आचम्य, वेदि-
कास्थितकुम्भे आधारशक्त्यादि सम्पूज्य । पाद्याचमनार्घ्यं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दत्वा। शुद्धान्नमुद्गान्नापूपादिपायसान्नं निवेद्य। नालिकेरकदली-
फलताम्बूलं निवेद्य। धूपदीपादिदीपाराधनक्रमेणाराध्य। ग-
णिकानृत्तबहुनृत्तसर्ववाद्यघोषैः भक्तस्तुत्यादिभिर्देवं स-
146 a न्तोष्य प्रदक्षिणनमस्कारस्तोत्रैः स्तुत्वा॥

इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायां
तुरीयदिनप्रातर्होमविधिस्समाप्तः॥

## * तुरीयदिनरात्रिहोमविधिः *

सायाह्नसमये आचार्यः मूर्तिपैस्सह स्नानानुष्ठानावश्यकं
निर्वर्त्य। यागगेहं प्रविश्य। धर्मासने सुखासनमुपविश्य।
प्राणायामाद्यन्तर्यागान्तं कृत्वा। सामान्यार्घ्यं पाद्यार्घ्यं विशे-
षार्घ्यं साधयित्वा। सामान्यार्घ्यजलेनात्मानं पूजोपकरणद्रव्य-
मस्त्रेण सम्प्रोक्ष्य। विनायकं सम्पूज्य। सङ्कल्प्य। पुण्याहं वाच-
यित्वा। पञ्चगव्यं संस्थाप्य। सम्प्रोक्ष्य। मण्टपपूजां यथाक्रमेण
सौरादिगुरुपर्यन्तं पूर्ववत्सम्पूज्य। कुम्भं पूर्ववत् यथाक्रमे-
ण पूजयेत्। ततो होमं कुर्यात्। मूर्तिपैस्सहाचार्यः तत्तत्कुण्डं
निवेश्य। अग्निं प्रज्वाल्य। प्रातर्वद्धोमं विशेषहोमं स्पर्शाहुतिं
पूर्णाहुतिं च कृत्वा। वेदिकास्थितकुम्भे दीपाराधनसर्वोपचारैः
सम्पूज्य। इति तुरीयदिवसरात्रिहोमविधिस्समाप्तः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

146 b

## — शयनोद्वासनम् —

पश्चाच्छयनोद्वासनविधिरुच्यते। अधिवासनबिम्बस्य दक्षिण-
भागे उत्तराभिमुखमुपविश्य। सकलीकृत्य। अर्घ्यं साधयित्वा।
तत्स्थानं बिम्बं सम्प्रोक्ष्य। विनायकं सम्पूज्य। सङ्कल्प्य। शिव-
श्शम्भोराज्ञा इत्यादिविशेषेण श्रीमद्वल्ली देवनायकी समेत श्री-
सुब्रह्मण्यप्रीत्यर्थं अष्टबन्धनकर्माङ्गं शयनोद्वासनकर्म क-
रिष्ये तदङ्गं शुद्धिपुण्याहं वाचयिष्ये इति सङ्कल्प्य। पुण्याहं
वाचयित्वा। बिम्बत्रयं सम्प्रोक्ष्य। बिम्बस्याधः आधारशक्तिकम-
लासनाय नमः अनन्तासनाय नमः सिंहासनाय नमः योगास-
नाय नमः पद्मासनाय नमः। विमलासनाय नमः स्कन्दासना-
य नमः। स्कन्दमूर्तये नमः। ततः दण्डभङ्गिं मुण्डभङ्गीं न्यस्य।
ध्यात्वा। विद्यादेहं नेत्रं विन्यस्य। आवाह्य स्थापनादि कृत्वा।
पाद्यादिसर्वोपचारैस्सम्पूज्य। फलादि निवेद्य। ततश्शक्तिद्वय-
मावाहनादि सर्वोपचारैस्सम्पूज्य। पश्चात् शयनोद्वासनमन्त्रः।
यथा। 'उत्तिष्ठ ब्रह्मणस्पते देव यन्तस्त्वेमहे। उपप्रयन्तु मरुत-
स्सुदानवः। इन्द्र प्राशूर्भवा सचा' इति मन्त्रेण शयनोत्थाप्य।
ततः गर्भन्यासविधिरुच्यते ॥

147 a

## — गर्भन्यासः —

गर्भगृहं नवधा कृत्वा। मध्यपदपश्चिमे रेखादि तत्पश्चिमे
पीठं न्यस्य। तदुपरि बिम्बस्थापनं कृत्वा। किञ्चिदीशान -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वीक्षणम् समदृष्टिं कारयेत् ॥

ऊर्ध्वदृष्टिरनायुष्यं अधोदृष्टिर्धनक्षयम् ।
बन्धुनाशो भवेत्पार्श्वे समदृष्टिर्विशिष्यते ॥
स्कन्दस्य दक्षभागे तु वल्लीदेवीं न्यसेद्बुधः ।
उदीच्यामिन्द्रतनयां स्थापयेद्विधिमार्गतः ॥
ईषत् भर्तुश्च नेत्राणि कारयेदष्टबन्धनम् ।

— रत्नन्यासः —

पश्चाद्रत्नन्यासविधिरुच्यते । तत्र ब्रह्मशिलायां नवकोष्ठं विलिख्य । विनायकं सम्पूज्य । सङ्कल्प्य । शिवश्शम्भो राज्ञा इत्यादिविशेषेण रत्नन्यासकर्म करिष्ये । तदङ्गं शुद्धि पुण्याहवाचनं करिष्ये इति सङ्कल्प्य । पुण्याहं वाचयित्वास्त्रेण सम्प्रोक्ष्य ॥

पीठमध्ये न्यसेद्धेममिन्द्रनीलं तथैन्द्रके ।
याम्ये मरकतं न्यस्य स्फटिकं वारुणे न्यसेत् ॥
वज्रं सौम्ये तु विन्यस्य पुष्यरागं तु पावके ।
माणिक्यं नैरृते न्यस्य वायव्यां मौक्तिकं न्यसेत् ॥
ईशाने च प्रवालं च वैडूर्यं मध्यमे न्यसेत् ।
पूजयेत्स्वस्वमन्त्रेण इन्द्रादीन् दिक्पतीन् क्रमात् ॥
सर्वोपचारैस्सम्पूज्य चक्रस्थापनमाचरेत् ।
पीठत्रयं तु संस्थाप्य बिम्बं न्यस्य तथोपरि ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रवालं मध्यमेस्थाप्य शक्तिपीठौ च विन्यसेत्॥

147 b

## — अष्टबन्धनम् —

अष्टबन्धनविधिः —

अथातस्सम्प्रवक्ष्यामि अष्टबन्धनमुत्तमम्।
अथ पक्वमपक्वं वा द्विविधः क्रम उच्यते॥
अग्निदाहश्च पक्वं स्यादपक्वं कुट्टनं भवेत्।
शतवर्षबलं पक्वमपक्वं च तदर्धकम्॥
पक्वं च दृढमेवोक्तमपक्वं बलहीनकम्।
पाकौषधं विशेषोऽस्ति किञ्चिद्भेदं च वर्त्मना॥
उष्णोऽधिकं च पक्वं स्यादुष्णरोगं प्रवर्तते।
तद्दोषशमनार्थं च जलधारां त्रिमासकम्॥
शीतोपचारं कर्तव्यं ब्राह्मणान् भोजयेत्ततः।
न चोष्णं कुट्टनं चैव राजराष्ट्राभिवर्धनम्॥

पश्चाद्देवाग्रे स्थलीं कृत्वा। अष्टदलपद्मं विलिख्य। तन्मध्ये शालितण्डुलं दर्भैः परिस्तीर्य। तन्मध्ये स्थलिकायामोषधीन्यस्य। आधारशक्त्यादि सम्पूज्य। स्कन्दमावाह्य —

श्रीरुद्रं ब्रह्मसूक्तं च विष्णुसूक्तं तथैव च।
रुद्रसूक्तं पावमानं स्कन्दसूक्तं तथैव च॥
पश्चादोषधिसूक्तं च त्रियम्बकं तथैव चेतः परम्।
धूपदीपं च नैवेद्यं धामप्रदक्षिणं कुरु॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवाग्रे कुट्टनं चैव तच्चूर्णं संधिरं नयेत् ।
अष्टबन्धं ततः कृत्वा शिल्पिनोद्वासनं चरेत् ॥
वास्तुशान्तिं ततः कृत्वा पर्यग्निकरणं कुरु ।
सप्तशुद्धिक्रमं चैव प्रासादशुद्धिमाचरेत् ॥

— सप्तशुद्धिः —

148 a सप्तशुद्धिक्रमं वक्ष्ये श्रूयतां रविसत्तम ।
गर्भगेहं विमानं च परिवारालयं तथा ॥
प्रागुक्तलक्षणं चैव जीर्णमुद्धारणं कुरु ।
उद्वास्य शिल्पिनं पश्चान्मार्जनं प्रोक्षणं तथा ॥
मण्टपं गर्भगेहं च प्राकारं परिवारकम् ।
पचनालयमेवं च प्रासादं बलिपीठकम् ॥
ततश्शुद्धिक्रमं कृत्वा स्थानशुद्धिक्रमं कुरु ।
खननं हरणं दाहं पूरणं गोनिवासनम् ॥
विप्रोच्छिष्टं च गव्यं च सप्तैते स्थानशुद्धयः ।
अन्तर्गेहादिसालेषु यत्र देशे मनोरमे ॥
अष्टदिक्खननं कृत्वा तालमात्रप्रमाणतः ।
तन्मृदं वर्जयेद्धीमांस्तत्तत्स्थाने दहेत्ततः ॥
तद्भस्म वर्जयित्वा तु शुद्धमृद्भिः प्रपूरयेत् ।
मण्टपादिषु सर्वेषु प्राकारे गर्भगेहके ॥
एकरात्रं त्रिरात्रं वा गोनिवासनमाचरेत् ।
तत्स्थानं मार्जनं कृत्वा गोमयालेपनं कुरु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पर्यग्निकरणं कृत्वा प्रागुक्त विधिना सह ।
तैलाभ्यङ्गं च विप्राणां तद्दिनात्प्राग्दिनत्रयम् ॥
प्राकारे मण्टपे चैव गर्भगेहार्धमण्टपे ।
परिवारालयेचैव ब्राह्मणान् भोजयेत्ततः ॥
तत्स्थानं मार्जनं कृत्वा गोमयालेपनं कुरु ।
148 b शुद्धैरुत्येति मन्त्रेण प्रोक्षयेत्पञ्चगव्यकैः ॥
स्थानशुद्धिक्रमः प्रोक्तः प्रासादशुद्धिमाचरेत् ।

— प्रासादशुद्धिः —

विघ्नेश्वरं समभ्यर्च्य पुण्याहं वाचयेत्ततः ।
देवाग्रे स्थण्डिलं कृत्वा नवकोष्ठं प्रकल्पयेत् ॥
मध्यादिपदपञ्चेषु स्थापयेत्पञ्चगव्यकम् ।
आग्नेयादिषु कोणेषु शुद्ध्यर्थं द्रव्यसङ्ग्रहम् ॥
नालिकेरदलैर्मुष्टिं आग्नेय्यां दिशि विन्यसेत् ।
श्रीपत्रं दर्भमुष्टिं च नैरृते विन्यसेद्बुधः ॥
विन्यसेद्वायुदिग्भागे स्थालीं तन्मध्यमे न्यसेत् ।
दूर्वासिद्धार्थकं चैव तण्डुलं क्षीरसंयुतम् ॥
तन्तुना दर्भमालां च नववस्त्रेण संयुतम् ।
विन्यसेत्त्वीशकोणेषु हृदयादिचतुष्टयम् ॥
मूलमन्त्रेण सम्पूज्य नैवेद्यं धूपदीपकम् ।
तद्द्रव्यं सङ्गृहीत्वा तु वाद्यघोषपुरस्सरम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धामप्रदक्षिणं चैव विमानाग्रे विशेद्बुधः ।
पञ्चगव्येन सम्प्रोक्ष्य वायुबीजेन मार्जयेत् ॥
शोधयेद्दलमयेनैव श्रीपत्रं दर्भमुष्टिकम् ।
क्षीरमिश्रेण तद्द्रव्यं विकराण्यस्त्रमन्त्रतः ॥
कवचेन तु संवेष्ट्य तन्तुना दर्भमालया ।
नववस्त्रेण तन्मन्त्रं स्थूप्यालम्बं कृतान्तकम् ॥
गुरुमूलेन सम्पूज्य नैवेद्यं धूपदीपकम् ।

॥ इति प्रासादशुद्धिस्समाप्ता ॥

149 a * पञ्चमदिनमण्टपपूजा *

पञ्चमदिनस्य । देशिकः प्रातरुत्थाय स्नात्वा सन्ध्यावन्दना-द्यावश्यकं कर्म कृत्वा । मूर्तिपैस्सह यागगेहं प्रविश्य । नित्यव-त्प्राणायामकरन्यासभूतशुद्ध्यङ्गन्यासदण्डन्यासमुण्डन्यास-मातृकान्यासस्कन्दकलान्यासषडक्षरन्यासान्तर्योगस्थलशुद्धि-मन्त्रशुद्धिसामान्यार्घ्यपाद्यार्घ्यविशेषार्घ्यान्तं कृत्वा । सामान्या-र्घ्यजलेनात्मानं पूजोपकरणद्रव्यं अस्त्रेण सम्प्रोक्ष्य, कलश-पूजां शङ्खपूजामात्मपूजां च कृत्वा । विनायकं सम्पूज्य । सङ्क-शिवश्शम्भोराज्ञा इत्यादिविशेषेण श्रीमद्वल्लीदेवनायकीसमेत-श्रीसुब्रह्मण्यस्य जीर्णोद्धारण पुनरावृत्त्यष्टबन्धनकर्माङ्ग राजराष्ट्रसर्वजनानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्या-भिवृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधफलसिद्ध्यर्थं श्रीमद्वल्ली-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवनायकी समेत श्रीसुब्रह्मण्येश्वरप्रसादसिद्ध्यर्थं मण्टपारा-
धनकुम्भपूजामग्निकार्यकर्म करिष्ये । तदङ्गं शुद्धिपुण्या-
हवाचनं करिष्ये इति सङ्कल्प्य । पुण्याहं वाचयित्वा अस्त्रेण
प्रोक्ष्य । पञ्चगव्यं विधिवत् स्थाप्य । मण्टपपूजामारभेत् ॥

149 b शान्तिं सुदेहं सुमुखं चक्रं पूर्वे समर्चयेत् ।
इन्द्राग्निमध्यमार्ताण्डं वह्निकोणे च पावकम् ॥
याम्ये विद्यामहावल्लीं ततस्सेनापतिं यमम् ।
नैरृते निरृतिं विष्णुं महालक्ष्मीं प्रपूजयेत् ॥
आप्ये निवृत्तिं शिखिनं गजं वरुणमस्त्रकम् ।
वायुं गणेशं क्षेत्रेशं वायव्यां दिशि पूजयेत् ॥
प्रतिष्ठां देवसेनां च सुमित्रं सोममुत्तरे ।
ईशानं पितराधारं गुरुमैशान्यके यजेत् ।

इत्यष्टाविंशतिकलशं सम्पूज्य । तद्यथा — इन्द्राग्न्योर्मध्ये
सूर्यकुम्भपूजां कुर्यात् । सामान्यार्घ्यजलेन प्रोक्ष्य । सूर्यकु-
म्भस्य पश्चिमभागे सूर्यद्वारार्चनं कुर्यात् । द्वारस्य दक्षिणे
ओं दण्डिने नमः । उत्तरे पिङ्गलाय नमः । ऐशान्यं गं गणप-
तये नमः । आग्नेय्यां ओं गुरुभ्यो नमः । मध्ये ओं प्रभूताय
नमः । आग्नेयादिकोणेषु ओं विमलाय नमः सौराय नमः ।
आराध्याय नमः । परमसुखाय नम इति सम्पूज्य । कुम्भस्याधः
ओं हां पद्मासनाय नमः तदुपरि दीप्ताय नमः । सूक्ष्माय नमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जयाय नमः भद्राय नमः। विभूत्यै नमः अमोघाय नमः। वि-
द्युताय नमः सर्वतोमुख्यै नमः। विस्फुरमुद्रां प्रदर्श्य। ओं अ-
150 a र्कासनाय नमः खं खखोल्काय सूर्यमूर्तये नमः। इत्यासन-
मूर्तिं विन्यस्य। दण्ड भङ्गि मुण्ड भङ्गी न्यस्य। ध्यानम् —

सौरं कुङ्कुमसङ्काशं सर्वाभरणभूषितम्।
द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम्॥
चतुर्भुजसमोपेतं ऊर्ध्वहस्ताम्बुजद्वयम्।
अभयं वरदोपेतमुषःप्रत्युषसायुकम्॥

इति ध्यात्वा। ओं सां विद्यादेहाय नमः ओं सौं नेत्रेभ्यो नमः
इति विद्यादेहं नेत्रं विन्यस्य। ओं श्रीं सांसंः सां शिवसूर्याय
नमः। इति मूलेनावाह्य। स्थापनादि कृत्वा। स्वाहान्तमूलेन
पाद्याचमनार्घ्यं दत्वा। स्नानवस्त्रोत्तरीयगन्धपुष्पधूपदीपनै-
वेद्यं दत्त्वा। उत्तरे ओं ह्रीं उषादेव्यै नमः। दक्षिणे ओं श्रीं प्रत्यु-
षादेव्यै नमः। पूर्वादिदलाग्रेषु सोमाय नमः बुधाय नमः बृ-
हस्पतये नमः भार्गवाय नमः। विदिक्षु दलेषु अङ्गारकाय नमः
शनैश्चराय नमः। राहवे नमः केतवे नमः। इत्यभ्यर्च्य सर्वत्र
पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। नमस्कारमुद्रां द-
र्शयित्वा। ताम्बूलं दत्त्वा प्रार्थ्य —

देवदेव त्रिलोकेश जगत्प्रथममङ्गल।
तिष्ठ त्वं स्थापितो भक्त्या मया सूर्य जगत्पते॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्येवं विज्ञाप्य। सूर्यमूलमन्त्रं यथाशक्ति जप्त्वा। जपफलं दे-
वतायै समर्प्य स्तोत्रैः स्तुत्वा। पराङ्मुखार्घ्यं दत्त्वा। ऐशान्यां सूर्य-
150 b निर्माल्यदेवाय तेजश्चण्डेश्वराय नम इत्यभ्यर्च्य। विसृज्य।
एवं सूर्यपूजां निर्वृत्य। बहिर्गत्वा। पूर्वकृतसौरभावनानि-
वृत्त्यर्थं पादौ प्रक्षाल्याचम्य। भस्मधारणं कृत्वा। पुनर्गत्वा।
सकलीकृत्य। सामान्यार्घ्यहस्तो मण्टपाद्बाह्ये स्थित्वा। पूर्व-
द्वारमस्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां शान्तितोरणासनाय
नमः। शान्तितोरणमूर्तये नमः शान्तितोरणाय नमः। शान्तितो-
रणाधिपतये भद्राय नमः। तोरणशाखयोः ऋग्वेदाय नम इति
सम्पूज्य। पाद्यादि दत्त्वा। द्वारस्योत्तरे प्रथमकलशे ओं हौं शा-
न्तिकलासनाय नमः शान्तिकलामूर्तये नमः शान्तिकलायै
नमः। पाद्याद्युपचारं दत्त्वा। तदुत्तरकुम्भे ओं हां सुदेहासनाय
नमः। सुदेहमूर्तये नमः सुदेहाय नमः। इति सम्पूज्य। द्वारद-
क्षिणकुम्भे ओं हां सुमुखासनाय नमः सुमुखमूर्तये नमः।
सुमुखाय नमः। इति सम्पूज्य। द्वारस्योत्तरपताकायां ओं हां
प्रशान्तासनाय नमः प्रशान्तमूर्तये नमः प्रशान्ताय नमः। द्वार-
दक्षिणपताकायां ओं हां शशिरासनाय नमः शशिरमूर्तये नमः
शशिराय नमः। द्वारोपरि मध्यस्थितध्वजे ओं हां कुमुदास-
नाय नमः कुमुदमूर्तये नमः कुमुदाय नमः। अग्निकोणध्वजे
ओं हां कुमुदाक्षासनाय नमः कुमुदाक्षमूर्तये नमः कुमुदाक्षाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

151 a नमः। पाद्याद्युपचारं दत्वा। दक्षिणद्वारमन्त्रेण सम्प्रोक्ष्य।
तोरणमध्ये ओं हां भूतितोरणासनाय नमः भूतितोरणमूर्तये
नमः भूतितोरणाय नमः। भूतितोरणाधिपतये विजयाय नमः।
तोरणशाखयोः यजुर्वेदाय नम इति सम्पूज्य। पाद्याद्युपचारं द-
त्वा। दक्षिणद्वारस्य पूर्वे प्रथमकलशे ओं हूं विद्याकलासनाय
नमः विद्याकलामूर्तये नमः विद्याकलायै नमः इति सम्पूज्य।
तत्पूर्वकुम्भे ओं हां बल्ल्यासनाय नमः वल्लीमूर्तये नमः वल्ल्यै
नमः इति सम्पूज्य। द्वारपश्चिमे प्रथमकलशे ओं हां सेनाप-
त्यासनाय नमः सेनापतिमूर्तये नमः सेनापतये नम इत्यभ्यर्च्य।
तत्पश्चिमकुम्भे ओं हां लक्ष्म्यासनाय नमः लक्ष्मीमूर्तये नमः
लक्ष्म्यै नमः इत्यभ्यर्च्य। द्वारपूर्वपताकायां ओं हां पर्जन्यास-
नाय नमः पर्जनिमूर्तये नमः पर्जन्यै नमः द्वारपश्चिमपताकायां
ओं हां जयन्तासनाय नमः जयन्तमूर्तये नमः जयन्ताय नमः।
द्वारोर्ध्वध्वजे ओं हां पुण्डरीकासनाय नमः पुण्डरीकमूर्तये
नमः पुण्डरीकाय नमः इति। नैऋतकोणध्वजे ओं हां वामना-
सनाय नमः वामनमूर्तये नमः वामनाय नमः इति सम्पूज्य।
पश्चिमद्वारमन्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां बलतोर-
णासनाय नमः बलतोरणमूर्तये नमः बलतोरणाय नमः। बल-
151 b तोरणाधिपतये वज्राय नमः। तोरणशाखयोः सामवेदाय नमः।
इति सम्पूज्य। पश्चिमद्वारस्य दक्षिणे प्रथमकलशे ओं हां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निवृत्तिकलासनाय नमः निवृत्तिकलामूर्तये नमः निवृत्तिकला-
यै नमः। पाद्यादि दत्वा। तद्दक्षिणकुम्भे ओं हां मयूरासनाय
नमः मयूरमूर्तये नमः मयूराय नमः इति सम्पूज्य। तद्दक्षिण-
कुम्भे ओं हां गजासनाय नमः गजमूर्तये नमः गजाय नम इति
सम्पूज्य। द्वारस्योत्तरे प्रथमकलशे ओं हां अस्त्रासनाय नमः
अस्त्रमूर्तये नमः अस्त्राय नमः इत्यभ्यर्च्य। वायुदक्षिणकुम्भे
ओं हां क्षेत्रपालासनाय नमः क्षेत्रपालमूर्तये नमः क्षेत्रपालाय
नमः इति सम्पूज्य। द्वारोत्तरपताकायां ओं हां अमृतासनाय
नमः अमृतमूर्तये नमः अमृताय नमः। द्वारदक्षिणपताकायां
ओं हां अशोकासनाय नमः अशोकमूर्तये नमः अशोकाय नमः।
द्वारोर्ध्वध्वजे ओं हां शङ्कुकर्णासनाय नमः शङ्कुकर्णमूर्तये नमः
शङ्कुकर्णाय नमः। वायुकोणध्वजे ओं हां सर्वनेत्रासनाय नमः।
सर्वनेत्रमूर्तये नमः सर्वनेत्राय नमः। इत्यभ्यर्च्य। उत्तरद्वारम-
स्त्रेण सम्प्रोक्ष्य। तोरणमध्ये ओं हां आरोग्यतोरणासनाय नमः
आरोग्यतोरणमूर्तये नमः आरोग्यतोरणाय नमः आरोग्यतो-
152a रणाधिपतये नीललोहिताय नमः। तोरणशाखयोः अथर्वण-
वेदाय नमः। इति सम्पूज्य। उत्तरद्वारस्य पश्चिमे प्रथम-
कलशे ओं ह्रीं प्रतिष्ठाकलासनाय नमः प्रतिष्ठाकलामूर्तये
नमः प्रतिष्ठाकलायै नमः इत्यभ्यर्च्य। तत्पश्चिमकुम्भे ओं
हां देवसेनापत्यासनाय नमः देवसेनापतिमूर्तये नमः देव-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सेनापतये नमः इति सम्पूज्य। द्वारपूर्वे प्रथमकलशे ओं हां
सुमित्रासनाय नमः सुमित्रमूर्तये नमः सुमित्राय नमः इति स-
म्पूज्य। द्वारपश्चिमपताकायां ओं हां धनदासनाय नमः धन-
दमूर्तये नमः धनदाय नमः। द्वारपूर्वपताकायां ओं हां श्रीप्र-
दासनाय नमः श्रीप्रदमूर्तये नमः श्रीप्रदाय नमः। द्वारोर्ध्वध्वजे
ओं हां सुमुखासनाय नमः सुमुखमूर्तये नमः सुमुखाय नमः।
ईशानकोणध्वजे ओं हां सुप्रतिष्ठासनाय नमः सुप्रतिष्ठमू-
र्तये नमः सुप्रतिष्ठाय नमः इति सम्पूज्य। सर्वपाद्यादि गन्ध-
पुष्प धूपदीप नैवेद्यं दत्त्वा। मध्याकाशोपरि ओं हां शान्त्य-
तीतकलासनाय नमः शान्त्यतीतकलामूर्तये नमः शान्त्यतीत-
कलायै नमः इत्यावाहनादिना सम्पूज्य। सर्वेभ्यो द्वारपालेभ्यो
152b नमः। ततः पश्चिमद्वारे नित्यवत् द्वारार्चनं कुर्यात्। तद्यथा।
पश्चिमद्वारमन्त्रेण सम्प्रोक्ष्य। द्वारदक्षिणभागे ओं हां सुदेहाय
नमः। उत्तरभागे ओं हां सुमुखाय नमः। दक्षिणशाखायां दी-
प्तायै नमः। उत्तरशाखायां सूक्ष्मायै नमः। तयोर्मध्ये ओं हां
महालक्ष्म्यै नमः। अधिष्ठाने आधारशक्त्यै नमः। उपाने आदि-
शक्त्यै नमः। जगत्यां क्रियाशक्त्यै नमः। पद्मे ज्योतिरशक्त्यै
नमः। कुमुदे गुणशक्त्यै नमः। पट्टिकायां ज्ञानशक्त्यै नमः।
भित्त्यां रौद्र्यै नमः। स्तम्भे भोगशक्त्यै नमः। पालिकायां अ-
नन्तशक्त्यै नमः। कम्पे वल्ल्यै नमः। कपोते पूतायै नमः। पूत-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मालिकायां रेवत्यै नमः। नासिकायां कृत्तिकायै नमः। शिख-
रे शकुन्यै नमः। स्थूण्यां कौमार्यै नमः। अग्रे स्कन्दशक्त्यै
नमः। इत्यभ्यर्च्य। अन्तर्द्वारार्चनं कुर्यात्। ओं हां शान्ति-
कलाद्वारायै नमः। द्वारोर्ध्वोदुम्बरे भृङ्गाय नमः। अधोदु-
म्बरे पतङ्गाय नमः। दक्षिणशाखायां उलकराय नमः। उत्तर-
शाखायां पदगाय नमः। द्वारोर्ध्वे गं गणपतये नमः। तस्य
वामभागे सं सरस्वत्यै नमः। द्वारस्य दक्षिणे जयाय नमः।
उत्तरे विजयाय नमः। दक्षिणकवाटे वीरबाहवे नमः। उत्तर-
कवाटे महावीराय नमः। इत्यभ्यर्च्य। सर्वेभ्यो द्वारपालेभ्यो
153 नमः पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। मूलेन दिव्य-
दृष्ट्या ऊर्ध्वगतान्विघ्नान् ओं भूर्भुवास्त्रेण नाराचमुद्रया
पुष्पक्षेपणान्तर्गतान्विघ्नान् व्यपोह्य। ओं भूर्भुवास्त्रेण पार्ष्णिघात-
त्रयेण भूगतान्विघ्नान् उत्सार्य। अन्यद्वारमस्त्रेण संघट्य। पश्चि-
मद्वाराधोदुम्बरमध्ये ओं हां पाशुपतास्त्रासनाय नमः पाशुपतमू-
र्तये नमः। ओं श्लीं पशुं हुं फट् पाशुपतास्त्राय हुं फण्णमः इत्य-
भ्यर्च्य। किञ्चिद्वामशाखां समाश्रयन्। दक्षपादपुरस्सरमन्तः
प्रविश्य। यागशालां प्रदक्षिणक्रमेण नैऋत्यां स्थित्वा। मण्टपं
तृणादिनाच्छादितं चेत् कम्पेषु वायुतत्वाय नमः। तृणेष्वप्त-
त्वाय नमः। बन्धेषु तेजस्तत्वाय नमः। वंशेषु पृथिवीतत्वाय
नमः। स्तम्बेषु (भे?) आकाशतत्वाय नमः। चुलिकायां स्कन्दाय नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वितानेषु चन्द्राय नमः। तरङ्गेषु जाह्नव्यै नमः। दर्भमालायां वा-
सुक्यै नमः। अङ्गणे उत्कशय नमः। दिशासु अस्त्राय नमः। इत्य-
भ्यर्च्य। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। उपवेदिपरितः
गजाष्टकं पूजयेत्। पूर्वादीशान्तदिक्षु ओं हां ऐरावताय नमः।
पुण्डरीकाय नमः। वामनाय नमः। कुमुदाय नमः। अञ्जनाय नमः।
पुष्पदन्ताय नमः। सार्वभौमाय नमः। सुप्रतीकाय नमः। इत्यभ्य-
र्च्य। पूर्वादीशानपर्यन्तं अष्टनागान् समर्चयेत्। अनन्ताय
153 b नमः। वासुक्यै नमः। तक्षकाय नमः। कार्कोटकाय नमः। पद्माय
नमः। महापद्माय नमः। शंखपालाय नमः। गुलिकाय नमः इत्यष्ट-
नागान् सम्पूज्य। पूर्वादीशानपर्यन्तं मङ्गलाष्टकं पूजयेत्। उर्वशी-
धृतदर्पणे सूर्याय नमः। मेनकाधृतपूर्णकुम्भे जलेश्वराय नमः।
रम्भाधृतमयूरे स्कन्दाय नमः। तिलोत्तमाधृतयुग्मचामरे मात-
रिश्वने नमः। सुमुखीधृतश्रीवत्से महालक्ष्म्यै नमः। सुन्दरी-
धृतस्वस्तिके सरस्वत्यै नमः। कार्मुखीधृतशंखे चन्द्राय नमः।
कामवर्धनीधृतदीपे ज्वलनाय नमः। इति सम्पूज्य। पाद्यादिग-
न्धपुष्पधूपदीपनैवेद्यं दत्त्वा। श्रीसुब्रह्मण्यपदन्यासिकं म-
ण्टपं विभाव्य। वेदिकादक्षिणतः कूर्मासने व्याघ्राजिनादौ रु-
चिरासने उदङ्मुख उपविश्य। प्राणायामत्रयं कृत्वा। कृतभूतशु-
द्ध्यन्तर्यजनहवहनध्यानं गुहहस्तं कुर्यात्। तद्यथा — स्वदक्षि-
णहस्ततले वामाङ्गुष्ठेन गन्धलेपिते मध्ये ओं हां स्कन्दासनाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः स्कन्दमूर्तये नमः। इत्यासनमूर्तिं विन्यस्य। अङ्गुष्ठादि-
कनिष्ठान्तेषु ओं सों ईशानाय जगद्भुवाय नमः। ओं सें तत्पुरु-
षाय वचद्भुवाय नमः। ओं सुं अघोराय विश्वभुवाय नमः।
ओं सिं वामदेवाय रुद्रभुवाय नमः। ओं सं सद्योजाताय ब्र-
ह्मभुवाय नमः। इति क्रमेण विन्यस्य। ओं सः आप्यभुवाय
भुवद्भुवाय नमः। पुनरनामिकायां विन्यस्य। विद्यादेहनेत्र-
154 a न्यासौ विधाय मूलेन स्कन्दमावाह्य। अङ्गानि कनिष्ठि-
कादिषु क्रमेण विन्यस्य। परमीकृत्य। तेजोरूपं ध्यात्वा।
स्वशिरस्यधिरोप्य। ब्रह्मरन्ध्रप्रविष्टेन तेजसा ब्राह्याभ्यन्तरं
तमःपटलमाधूय। प्रद्योतितदिगन्तरं सम्भाव्य। ततो लाज-
चन्दनसिद्धार्थभस्मपुष्पकुशाक्षतान् सप्तसंख्यान् शुद्ध-
लाजान्विकराण्यस्त्रेण हुंफडन्तेन सप्तधाभिमन्त्र्य। शुद्धिपात्रं
सङ्गृह्य। नानाप्रहाराकाराण्यस्त्रेणान्तरिक्षविघ्नप्रशमनार्थं
विकीर्य पञ्चगव्यस्य जलेन यागगृहं सम्प्रोक्ष्य। भूमिर्भू-
म्नेति मन्त्रेण स्थानशुद्धिं कुर्यात्। मन्त्रः — 'भूमिर्भूम्ना द्यौ-
र्वरुणान्तरिक्षं महित्वा। उपस्थे देव्यदिते अग्निमन्नाद्य-
मादधे' इति मन्त्रेण पञ्चगव्येन मण्टपं सम्प्रोक्ष्य। नि-
रीक्षणादि चतुस्संस्कारान् शल्यनिवृत्त्यर्थं विदध्यात्।
इति विशेषशुद्धिः। पश्चात् द्वारत्रयमस्त्रेण कवाटमुद्घाट्य।
प्रदक्षिणक्रमेण ईशानभागे स्थित्वा। स्कन्दकुम्भवर्धनीं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सम्पूजयेत्। कुम्भस्याधः आधारशक्तिकमलासनाय नमः।
अनन्तासनाय नमः सिंहासनाय नमः योगासनाय नमः पद्मा-
सनाय नमः। विमलासनाय नमः। ओं हां स्कन्दासनाय नमः।
स्कन्दमूर्तये नमः इति चलासनमभ्यर्च्य। ध्यानम् —

पद्मसर्वकटिसंयुतवामं
पद्मकान्तिनिभमेकमुखं त्वाम्।
154 b बालषट्कर··· मीश्वरसूनुं
बालमुन्नतभुजं प्रणतोऽस्मि॥

इति ध्यात्वा। मूलेनावाह्य। स्थापनादि कृत्वा। तद्वामे वर्धनीं
ओं हां वल्ल्यासनाय नमः वल्लीमूर्तये नमः। ध्यानम् —

वल्लीनां श्यामवर्णां तु सर्वाभरणभूषिताम्।
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम्॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। पाद्यादि-
गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। पश्चादिन्द्रादिलोकपालाना-
राध्य। पूर्वद्वारस्य दक्षिणे द्वितीयकलशे ओं हां इन्द्रासना-
य नमः इन्द्रमूर्तये नमः इन्द्राय नमः। पाद्याद्युपचारं दत्त्वा।

भो भो इन्द्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्तं यावत्स्थेयं गुहाज्ञया॥

इति सर्वत्र गुहाज्ञां श्रावयेत्। पूर्वद्वारस्य दक्षिणे चतुर्थ-
कलशे ओं हां अग्न्यासनाय नमः अग्निमूर्तये नमः अग्नये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। पाद्याद्युपचारं दत्वा। दक्षिणद्वारस्य पूर्वे तृतीयकलशे
ओं हां यमासनाय नमः यममूर्तये नमः यमाय नमः। पाद्याद्युप-
चारं दत्वा। नैरृतकुम्भे ओं हां नैरृत्यासनाय नैरृतमूर्तये नमः
नैरृताय नमः। पाद्याद्युपचारं दत्वा। पश्चिमद्वारस्योत्तरे द्वितीय-
कलशे ओं हां वरुणासनाय नमः वरुणमूर्तये नमः वरुणाय नमः
155 a पाद्याद्युपचारं दत्वा। पश्चिमद्वारस्योत्तरे चतुर्थकलशे ओं हां वा-
य्वासनाय नमः वायुमूर्तये नमः वायवे नमः। पाद्याद्युपचारं दत्वा।
उत्तरद्वारस्य पूर्वे द्वितीयकलशे ओं हां कुबेरासनाय नमः।
कुबेरमूर्तये नमः कुबेराय नमः। पाद्याद्युपचारं दत्वा। उत्तर-
द्वारस्य पूर्वे चतुर्थकलशे ओं हां ईशानासनाय नमः ईशान-
मूर्तये नमः ईशानाय नमः। पाद्याद्युपचारं दत्वा। तद्दक्षिण-
कुम्भे ओं हां ब्रह्मासनाय नमः ब्रह्ममूर्तये नमः ब्रह्मणे नमः।
पाद्याद्युपचारं दत्वा। नैरृतपूर्वकुम्भे ओं हां विष्ण्वासनाय न-
मः विष्णुमूर्तये नमः विष्णवे नमः। पाद्याद्युपचारं दत्वा। ततः
इन्द्रादिदिक्षु दशायुधानि च पूजयेत्। ओं हां वज्राय नमः।
शक्तये नमः दण्डाय नमः खड्गाय नमः पाशाय नमः अङ्कुशाय
नमः गदायै नमः त्रिशूलाय नमः। पद्माय नमः चक्राय नमः।
पाद्याद्युपचारं दत्वा। ततः अस्त्रवर्धनीं गुरुरादाय। स्कन्दकु-
म्भं शिष्येण वाहयित्वा। कुम्भाग्रगामिनीं वर्धनीं नालोद्धृतावि-
च्छिन्नधारां पदे पदे प्रपातयन् ओं नमश्शिवाज्ञायै हुं फण्णमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ईशानादीशानान्तं भ्रामयित्वा । प्रदक्षिणं स्रावयेत् ॥

लोकपाला भवद्भिस्तु यज्ञविघ्नप्रशान्तये ।
गुह्याज्ञयात्र स्थातव्यं तावद्यज्ञः समाप्यते ॥

इत्थं विज्ञाप्य । स्वस्थाने कुम्भं वर्धनीं च संस्थाप्य । स्थिरा-
155b सनं सम्पूजयेत् । यागेश्वरकुम्भस्याधः ओं हां आधारशक्ति-
कमलासनाय नमः अनन्तासनाय नमः सिंहासनाय नमः ।
योगासनाय नमः पद्मासनाय नमः विमलासनाय नमः । ओं
हां स्कन्दासनाय नमः स्कन्दमूर्तये नमः । दण्डभङ्गि मुण्डभङ्गी
न्यस्य । ध्यानम् —

वज्रं त्रिवर्तिसंयुक्तं मूर्धानं पुरुषाकृतिम् ।
स्कन्दस्य वामहस्ते तु स्थितं शत्रुविमर्दनम् ॥

इति ध्यात्वा । ओं हां विद्यादेहाय नमः । ओं सौं नेत्रेभ्यो नमः
इति विद्यादेहं नेत्रं विन्यस्य । पश्चात् पुष्पाञ्जलिं दत्त्वा । ओं
हुं हैं सौं वज्राय हुं फण्णमः इति मूलेन पुष्पाञ्जलिं कुम्भ-
मूर्ध्नि विन्यस्य । जगद्भुवाय नमः आवाहितो भव । वचद्भुवाय
नमः स्थापितो भव । विश्वभुवाय नमः सन्निधीभव । रुद्रभु-
वाय नमः सन्निरुद्धो भव । ब्रह्मभुवाय नमः त्रिरव~~कुण्ठितो
भव । वचद्भुवाय नमः स्था~~ण्ठ्य । भूर्भुवाय नमः धेनुमुद्रां
महामुद्रां दर्शयित्वा । स्वागतार्घ्यं दत्त्वा । हृदयादिकरान्त-
स्थानेषु हृदयाद्यङ्गानि विन्यस्य । पाद्यादिगन्धपुष्पधूप-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीपनैवेद्यं दत्त्वा । ततो वर्धन्यां ओं हां शक्त्यासनाय नमः श-
क्तिमूर्तये नमः । ध्यानम् —

शक्तिं च योषिदाकारां रक्तवर्णां महाबलाम् ।
त्रिशूलाकृतिसंयुक्तां शक्तिं शत्रुविमर्दनीम् ॥

इति ध्यात्वा । ओं ह्रीं शक्त्यै हुं फण्णमः । इति मूलेनावाह्य ।
स्थापनादि कृत्वा । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । व-
ज्राय नमः शक्तये नमः । सावधानेन यागान्तं यावत्स्थेयं गुहा-
156 a ज्ञया । इति विज्ञाप्य । मूलमन्त्रमष्टोत्तरशतं जप्त्वा । कुम्भे निवेद्य ॥

मया प्रवर्तितच्छायां यज्वना भवतः क्रतुः ।
रक्षणीयस्त्वयैवं हि समाप्तिर्यावदस्य हि ॥

इति यज्ञरक्षाध्वरमाविश्य । तत्पात्रं निश्चलं संस्थाप्य ।
पश्चादुत्तरद्वारस्य पश्चिमे तृतीयकलशे ओं हां विनायका-
सनाय नमः विनायकमूर्तये नमः विनायकाय नमः । पाद्याद्यु-
पचारं दत्त्वा ।

यत्सुरेशाध्वरोऽस्माभिः पश्वनुग्रहहेतवे ।
प्रवर्तितः प्रयात्वन्तमविघ्नं तव सन्निधौ ॥

इति विज्ञाप्य । उत्तरद्वारस्य पूर्वे तृतीयकलशे —

सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् ।
गुहं विष्णुं च धातारं गुरून् सप्त समाश्रये ॥

ओं हां सप्तगुरुभ्यो नमः । इत्यावाहनादि सर्वोपचारैस्सम्पूज्य ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवदेव जगन्नाथ जगदानन्दकारण ।

गुहाध्वरः प्रवृत्तोऽयमनुज्ञां कुरु ते नमः ॥

इति विज्ञाप्य ॥ इति मण्टपपूजाविधिस्समाप्तः ॥

156 b

## ❀ पञ्चमदिनकुम्भपूजा ❀

कुम्भपूजामारभेत् । वेदिकाया दक्षिणभागे उत्तराभिमुख-
मुपविश्य । अर्घ्यजलेन प्रोक्ष्य । निर्माल्यं विसृज्य । कुम्भ-
स्याधः ओं हां आधारशक्तये नमः मूलप्रकृत्यै नमः महाम-
ण्डूकाय नमः । अनन्ताय नमः सुधासिन्धवे नमः । रत्नद्वीपा-
य नमः मणिमण्टपाय नमः । नन्दनोद्यानाय नमः कल्पवृक्ष-
वाटिकायै नमः । चिन्तामणि गृहराजाय नमः । रत्नसिंहास-
नाय नमः तन्मध्ये सहस्रदलसंयुक्तं शुद्धविद्यामयं पद्मा-
सनाय नमः । गं गणपतये नमः । सं सरस्वत्यै नमः । धर्मक-
न्दाय नमः ज्ञाननालाय नमः । वैराग्यपत्राय नमः ऐश्वर्यकर्णि-
काय नमः । ओं हां स्कन्दासनाय नमः । ओं हां हं हां स्कन्द-
मूर्तये नमः । इतिं मूर्तिं दण्डाकारं रक्तवर्णं विभाव्य । पश्चा-
द्दण्डभङ्गिन्यासं कुर्यात् । ओं सों ईशानमूर्धाय नम इति
शिरसि । ओं सें तत्पुरुषवक्त्राय नमः इति वक्त्रे । ओं सुं अ-
घोरहृदयाय नमः इति हृदये । ओं सिं वामदेवगुह्याय नम
इति गुह्ये । ओं सं सद्योजातपादाय नम इति पादयोर्विन्यस्य ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततो मुण्डभाङ्गन्यासं कुर्यात् । ओं सों ईशानमूर्ध्ने नमः इतीशानमूर्ध्नि । ओं सें तत्पुरुषमूर्ध्ने नमः इति पूर्वमूर्ध्नि । ओं सुं अघोरमूर्ध्ने नमः इति दक्षिणमूर्ध्नि । ओं सिं वामदेवमूर्ध्ने नमः इत्युत्तरमूर्ध्नि । ओं सं सद्योजातमूर्ध्ने नमः इति
157 a पश्चिममूर्ध्नि । ओं सौं आप्यभुवमूर्ध्ने नमः इति नैऋतमूर्ध्नि न्यसेत् । कलाभाङ्गन्यासः — ओं हौं शान्त्यतीतकलायै नमः । इति शिरसि । ओं हैं शान्तिकलायै नमः वक्त्रे । ओं हूं विद्याकलायै नमः हृदये । ओं ह्रीं प्रतिष्ठाकलायै नमः गुह्ये । ओं ह्रां निवृत्तिकलायै नमः इति पादयोर्विन्यस्य । पश्चात्तत्वन्यासः — ओं हं आकाशतत्वाय नमः । ओं हं आकाशतत्वाधिपतये सदाशिवाय नमः इति शिरसि । ओं यं वायुतत्वाय नमः ओं यं वायुतत्वाधिपतये महेश्वराय नम इति वक्त्रे । ओं रं तेजस्तत्वाय नमः ओं रं तेजस्तत्वाधिपतये रुद्राय नम इति हृदये । ओं वं अमृततत्वाय नमः ओं वं अमृततत्वाधिपतये विष्णवे नमः । गुह्ये । ओं लं पृथिवीतत्वाय नमः ओं लं पृथिवीतत्वाधिपतये ब्रह्मणे नम इति पादयोर्विन्यस्य । मातृकान्यासः — ओं अं नमः शिरसि । आं नमो मुखमण्डले इं नमः दक्षनेत्रे । ईं नमः वामनेत्रे । उं नमः दक्षिणकर्णे । ऊं नमः वामकर्णे । ऋं नमः दक्षिणगण्डे । ॠं नमः वामगण्डे । ऌं नमः दक्षिणनासिकायाम् । ॡं नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामनासिकायाम् । एं नमः ऊर्ध्वौष्ठे । ऐं नमः अधरोष्ठे । ओं
नमः ऊर्ध्वदन्ते । औं नमः अधोदन्ते । अं नमः जिह्वायाम् ।
अः नमः तालुरन्ध्रे विन्यस्य । कं नमः दक्षिणबाहुशिखरे ।
खं नमः दक्षिणकोर्परे । गं नमः दक्षिणमणिबन्धे । घं नमः
157 b दक्षिणहस्ताङ्गुलिमूले । ङं नमः दक्षिणहस्ताङ्गुल्यग्रे विन्यसेत् ।
चं नमः वामबाहुशिखरे । छं नमः वामकोर्परे । जं नमः वाम-
मणिबन्धे । झं नमः वामहस्ताङ्गुलिमूले । ञं नमः वामह-
स्ताङ्गुल्यग्रे विन्यसेत् । टं नमः दक्षिणोरुमूले । ठं नमः दक्षि-
णजानुनि । डं नमः दक्षिणगुल्फे । ढं नमः दक्षिणपादाङ्गुलि-
मूले । णं नमः दक्षिणपादाङ्गुल्यग्रे न्यसेत् । तं नमः वामोरु-
मूले । थं नमः वामजानुनि । दं नमः वामगुल्फे । धं नमः वाम-
पादाङ्गुलिमूले । नं नमः वामपादाङ्गुल्यग्रे न्यसेत् । पं नमः
दक्षिणपार्श्वे । फं नमः वामपार्श्वे । बं नमः पृष्ठे । भं नमः नाभौ ।
मं नमः उदरे । यं नमः हृदये । रं नमः दक्षिणदोर्मूले । लं नमः
वामदोर्मूले । वं नमः पिठरे । शं नमः दक्षिणकक्षे । षं नमः वाम-
कक्षे । सं नमः दक्षिणबाहौ । हं नमः वामबाहौ । ळं नमः द-
क्षिणपादे । क्षं नमः वामपादे न्यसेत् । पश्चात् स्कन्दकला-
न्यासः — ओं जगद्भुवं जयायै नम इतीशानमूर्ध्नि । बहुतो-
बलायै नमः पूर्वमूर्ध्नि । हुतं उन्नतायै नमः दक्षिणमूर्ध्नि ।
वचद्भुवं वामायै नमः इत्युत्तरमूर्ध्नि । नमस्तेऽस्तु नान्दिन्यै नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्चिममूर्ध्नि । विश्वभुवे विजयायै नमः नैरृतमूर्ध्नि । जगद्भु-
वोऽधिपतिर्जयायै नम इतीशानवक्त्रे । सेनानि सेनायै न-
158 a मः पूर्ववक्त्रे । मयूरप्रियायै नमः दक्षिणवक्त्रे । षडाननमङ्गा-
निशान्त्यै नमः उत्तरवक्त्रे । सन्ध्याया नमस्तेऽस्तु सत्यै नमः
पश्चिमवक्त्रे । सुखं वह्निसूक्ष्मायै नमः नैरृतवक्त्रे । सुब्र-
ह्मण्यसुमत्यै नमः हृदये । बृहस्पतये सुखाय प्रज्ञायै नमः
गले । अस्य पञ्चयोनेः अमृतायै नमः दक्षिणबाहौ । यस्या-
त्माय यशस्विन्यै नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः
नाभौ । सुब्रह्मण्यसुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे रुचये
नमः पृष्ठे । ब्रह्मभुवे ब्रह्माण्यै नमः उरसि । भुवद्भुवे भूत्यै
नमः गुह्ये । मान्तृतायमान्यै नमः शिश्ने । जगद्भुवं जीवायै
नमः दक्षिणोरौ । सुब्रह्मण्यशुद्धायै नमः वामोरौ । कृत्तिका-
सुतकृपायै नमः दक्षिणजानुनि । षष्टिकासत्वरायै नमः
वामजानुनि । जगद्भुवं जगत्यै नमः दक्षिणजंघायाम् । व-
यद्भुवं वरदायै नमः वामजंघायाम् । स्कन्दविशाखिने कामदायै
नमः दक्षिणपादे । हव्यं यस्नाय धारिण्यै नमः वामपादे । षण्मु-
खश्यामायै नमः उरसि विन्यस्य । षडक्षरन्यासः — ओं सौं
शं नमः इति शिरसि । रं नमः दक्षिणनेत्रे । वं नमः वामनेत्रे ।
णं नमः दक्षिणनासिकायाम् । भं नमः वामनासिकायाम् ।
वं नमः इति शिरसि विन्यस्य । इति प्रथमम् ॥ शं नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दक्षिणबाहुशिखरे । रं नमः दक्षिणकोर्परे । वं नमः दक्षिण-
158 b मणिबन्धे । णं नमः दक्षिणहस्ताङ्गुलिमूले । भं नमः दक्षिण-
हस्ताङ्गुलिमध्ये । वं नमः दक्षिणहस्ताङ्गुल्यग्रे न्यसेत् । इति
द्वितीयम् ॥ शं नमः वामबाहुशिखरे । रं नमः वामकोर्परे । वं
नमः वाममणिबन्धे । णं नमः वामहस्ताङ्गुलिमूले । भं नमः
वामहस्ताङ्गुलिमध्ये । वं नमः वामहस्ताङ्गुल्यग्रे न्यसेत् ।
इति तृतीयम् ॥ शं नमः दक्षिणोरुमूले । रं नमः दक्षिणजानु-
नि । वं नमः दक्षिणस्फिचि । णं नमः दक्षिणपादाङ्गुलिमूले ।
भं नमः दक्षिणपादाङ्गुलिमध्ये । वं नमः दक्षिणपादाङ्गुल्यग्रे
न्यसेत् । इति तुरीयम् ॥ शं नमः वामोरुमूले । रं नमः वामजा-
नुनि । वं नमः वामस्फिचि । णं नमः वामपादाङ्गुलिमूले । भं
नमः वामपादाङ्गुलिमध्ये । वं नमः वामपादाङ्गुल्यग्रे । न्यसेत् ।
इति पञ्चमम् ॥ शं नमः हृदये । रं नमः दक्षिणपार्श्वे । वं नमः
वामपार्श्वे । णं नमः नाभौ । भं नमः पृष्ठे । वं नमः लिङ्गे विन्यस्य ।
इति षष्ठम् ॥ ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं ब्रह्मरन्ध्रान्तं नीत्वा । ओं सां सं विद्या-
देहाय नमः । इति पुष्पाञ्जलिगतं विभाव्य । कुम्भे विन्यस्य ।
षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः । इति नेत्रमुद्रां प्रदर्श्य ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

159a आवाहनम्। पश्चाद्रेचकया। पुष्पैरञ्जलिमापूर्य। हृत्प्रदेशे नि-
धाय। पूरकं विभाव्य। कुम्भकं भावनया मूलाधारादिनाभ्यन्त-
व्याप्तं प्राणबीजं हकारं नाभ्यादिहृदयान्तव्याप्तं घोषामेधा-
कलां औकारेण संयोज्य। हौकारं हृदयादिकण्ठान्तव्याप्तं र-
सकलां ऊकारेण संयोज्य। हौकारऊकारौ कण्ठादितालुरन्ध्रा-
न्तव्याप्तं विषकलां मकारेण संयोज्य। हौंकारस्योपरि भ्रूम-
ध्यगतबिन्दुकलया बिन्दुकलां तदुपरि ललाटगतार्धचन्द्र-
कलयार्धचन्द्रकलां तदुपरि गतनिरोधिकलया निरोधिकलां
तदूर्ध्वगतनादेन नादं च तदुपरि ब्रह्मरन्ध्रान्तव्याप्तां नादांतेन
संयोज्य। ब्रह्मरन्ध्रं तदुपरि शक्तिमेकाङ्गुलव्याप्तां तदुपरि
व्यापिनित्र्यङ्गुलव्याप्तां तदुपरि व्योमरूप अनन्त अनाथ-
अनाश्रितां तदुपरि उन्मनामपि चतुरङ्गुलव्याप्तां सञ्चिन्त्य।
प्रासादान्ते द्वादशान्तोपरि षडक्षरेण वाच्यवाचकभावादभि-
न्नं श्रीसुब्रह्मण्यं सञ्चिन्त्य। पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा।
सृष्टिमार्गेण भ्रूमध्यान्तमवरोप्य। स्फुरत्तारकाकारं स्कन्दं
रेचकभावनया हृदयस्थितपुष्पाञ्जलिगतं विभाव्य। अयं
कुमारो जरां जयत् दीर्घायुः यस्मै त्वं स्तनप्रछ्यायायुर्वर्चो
159b यशो बलं इति मन्त्रमुच्चार्य। मूलमन्त्रं दशवारं जप्त्वा। त-
न्मन्त्रेण पुष्पाञ्जलिं कुम्भमूर्ध्नि विन्यस्य। कुम्भे आवाहिन्या
ऊर्ध्वहस्तेन जगद्भवहृदयेनावाह्य। अधोमुखहस्तेन वचद्भव-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिरसेन स्थापिन्या संस्थाप्य । विश्वभुवशिखोर्ध्वाङ्गुष्ठमुष्टिभ्यां सन्निधान्या सन्निधीकृत्य । रुद्रभुवकवचेनाङ्गुष्ठगर्भमुष्टिरूपिण्या निष्ठुरया सन्निरुध्य । ब्रह्मभुवनेत्रेणावकुण्ठ्य । ओं भूर्भुवास्त्रेण धेनुमुद्रयामृतीकृत्य । स्वागतं ते सुब्रह्मण्येति विज्ञाप्य । वत्सं स्वागतमिति देवोक्तं विभाव्य ॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्सम्प्रीतिभावेन कुम्भेऽस्मिन् सन्निधीभव ॥

इति विज्ञाप्य । स्वागतार्घ्यं दत्वा । हृदयादिकरान्तस्थानेषु जगद्धृद्यादि विन्यस्य । ओं भूर्भुवास्त्रेण संरक्ष्य । रुद्रभुवकवचेनावकुण्ठ्य मूलेन धेनुमुद्रां महामुद्रां दत्वा । ओं सां सुब्रह्मण्याय नमः पादयोः पाद्यम् । ओं सां सुब्रह्मण्याय स्वधा इति षड्वक्त्रेष्वाचमनम् । ओं सां सुब्रह्मण्याय स्वाहा इति शिरष्षट्कार्घ्यं दत्वा । आपोहिष्ठेति स्नानार्थमर्घ्यजलेन प्रोक्ष्य । दुकूलचित्रवर्णं सन्धार्य । गन्धद्वारामिति गन्धं कुङ्कुमाक्षतं समर्प्य । अष्टपुष्पैरभ्यर्च्य । ओं सां ज्ञानशक्तिधराय
160 a नमः स्कन्दाय नमः देवसेनापतये नमः सुब्रह्मण्याय नमः गजारूढाय नमः शरकाननसम्भवाय नमः । कार्तिकेयाय नमः कुमाराय नमः । षण्मुखाय नमः तारकान्तकाय नमः । सेनान्ये नमः ब्रह्मचारिणे नमः वल्लीकल्याणसुन्दराय नमः बालाय नमः । क्रौञ्चभेदनाय नमः शिखिवाहनाय नमः इति षोडशनामभिः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभ्यर्च्य । शरवणभवाय नमः शयलुषुभवाय नमः परिपुर-
भवाय नमः पकलोलिभवाय नमः त्रिपुरभवाय नमः तिक्लो-
लिभवाय नमः शरवणोद्भवाय नमः षण्मुखाय नमः शिखि-
वाहनाय नमः अभयवरप्रदाय नमः शक्तिहस्ताय नमः कुक्कुट-
ध्वजाय नमः । कुङ्कुमाङ्गाय नमः कुमाराय नमः इत्यभ्यर्च्य ।
धूपदीपं दत्त्वा । नालिकेरकदलीफलगुलताम्बूलं निवेद्य ।
ततो दक्षिणवर्धन्यां ओं ह्रीं वल्ल्यासनाय नमः वल्लीमूर्तये
नमः इत्यासनमूर्तिं विन्यस्य । ध्यानम् —

श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
सव्ये लम्बकरां किरीटमकुटां तुङ्गस्तनीकञ्चुकाम् ।
अन्योन्यीक्षणसंयुतां शरवणोद्भूतस्य सव्ये स्थितां
मुक्तामाल्यधरां प्रसन्नवदनां वल्लीश्वरीं भावये ॥

इति ध्यात्वा । ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य । स्थापनादि
कृत्वा । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । उत्तरवर्धनीं
ओं श्रीं देवगजासनाय नमः देवगजमूर्तये नमः । ध्यानम् —

1606 पीतामुत्पलधारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां
पीतालङ्करणां करण्डमकुटां सेनानिवामे स्थिताम् ।
वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधरां
देवैरर्चितपादुकां शशियुतां देवीं त्रिभङ्गीं भजे ॥

इति ध्यात्वा ओं श्रीं देवगजायै नमः इति मूलेनावाह्य स्थाप-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नादि कृत्वा । पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । पश्चाद्गोगाङ्ग

पूजयेत् । तद्यथा – कुम्भमूर्तिषु तस्य शिरष्षट्कादीशानमादाय ।

स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम् ।
सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ॥

इति ध्यात्वा । ओं सों ईशानाय जगद्भवमूर्ध्ने नमः इतीशान-
दले सम्पूज्य । वक्त्रषट्काद्वक्त्रमादाय —

पीताम्बरोपवीतं च नरं कनकसन्निभम् ।
मातुलुङ्गाक्षसूत्रं च दधानं चन्द्रमौलिनम् ॥

इति ध्यात्वा । ओं सें तत्पुरुषाय वचद्भववक्त्राय नमः इति पूर्व-
दले सम्पूज्य । हृत्प्रदेशादघोरमादाय —

खट्वाङ्गं खेटं च कपालपाशं वामे दधानं परशुं त्रिशूलम् ।
खड्गं च दण्डं विकृतं च भीमं ध्यायेदघोरं भुजगादिभूषम् ॥

इति ध्यात्वा । ओं सुं अघोराय विश्वभुवहृदयाय नमः इति
दक्षिणदले सम्पूज्य । वामदेवं गुह्यमण्डलादादाय —

वामं रक्तं सुरक्ताभं माल्यवस्त्रोपवीतिनम् ।
तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥

इति ध्यात्वा । ओं सिं वामदेवाय रुद्रभुवगुह्याय नमः इति
161 a उत्तरदले सम्पूज्य । पादाद्यङ्गात्सद्योजातमादाय —

सुतस्रुग्गन्धवस्त्राढ्यं बालाकारं त्रिलोचनम् ।
सद्योजातं शशिभृतं वरदाभयपाणिनम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा। ओं सं सद्योजाताय ब्रह्मभुवमूर्तये नम इति प-
श्चिमदले सम्पूज्य। सर्वाङ्गमाप्यभुवमादाय —

आप्यं च श्वेतवर्णाढ्यं सर्वलोकोपकारकम्।
स्थित्वा रुद्रस्य मकुटं गङ्गायां प्रणमाम्यहम्॥

इति ध्यात्वा। ओं सौं आप्यभुवाय भुवद्भवसर्वाङ्गाय नमः
इति नैऋतदले सम्पूज्य। सर्वज्ञातबीजेभ्यो नेत्रमादाय —

चन्द्रार्कवह्निरूपाणि अभयं वरदान्वितम्।
पद्मस्थानीन्दुधारीणि नेत्राणि च विभावये॥

इति ध्यात्वा। ओं सौं ब्रह्मभुवनेत्रेभ्यो नमः इतीशानस्योत्तर-
भागे सम्पूज्य। सद्भावात्मकं हृदयं हृदयादादाय —

हृदयं चन्द्रसङ्काशं वराभयकरान्वितम्।
पद्मासनं सोमधरं गुहस्याभिमुखं भजे॥

ओं सां जगद्भवहृदयाय नमः इत्याग्नेयदलेऽभ्यर्च्य। सर्वे-
गुहतत्वलक्षणम् — शिरश्शिरोदेशादादाय —

शिरश्चामीकरप्रख्यमभयं वरदं दधत्।
पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे॥

इति ध्यात्वा। ओं सिं वचद्भवशिरसे नमः इतीशानदले नेत्र-
स्योत्तरे सम्पूज्य। शिखां शिखाया आदाय —

161b शिखां सिन्धूरवर्णाढ्यां अभयं बिभ्रतीश्वरम्।
पद्मासनामिन्दुधरां गुहस्याभिमुखं भजे॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा । ओं सूं विश्वभुवशिखायै नमः इति नैरृतदले सम्पूज्य । परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादाय —

कवचं भृङ्गसङ्काशं वरदाभयपाणिनम् ।
पद्मस्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा । ओं सैं रुद्रभुवकवचाय नमः इति वायव्यदले सम्पूज्य । प्रतापरूपमस्त्रमस्त्रेभ्य आहृत्य ॥

दंष्ट्रापिङ्गलवर्णाढ्यं ज्वलत्केशं भयानकम् ।
शक्तिशूलं दधद्भीमं अस्त्रं शत्रुविमर्दनम् ॥

इति ध्यात्वा । ओं सः भूर्भुवअस्त्राय नमः इति पूर्वादिचतुर्दलेषु सम्पूज्य । इति प्रथमावरणम् ॥ अथ द्वितीयावरणमारभ्य, पूर्वाद्यष्टघटेषु पूर्वकुम्भे ओं हां जयन्तासनाय नमः । जयन्तमूर्तये नमः ॥ जयन्तारव्यमेकवक्त्रं अञ्जलीकृतसंयुतम् ।

वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां जयन्ताय नमः आवाहनादि धूपदीपनैवेद्यं दत्वा । आग्नेयकुम्भे ओं हां अग्निशिखासनाय नमः अग्निशिखमूर्तये नमः ॥ तेजोरूपमग्निशिखं सर्वाभरणभूषितम् ।

वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां अग्निशिखाय नमः । आवाहनादि धूपदीपनैवेद्यं दत्वा ।

162 a याम्ये ओं हां कृत्तिकापुत्रासनाय नमः । कृत्तिकापुत्रमूर्तये नमः ॥

रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृताञ्जलिपुटं श्यामं गुहस्याभिमुखं भजे ॥

ओं हां कृत्तिकापुत्राय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।
नैऋतकुम्भे ओं हां भूतपत्यासनाय नमः भूतपतिमूर्तये नमः॥

भूतं सिन्धूरवर्णाढ्यं गुहस्याभिमुखस्य तु।
वज्रशक्तिधरं देवं कृताञ्जलिपुटान्वितम् ॥

ओं हां भूतपतये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।
पश्चिमकुम्भे ओं हां सेनापत्यासनाय नमः सेनापतिमूर्तये
नमः॥ देवसेनां चतुर्बाहुं श्वेतवर्णं कृताञ्जलिम्।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां सेनान्ये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।
वायुकुम्भे ओं हां गुहासनाय नमः गुहमूर्तये नमः॥

तेजोरूपं गुहस्यालं मन्दहास्यं कृताञ्जलिम्।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां गुहाय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। उत्तर-
कुम्भे ओं हां हेमशूलासनाय नमः हेमशूलमूर्तये नमः॥

हेमशूलं कृष्णवर्णं चतुर्हस्तं कृताञ्जलिम्।
खड्गखेटकसंयुक्तं गुहस्याभिमुखं भजे ॥

ओं हां हेमशूलाय नमः आवाहनादि धूपदीपनैवेद्यं दत्वा।
1626 ईशानकुम्भे ओं हां विशालाक्षासनाय नमः। विशालाक्ष-
मूर्तये नमः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रसन्नं विशालाक्षं अञ्जलीकृतसंयुतम् ।
पीताम्बरधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां विशालाक्षाय नमः । आवाहनादि धूपदीपनैवेद्यं दत्त्वा । पश्चात्तृतीयावरणं पूजयेत् ॥ तद्बहिरावृतेषु द्वारस्य दक्षिणे ओं जयाय नमः । उत्तरे विजयाय नमः । पूर्वे मयूराय नमः । आग्नेय्यां सुदेहाय नमः । याम्ये सुमुखाय नमः । नैरृते देवसेनापतये नमः । पश्चिमे गजेन्द्राय नमः । वायौ सुरेशाय नमः । उत्तरे सुमित्राय नमः । ईशे क्षेत्रपालाय नमः । इति तृतीयावरणम् ॥ ततः बहिरावृत पूर्वाद्यष्टदिक्षु इन्द्राय नमः अग्नये नमः यमाय नमः नैरृतये नमः वरुणाय नमः वायवे नमः सोमाय नमः ईशानाय नमः । तद्दक्षिणे ब्रह्मणे नमः । नैरृते विष्णवे नमः । तद्बहिरावृते पूर्वाद्यष्टदिक्षु वज्राय नमः शक्तये नमः दण्डाय नमः खड्गाय नमः पाशाय नमः अङ्कुशाय नमः गदायै नमः त्रिशूलाय नमः पद्माय नमः चक्राय नमः । इति सम्पूज्य । पाद्यादि गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा । अनन्तरं गुहाय मूलेन पुष्पाञ्जलिं दत्त्वा । महामुद्रां दर्शयित्वा । जयन्तादीन्विना सर्वेषां गुहेन सार्धमत्यन्तमैक्यं विभावयेत् ॥

पश्चात्प्राणप्रतिष्ठां कुर्यात् ॥ अस्य श्री प्राणप्रतिष्ठामहामन्त्रस्य
163 a रुद्रब्रह्माच्युता ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांसि । अखिलचैतन्यरूपिणी प्राणशक्तिः परा देवता । आं बीजं ह्रीं शक्तिः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रों कीलकम्। श्रीमत्सुब्रह्मण्येश्वरस्य सशक्तिसपरिवारस्य प्रा-
णकला प्रसादसिद्ध्यर्थे जपे विनियोगः। ह्रामित्यादि कराङ्गन्यासः॥
ध्यानम् - रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्च बाणान्।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥
इति ध्यात्वा। पञ्चोपचारं कृत्वा। कुम्भमूर्ध्नि स्पृष्ट्वा। ओं आं
ह्रीं क्रों यरलवशषसहों हंसस्सोऽहमोम्। श्रीसुब्रह्मण्येश्व-
रस्य प्राणाः इह प्राणास्थिताः। आं ह्रीं क्रों यरलवशषसहों
हंसस्सोहमोम्। श्रीसुब्रह्मण्येश्वरस्य जीव इह स्थितः। आं ह्रीं
क्रों यरलवशषसहों हंसस्सोऽहमोम्। श्रीसुब्रह्मण्येश्वरस्य
जीवतत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्त पृथिव्यप्तेजोवा-
य्वाकाश शब्द स्पर्श रूपरसगन्ध श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण वा-
क्पादपाणिपायूपस्थजीवप्राण इहागत्य अस्मिन् कुम्भे श्रीसुब्र-
ह्मण्यस्य सशक्ति सपरिवारं सुखं चिरं तिष्ठन्तु स्वाहा। क्रों ह्रीं
1636 आं हंसस्सोहं स्वाहा। इति मूलेन द्वादशवारं जप्त्वा। पुनः
षडङ्गध्यानम्। असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह
नो धेहि भोगं। ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया
नः स्वस्ति। पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्त-
रिक्षम्। पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां या

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वस्ति। ओं सौं सुब्रह्मण्याय नमः प्राणान् प्रतिष्ठापयामि।
इति प्राणप्रतिष्ठां कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्त्वा।
मूलमन्त्रं यथाशक्ति जप्त्वा।

164a

## * पञ्चमदिनहोमः *

आचार्यः मूर्तिपैस्सह तत्कुण्डसमीपे पूर्ववत् स्थित्वा। अग्निं प्रज्वाल्य। परिसमूहनं कृत्वा। परिस्तरणाद्याज्यसंस्कारान्तं कृत्वा। जुषस्वेनेति जपित्वा। अदितेनुमन्यस्व। इत्यादि परिषिच्य। कुण्डमध्ये ओं हूं अग्नये नमः। ऊर्ध्वमेखलायां पूर्वाद्यष्टदिक्षु जातवेदसे नमः सहोजसे नमः अजिराप्रभवे नमः वैश्वानराय नमः नर्यापसे नमः। पङ्क्तिराजसे नमः। विसर्पिणे नमः। यज्ञपुरुषाय नमः। मध्यमेखलायां पूर्वाद्यष्टदिक्षु जयन्ताय नमः अग्निशिखाय नमः कृत्तिकापुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय नमः हेमशूलाय नमः विशालाक्षाय नमः। अधोमेखलायां पूर्वाद्यष्टदिक्षु इन्द्राय नमः अग्नये नमः यमाय नमः निरृतये नमः वरुणाय नमः वायवे नमः कुबेराय नमः ईशानाय नमः। इति सम्पूज्य। हे लोकपालाः! विघ्नसंघातं निवार्य अग्निं पालयिष्यथेति गुहाज्ञां श्रावयेत्। इति विज्ञाप्य। कुण्डमध्ये ओं हां अग्न्यासनाय नमः अग्निमूर्तये नमः। ध्यानम् —

अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।

वरदमनलखेटं स्रङ्कुशं स्रुक् च वामे
दधतमृषभसंस्थं भावयेयं गुहाग्निम् ॥

1646 इति ध्यात्वा। ओं हूं गुहाग्नये नमः इति मूलेनावाह्य। पाद्यादि-
गन्धपुष्पधूपदीपनैवेद्यं दत्त्वा। व्याहृतिभिर्हुत्वा। ततः कुण्डा-
ग्निमध्ये ओं हां आधारशक्तिकमलासनाय नमः इत्यादि ओं हां
गुहासनाय नमः गुहमूर्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम्।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा। ओं सौं सुब्रह्मण्याय शरवणभवाय नमः इति
मूलेन कुण्डाग्निमध्ये सुब्रह्मण्यमावाहयामि इत्यावाह्य। उप-
चारैस्सम्पूज्य। ओं ह्रीं वल्ल्यै नमः। ओं श्रीं देवगजायै नमः। इति
शक्तिद्वयं सम्पूज्य। तदावृतदेवानां जयन्ताय नमः अग्निशिखाय
नमः कृत्तिकापुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय
नमः हेमचूलाय नमः विशालाक्षाय नमः इत्यभ्यर्च्य। पश्चाद्व्या-
ज्याहुतिं हुत्वा। ओं सुं सुब्रह्मण्याय स्वाहा। ओं ह्रीं वल्ल्यै स्वाहा।
ओं श्रीं देवगजायै स्वाहा। जयन्ताय स्वाहा इत्यादि विशालाक्षाय
स्वाहा। पश्चात्पूर्णां विधाय। नवकुण्डपक्षे — पूर्वकुण्डे ओं हां
सुब्रह्मण्यासनाय नमः सुब्रह्मण्यमूर्तये नमः। ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागान्वितं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणोशोद्यमम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्वा । ओं सौं सुब्रह्मण्याय नमः इति
165 a मूलेनास्मिन् कुण्डाग्निमध्ये श्री सुब्रह्मण्यमावाहयामि । स्थाप-
नादि कृत्वा । पाद्याद्युपचारैस्सम्पूज्य । आग्नेयकुण्डे ओं सां कु-
मारासनाय नमः कुमारमूर्तये नमः । ध्यानम् —

सव्यद्वये निशितशक्ति समादधानं
वामद्वये भरतकुक्कुटखेटकं च ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदाननिरतं कलये कुमारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां कुमाराय नमः इति मू-
लेनास्मिन् कुण्डाग्निमध्ये श्रीकुमारमावाहयामि । स्थापनादि कृ-
त्वा पाद्याद्युपचारं दत्वा । दक्षिणकुण्डे ओं सां षण्मुखासनाय
नमः षण्मुखमूर्तये नमः । ध्यानम् —

वन्दे सिन्धूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्रं देवसेनामदनरिपुसुतावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां षण्मुखाय नमः इति मूले-
नास्मिन् कुण्डाग्निमध्ये श्रीषण्मुखमावाहयामि । स्थापनादि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृत्वा। पाद्याद्युपचारं दत्त्वा। नैऋतकुण्डे ओं सां ब्रह्मचार्यासनाय नमः ब्रह्मचारिमूर्तये नमः। ध्यानम् —

कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्त्रम्।
कात्यायनीसुतमहं कटिबद्धवामे
165 b कौपीनदण्डधर दक्षिणहस्तमीडे ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां ब्रह्मचारिणे नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये श्रीब्रह्मचारिणमावाहयामि। स्थापनादि कृत्वा। पाद्याद्युपचारं दत्त्वा। पश्चिमकुण्डे ओं सां सेनापत्यासनाय नमः सेनापतिमूर्तये नमः। ध्यानम् —

नौम्यादित्यप्रदीप्तं द्वादशनयनं षण्मुखं मन्दहासं
वामाङ्के सुस्थितायां सरसिरुहयुतालिङ्गितायां सुहस्तम्।
उत्तुङ्गोरुस्तनाग्रे विहितकरतलाभीतिखेटादिशूलं
ह्लादिन्यादीप्रशक्तीष्वसनवनगदा कुक्कुटाब्जेनहस्तम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां देवसेनापतये नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं देवसेनापतिमावाहयामि। स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा। वायुकुण्डे ओं सां गजारूढासनाय नमः गजारूढमूर्तये नमः। ध्यानम् —

एकाननं द्विनयनं वरकुक्कुटौ च
वामद्वये निहितशक्त्यभये द्वयेऽन्ये।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बिभ्राणमीश्वरसुतं तपनायुताभं

नित्यं नमामि गजवाहनमिष्टसिद्धै ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं हां गजारूढाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं गजारूढमावाहयामि । स्थापनादि कृत्वा । पाद्याद्युपचारं दत्वा । उत्तरकुण्डे ओं सां बालासनाय नमः बालमूर्तये नमः । ध्यानम् —

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम् ।

166 a विप्रप्रियकरं वन्दे बालरूपं रविप्रभम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्वा । ओं सां बालाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये श्रीबालरूपमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा ॥ ईशानकुण्डे ओं हां शिखिवाहनासनाय नमः शिखिवाहनमूर्तये नमः । ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।

देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं दत्वा । ओं हां शिखिवाहनाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शिखिवाहनमावाहयामि । स्थापनादि कृत्वा पाद्याद्युपचारं दत्वा ॥ इति नवकुण्डविधिः ॥

— पञ्चकुण्डविधिः —

पञ्चाग्नेरायतनं चेत् पञ्चकुण्डाधिदैवतम् । प्रधानकुण्डे मूलबेराकृतिं ध्यात्वा । होमयेत् । दिक्कुण्डचतुष्के पूर्वकुण्डे ओं सां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सेनान्यासनाय नमः सेनानीमूर्तये नमः। ध्यानम् —

अभयसितकराङ्कः अङ्कुशं शक्तिशूलं
वरदकुलिशपाशं पद्महस्तौ गदां च।
दधत धनुसुबाणं द्वादशायां तु हस्ते
द्विदशकमलनेत्रं देवसेनानिमीडे ॥

इतिइ ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां सेनान्ये नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं सेनानीमावाहयामि। स्थापनादि कृत्वा।
1668 पाद्याद्युपचारं दत्त्वा। दक्षिणे ओं सां कार्तिकेयासनाय नमः कार्तिकेयमूर्तये नमः। ध्यानम् —

वरदकुलिशखेटं वामहस्तत्रये च
दधतमभयशक्तिं खड्गमन्यत्रये च।
तरुणरविसमाभं साधुभिः पूज्यमानं
कमलवदनमेकं कार्तिकेयं नमामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्त्वा। ओं सां कार्तिकेयाय नमः इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं कार्तिकेयमावाहयामि। स्थापनादि कृत्वा पाद्याद्युपचारं दत्त्वा। पश्चिमकुण्डे ओं सां स्कन्दासनाय नमः स्कन्दमूर्तये नमः। ध्यानम् —

वामे करे च युगले वरकुण्डिकायां
सव्येऽक्षसूत्रमभयं दधतं विशारदम्।
वल्लीयुतं वनजलोचनमेकवक्त्रं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वन्दामहे वनजसम्भवशासितारम् ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां स्कन्दाय नमः इति मूलेना-
स्मिन् कुण्डाग्निमध्ये ओं स्कन्दमावाहयामि । स्थापनादि कृत्वा ।
पाद्याद्युपचारं दत्वा । उत्तरकुण्डे ओं सां शरवणोद्भवासनाय
नमः शरवणोद्भवमूर्तये नमः । ध्यानम् —

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटं प्रासदण्डौ
टङ्कं बाणं वरदमभयं कार्मुकं चोर्ध्वहस्ते ।
पीतं सौम्यं द्विदशनयनं केकयं साकमीन्द्रै-
स्सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

इति ध्यात्वा पुष्पाञ्जलिं दत्वा । ओं सां शरवणोद्भवाय नमः
इति मूलेनास्मिन् कुण्डाग्निमध्ये ओं शरवणोद्भवमावाहयामि ।
167 a स्थापनादि कृत्वा । पाद्याद्युपचारं दत्वा ॥

पञ्चकुण्डविधिः प्रोक्त एककुण्डविधिं शृणु ।
एकाग्निरायतनं चेज्जीर्णबेराकृतिं यजेत् ॥

यथोचितकुण्डस्य यथोचितदेवं आधारशक्त्यादि आसनमूर्ति-
ध्यानपुरस्सरं सम्पूज्य । तत्तन्मन्त्रेणाष्टोत्तरशतमाज्याहुतिं हुत्वा ।
प्रधानकुण्डादि सर्वत्र कुण्डेषु तत्तन्मन्त्रेण समिदन्नाज्याहुति-
द्रव्यं प्रति सहस्रं वा तदर्धं वाष्टोत्तरशतं वा हुत्वा द्रव्यं प्रति-
व्याहृतिभिर्हुत्वा । विशेषद्रव्यैश्च प्रत्येकं पञ्चविंशतिवारं हुत्वा ।
तद्यथा — समिधं सद्योजाताय स्वाहा । आज्यं वामदेवाय स्वाहा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चरुं अघोराय स्वाहा। लाजं तत्पुरुषाय स्वाहा। सर्षपं ईशानाय स्वाहा। यवं जगद्भवहृदयाय स्वाहा। तिलं वचद्भवशिरसे स्वाहा। मुद्गं विश्वभुवशिखाय स्वाहा। माषं रुद्रभुवकवचाय स्वाहा। सक्तुं ब्रह्मभुवनेत्राय स्वाहा। कदलीफलं भूर्भुव अस्त्राय स्वाहा। अपूपं ओं सौं सुब्रह्मण्याय स्वाहा। निष्पावं वल्ल्यै स्वाहा। चणकं गुहास्याय स्वाहा। वैणवं जयन्ताय स्वाहा। कुलस्थं अग्निशिखाय स्वाहा। आढकं कृत्तिकापुत्राय स्वाहा। गोधूमं भूतपतये स्वाहा। प्रियङ्गुं सेनान्ये स्वाहा। नालिकेरं गुहाय स्वाहा। क्षीरं हेमकुण्डलाय
167 b स्वाहा। ताम्बूलं विशालाक्षाय स्वाहा। एलादिवासनाद्रव्यं ओं शरवणोद्भवाय स्वाहा॥

शतमर्धं तदर्धं वा तदर्धार्धमथापि वा।

द्रव्यान्ते व्याहृतिं हुत्वा सर्वकुण्डानि होमयेत्॥

ओं शरवणभवाय षण्मुखाय शिखिवाहनाय अभयवरप्रदाय शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमाङ्गाय कुमाराय ओं हां ह्रीं सौं शरवणभव हुं फट् स्वाहा। इति मालामन्त्रेण पञ्चविंशतिवारं हुत्वा। ओं श्रीं क्लीं ह्रीं ऐं सौं नं ळं ईं शरवणभव स्वाहा। ओं ह्रीं वल्ल्यै स्वाहा। ओं श्रीं देवगजायै स्वाहा इति मूलेन अष्टोत्तरशतं हुत्वा। शकुन्यै स्वाहा। रेवत्यै स्वाहा। पूतायै स्वाहा महापूतायै स्वाहा। निशीथिन्यै स्वाहा। मालिन्यै स्वाहा। शीतलायै स्वाहा। भूत्यै स्वाहा। विश्वतोमुख्यै स्वाहा। इत्येकैकवारं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हुत्वा । जयन्ताय स्वाहा इत्यादि विशालाक्षाय स्वाहा । ओं भूः
स्वाहा अग्नये इदं न मम । ओं भुवः स्वाहा वायवे इदं न मम ।
ओं सुवः स्वाहा सूर्यायेदं न मम । ओं भूर्भुवः स्वः स्वाहा प्रजा-
पतये इदं न मम । इति सर्वत्र कुण्डे होमयेत् । हव्यवाहमभि-
मातिषाहं रक्षोहणं प्रतिना सुजुष्णं ज्योतिष्मन्तं दीद्यतं पु-
रन्धिं अग्निं स्विष्टकृतमाहुवेमां स्विष्टमग्ने अभि तत्पृणाहि
विश्वा देवा पृतना अभिष्या उरुं नः पन्था प्रदिशं विभाहि ।
168 a ज्योतिष्मद्धेह्यजरं न आयुः स्वाहा । अग्नये स्विष्टकृत इदं न
मम । इति सर्वत्र हुत्वा । ततः सर्वत्र पूर्णां जुहुयात् । तद्यथा ।
स्रुगग्रं आज्येनापूर्य पुष्करोपर्यधोमुखं स्रुवं न्यस्य । तदग्रे
पुष्पं दत्वा । वामदक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां उरस-
न्येन संलग्नौ तावुभावुपादाय । समपादस्समुत्थायोर्ध्वकायो
नाभ्यां तिर्यग्विधाय स्रुगग्रदत्तदृष्टिः ओं सौं सुब्रह्मण्याय
वौषडिति मूलं प्लुतमुच्चार्य । वामस्तनान्तं स्रुङ्मूलमानीय
अनुद्विग्नः घृतधारां बिन्दुस्थानाद्विनिस्सृतामृतधारामिति
संस्मरन् यवप्रमाणेनाविच्छिन्नधारया समस्तमाज्यं वह्नौ
क्षिपेत् । इति सर्वत्र पूर्णां विधाय । ततस्सर्वत्र कुण्डेषु आ-
ज्याहुतीर्जुहोति । तद्यथा — तत्तन्मूलमन्त्रेण सहस्रं वा तदर्धं
वाष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा । अनाज्ञातं यदाज्ञातं य-
ज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T. No. 412



पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय।
त्वं वेत्थ यथातथं स्वाहा। अग्नये इदं न मम। यत्पाकत्रा मनसा
दीनदक्षाणा य · · · मन्वते मर्ता सह। अग्निष्टद्धोता क्रतु-
168 b विद्विजानन्। नेजिष्ठो देव क्रतुशो यजामि स्वाहा। अग्नये इदं
न मम। पश्चाद्व्याहृतिभिर्हुत्वा। ततः पूर्णां विधाय। एवं क्रमेण
सर्वत्र कुण्डं होमयेत् दिक्कुण्डहोमं विना प्रधानकुण्डस्य
व्याहृतिभिर्हुत्वा। ततो नाडीसन्धानार्थं मूलमन्त्रेणाहुतित्रयं
दत्वा। नाडीसन्धानं कुर्यात्। यथा – ओं सौं सुब्रह्मण्याय
स्वाहा। ओं हूं गुहाग्निभ्यां स्वाहा। इति सन्धाय। निस्सृत्य।
मूलमन्त्रमुच्चार्य। वह्निस्थगुहनासाविनिर्गतज्योतीरूपशिखां
यागस्थगुहशिखालीनां रश्मिमात्रावियोगेनाविच्छिन्नामुभयत्र
सकृदास्पदं ध्यायेत्। एवं कुम्भं यागाग्निगुहैरात्मानं सह नाडी-
सन्धानं कुर्यात्। यथा – कुशाच्छलेन बिसतन्तुनिभां कुम्भ-
स्य गुहनाडीं पिङ्गलया विनिस्सृत्य। स्वनाड्यामिडया प्रवि-
श्य। विलीनेति विभाव्य। गुहाणुना रेचकेण विनिस्सृत्य।
वह्निस्थगुहनाडीं पिङ्गलया प्रविश्य। विलीनं विभाव्य। मूलेन
रेचकेण इडया विनिस्सृत्य। स्वनाड्या पिङ्गलया प्रविश्य।
विलीनेति विभाव्य। गुहाणुना रेचकेण विनिस्सृत्य। कुम्भस्थ-
गुहहृदयं तत्पूरकेण प्रविश्य। लयमिति विभाव्य। मूलेन
रेचकेण विनिस्सृत्य। स्वहृदयं पूरकेण प्रविशेत्। एवं कुम्भं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्निगुहाख्यामात्मानं सह नाडीं सन्धाय। पश्चान्मन्त्रतर्पण-
169 a दीपनार्थं जुहुयात्। तद्यथा — ओं सौं सुब्रह्मण्याय स्वाहा। इत्य-
ष्टोत्तरशतं वा पञ्चविंशतिं वा हुत्वा। इति मन्त्रः। ओं सां ईशानाय
जगद्भुवाय स्वाहा। ओं सें तत्पुरुषाय वचद्भुवाय स्वाहा। ओं सुं
अघोराय विश्वभुवाय स्वाहा। ओं सिं वामदेवाय रुद्रभुवाय स्वाहा।
ओं सं सद्योजाताय ब्रह्मभुवाय स्वाहा। ओं सौं आप्यभुवाय भुव-
द्भुवाय स्वाहा। इति मन्त्रं प्रतिदशवारं हुत्वा। इति तर्पणम्। ओं
सां जगद्भुवहृदयाय स्वाहा। ओं सिं वचद्भुवशिरसे स्वाहा। ओं सुं
विश्वभुवशिखायै स्वाहा। ओं सैं रुद्रभुवकवचाय स्वाहा। ओं सौं
ब्रह्मभुवनेत्राय स्वाहा। ओं सः भूर्भुव अस्त्राय स्वाहा। इति दीपनम्।
एवं मन्त्रतर्पणदीपनम्। ततो देशकालदुर्निमित्तदुस्स्वप्नद्रव्य-
लोपमन्त्रलोपतन्त्रलोपसमकालसङ्करदोषनिवृत्त्यर्थं प्रासादेन
शतं वा पञ्चविंशतिं वा हुत्वा पश्चात्प्रायश्चित्तार्थं बहुरूपेण प-
ञ्चास्त्रेण पापभक्षणमन्त्रेण नवात्ममन्त्रेण शम्बरेणासिना प्रत्ये-
कमष्टोत्तरशतं पञ्चदश पञ्चविंशतिं वा हुत्वा। मन्त्रो यथा —
169 b बहुरूपमन्त्रः। ओं हुं अघोराय स्वाहा। शिवास्त्रमन्त्रः - ओं हौं
हरहर शिव शिव शिवास्त्राय स्वाहा। क्षुरिकास्त्रमन्त्रः - छित्
छित् क्षुत् क्षुत् क्षुरिकास्त्राय स्वाहा। व्योमास्त्रमन्त्रः - ओं षं
हं हां हिं हुं व्योमव्यापिने स्वाहा। पाशुपतास्त्रमन्त्रः — ओं श्लीं
पशुं हुं फट् पाशुपतास्त्राय स्वाहा। अघोरास्त्रमन्त्रः - ओं ह्रीं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनु तनु रूप रूप चटचट प्रचट प्रचट कह कह वम वम बन्धय बन्धय घातय घातय हुं फट् ह्रीं स्वाहा। पापभक्षणमन्त्रः - ओं ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रों ह्रौं ह्रः पापभक्षणाय शिवाय स्वाहा। नवात्ममन्त्रः - ओं हं हंसस्सोहं स्वाहा। शम्बरमन्त्रः - ओं ह्रां ह्रीं हृदयाय स्वाहा। असिमन्त्रः - ओं हः अस्त्राय स्वाहा। इत्येवं प्रत्येकमष्टोत्तरशतं वा पञ्चाशत् पञ्चविंशतिं वा हुत्वा॥

— पञ्चमदिनविशेषहोमः —

ततः पञ्चमदिनविशेषहोमं कुर्यात्। तद्यथा - नवग्रहहोमः। सूर्याय स्वाहा। सोमाय स्वाहा। अङ्गारकाय स्वाहा। बुधाय स्वाहा। बृहस्पतये स्वाहा। शुक्राय स्वाहा। शनैश्चराय स्वाहा। राहवे स्वाहा। केतवे स्वाहा। शिवतत्वाय स्वाहा। विद्यातत्वाय स्वाहा। आत्म-
170 a तत्वाय स्वाहा। आकाशवाय्वग्निजलपृथिवीभ्यः स्वाहा। शब्दस्पर्श-रूपरसगन्धेभ्यः स्वाहा। श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेभ्यः स्वाहा। वाक्पाणिपादपायूपस्थेभ्यः स्वाहा। वचनदानगमनविसर्गानन्देभ्यः स्वाहा। मनोबुद्ध्यहङ्कारचित्तप्रकृतिभ्यः स्वाहा। प्राणापानव्या-नोदानसमानेभ्यः स्वाहा। ओं ह्रीं क्रों हंसस्सोहं स्वाहा। इति प्राण-प्रतिष्ठा मूलेन द्वादशवारं हुत्वा। पश्चात्सुब्रह्मण्यमूलेन द्वादश-वारं हुत्वा। ततः दिक्सर्वत्र कुण्डेषु व्याहृतिभिर्हुत्वा। तत्त-न्मूलमन्त्रेणाष्टोत्तरशतं हुत्वा। सर्वत्र पूर्णां विधाय। पश्चात्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जयादिहोमं कुर्यात् ॥

170 b

— जयादिहोमः —

पश्चादाचार्यः प्रधानकुण्डस्य समीपे पूर्ववत् स्थित्वा । अनुयाज-
समिधमादधाति स्वाहा । कर्मसंवृद्ध्यर्थं जयादिहोमं करिष्ये ।
ओं चित्तं च स्वाहा चित्तायेदं न मम । चित्तिश्च स्वाहा चित्त्यै इदं
न मम । आकूतं च स्वाहा आकूतायेदं न मम । आकूतिश्च
स्वाहा आकूत्यै इदं न मम । विज्ञातं च स्वाहा विज्ञातायेदं न
मम । विज्ञानं च स्वाहा विज्ञानायेदं न मम । मनसश्च स्वाहा
मनस इदं न मम । शक्वरीश्च स्वाहा शक्वरीभ्य इदं न मम ।
दर्शश्च स्वाहा दर्शायेदं न मम । पूर्णमासश्च स्वाहा पूर्णमासायेदं
न मम । बृहते च स्वाहा बृहत इदं न मम । रथन्तरश्च स्वाहा ।
रथन्तरायेदं न मम । प्रजापतिर्जयानीन्द्राय वृष्णे प्रायच्छदुग्रः
पृथनायेषु तस्मै विशस्समनन्तस्सर्वास उग्रस्सहि हव्यो बभूव
स्वाहा । प्रजापतये इदं न मम । अग्निर्भूतानामधिपतिस्समावत-
स्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्स्यां पुरोधायामस्मिन् क-
र्मन्नस्यां देवहूत्यां स्वाहा । भूतानामधिपतये अग्नय इदं न मम ।
इन्द्रो ज्येष्ठानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्या-
माशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा । ज्येष्ठा-
नामधिपतये इन्द्रायेदं न मम । यमः पृथिव्या अधिपतिस्समाव-
त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

171 a कर्मन्नस्यां देवहूत्यां स्वाहा। पृथिव्या अधिपतये यमायेदं न मम।
वायुरन्तरिक्षस्याधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्या-
माशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। अ-
न्तरिक्षाधिपतये वायवे इदं न मम। सूर्यो दिवोऽधिपतिस्समा-
वत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्
कर्मन्नस्यां देवहूत्यां स्वाहा। दिवोऽधिपतये सूर्यायेदं न मम।
चन्द्रमा नक्षत्राणामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्या-
माशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। नक्ष-
त्राणामधिपतये चन्द्रमसे इदं न मम। बृहस्पतिर्ब्रह्मणोऽधिपति-
स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधाया-
मस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। ब्रह्मणोऽधिपतये बृहस्प-
तये इदं न मम। मित्रस्सत्यानामधिपतिस्समावत्वस्मिन् ब्रह्म-
न्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देव-
हूत्यां स्वाहा। सत्यानामधिपतये मित्रायेदं न मम। वरुणोऽपा-
मधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरो-
धायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। अपामधिपतये वरु-
णायेदं न मम। समुद्रस्स्रोतसामधिपतिस्समावत्वस्मिन् ब्रह्मन्न-
स्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहू-
171 b त्यां स्वाहा। स्रोतसामधिपतये समुद्रायेदं न मम। अन्नं साम्रा-
ज्यानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्मन्नस्यां देवहूत्यां स्वाहा । साम्राज्यानामधिपतये अग्नायेदं
न मम । सोम ओषधीनामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन्
क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां
स्वाहा । ओषधीनामधिपतये सोमायेदं न मम । सविता प्रस-
वानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्य-
स्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा । प्रसवाना-
मधिपतये सवित्र इदं न मम । रुद्रः पशूनामधिपतिस्समावत्व-
स्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् क-
र्मन्नस्यां देवहूत्यां स्वाहा । पशूनामधिपतये रुद्रायेदं न मम ।
अप उपस्पृश्य । त्वष्टा रूपाणामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन्
क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वा-
हा । रूपाणामधिपतये त्वष्ट्र इदं न मम । विष्णुः पर्वतानामधि-
पतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधा-
यामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा । पर्वतानामधिपतये वि-
ष्णव इदं न मम । मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन्
ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां
देवहूत्यां स्वाहा । गणानामधिपतिभ्यो मरुद्भ्य इदं न मम । पितरः
172 a पितामहाः परे वरे ततास्ततामहा इह मावता समावत्वस्मिन् ब्र-
ह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां दे-
वहूत्यां स्वाहा । पितृभ्य इदं न मम । अप उपस्पृश्य । ऋताषाडृत-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धामाग्नि गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। ऋताषाहे सूर्य-
रश्मये चन्द्रमसे ऋतधाम्ने अग्नये गन्धर्वायेदं न मम। तस्यौष-
धयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा।
ओषधीभ्य अप्सरोभ्य ऊर्ग्भ्य इदं न मम। संहितो विश्वसामा
सूर्यो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। (सुषुम्नाय सूर्या-
य चन्द्रमसे गन्धर्वायेदं न मम) संहिताय विश्वसाम्ने सूर्याय
गन्धर्वायेदं न मम। तस्य मरीचयोऽप्सरसो आयुवो नाम ता
इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। मरीचिभ्योऽप्सरोभ्य आयु-
भ्य इदं न मम। सुषुम्न सूर्यरश्मिश्चन्द्रमा गन्धर्वस्स इदं ब्रह्म
क्षत्रं पातु तस्मै स्वाहा। सुषुम्नाय सूर्याय चन्द्रमसे गन्धर्वायेदं
न मम। तस्य नक्षत्राण्यप्सरसो बेगुरयो नाम ता इदं ब्रह्म क्षत्रं
पान्तु ताभ्यः स्वाहा। नक्षत्रेभ्योऽप्सरोभ्यो बेगुरिभ्य इदं न मम।
भुज्युस्सुपर्णो यज्ञो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा।
भुज्यवे सुपर्णाय यज्ञाय गन्धर्वायेदं न मम। तस्य दक्षिणाप्सर-
सस्तवा नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। दक्षिणाभ्य
172 b अप्सरोभ्यस्तवाभ्य इदं न मम। प्रजापतिर्विश्वकर्मा मनो गन्ध-
र्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। प्रजापतये विश्वकर्मणे
मनसे गन्धर्वायेदं न मम। तस्य ऋक्सामान्यप्सरसो वह्नयो नाम
ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। ऋक्सामभ्योऽप्सरोभ्यः
वह्निभ्य इदं न मम। इषिरो विश्वव्यचा वाता गन्धर्वस्स इदं ब्रह्म

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षत्रं पातु तस्मै स्वाहा। इषिराय विश्ववेदसे वाताय गन्धर्वायेदं
न मम। तस्यापोऽप्सरसो मुदा नाम ता इदं ब्रह्म क्षत्रं पान्तु ता-
भ्यः स्वाहा। अद्भ्योऽप्सरोभ्यो मुदाभ्य इदं न मम। भुवनस्य पते
तस्य उपरि गृहा इह च सनो रास्वा स्वाज्यानिं रायस्पोषं सुवीर्यं
संवत्सरीणां स्वस्तिं स्वाहा। भुवनस्य पत्य इदं न मम। परमेष्ठ्य-
धिपतिर्मृत्युर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। परमेष्ठिने
मृत्यवे गन्धर्वायेदं न मम। तस्य विश्वमप्सरसो भुवो नाम ता इदं
ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। विश्वाभ्योऽप्सरोभ्यो भूभ्य इदं न
(प?)
मम। सुक्षितिस्सुभूतिर्भद्रकृत् सुपर्वान् पर्जन्यो गन्धर्वस्स इदं
ब्रह्म क्षत्रं पातु तस्मै स्वाहा। सुक्षितये सुभूपतये भद्रकृते सुप-
र्वते पर्जन्याय गन्धर्वाय इदं न मम। तस्य विद्युतोऽप्सरसो
173 a रुचो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। विद्युद्भ्योऽप्स-
रोभ्यो रुग्भ्य इदं न मम। दूरेहेतिरमृडयो मृत्युर्गन्धर्वस्स इदं
ब्रह्म क्षत्रं पातु तस्मै स्वाहा। दूरहेतये अमृडाय मृत्यवे गन्धर्वा-
येदं न मम। तस्याः प्रजा अप्सरसो भीरवो नाम ता इदं ब्रह्म क्षत्रं
पान्तु ताभ्यः स्वाहा। प्रजाभ्योऽप्सरोभ्यो भीरुभ्य इदं न मम।
चारुः कृपणकाशी कामो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै
स्वाहा। चारवे कृपणकाशिने कामाय गन्धर्वायेदं न मम। तस्याध-
योऽप्सरसश्शोचयन्तीर्णाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा।
आदिभ्योऽप्सरोभ्यश्शोचयन्तीभ्य इदं न मम। सनो भुवनस्पते

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यस्य त उपरि ग्रहा इह च उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा। भुवनस्य पत्ये ब्रह्मण इदं न मम। यद्देवा देवहेडनं देवासश्चकृमा वयं आदित्यास्तस्मान्मा मुञ्चतु तस्यर्तेन मामुत स्वाहा। देवेभ्य आदित्येभ्य इदं न मम। देवा जीवनकाम्या यद्वाचानृतमोदिमा अग्निर्मा तस्मा एनसो गार्हपत्यः प्रमुञ्चतु। दुरिता यानि च कृमा करोतु मामनेनसं स्वाहा। अग्नये गार्हपत्यायेदं न मम। ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वती। कृता मा मुञ्चतांहसे यदन्य कृतमारिम स्वाहा। द्यावापृथिवीभ्यां सरस्वत्या इदं न मम। सजात-

173 b शंसा दुत स्वा जामिशंसा ज्यायसश्शंसा दुमुत वा कनीयसः अनाज्ञातं देवकृतं यदेनस्तस्मा त्वमस्मां जातवेदो मुमुग्धि स्वाहा। अग्नये जातवेदस इदं न मम। यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामुष्टिवद्भ्यां शिश्नैर्यदनृतं च कृमा वयं अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि च कृमा करोतु मामनेनसं स्वाहा। अग्नये गार्हपत्यायेदं न मम। यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः दूरे पश्या च राष्ट्रभृश्च तान्यप्सरस वनुधत्तामृणानि स्वाहा। दूरे पश्या च राष्ट्रभृश्च तान्यप्सरोभ्य इदं न मम। अदैव्यनृणं यदहं चकार य(द्वा?)द्यदास्यन् सञ्चकार जनेभ्यः अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि च कृमा करोतु मामनेनसं स्वाहा। अग्नये गार्हपत्यायेदं न मम। यन्मे माता गर्भे सति एनश्चकार यत्पिता अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दुरिता यानि च कृमा करोतु मामनेनसं स्वाहा । अग्नये गार्हपत्याये-
दं न मम । यदा पिपेष मातरं पितरं पुत्रः प्रमुदितो धयन् । अहिं
सितौ पितरौ उ मया तत् तदग्ने अनृणो भवामि स्वाहा । अग्नय
इदं न मम । यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वाचि
हिंसिम । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता
174 a यानि चकृम करोतु मामनेनसं स्वाहा । अग्नये गार्हपत्यायेदं
न मम । यदाजसा निजसा यत्पराजसा यदेनश्चकृम नूतनं यत्
पुराणम् । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि
चकृम करोतु मामनेनसं स्वाहा । अग्नये गार्हपत्यायेदं न मम ।
अतिक्रमामि दुरितं यदेनो जहामि रिप्रं परमे सधस्ते । यत्रयन्ति
सुकृतो नापि दुष्कृतस्तमारोहामि सुकृतानिलोकं स्वाहा । अ-
ग्नये इदं न मम । मृते देवा अमृजतैतदेनस्कृत एतन्मनुष्येषु
मा मृजे ततो मायति किञ्चिदानशे अग्निर्मा तस्मादेनसो गार्ह-
पत्यः प्रमुञ्चतु । दुरिता यानि चकृम करोतु मामनेनसं स्वाहा ।
अग्नये गार्हपत्यायेदं न मम । दिवि जाताऽप्सुजाता या जाता ओ-
षधीभ्यः । अथोर्यो अग्निया आपस्तानश्शुन्धन्तु । शुन्धनीभ्यां
स्वाहा । अद्भ्यश्शुन्धनीभ्यामिदं न मम । यदापो नक्तं दुरितं
चराम यद्वा दिवा नूतनं यत्पुराणं हिरण्यवर्णास्तद उत्पनी-
तनः स्वाहा । अद्भ्यो हिरण्यवर्णाभ्य इदं न मम । इमं मे वरुण
श्रुतीहवं यद्या च मृडय । त्वामवस्युराजके स्वाहा । वरुणायेदं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न मम। तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हवि-
र्भिः। अहेडमानो वरुणेह बोध्युरुशँसमान आयुः प्रमोषीः स्वाहा।
174 b वरुणायेदं न मम। त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो
वयासिसीष्ठाः। यजिष्ठो वह्नितमश्शोशुचानो विश्वा द्वेषांसि प्र-
मुमुध्यस्मत् स्वाहा। अग्नये वरुणाभ्यामिदं न मम। स त्वं नो अ-
ग्ने वमो भवोति नेजिष्ठो अस्य उषसो व्युष्टौ अवयक्ष्मणों वरु-
णगँ रराणो वहि मृडिकं सुहवोनयेधि स्वाहा। अग्नये वरुणाभ्या-
मिदं न मम। त्वमग्ने अयास्ययासन् मनसाहितः अयासन्
हव्यमूहिषे यानो धेहि भेषजं स्वाहा। अग्नये अयस इदं न
मम। प्रजापते नत्वदेतान्यन्यो विश्वाजातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्
स्वाहा। प्रजापतये इदं न मम। इध्मप्रवृश्चिदनानभ्याधाय
इध्मसन्नहनानि च। अथ प्रायश्चित्ताहुती जुहोति। अस्मिन्
कर्मणि मध्ये सम्भावितसमस्तदोषप्रायश्चित्तार्थं महाप्रायश्चि-
त्ताहुती जुहोति। मनो ज्योतिर्जुषतामाज्यं विच्छिन्नयज्ञं समिमं
दधातु। याजुष्टा उषसो निमृचश्च तास्सन्दधामि हविषा घृतेन
स्वाहा। मनसो ज्योतिष इदं न मम। अयाश्चाग्नेस्यनभिशस्ति-
श्च सत्यमित्त्वमया असि। अयसा मनसा धृतोयसा हव्यमूहिषेऽ-
175 a यानो धेहि भेषजं स्वाहा। अग्नये अयस इदं न मम। यदस्मिन्
कर्मण्यन्तरत कामान्ततः कर्मतो वानयाहुत्या तच्छमयामि सर्वं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तृप्यन्तु । देवा नवन्तान् घृतेन स्वाहा । देवेभ्य इदं न मम । स्वस्ति न
इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अ-
रिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु स्वाहा । इन्द्राय वृद्धश्रवसे
पूष्णे विश्ववेदसे तार्क्ष्याय अरिष्टनेमये बृहस्पतय इदं न मम।
यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराजातवेदा विचक्षणी स्वाहा।
जातवेदसे इदं न मम । पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पतिः
पुनर्मे अश्विनायुवं चक्षुराधत्तमक्ष्योः स्वाहा । अग्नीन्द्रबृहस्पति-
भ्य अश्विभ्यामिदं न मम । ओं भूः स्वाहा अग्नये इदं न मम । ओं
भुवः स्वाहा वायवे इदं न मम । ओं सुवः स्वाहा सूर्यायेदं न मम।
ओं भूर्भुवःस्वः स्वाहा प्रजापतये इदं न मम । इष्टेभ्यः स्वाहा इ-
ष्टेभ्य इदं न मम । वषडनिष्टेभ्यः स्वाहा वषडनिष्टेभ्य इदं न मम।
भेषजं दुरिष्ट्यै स्वाहा भेषजं दुरिष्ट्या इदं न मम । निष्कृत्यै स्वा-
हा निष्कृत्यै इदं न मम । दौराध्यै स्वाहा दौराध्यै इदं न मम।
देवीभ्यस्तनूभ्यः स्वाहा देवीभ्यस्तनूभ्य इदं न मम । ऋद्ध्यै स्वाहा।
ऋद्ध्या इदं न मम । समृद्ध्यै स्वाहा समृद्ध्यै इदं न मम । सर्व-
समृद्ध्यै स्वाहा सर्वसमृद्ध्या इदं न मम । यत इन्द्र भयामहे त-
175b तो नो अभयं कृधि । मघवन् शग्धि तव तन्न ऊतये विद्विषो
वि मृधो जहि स्वाहा । इन्द्राय अभयङ्करायेदं न मम । आभिर्गी-
र्भिर्यततो न ऊनं आप्यायये हरिवो वर्धमानः । यदा स्तोतृभ्यो
महि गोत्रा रुजासि भूयिष्ठभाजो अथ ते स्याम स्वाहा । इन्द्राय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्धमानायेदं न मम । अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु।
अग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा । अग्नये इदं न मम।
पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वं वेत्थ
यथातथं स्वाहा । अग्नये इदं न मम । यत्पाकत्रा मनसा दीनद-
क्षाणा यज्ञस्य मन्वते । मर्ता सह । अग्निष्टद्धोता क्रतुविद्विजानन्
यजिष्ठो देवां ऋतुशो यजाति स्वाहा । अग्नये ~~[illegible]~~ क्रतुवि-
द्विजानते ~~[illegible]~~ इदं न मम । भूरग्नये च पृथिव्यै च महते च
स्वाहा । भूरग्नये पृथिव्यै च महते इदं न मम । भुवो वायवे चा-
न्तरिक्षाय च महते च स्वाहा । भुवो वायवे अन्तरिक्षाय महत
इदं न मम । सुवरादित्याय च दिवे च महते च स्वाहा । सुवरा-
दित्याय महत इदं न मम । भूर्भुवश्चन्द्रमसे च नक्षत्रेभ्यश्च
दिग्भ्यश्च महते च स्वाहा । भूर्भुवश्चन्द्रमसे च नक्षत्रेभ्यो महत
इदं न मम । पाहि नो अग्नये(ऐ)नसे स्वाहा । पाहि नो अग्नयेनस
इदं न मम । पाहि नो विश्ववेदसे स्वाहा । विश्ववेदसे इदं न मम।
176a यज्ञं पाहि विभावसो स्वाहा । विभावसवे इदं न मम । सर्वं पाहि
शतक्रतो स्वाहा शतक्रतवे इदं न मम । पाहि नो अग्न एकया ।
पाह्युत द्वितीयया । पाहि गीर्भिः(ति)सृभिरूर्जांपते पाहि चतसृ-
भिर्वसो स्वाहा । पाहिभ्य इदं न मम । सप्त ते अग्ने स्समिध-
स्सप्तजिह्वा सप्तऋषयस्सप्तधामप्रियाणि सप्तहोत्रा सप्तधात्वा
यजन्ति । सप्तयोनिराबृणस्व घृतेन स्वाहा । अग्नये सप्तवत इदं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न मम। पुनस्त्वादित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः घृतेन त्वं तनुवो वर्धयस्व। सत्याः सन्तु यजमानस्य कामाः स्वाहा। वसुनीथय इदं न मम। गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादनं स्वाहा। गणपतये इदं न मम। त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा। त्रियम्बकायेदं न मम। जातवेदसे सुनुवाम सोममरातीयतो निदहाति वेदः। सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः स्वाहा। अग्नये जातवेदसे दुर्गायेदं न मम। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा। विष्णवे इदं न मम।
176 b विष्णुरराडमसि स्वाहा। विष्णव इदं न मम। विष्णोः पृष्ठमसि स्वाहा विष्णव इदं न मम। विष्णु श्नप्त्रे य स्वाहा। विष्णव इदं न मम। विष्णो स्यूरसि स्वाहा। विष्णव इदं न मम। विष्णोर्ध्रुवमसि स्वाहा। विष्णव इदं न मम। वैष्णवमसि विष्णवे त्वां स्वाहा विष्णव इदं न मम। विष्णोरराडमसि विष्णोः पृष्ठमसि विष्णो श्नप्त्रे स्थो विष्णोस्स्यूरसि विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वां स्वाहा। विष्णवे नारायणायेदं न मम। ब्रह्म प्रतिष्ठा मनसो ब्रह्म वाचः ब्रह्मजज्ञानं हविषामाज्यस्य अतिरिक्तं कर्मणो यच्च हीनम्। यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् स्वाहा। ब्रह्मण

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इदं न मम। कृताहुतिरेतु देवान् स्वाहा। यज्ञाय ब्रह्मण इदं न मम। यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनं महकरं अग्निष्टः स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मेऽग्नये स्विष्टकृते सुहुताहुते। सर्वप्रायश्चित्ताहुतीनां कामानां सत्रद्दयित्रे स्वाहा। अग्नये स्विष्टकृत इदं न मम। अस्मिन् कर्मणि मध्ये सम्भावितसमस्तमन्त्रलोपतन्त्रलोपक्रियालोपद्रव्यलोपन्यूनातिरिक्तविपर्यासविस्मृति समस्तदोषप्रायश्चित्तार्थं महाप्रायश्चित्तहोमं
177 a होष्यामि। ओं भवाय देवाय स्वाहा इत्यादि। महतो देवाय स्वाहा। रुद्रायेदं न मम। ओं भवस्य देवस्य पत्ये स्वाहा इत्यादि। महतो देवस्य पत्ये स्वाहा। गार्या इदं न मम। ओं भवस्य देवस्य सुताय स्वाहा। इत्यादि। महतो देवस्य सुताय स्वाहा। सुब्रह्मण्यायेदं न मम। ओं भूः स्वाहा अग्नये इदं न मम। भुवः स्वाहा वायवे इदं न मम। सुवः स्वाहा सूर्यायेदं न मम। ओं भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम। पश्चात् प्रधानादि सर्वत्रकुण्डेषु तत्तन्मूलमन्त्रेणाष्टोत्तरशतं हुत्वा। सर्वत्र पूर्णां विधाय।

## — बिम्बशुद्धिः —

ततो बिम्बशुद्ध्यर्थं मृदुदकुम्भादि मूलबेरे क्रमेणाभिषिच्य, पश्चात् घृतशिरोऽर्पणप्रयोगः। घृतशिरोऽर्पणकुम्भं शिष्यमूर्ध्नि वाहयित्वा। स्वस्तिवाचनपुरस्सरं मङ्गलवाद्यैस्सहालयं प्रदक्षिणीकृत्य। बिम्बस्य पुरतः प्रतिष्ठाप्य। घृतशिरोऽर्पणकर्म करिष्ये

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति सङ्कल्प्य । पुण्याहं वाचयित्वा । आत्मानमुपकरणानि प्रोक्ष्य । कराङ्गं न्यस्य । गुरुं सर्वोपचारैस्सम्पूज्य । कराभ्यां घृतमादाय घृतं मिमिक्षे इति मन्त्रेण बिम्बस्य शिरस्यभिषिच्य । मन्त्रः ।

घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुपस्य धाम । अनुष्वधमाह मादयस्व स्वाहा घृतकृतं वृषभवक्षि हव्यम् । इति मन्त्रेणाभिषिच्य । उष्णोदकादिभिरभिषिच्य । उद्वर्त्य । गन्ध-
177b पुष्पादि सर्वोपचारान् कृत्वा । दूर्वाग्रान् शिरसि विन्यस्य । हेम-पुष्पाणि दोस्थले । अङ्कुरान् कण्ठदेशे तु हृदये यवलाक्षतान् । मूलमन्त्रेण विन्यस्य नमस्कृत्वा क्षमापयेत् ।

॥ इति घृतशिरोऽर्पणविधिः ॥

— न्यासक्रमः —

बिम्बस्य दक्षिणभागे उत्तराभिमुखः स्थित्वा । ओं ह्रीं सर्वज्ञशक्तिधाम्ने हृदयाय नमः । ओं ह्रीं नित्यतृप्तशक्तिधाम्ने शिरसे स्वाहा । ओं ह्रीं अनादिबोधशक्तिधाम्ने शिखायै वौषट् । ओं ह्रीं स्वतन्त्रशक्तिधाम्ने कवचाय हुं फट् । ओं ह्रीं अलिप्तशक्तिधाम्ने नेत्रत्रयाय वषट् । ओं ह्रीं अनन्तशक्तिधाम्ने अस्त्राय फट् । इति दर्भाग्रेण वा कराग्रेण वा क्रमेण विन्यस्य ॥ त्रितत्वन्यासः —
ओं हां शिवतत्वाय नमः । ओं हां शिवतत्वाधिपतये रुद्राय नमः । इति शिरसि । ओं हिं विद्यातत्वाय नमः । ओं हिं विद्यातत्वाधिपतये विष्णवे नमः । इति हृदये । ओं हुं आत्मतत्वाय नमः । ओं हुं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आत्मतत्वाधिपतये ब्रह्मणे नमः। इति पादयोर्विन्यस्य। पञ्चतत्व-
न्यासः — ओं हं आकाशतत्वाय नमः। ओं हं आकाशतत्वाधिपतये
सदाशिवाय नमः। इति शिरसि। ओं यं वायुतत्वाय नमः। ओं यं वायु-
तत्वाधिपतये महेश्वराय नमः। इति मुखमण्डले। ओं रं अग्नितत्वा-
य नमः। ओं रं अग्नितत्वाधिपतये रुद्राय नमः इति हृदये। ओं वं
अप्तत्वाय नमः। ओं वं अप्तत्वाधिपतये विष्णवे नमः। इति नाभौ।
ओं लं पृथिवीतत्वाय नमः। ओं लं पृथिवीतत्वाधिपतये ब्रह्मणे
नमः इति पादयोर्विन्यस्य। मातृकान्यासः — अं नमश्शिरसि।
178 a आं नमः मुखमण्डले। इं नमः दक्षिणनेत्रे। ईं नमः वामनेत्रे।
उं नमः दक्षिणकर्णे। ऊं नमः वामकर्णे। ऋं नमः दक्षिणनासि-
कायाम्। ॠं नमः वामनासिकायाम्। ऌं नमः दक्षिणगण्डे। ॡं नमः
वामगण्डे। एं नमः ऊर्ध्वदन्ते। ऐं नमः अधोदन्ते। ओं नमः ऊर्ध्वा-
धरे। औं नमः अधोऽधरे। अं नमः जिह्वायाम्। अः नमः मूर्ध्नि न्य-
सेत्। कं नमः दक्षिणबाहुशिखरे। खं नमः दक्षकोर्परे। गं नमः
दक्षिणमणिबन्धे। घं नमः दक्षहस्ताङ्गुलिमूले। ङं नमः दक्षहस्ता-
ङ्गुल्यग्रे। चं नमः वामबाहुशिखरे। छं नमः वामकोर्परे। जं नमः वाम-
मणिबन्धे। झं नमः वामहस्ताङ्गुलिमूले। ञं नमः वामहस्ताङ्गुल्यग्रे।
टं नमः दक्षिणोरुमूले। ठं नमः दक्षिणजानुनि। डं नमः दक्षिण-
गुल्फे। ढं नमः दक्षपादाङ्गुलिमूले। णं नमः दक्षपादाङ्गुल्यग्रे।
तं नमः वामोरुमूले। थं नमः वामजानुनि। दं नमः वामगुल्फे।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धं नमः वामपादाङ्गुलिमूले । नं नमः वामपादाङ्गुल्यग्रे । पं नमः
दक्षिणपार्श्वे । फं नमः वामपार्श्वे । बं नमः पृष्ठे । भं नमः नाभौ । मं
नमः उदरे । यं नमः हृदये । रं नमः दक्षिणदोर्मूले । लं नमः वाम-
दोर्मूले । वं नमः पिठरे । शं नमः दक्षिणकक्षे । षं नमः वामकक्षे ।
सं नमः दक्षिणबाहौ । हं नमः वामबाहौ । ळं नमः दक्षिणपादे । क्षं
178 b नमः वामपादे न्यसेत् ॥ दण्डभङ्गिन्यासः — ओं सों ईशानाय
जगद्भवमूर्ध्ने नमः शिरसि । ओं सें तत्पुरुषाय वचद्भवमूर्ध्ने नमः
मुखमण्डले । ओं सुं अघोराय विश्वभुवहृदयाय नमः हृदये । ओं
सिं वामदेवाय रुद्रभुवगुह्याय नमः गुह्ये । ओं सं सद्योजाताय ब्रह्म-
भुवमूर्तये नमः पादे । ओं सौं आप्यभुवाय भुवद्भवसर्वाङ्गाय नमः
इति सर्वाङ्गं न्यसेत् ॥ मुण्डभङ्गिन्यासः — ओं सों ईशानाय जग-
द्भवमूर्ध्ने नमः इतीशानमूर्ध्नि । ओं सें तत्पुरुषाय वचद्भवमूर्ध्ने
नमः पूर्वमूर्ध्नि । ओं सुं अघोराय विश्वभुवमूर्ध्ने नमः दक्षिणमूर्ध्नि ।
ओं सिं वामदेवाय रुद्रभुवमूर्ध्ने नमः उत्तरमूर्ध्नि । ओं सं सद्यो-
जाताय ब्रह्मभुवमूर्ध्ने नमः पश्चिममूर्ध्नि । ओं सौं आप्यभुवाय भुव-
द्भवमूर्ध्ने नमः इति नैऋतमूर्ध्नि ॥ न्यसेत् ॥ ततः स्कन्दकलान्यासः ॥
जगद्भुवं जयायै नमः इतीशानमूर्ध्नि । बहुतो बलायै नमः पूर्वमूर्ध्नि ।
हुतं उन्नतायै नमः दक्षिणमूर्ध्नि । वचद्भुवं वामायै नमः उत्तरमूर्ध्नि ।
नमस्तेऽस्तु नन्दिन्यै नमः पश्चिममूर्ध्नि । विश्वभुवे विजयायै नमः
नैऋतमूर्ध्नि न्यसेत् । जगद्भुवोऽधिपतिर्जयायै नमः इतीशानवक्त्रे ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सेनानि सेनायै नमः पूर्ववक्त्रे। मयूरप्रियायै नमः दक्षिणवक्त्रे। षडा-
ननमङ्गानि शान्त्यै नमः उत्तरवक्त्रे। सन्ध्यायाः नमस्तेऽस्तु सत्यै
179 a नमः पश्चिमवक्त्रे। सुखं वह्निसूक्ष्मायै नमः ~~दक्षिणवक्त्रे~~। नैरृत-
वक्त्रे न्यसेत्। सुब्रह्मण्यसुमत्यै नमः हृदये। बृहस्पतये सुखाय प्र-
ज्ञायै नमः गले। अस्य पद्मयोनेः अमृतायै नमः दक्षिणबाहौ। य-
स्यात्माय यशस्विन्यै नमः वामबाहौ। वहने वहन्तु वरिष्ठायै नमः
नाभौ। सुब्रह्मण्यसुप्रतिष्ठायै नमः कुक्षौ। रुद्रभुवे रुचये नमः पृष्ठे।
ब्रह्मभुवे ब्रह्माण्यै नमः उरसि। भुवद्भुवे भूत्यै नमः गुह्ये। मातृताय-
मान्यै नमः शिश्ने। जगद्भुवं जीवायै नमः दक्षिणोरौ। सुब्रह्मण्यशु-
द्धायै नमः वामोरौ। कृत्तिकासुतकृपायै नमः दक्षिणजानुनि। षष्ठि-
कासत्वरायै नमः वामजानुनि। जगद्भुवं जगत्यै नमः दक्षिणजंघायाम्।
वचद्भुवं वरदायै नमः वामजंघायाम्। स्कन्दविशाखेन कामदायै न-
मः दक्षिणपादे। हव्यं यस्नाय धारिण्यै नमः वामपादे। षण्मुख-
श्यामायै नमः इत्युरसि विन्यस्य। तत्त्वतत्त्वेश्वरन्यासः — मूर्धा-
दिगलपर्यन्तं शिवतत्त्वस्थानम् ब्रह्मभागम्। कण्ठादिकटिपर्यन्तं
विद्यातत्त्वस्थानं विष्णुभागम्। कट्यादिपादपर्यन्तं आत्मतत्त्वस्था-
नं ब्रह्मभागम्। इति ज्ञात्वा। ततः आत्मतत्त्वचतुर्विंशतिनामानि
साधिपानि च समर्चयेत्। तद्यथा — बिम्बस्य मूर्धादिकण्ठपर्यन्तं
ओं हां शिवतत्त्वाय नमः। शिवतत्त्वाधिपतये शिवाय नमः। शक्तित-
त्त्वाय नमः शक्तितत्त्वाधिपतये शक्तिमते नमः। सदाशिवतत्त्वाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

179 b नमः सदाशिवतत्वाधिपतये ब्रह्मणे नमः। ईश्वरतत्वाय नमः ईश्वर-
तत्वाधिपतये अनन्ताय नमः। शुद्धविद्यातत्वाय नमः शुद्धविद्यात-
त्वाधिपतये शम्बराय नमः इति मूर्धादिकण्ठपर्यन्तं शिवतत्व-
पञ्चकम् साधिपदेवपञ्चकमर्चयेत्। कण्ठादिकटिपर्यन्तं विद्या-
तत्वसप्तकम्। ओं हां मायातत्वाय नमः। मायातत्वाधिपतये गहने-
शाय नमः। कालतत्वाय नमः कालतत्वाधिपतये कालनाम्ने नमः। क-
लातत्वाय नमः कलातत्वाधिपतये ज्ञानबिन्दवे नमः। विद्यातत्वाय
नमः विद्यातत्वाधिपतये विज्ञानाय नमः। नियतितत्वाय नमः निय-
तितत्वाधिपतये नियामकाय नमः। रागतत्वाय नमः रागतत्वाधि-
पतये कामदाय नमः। पुरुषतत्वाय नमः पुरुषतत्वाधिपतये सूक्ष्म-
देहाय नमः। इति विद्यातत्वसप्तकं साधिपं च समर्चयेत्। कट्यादि-
पादपर्यन्तं आत्मतत्व~~...~~चतुर्विंशति। ओं हां प्रकृतितत्वाय
नमः प्रकृतितत्वाधिपतये प्रधानकाय नमः। चित्ततत्वाय नमः।
चित्ततत्वाधिपतये त्रिदेहाय नमः। अहङ्कारतत्वाय नमः अहङ्कार-
तत्वाधिपतये अहङ्कृते नमः। बुद्धितत्वाय नमः बुद्धितत्वाधिपतये
बुद्ध्याङ्गाय नमः। मनस्तत्वाय नमः मनस्तत्वाधिपतये सङ्कल्पाय न-
मः। नासातत्वाय नमः नासातत्वाधिपतये विलुम्बकाय नमः। जिह्वा-
तत्वाय नमः जिह्वातत्वाधिपतये महावक्त्राय नमः। चक्षुस्तत्वाय नमः।
चक्षुस्तत्वाधिपतये प्रकाशाय नमः। त्वक्तत्वाय नमः। त्वक्तत्वाधिप-
तये सर्वाङ्गाय नमः। श्रोत्रतत्वाय नमः श्रोत्रतत्वाधिपतये व्योमचराय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। उपस्थतत्वाय नमः उपस्थतत्वाधिपतये घनानन्दाय नमः।
180 a पायुतत्वाय नमः पायुतत्वाधिपतये तूर्णकृते नमः। पाणितत्वाय नमः। पाणितत्वाधिपतये रमणाय नमः। पादतत्वाय नमः। पादतत्वाधिपतये सामदाय नमः। वाक्तत्वाय नमः वाक्तत्वाधिपतये दुदुपतये नमः। शब्दतत्वाय नमः शब्दतत्वाधिपतये सूक्ष्मनादाय नमः। स्पर्शतत्वाय नमः स्पर्शतत्वाधिपतये बलवत्तराय नमः। रूपतत्वाय नमः रूपतत्वाधिपतये भानुमते नमः। रसतत्वाय नमः रसतत्वाधिपतये जलेशाय नमः। गन्धतत्वाय नमः गन्धतत्वाधिपतये गन्धाङ्गाय नमः। आकाशतत्वाय नमः आकाशतत्वाधिपतये सूक्ष्माय नमः। वायुतत्वाय नमः वायुतत्वाधिपतये मातरिश्वने नमः। तेजस्तत्वाय नमः तेजस्तत्वाधिपतये विश्वनिधये नमः। अप्तत्वाय नमः अप्तत्वाधिपतये जलेश्वराय नमः। पृथिवीतत्वाय नमः पृथिवीतत्वाधिपतये श्रीकण्ठाय नमः। इत्यात्मतत्वचतुर्विंशतिनामानि साधिपानि च समर्चयेत्। इति तत्वतत्वेश्वरनाम समाप्तम्॥

पश्चान्मूर्तिमूर्तीश्वरन्यासं कुर्यात्। मूर्धादि भ्रूमध्यपर्यन्तं आकाशस्थानम्। भ्रूमध्यादिकण्ठपर्यन्तं वायुस्थानम्। कण्ठादिहृदयपर्यन्तं अग्निस्थानम्। हृदयादिगुदपर्यन्तं अप्स्थानम्। गुदादिपादपर्यन्तं पृथिवीस्थानम्। इति ज्ञात्वा तत्तत्स्थाने समर्चयेत्। यथा — ओं हां हूं आकाशमूर्तये नमः आकाशमूर्त्यधिपतये सदाशिवाय नमः। ओं यूं वायुमूर्तये नमः वायुमूर्त्यधिपतये ईश्वराय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

180 b नमः। ओं रूं तेजोमूर्तये नमः तेजोमूर्त्यधिपतये रुद्राय नमः। ओं हां
वूं जलमूर्तये नमः जलमूर्त्यधिपतये विष्णवे नमः। ओं हां लूं पृथि-
वीमूर्तये नमः पृथिवीमूर्त्यधिपतये ब्रह्मणे नमः। पुनर्नाभिहृदय-
शिरस्सु स्थानत्रयेषु ओं हां षूं अर्कमूर्तये नमः अर्कमूर्त्यधिपत-
ये भवाय नमः। ओं हां सूं इन्दुमूर्तये नमः इन्दुमूर्त्यधिपतये
महादेवाय नमः। ओं हां हंसः यजमानमूर्तये नमः यजमानमूर्त्य-
धिपतये पशुपतये नमः। इति मूर्तिमूर्तीश्वरन्यासस्समाप्तः॥
पश्चात् आवाहनस्थापनसन्निधानसन्निरोधनावकुण्ठनधेनुमुद्रा-
महामुद्राः प्रदर्श्य। पाद्यादिगन्धपुष्पधूपदीपं नैवेद्यं दत्वा। पश्चा-
त्प्राणप्रतिष्ठां कुर्यात्। अस्य श्री प्राणप्रतिष्ठामहामन्त्रस्य रुद्रब्रह्मा-
च्युता ऋषयः। ऋग्यजुस्सामाथर्वाणि च्छन्दांसि। अखिलचैतन्य-
रूपिणी परा प्राणशक्तिर्देवता। आं बीजं ह्रीं शक्तिः क्रों कीलकं
श्री वल्ली देवनायकी समेत श्री सुब्रह्मण्यस्य प्राणकलाप्रसादसिद्ध्य-
र्थे जपे विनियोगः। ह्रामित्यादिकराङ्गन्यासः। ध्यानम् —

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान्।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या
181 a देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

इति ध्यात्वा। पञ्चोपचारान् कृत्वा। बिम्बमूर्ध्नि स्पृष्ट्वा जपेत्। ओं
आं ह्रीं क्रों यरलवशषसहों हंसस्सोऽहमोम्। श्रीवल्ली देवनायकी-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समेतश्रीसुब्रह्मण्येश्वरस्य प्राणाः इह प्राणस्थिताः। आं ह्रीं क्रों यर-
लवशषसहों हंसस्सोऽहमोम्। श्रीवल्लीदेवनायकीसमेतश्रीसुब्र-
ह्मण्येश्वरस्य जीव इह स्थिताः। आं ह्रीं क्रों यरलवशषसहों हंस-
स्सोऽहमोम्। श्रीवल्लीदेवनायकीसमेतश्रीसुब्रह्मण्येश्वरस्य जीव-
तत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्त पृथिव्यप्तेजोवाय्वाकाश-
शब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राण वाक्पादपाणि-
पायूपस्थजीवप्राण इहैवागत्यास्मिन् बिम्बे श्रीसुब्रह्मण्येश्वरं
सुखं चिरं तिष्ठन्तु स्वाहा। क्रों ह्रीं आं हंसस्सोहं स्वाहा। इति
मूलमन्त्रं द्वादशवारं जप्त्वा। पुनः षडङ्गध्यानम् - असुनीते पु-
नरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्। ज्योक्पश्येम
सूर्यमुच्चरन्तमनुमते मृडयानः स्वस्ति। पुनर्नो असुं पृथिवी द-
दातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्। पुनर्नस्सोमस्तन्वं ददातु पुनः
पूषा पथ्यां या स्वस्ति। श्रीवल्लीदेवनायकीसमेतश्रीसुब्रह्म-
18। 6 ण्याय नमः प्राणान् प्रतिष्ठापयामि। पश्चाद्यागशालां प्रविश्य।
आचार्यः ऋत्विजां तत्तत्कुण्डमासाद्य। प्रायश्चित्तार्थं अनाज्ञातादि
होमं होष्यामि। अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने
तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा। अग्नये इदं न मम। पु-
रुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वं
वेत्थ यथातथं स्वाहा। अग्नये इदं न मम। यत्पाकत्रा मनसा
दीनदक्षाणा यज्ञस्य मन्वते। अग्निष्टद्धोता क्रतुविद्विजानन्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नेजिष्ठो देवां क्रतुशो यजामि स्वाहा। अग्नये इदं न मम। ओं हुं
अघोराय स्वाहा। इत्यष्टोत्तरशतं जुहुयात्। क्रों ह्रीं आं हंसस्सो-
हं स्वाहा। इति पञ्चविंशतिवारं हुत्वा। पश्चान्मूलेनाष्टोत्तरशतं
वा पञ्चविंशतिं वा हुत्वा। सर्वत्र पूर्णां विधाय पश्चात्कुण्डस्थ-
मूर्तिं आधारशक्त्यादि सम्पूज्य। आवाहनादिसर्वोपचारैस्सम्पू-
ज्य। ततः दिक्कुण्डदेवानां प्रधानकुण्डे तत्तन्मूलमन्त्रेणावाह्य।
पश्चादाचार्यहृदयपङ्कजे आधारशक्त्यादि आसनमूर्तिमभ्यर्च्य।
पूरकाभ्यां कुण्डस्थदेवं स्वहृदये संयोज्य। कुम्भकं कृत्वा प्रधान-
कुम्भे रेचकभावनया पुष्पाञ्जलिना प्रासादोच्चारेण मूलमन्त्रेण
कुम्भे आवाहिन्या आवाह्य। स्थापनादि कृत्वा। पाद्यादि धूपदीप-
नैवेद्यं दत्वा। पश्चात्कुण्डान्तिकं गत्वा। अग्निं प्रज्वाल्य। सर्वत्र
182 a कुण्डे व्याहृतिभिर्हुत्वा। जुषस्व न समिधमग्ने अद्य शोचा बृहद्
यजतं धूममृण्वन्नुपस्पृश दिव्यं सानुस्तूपैस्संरश्मिभिस्ततनु
सूर्यस्य इति जप्त्वा। अदितेनुमग्गँ स्थाः। अनुमतेनुमग्गँ स्थाः।
सरस्वतेनुमग्गँ स्थाः। देव सवितः प्रासावीः। इति समन्तात्परि-
षिच्य। स्वाहा इत्येकसमिधमग्नौ दत्वा। उपस्थानं कृत्वा। यत्ते
अग्ने तेजस्तेन अहं तेजस्वी भूयासम्। यत्ते अग्ने हरस्तेनाहं
हरस्वी भूयासम्। यत्ते अग्ने वर्चस्तेन अहं वर्चस्वी भूयासम्।
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु। मयि मेधां मयि
प्रजां मयीन्द्र इन्द्रियं दधातु। मयि मेधां मयि प्रजां मयि सूर्यो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भ्राजो दधातु ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु मे ।

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि शेषाण्यशेषाणां शिवानुस्मरणं परम् ॥

अभिवादये । नमस्कृत्वा । ततः स्थित्वा । परिस्तरणस्थाघारसमि-
धादिक्रमेण दहेत् । पश्चान्मध्यमेखलायां विष्टरस्थजयन्ताख्या-
दीनां क्रमेण बलिं दत्वा । अधोमेखलायां परिस्तरणस्थब्रह्माणं
विसृज्य । ब्रह्मन् ब्रह्मासि नमस्ते ब्रह्मन् ब्रह्मणे ब्रह्मणे नमः अ-
स्मात् कूर्चात् ब्रह्माणं यथास्थानं प्रतिष्ठापयामि । तत्कूर्चग्रन्थिं
विस्रस्य तत्कुण्डावृतपरिस्तरणस्थेन्द्रादीनां क्रमेण बलिं ददेत् ।
182b विसृज्य, परिस्तरणं किञ्चित्किञ्चिदादाय वामहस्ते अग्रं सङ्गृह्य ।
तन्मूलं सव्यहस्ते सङ्गृह्य । दर्भानाज्यस्थाल्यामग्रं मध्यं मूलं
निसिच्य । दहेत् । पश्चात्प्रणीतामोक्षणम् । प्रणीतापात्रं स्वाग्रे नि-
धाय किञ्चिज्जलमापूर्य पूर्वादिचतुर्दिक्षु प्रणीताजलेन किञ्चि-
त्किञ्चित् सेचयित्वा । तज्जलेनात्मानं कुम्भं सम्प्रोक्ष्य । अग्निमु-
द्वास्य । तद्भस्म बृहत्सामेति ललाटे धृत्वा ॥ अष्टाविंशतिकलशान्
यागेशं वर्धिनीं, तथा सोमकुम्भस्थमूर्तीनां पालिकामूर्तिरेव च ॥
सर्वदेवान्विसृज्याथ दीपाराधनमेव च । दीपाराधनं षोडशोप-
चारक्रमेणाराध्य । मन्त्रपुष्पवेदपारायणभक्तस्तुत्यादिभिर्देवं स-
न्तोष्य ॥ — दशदानानि —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथ मूलबेरकुम्भाभिषेकमुहूर्तसाद्गुण्यार्थं दशदानक्षेत्रदान-
गृहादिदानं यथाविभवं कृत्वा। दशदानमन्त्रः —

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च।
रौप्यं लवणमित्याहुर्दशदानं प्रकीर्तितम्॥

गोदानमन्त्रः —

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे॥

गोदानं सदक्षिणाकं सताम्बूलं श्रीसाम्बशिवप्रियं कामयमान-
स्तुभ्यमहं सम्प्रददे॥ भूमिदानमन्त्रः —

सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे॥

भूमिदानं सदक्षिणाकं सताम्बूलं श्रीमहागौरीप्रियं कामयमान-
स्तुभ्यमहं सम्प्रददे॥ तिलदानमन्त्रः —

183 a तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः।
यस्मात्तस्माच्छिवं मे स्यादतश्शान्तिं प्रयच्छ मे॥

तिलदानं सदक्षिणाकं सताम्बूलं श्रीमहादेवप्रियं कामयमान-
स्तुभ्यमहं सम्प्रददे॥ हिरण्यदानमन्त्रः —

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे।

हिरण्यदानं सदक्षिणाकं सताम्बूलं श्रीसुब्रह्मण्यप्रियं कामय-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मानस्तुभ्यमहं सम्प्रददे ॥ आज्यदानमन्त्रः —

कामधेनुसमुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारमतश्शान्तिं प्रयच्छ मे ॥

आज्यदानं सदक्षिणाकं सताम्बूलं श्रीमहादेवप्रियं कामयमान-
स्तुभ्यमहं सम्प्रददे ॥ वस्त्रदानमन्त्रः —

शीतवातोष्णसन्त्राणं लज्जाया लक्षणं परम् ।
देहालङ्करणं वस्त्रमतश्शान्तिं प्रयच्छ मे ॥

धान्यदानमन्त्रः —

धान्यं करोति धातारमिह लोके परत्र च ।
यस्मात्तस्माच्छिवं मे स्यादतश्शान्तिं प्रयच्छ मे ॥

गुलदानमंत्रः —

इक्षुदण्डसमुद्भूतं देवानां च मनोहरम् ।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ।

रौप्यदानमन्त्रः —

पितॄणां वल्लभं यस्माच्छिवस्य च हरीन्द्रयोः ।
रजतं प्राणिनां तस्मादतश्शान्तिं प्रयच्छ मे ॥

लवणदानमन्त्रः —

रसानामग्रजं श्रेष्ठं लवणं बलवर्धनम् ।
पुष्टिजं सर्वजज्ञानमतश्शान्तिं प्रयच्छ मे ॥

विभूतिदानमन्त्रः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

183 b विभूते भूतिमानासीद्वामदेवस्सदाशिवः ।

रक्षाबन्धं त्वया देवि रक्ष मामनघे सदा ॥

रुद्राक्षदानमन्त्रः —

रुद्राक्षं रुद्रदैवत्यं रुद्रप्रीतिकरं शुभम् ।

तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

फलदानमन्त्रः —

फलं मनोरथफलं प्रददाति सदा नृणाम् ।

पुत्रपौत्रादिवृद्ध्यर्थं अतश्शान्तिं प्रयच्छ मे ॥

ताम्बूलदानमन्त्रः —

ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ।

तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

हरिद्रादानमन्त्रः —

हरिद्राकुङ्कुमोपेतं लक्ष्मीप्रीतिकरं शुभम् ।

तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

दीपदानमन्त्रः —

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।

गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥

जलपात्रदानमन्त्रः —

प्राणिनां जीवनं वारि प्राणा वारिणि संस्थिताः ।

तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्यादि दशदानादिकं दत्वा । पश्चात्परिचारकं स्नानानुष्ठानं निर्व-
र्त्य । नववस्त्रोत्तरीयोष्णीषभस्मरुद्राक्षैः शिष्यदेहमलङ्कृत्य ।
तच्छिरोमयूरासनं सम्पूज्य । प्रधानकुम्भं परिचारकमूर्ध्नि वि-
न्यस्य । वर्धनीं गुरुरादाय । अष्टपरिवारकुम्भान् ऋत्विग्भिरादाय
क्रमेण पदे पदे नानादीपनानाध्वजमङ्गलवाद्यस्वस्तिवाचनपुर-
स्सरं विमानं प्रदक्षिणीकृत्य । द्वारदेशे पाद्यादिकं दत्वा । देवस्य
184 a पुरतो धान्यराशिं निधाय । सङ्कोचसूत्रं कुम्भबिम्बयोः पूर्ववद्ब-
द्ध्वा । तद्देरस्य आधारशक्त्यादि सम्पूज्य । तद्यथा — ओं हां आ-
धारशक्तये नमः मूलप्रकृत्यै नमः अनन्ताय नमः वराहाय नमः
सुधासिन्धवे नमः । रत्नद्वीपाय नमः कलधौताचलाय नमः महा-
मण्डूकाय नमः आदिकूर्माय नमः नन्दनोद्यानाय नमः कल्पवृक्ष-
वाटिकाय नमः धर्मकन्दाय नमः ज्ञाननालाय नमः वैराग्यपत्राय
नमः । ऐश्वर्यकर्णिकाय नमः सहस्रदलसंयुक्तमहापद्माय नमः ।
तन्मध्ये ओं हां स्कन्दासनाय नमः । स्कन्दमूर्तये नमः इत्यासन-
मूर्तिं विन्यस्य । दण्डभङ्गिं मुण्डभङ्गिं न्यस्य । ततः पुष्पाञ्जलिं
बद्ध्वा । ध्यात्वा ॥

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा । पुष्पाञ्जलिं नाभ्यादिभ्रूमध्यपर्यन्तं आरोप्य ।
हृदयस्थितपुष्पाञ्जलिगतं विभाव्य । ओं [illegible] सां विद्यादेहाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः इति पुष्पाञ्जलिं बिम्बमूर्ध्नि विन्यस्य । ओं सौं नेत्रेभ्यो
नमः इति नेत्रमुद्रां विन्यस्य । पश्चात्कुम्भसमीपं गत्वा । कुम्भ-
स्थ ओं ह्रां निवृत्तिकलायै नमः इति पादे । ओं ह्रीं प्रतिष्ठाकला-
यै नमः नाभौ । ओं ह्रूं विद्याकलायै नमः इति हृदये । ओं ह्रैं शान्ति-
कलायै नमः इति मुखमण्डले । ओं ह्रौं शान्त्यतीतकलायै नमः
इति मूर्ध्नि सम्पूज्य । पुष्पाञ्जलिं दत्वा । कुम्भस्थ तत्व भुवन मन्त्र-
184 b पदवर्णकलासकलचैतन्यं साङ्गोपाङ्गं पादादिमूर्धान्तं सङ्गृह्य ।
मूलमन्त्रमुच्चार्य तन्मात्वं सङ्गृह्य । सूत्रमार्गेण 'हंसहंसाय वि-
द्महे परमहंसाय धीमहि तन्नो हंसः प्रचोदयात्' इति मन्त्रेण
'सद्योजातं प्रपद्यामि' इति । 'अयं कुमारो जरां जयतु दीर्घमायुः
यस्मै त्वं स्तनपृछ्यायायुर्वर्चो यशो बलं' इति मन्त्रं दशवारं जप्त्वा ।
सावधानेन सूत्रप्रविष्टं पदे पदे प्रपातयन् । पूरककुम्भकं कृत्वा ।
बिम्बसमीपं गत्वा । मात्वसमर्पणम् । रेचकभावनया पुष्पाञ्जलिं
बिम्बमूर्ध्नि विन्यस्य । पूर्ववदावाहनस्थापनसन्निधानसन्निरोधना-
वकुण्ठनधेनुमुद्रामहामुद्राः दत्वा । पाद्याचमनं दत्वा । वर्धनी-
बीजमादाय शक्तिबिम्बे संयोज्य । ततः अष्टविद्येश्वरकुम्भात्
बीजमादाय । पीठे तत्तत्स्थानेषु विन्यस्य । पश्चात् स्कन्दसूक्त-
मन्त्रेण शरवणोद्भवाय षण्मुखाय शिखिवाहनाय अभयवर-
प्रदाय शक्तिहस्ताय कुक्कुटध्वजाय कुङ्कुमवर्णाय कुमाराय ओं
ह्रां ह्रीं सौं शरवणभव हुं फट् स्वाहा । इति मालामन्त्रं समुच्चार्य

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रधानकुम्भादीन् क्रमेणाभिषेचयेत्। पश्चात्पाद्याचमनार्घ्यं गन्ध-
पुष्पधूपदीपनैवेद्यं दत्त्वा। समस्तोपचारान् कृत्वा ऽक्षमापयेत्।

॥ इति कुम्भाभिषेकविधिस्समाप्तः॥

श्री धर्मसंवर्धन्यम्बासमेत श्रीनगरीश्वर महाप्रभवे नमः॥

॥ श्रीगिरिनिवासाय नमः॥

185 a — पञ्चविंशतिस्नपनम् —

सायाह्नसमये आचार्यः स्नानानुष्ठानं निर्वर्त्य। नववस्त्रोत्तरी-
योष्णीषभस्मरुद्राक्षैर्गुरुदेहमलङ्कृत्य देवाग्रे वा ऐशान्यां वा
मण्टपं प्रकल्प्य॥

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।
वितानध्वजसंयुक्तं दर्भमालासमावृतम्॥
तन्मध्ये वेदिकां कृत्वा तत्पूर्वे कुण्डमाचरेत्।
दर्पणोदरसंकाशं पूर्वोक्तैर्लक्षणैर्युतम्॥

पदविन्यासम् —

सप्तहस्तपदेषु च मध्यमे
नवतु पङ्कजमध्यमभूतले।
वीथिरेकपदमावृतं त्यजे-
द्दिक्षु विदिक्षु गुणचन्द्रकोष्ठकम्॥
प्राक्सूत्रं वसुसूत्रं स्यादुदक्सूत्रं तथैव च।
मध्ये नवपदं ग्राह्यं तत्पार्श्वैकपदं त्यजेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं क्रमेण पञ्चविंशतिकोष्ठं विधाय कोष्ठमध्ये शालितण्डुल-
माषमुद्गतिलनिष्पावशिम्बसर्षपकुटकलाजानीत्येतन्नवधान्य-
मुपर्युपरि विन्यस्य। स्वर्णरजतताम्रमृण्मयान् कुम्भान् लक्ष-
णसंयुतान् द्रोणोदकप्रपूरितान् सङ्गृह्य। अस्त्रेण प्रक्षाल्य
धूपधूम्रेणापूर्य पट्टसूत्रैर्वा तन्तुसूत्रैर्वा यथोक्तलक्षणान् संवे-
ष्ट्य। मध्यपदे संस्थाप्य। तद्वामदक्षिणे वर्धनीद्वयं प्रस्थोदक-
185 b प्रपूरितान् सर्वालङ्कारयुतान् सङ्गृह्य। तन्तुनावेष्ट्य। यथा-
स्थाने संस्थाप्य। अष्टविद्येश्वरकुम्भान् आढकोदकप्रपूरि-
तान् सङ्गृह्य। तथालङ्कृत्य। यथास्थाने संस्थाप्य द्वितीयावरणे
षोडशकुम्भान् पूर्वोक्तलक्षणान् सङ्गृह्य सर्वालङ्कारसहितान्
संस्थाप्य॥

पूर्वादिषु चतुर्दिक्षु स्थापयेत्तु त्रयं त्रयम्।
आग्नेयादिषु कोणेषु स्थापयेदेककुम्भकम्॥

एवं क्रमेण कुम्भं संस्थाप्य। प्रधानकुम्भान् कुम्भरत्नचूतपत्र-
नालिकेरकूर्चवस्त्रगन्धमाल्यैरलङ्कृत्य। सकलीकृत्य। विनायकं
सम्पूज्य सङ्कल्प्य। पुण्याहं वाचयित्वा अस्त्रेण प्रोक्ष्य। पञ्चगव्य-
पञ्चामृतं विधिवत् संस्थाप्य। सामान्यार्घ्यपाद्याद्यविशेषार्घ्यं
संसाध्य। पश्चादापो वा इति मन्त्रेण गन्धतोयेन सम्पूर्य प्रधा-
नकुम्भस्याधः ओं हां आधारशक्तये नमः। तदुपरि पूर्वाद्यष्टदि-
क्षु ओं हां अनन्ताय नमः वासुकये नमः तक्षकाय नमः कार्कोटकाय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः। पद्माय नमः। महापद्माय नमः। शंखपालाय नमः। गुलिकाय
नमः। तन्मध्ये ओं हां अनन्तासनाय नमः इत्यनन्तासनं तदु-
परि आग्नेयादिकोणेषु ओं हां धर्माय नमः ज्ञानाय नमः वैराग्या-
186a य नमः ऐश्वर्याय नमः। पूर्वादिदिक्षु अधर्माय नमः। अज्ञानाय
नमः अवैराग्याय नमः अनैश्वर्याय नमः। पीठोर्ध्वे मेखलाधो-
भागे शयनीयतयाधश्छदने नैरृते ओं हां अधश्छदनाय
नमः। तदूर्ध्वच्छदने ऐशान्ये ओं हां ऊर्ध्वच्छदनाय नमः। मध्ये
ओं हां सिंहासनाय नमः इति सिंहासनं तदुपरि आग्नेयादिषु
ओं हां कृतयुगाय नमः त्रेतायुगाय नमः द्वापरयुगाय नमः कलि-
युगाय नमः। पूर्वादिषु अव्यक्ताय नमः। नियतये नमः। कलायै नमः
कालाय नमः। तन्मध्ये केशवाय नमः। ओं हां योगासनाय नमः।
इति योगासनं तदुपरि ओं हां कन्दाय नमः बीजाय नमः अङ्कु-
राय नमः नालाय नमः। दलेभ्यो नमः केसरेभ्यो नमः। कर्णि-
कायै नमः बीजेभ्यो नमः। पद्मासनाय नम इति पद्मासनं ततः
पूर्वादीशानान्तकेसरेषु ओं हां शकुन्यै नमः। रेवत्यै नमः पूतायै
नमः। महापूतायै नमः निशीथिन्यै नमः। मालिन्यै नमः शीतलायै
नमः। भूत्यै नमः। कर्णिकायां विश्वतोमुख्यै नमः। दलाग्रावृत्ते ओं
हां सूर्यमण्डलाय नमः सूर्यमण्डलाधिपतये ब्रह्मणे नमः। केसरा-
ग्रावृत्ते ओं हां सोममण्डलाय नमः। सोममण्डलाधिपतये विष्णवे
नमः। कर्णिकाग्रावृत्ते ओं हां वह्निमण्डलाय नमः वह्निमण्डलाधि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

186 b पतये रुद्राय नमः। कर्णिकामध्ये ओं ह्रां शक्तिमण्डलाय नमः शक्ति-
मण्डलाधिपतये स्कन्दाय नमः। इति सम्पूज्य। तदुपरि विमला-
सनम् षट्कोणं विचित्रवर्णं विचिन्त्य। ओं ह्रां विमलासनाय नमः
तदुपरि मूलप्रकृत्यै नमः। महामण्डूकाय नमः। अनन्ताय नमः
सुधासिन्धवे नमः। रत्नद्वीपाय नमः मणिमण्टपाय नमः नन्द-
नोद्यानाय नमः कल्पवृक्षवाटिकायै नमः। चिन्तामणिगृहराजाय
नमः। रत्नसिंहासनाय नमः। तन्मध्ये सहस्रदलसंयुतं शुद्ध-
विद्यामयं पद्मासनाय नमः। गं गणपतये नमः सं सरस्वत्यै नमः।
ओं ह्रीं मदोङ्कारब्रह्म विश्वजगदाधारशक्त्यै नमः। विश्वज्योति-
र्महामण्डूकाय नमः। विश्वतोमुखशिखादीप्यमानकालाग्निरुद्राय
नमः। विश्वजगन्मूलप्रकृत्यै नमः। विश्वम्भरादिकूर्माय नमः।
भोगिभूषणफणामणिस्फुरदनन्ताय नमः। हरिहयादिहरिदी-
श्वरसामन्तचक्रहेममहिमगिरिधृतवसुन्धराय नमः। कुन्दसु-
न्दरशरच्चन्द्रिकासान्द्रकल्लोलसुधासमुद्राय नमः। चिन्ताम-
ण्यादिदिव्यमणिगणरमणीयमणिद्वीपाय नमः। हरिचन्दन-
187 a मन्दारादिदिव्यतरुबृन्दसुन्दरकल्पवृक्षमहोद्यानाय नमः। नव-
रत्नप्राकारेभ्यो नमः। पुरसुन्दरहरिमुखी भवचन्द्रकान्तकवाट-
तोरणाय नमः। नवरत्नविचित्रितगोपुरशिखरेभ्यो नमः। स्वर्ण-
रत्नमेखलापरिष्कृतमणिकुट्टिमभूचिन्तामणिगृहराजकक्ष्यान्त-
रान्तररत्नस्तम्भगतसहस्रजातज्योतिर्जातरूपसालभञ्जिकापुञ्ज-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मञ्जुलशतसहस्रस्वर्णस्तम्भमण्टपाय नमः। तन्मध्ये अष्टगजावि-
धृतेन्द्रविमानाय नमः। तन्मध्ये रत्नसिंहासनाय नमः। शुभ्रव-
र्णाय सिंहवर्णाय धर्माय आग्नेयाङ्घ्रये नमः। पीतवर्णाय सिंह-
रूपाय ज्ञानाय नैरृताङ्घ्रये नमः। रक्तवर्णाय सिंहरूपाय वैरा-
ग्याय वायव्याङ्घ्रये नमः। हरिद्वर्णाय सिंहरूपाय ऐश्वर्याय ऐ-
शान्याङ्घ्रये नमः। राजावर्तनिभाय नराकृतये अधर्माय पूर्व-
फलकाय नमः। राजावर्तनिभाय नराकृतये अज्ञानाय दक्षिण-
फलकाय नमः। राजावर्तनिभाय नराकृतये अवैराग्याय पश्चि-
मफलकाय नमः। राजावर्तनिभाय नराकृतये ऽनैश्वर्याय उत्तर-
फलकाय नमः। मध्ये लक्ष्मीपतिफलकाय नमः। तदुपरि ओं हां
स्कन्दासनाय नमः। ओं हां हं हां स्कन्दमूर्तये नमः इति मूर्तिं दण्डा-
187 b कारं रक्तवर्णं विचिन्त्य। पश्चाद्दण्डभङ्गिन्यासं कुर्यात्। ओं सों
ईशानमूर्धाय जगद्भुवाय नमः। इति शिरसि। ओं सें तत्पुरुषवक्त्राय
वचद्भुवाय नमः वक्त्रे। ओं सुं अघोरहृदयाय विश्वभुवाय नमः
हृदये। ओं सिं वामदेवगुह्याय रुद्रभुवाय नमः गुह्ये। ओं सं स-
द्योजातपादाय ब्रह्मभुवाय नमः पादे। ओं सौं आप्यभुवाय भुव-
द्भुवाय नमः इति सर्वाङ्गं न्यसेत्। ततो मुण्डभङ्गिन्यासः —
ओं सों ईशानाय जगद्भुवमूर्ध्ने नमः इतीशानमूर्ध्नि। ओं सें
तत्पुरुषवक्त्राय वचद्भुवमूर्ध्ने नमः पूर्वमूर्ध्नि। ओं सुं अघोराय
विश्वभुवमूर्ध्ने नमः दक्षिणमूर्ध्नि। ओं सिं वामदेवाय रुद्रभुवमूर्ध्ने

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः उत्तरमूर्ध्नि । ओं सं सद्योजाताय ब्रह्मभुवमूर्ध्ने नमः इति प-
श्चिममूर्ध्नि । ओं सौं आप्यभुवाय भुवद्भुवमूर्ध्ने नमः इति नैरृत-
मूर्ध्नि न्यसेत् । कलाभङ्गिन्यासः — ओं हौं शान्त्यतीतकलायै
नमः इति शिरसि । ओं हैं शान्तिकलायै नमः वक्त्रे । ओं हूं
विद्याकलायै नमः हृदये । ओं ह्वीं प्रतिष्ठाकलायै नमः गुह्ये । ओं
ह्लों निवृत्तिकलायै नमः इति पादयोर्विन्यस्य ॥ पञ्चतत्वन्यासः ॥
ओं हं आकाशतत्वाय नमः ओं हं आकाशतत्वाधिपतये सदाशिवाय
नमः इति शिरसि । ओं यं वायुतत्वाय नमः । ओं यं वायुतत्वाधि-
188 a पतये महेश्वराय नमः । वक्त्रे । ओं रं तेजस्तत्वाय नमः । ओं रं तेज-
स्तत्वाधिपतये रुद्राय नमः हृदये । ओं वं अमृततत्वाय नमः ।
ओं वं अमृततत्वाधिपतये विष्णवे नमः गुह्ये । ओं लं पृथिवीत-
त्वाय नमः । ओं लं पृथिवीतत्वाधिपतये ब्रह्मणे नमः इति पादयो-
र्विन्यस्य । त्रितत्वन्यासः — ओं हुं शिवतत्वाय नमः । ओं हुं शिव-
तत्वाधिपतये रुद्राय नमः । इति मुखमण्डले । ओं हिं विद्यातत्वाय
नमः । ओं हिं विद्यातत्वाधिपतये विष्णवे नमः इति हृदये । ओं हं
आत्मतत्वाय नमः । ओं हं आत्मतत्वाधिपतये ब्रह्मणे नम इति पा-
दयोर्विन्यस्य । पश्चान्मातृकान्यासं कुर्यात् । अं नमश्शिरसि । आं
नमः मुखवक्त्रे । इं नमः दक्षनेत्रे । ईं नमः वामनेत्रे । उं नमः दक्ष-
कर्णे । ऊं नमः वामकर्णे । ऋं नमः दक्षगण्डे । ॠं नमः वामगण्डे ।
ऌं नमः दक्षनासिकायाम् । ॡं नमः वामनासिकायाम् । एं नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ऊर्ध्वौष्ठे । ऐं नमः अधरोष्ठे । ओं नमः ऊर्ध्वदन्ते । औं नमः अधो-
दन्ते । अं नमः जिह्वायाम् । अः नमः तालुरन्ध्रे विन्यस्य । कं नमः
दक्षिणबाहुशिखरे । खं नमः दक्षिणकोर्परे । गं नमः दक्षमणि-
बन्धे । घं नमः दक्षहस्ताङ्गुलिमूले । ङं नमः दक्षहस्ताङ्गुल्यग्रे
न्यसेत् । चं नमः वामबाहुशिखरे । छं नमः वामकूर्परे । जं नमः
वाममणिबन्धे । झं नमः वामहस्ताङ्गुलिमूले । ञं नमः वामह-
188b स्ताङ्गुल्यग्रे न्यसेत् । टं नमः दक्षिणोरुमूले । ठं नमः दक्षिण-
जानुनि । डं नमः दक्षिणगुल्फे । ढं नमः दक्षपादाङ्गुलिमूले ।
णं नमः दक्षपादाङ्गुल्यग्रे न्यसेत् । तं नमः वामोरुमूले । थं नमः
वामजानुनि । दं नमः वामगुल्फे । धं नमः वामपादाङ्गुलिमूले ।
नं नमः वामपादाङ्गुल्यग्रे न्यसेत् । पं नमः दक्षिणपार्श्वे । फं नमः
वामपार्श्वे । बं नमः पृष्ठे । भं नमः नाभौ । मं नमः उदरे । यं नमः हृदये ।
रं नमः दक्षिणदोर्मूले । लं नमः वामदोर्मूले । वं नमः पिठरे । शं नमः
दक्षिणकक्षे । षं नमः वामकक्षे । सं नमः दक्षिणबाहौ । हं नमः वाम-
बाहौ । ळं नमः दक्षिणपादे । क्षं नमः वामपादे न्यसेत् ॥ स्कन्दकला-
न्यासः — जगद्भुवं जयायै नमः इतीशानमूर्ध्नि । वहुतो बलायै
नमः पूर्वमूर्ध्नि । हुतं उन्नतायै नमः दक्षिणमूर्ध्नि । वचद्भुवं वामायै
नमः उत्तरमूर्ध्नि । नमस्तेऽस्तु नन्दिन्यै नमः पश्चिममूर्ध्नि । विश्व-
भुवे विजयायै नमः नैऋतमूर्ध्नि । जगद्भुवोऽधिपतिर्जयायै नमः
ईशानवक्त्रे । सेनानि सेनायै नमः पूर्ववक्त्रे । मयूरप्रियायै नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दक्षिणवक्त्रे । षडाननमङ्गानि शान्त्यै नमः उत्तरवक्त्रे । सन्ध्यायाः न-
मस्तेऽस्तु सत्यै नमः पश्चिमवक्त्रे । सुखं वह्निसूक्ष्मायै नमः नैऋतव-
189 a क्त्रे । सुब्रह्मण्यसुमत्यै नमः हृदये । बृहस्पतये सुखाय प्रज्ञायै नमः
गले । अस्य पद्मयोनेः अमृतायै नमः दक्षिणबाहौ । यस्यात्माय य-
शस्विन्यै नमः वामबाहौ । वहने वहन्तु वरिष्ठायै नमः नाभौ । सु-
ब्रह्मण्यसुप्रतिष्ठायै नमः कुक्षौ । रुद्रभुवे रुच्यै नमः पृष्ठे । ब्रह्मभुवे
ब्रह्मण्यै नमः उरसि । भुवद्भुवे भूत्यै नमः गुह्ये । मानृतायमान्यै
शिश्ने । जगद्भुवं जीवायै नमः दक्षिणोरौ । सुब्रह्मण्यशुद्धायै नमः
वामोरौ । कृत्तिकासुतकृपायै नमः दक्षिणजानुनि । षष्टिकासत्वरायै
नमः वामजानुनि । जगद्भुवं जगत्यै नमः दक्षिणजंघायाम् । वचद्भुवं
वरदायै नमः वामजंघायाम् । स्कन्दविशाखिने कामदायै नमः द-
क्षिणपादे । हव्यं यस्नाय धारिण्यै नमः वामपादे । षण्मुखश्या-
मायै नमः उरसि विन्यस्य ॥ पश्चात् षडक्षरन्यासः — अस्य
श्रीसुब्रह्मण्यमहामन्त्रस्य काश्यपऋषिः गायत्रीच्छन्दः श्रीषण्मुखो
देवता । सौं बीजं ह्रीं शक्तिः श्रीं कीलकम् । श्रीसुब्रह्मण्यप्रसादसि-
द्ध्यर्थे जपे विनियोगः । सामित्यादिकराङ्गन्यासः । ध्यानम् —

सिन्धूरारुणमिन्दुकान्तिवदनं ······ भीतिप्रणाशोद्यमम् ॥

पञ्चोपचाराः । न्यासक्रमः ॥ ओं सौं शं नमः इति शिरसि । रं नमः
189 b दक्षनेत्रे । वं नमः वामनेत्रे । णं नमः दक्षनासिकायाम् । भं नमः वाम-
नासिकायाम् । वं नमः इति शिरसि विन्यस्य । इति प्रथमम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शं नमः दक्षिणबाहुशिखरे । रं नमः दक्षकोर्परे । वं नमः दक्षिणमणि-
बन्धे । णं नमः दक्षहस्ताङ्गुलिमूले । भं नमः दक्षहस्ताङ्गुलिमध्ये ।
वं नमः दक्षहस्ताङ्गुल्यग्रे न्यसेत् ॥ इति द्वितीयम् ॥ शं नमः वाम-
बाहुशिखरे । रं नमः वामकोर्परे । वं नमः वाममणिबन्धे । णं नमः
वामहस्ताङ्गुलिमूले । भं नमः वामहस्ताङ्गुलिमध्ये । वं नमः वाम-
हस्ताङ्गुल्यग्रे विन्यस्य । इति तृतीयम् ॥ शं नमः दक्षिणोरुमूले ।
रं नमः दक्षिणजानुनि । वं नमः दक्षिणस्फिचि । णं नमः दक्षिण-
पादाङ्गुलिमूले । भं नमः दक्षपादाङ्गुलिमध्ये । वं नमः दक्षपादाङ्गु-
ल्यग्रे न्यसेत् ॥ इति तुरीयम् ॥ शं नमः वामोरुमूले । रं नमः वाम-
जानुनि । वं नमः वामस्फिचि । णं नमः वामपादाङ्गुलिमूले । भं नमः
वामपादाङ्गुलिमध्ये । वं नमः वामपादाङ्गुल्यग्रे न्यसेत् ॥ इति पञ्चमम् ॥
शं नमः हृदये । रं नमः दक्षिणपार्श्वे । वं नमः वामपार्श्वे । णं नमः नाभौ ।
भं नमः पृष्ठे । वं नमः गुह्ये ॥ इति षष्ठम् ॥ एवं षट्त्रिंशत्स्थानेषु
विन्यस्य । ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

190 a इति ध्यात्वा पुष्पाञ्जलिं ब्रह्मरन्ध्रान्तं नीत्वा । ओं सां सं विद्याः
देहाय नमः इति पुष्पाञ्जलिगतं विभाव्य । कुम्भे विन्यस्य ।
षण्मुखनेत्रेषु ओं सौं नेत्रेभ्यो नमः इति नेत्रमुद्रां प्रदर्श्य । आवा-
हनम् । पुष्पैरञ्जलिमापूर्य हृत्प्रदेशे निधाय । पूरकं विभाव्य ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुम्भकं भावनया मूलाधारादिनाभ्यन्तव्याप्तप्राणबीजं हकारं
नाभ्यादिहृदयान्तव्याप्तं घोषामेधाकलां औकारेण संयोज्य।
हौकारं हृदयादिकण्ठान्तव्याप्तं रसकलां ऊकारेण संयोज्य
हौकारऊकारौ कण्ठादितालुरन्ध्रान्तव्याप्तं विषकलां मकारेण
संयोज्य। हौंकारस्योपरि भ्रूमध्यान्तगतबिन्दुकलया बिन्दुक-
लां तदुपरि ललाटगतार्धचन्द्रकलयार्धचन्द्रकलां तदुपरि
गतनिरोधिकलया निरोधिकलां तदूर्ध्वगतनादेन नादं च तदुपरि
ब्रह्मरन्ध्रान्तव्याप्तां नादान्तेन संयोज्य ब्रह्मरन्ध्रं तदुपरि शक्ति-
मेकाङ्गुलव्याप्तां तदुपरि व्यापिनित्र्यङ्गुलव्याप्तां तदुपरि व्योम-
190 b रूपानन्तानाथानाश्रितां तदुपरि समनाचतुरङ्गुलव्याप्तां तदुपरि
उन्मनामपि चतुरङ्गुलव्याप्तां सञ्चिन्त्य। प्रासादान्ते द्वादशान्तो-
परि षडक्षरेण वाच्यवाचकभावादभिन्नं श्रीसुब्रह्मण्यं सञ्चि-
न्त्य। पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा। सृष्टिमार्गेण भ्रूमध्या-
न्तमवरोप्य स्फुरत्तारकाकारं स्कन्दं रेचकभावनया हृदयस्थित-
पुष्पाञ्जलिगतं विभाव्य। 'अयं कुमारो जरां जयतु दीर्घमायु-
र्यस्मै त्वं स्तनप्रछ्यायायुर्वर्चो यशो बलम्' इति मन्त्रमुच्चार्य।
मूलमन्त्रं दशवारं जप्त्वा। तन्मन्त्रेण पुष्पाञ्जलिं कुम्भमूर्ध्नि
विन्यस्य। कुम्भे आवाहिन्या ऊर्ध्वहस्तेन जगद्भवहृदयेनावाह्य।
अधोमुखहस्तेन वचद्भवशिरसेन स्थापिन्या संस्थाप्य। विश्व-
भुवशिखोर्ध्वाङ्गुष्ठमुष्टिभ्यां सन्निधान्या सन्निधीकृत्य। रुद्रभुव-

कवचेनाङ्गुष्ठगर्भमुष्टिरूपिण्या निष्ठुरया सन्निरुध्य ब्रह्मभुवने-
त्रेणावकुण्ठ्य । ओं भूर्भुवास्त्रेण धेनुमुद्रयामृतीकृत्य स्वागतं ते
सुब्रह्मण्येति विज्ञाप्य । वत्स स्वागतमिति देवोक्तं विभाव्य ॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।

तावत्सम्प्रीतिभावेन कुम्भेऽस्मिन् सन्निधीभव ॥

इति विज्ञाप्य । स्वागतार्घ्यं दत्वा हृदयादिकरान्तस्थानेषु जग-
द्भुवहृदयादि विन्यस्य । भूर्भुवास्त्रेण संरक्ष्य । रुद्रभुवकवचेनाव-
191 a कुण्ठ्य मूलेन धेनुमुद्रां महामुद्रां दत्वा । ओं सां सुब्रह्मण्याय
नमः पादयोः पाद्यम् । ओं सां सुब्रह्मण्याय स्वधा । इति षड्व-
क्रेष्वाचमनम् । ओं सां सुब्रह्मण्याय स्वाहा इति शिरष्षड्भ्योऽ-
र्घ्यं दत्वा । आपोहिष्ठेति स्नानार्थमर्घ्यजलेन प्रोक्ष्य । दुकूल-
चित्रवस्त्रं सन्धार्य । गन्धद्वारेति गन्धं कुङ्कुमाक्षतान् समर्प्य ।
अष्टपुष्पैरभ्यर्च्य । ओं हां ज्ञानशक्तिधराय नमः । स्कन्दाय नमः
देवसेनापतये नमः सुब्रह्मण्याय नमः गजारूढाय नमः शरकान-
नसम्भवाय नमः । कार्तिकेयाय नमः कुमाराय नमः षण्मुखाय
नमः । तारकान्तकाय नमः सेनान्ये नमः ब्रह्मचारिणे नमः वल्ली-
कल्याणसुन्दराय नमः बालाय नमः क्रौञ्चभेदनाय नमः शिखि-
वाहनाय नमः इति षोडशनामभिरभ्यर्च्य । ओं सौं शरवण-
भवाय नमः शैलूषभवाय नमः परिपुरभवाय नमः पकलोलि-
भवाय नमः त्रिपुरभवाय नमः तिकलोलिभवाय नमः शरवणोद्भ-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वाय नमः षण्मुखाय नमः शिखिवाहनाय नमः अभयवरप्रदाय
नमः शक्तिहस्ताय नमः कुक्कुटध्वजाय नमः कुङ्कुमाङ्गाय नमः।
कुमाराय नमः इत्यभ्यर्च्य। धूपदीपं दत्वा। नालिकेरकदलीफल-
गुलताम्बूलानि निवेद्य। ततो दक्षिणवर्धन्यां ओं ह्रीं वल्ल्यास-
नाय नमः ओं ह्रीं वल्लीमूर्तये नमः इत्यासनमूर्तिं विन्यस्य। ध्यानम्॥

191 6 श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
सव्ये लम्बकरां किरीटमकुटां तुङ्गस्तनीकञ्चुकाम्।
अन्योन्यीक्षणसंयुतां शरवणोद्भूतस्य सव्ये स्थितां
मुक्तामाल्यधरां प्रसन्नवदनां वल्लीश्वरीं भावयेत्॥

इति ध्यात्वा। ओं ह्रीं वल्ल्यै नमः इति मूलेनावाह्य। स्थापनादि
कृत्वा। पाद्यादिगन्धपुष्पधूपदीपनैवेद्यं दत्वा। उत्तरवर्धन्यां
ओं श्रीं देवगजासनाय नमः ओं श्रीं देवगजमूर्तये नमः। ध्यानम्॥

पीतामुत्पलधारिणीं शशिमुखीं दिव्याम्बरालङ्कृतां
पीतालङ्करणां करण्डमकुटां सेनानिवामे स्थिताम्।
वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधरां
देवैरर्चितपादुकां शशियुतां देवीं त्रिभङ्गीं भजे॥

इति ध्यात्वा। ओं श्रीं देवगजायै नमः इति मूलेनावाह्य। स्थाप-
नादि कृत्वा। पाद्यादि धूपदीपनैवेद्यं दत्वा। पश्चाद्भोगाङ्गं पूज-
येत्। तद्यथा। कुम्भमूर्तिषु तस्य शिरष्षट्केभ्य ईशानमादाय॥

स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रशेखरम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ॥

इति ध्यात्वा। ओं सों ईशानाय जगद्भवमूर्ध्ने नमः इतीशानदले सम्पूज्य। वक्त्रषट्केभ्यो वक्त्रमादाय —

पीताम्बरोपवीतं च नरं कनकसन्निभम्।

मातुलुङ्गाक्षसूत्रं च दधानं चन्द्रमौलिनम् ॥

192 a इति ध्यात्वा। ओं सें तत्पुरुषाय वचद्भववक्त्राय नमः इति पूर्वदले सम्पूज्य॥ हृत्प्रदेशादघोरमादाय —

खट्वाङ्गखेटं च कपालपाशं वामे दधानं परशुं त्रिशूलम्।

खड्गं च दण्डं विकृतं च भीमं ध्यायेदघोरं भुजगादिभूषम् ॥

इति ध्यात्वा। ओं सुं अघोराय विश्वभुवहृदयाय नमः इति दक्षिणदले सम्पूज्य। वामदेवं गुह्यमण्डलादादाय —

वामं रक्तं सुरक्ताभं मालावस्त्रोपवीतिनम्।

तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥

इति ध्यात्वा ओं सिं वामदेवाय रुद्रभुवगुह्याय नमः इत्युत्तरदलेऽभ्यर्च्य। पादाद्यङ्गात्सद्योजातमादाय —

स्रुवस्रुग्गन्धवस्त्राढ्यं बालाकारं त्रिलोचनम्।

सद्योजातं शशिभृतं वरदाभयपाणिनम् ॥

इति ध्यात्वा ओं सं सद्योजाताय ब्रह्मभुवमूर्तये नमः इति पश्चिमदले सम्पूज्य। सर्वाङ्गमाप्यभुवमादाय —

आप्यं च श्वेतवर्णाढ्यं सर्वलोकोपकारकम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थित्वा रुद्रस्य मकुटं गङ्गायां प्रणमाम्यहम् ॥

इति ध्यात्वा ओं सौं आप्यभुवाय भुवङ्कवसर्वाङ्गाय नमः इति नैऋतदले सम्पूज्य। सर्वज्ञातबीजेभ्यो नेत्रमादाय —

चन्द्रार्कवह्निरूपाणि अभयं वरदान्वितम्।

पद्मस्थानीन्दुधारीणि नेत्राण्येवं विभावयेत् ॥

इतिं ध्यात्वा ओं सौं ब्रह्मभुवनेत्रेभ्यो नमः इतीशानस्योत्तरभागे

192 b सम्पूज्य। सद्भावात्मकहृदयाद्धृदयमादाय —

हृदयं चन्द्रसङ्काशं वराभयकरान्वितम्।

पद्मासनं सोमधरं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा ओं सां जगद्भुवहृदयाय नमः इत्याग्नेयदले सम्पूज्य।

सर्वे गुहतत्वलक्षणम् - शिरश्शिरो देशादादाय —

शिरश्चामीकरप्रख्यमभयं वरदं दधत्।

पद्मासनं चन्द्रचूडं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा। ओं सिं वचद्भुवशिरसे नमः इतीशानदले नेत्रस्योत्तरे सम्पूज्य। शिखां शिखयाहृत्य —

शिखां सिन्धूरवर्णाढ्यामभयं बिभ्रतीश्वरम्।

पद्मासनामिन्दुधरां गुहस्याभिमुखं भजे ॥

इति ध्यात्वा ओं सूं विश्वभुवशिखायै नमः इति नैऋतदले।

परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादादाय —

कवचं भृङ्गसङ्काशं वरदाभयपाणिनम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पद्मस्थं चन्द्रमकुटं गुहस्याभिमुखं भजे ॥

इति ध्यात्वा। ओं सैं रुद्रभुवकवचाय नमः इति वायव्यदले।
प्रतापरूपमस्त्रमस्त्रेभ्य आहृत्य —

दंष्ट्रापिङ्गलवर्णाढ्यं ज्वलत्केशं भयानकम्।
शक्तिं शूलं दधद्भीमं अस्त्रं शत्रुविमर्दनम् ॥

इति ध्यात्वा ओं सः भूर्भुव अस्त्राय नमः पूर्वादिचतुर्दलेषु स-
म्पूज्य। इति प्रथमावरणम् ॥ ततो द्वितीयावरणमारभ्यते।
पूर्वाद्यष्टघटेषु पूर्वकुम्भे ओं हां जयन्तासनाय नमः। ओं हां
193 a जयन्तमूर्तये नमः॥

जयन्तारव्यमेकवक्त्रं अञ्जलीकृतसंयुतम्।
वज्रशक्तिधरं रक्तं गुहस्याभिमुखं भजे ॥

ओं हां जयन्ताय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। आ-
ग्नेयकुम्भे ओं हां अग्निशिखासनाय नमः अग्निशिखमूर्तये नमः॥
ध्यानम् — तेजोरूपमग्निशिखं सर्वाभरणभूषितम्।
वज्रशक्तिधरं चैव गुहस्याभिमुखं भजे ॥

ओं हां अग्निशिखाय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।
याम्ये ओं हां कृत्तिकापुत्रासनाय नमः कृत्तिकापुत्रमूर्तये नमः॥

रक्तवर्णं त्रिणेत्रं च मुक्ताभरणभूषितम्।
कृताञ्जलिपुटं श्यामं गुहस्याभिमुखं भजे ॥

ओं हां कृत्तिकापुत्राय नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नैर्ऋतकुम्भे ओं हां भूतपत्यासनाय नमः भूतपतिमूर्तये नमः॥

भूतं सिन्धूरवर्णाढ्यं गुहस्याभिमुखस्य तु।
वज्रशक्तिधरं देवं कृताञ्जलिपुटान्वितम्॥

ओं हां भूतपतये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। पश्चिम-
कुम्भे ओं हां सेनान्यासनायनमः। सेनानीमूर्तये नमः॥

देवसेनां चतुर्बाहुं श्वेतवर्णं कृताञ्जलिम्।
वज्रशक्तिधरं शान्तं गुहस्याभिमुखं भजे॥

ओं हां सेनान्ये नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा। वायु-
कुम्भे ओं हां गुहासनाय नमः गुहमूर्तये नमः।

तेजोरूपं गुहस्यात्मं मन्दहासं कृताञ्जलिम्।
193b वज्रशक्तिधरं देवं गुहस्याभिमुखं भजे॥

ओं हां गुहाय नमः आवाहनादि धूपदीपनैवेद्यं दत्वा। उत्तरकुम्भे
ओं हां हेमशूलासनाय नमः। हेमशूलमूर्तये नमः॥

हेमशूलं कृष्णवर्णं चतुर्हस्तं कृताञ्जलिम्।
खड्गखेटकसंयुक्तं गुहस्याभिमुखं भजे॥

ओं हां हेमशूलाय नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। ईशा-
नकुम्भे ओं हां विशालाक्षासनाय नमः विशालाक्षमूर्तये नमः॥

सुप्रसन्नं विशालाक्षमञ्जलीकृतसंयुतम्।
पीताम्बरधरं रक्तं गुहस्याभिमुखं भजे॥

ओं हां विशालाक्षाय नमः। आवाहनादि धूपदीपनैवेद्यं दत्वा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततस्तृतीयावरणम् ॥ तद्बहिरावृतपदस्थितकुम्भेषु मध्यकुम्भ-
स्योत्तरकुम्भे ओं हां शकुन्यासनाय नमः शकुनीमूर्तये नमः ॥

शकुनीं कृष्णवर्णां तु मन्दारकुसुमप्रियाम् ।
पीताम्बरधरां क्रूरां खड्गखेटकधारिणीम् ॥

ओं ह्रीं शकुन्यै नमः । आवाहनादि सर्वोपचारैस्सम्पूज्य । मध्य-
कुम्भे ओं हां मयूरासनाय नमः मयूरमूर्तये नमः ॥

चित्रवर्णं बृहत्पुच्छं भुजङ्गोद्धतवक्त्रकम् ।
महाबलं महाकायं मयूरं प्रणमाम्यहम् ॥

ओं हां मयूराय नमः । आवाहनादिभिस्सम्पूज्य । तद्दक्षिणकुम्भे
ओं हां रेवत्यासनाय नमः रेवतीमूर्तये नमः ॥

रेवतीं रक्तवर्णाढ्यां कुन्दपुष्पाभदन्तिकाम् ।
कन्दर्पशरहस्ताब्जां प्रसन्नवदनान्विताम् ॥

194 a ओं हां रेवत्यै नमः । आवाहनादि सर्वोपचारैस्सम्पूज्य । अग्नि-
कुम्भे ओं हां सुदेहासनाय नमः सुदेहमूर्तये नमः ॥

सुदेहं श्यामवर्णं तु सर्वाभरणभूषितम् ।
कृताञ्जलिपुटं चैव द्विनेत्रं रक्तवाससम् ॥

ओं हां सुदेहाय नमः । आवाहनादि सर्वोपचारैस्सम्पूज्य । तत्पश्चि-
मकुम्भे ओं हां पूतासनाय नमः पूतामूर्तये नमः ॥

पूतां महाबलां घोरां पाशाङ्कुशधरान्विताम् ।
रक्ताम्बरधरां रक्तां परगर्वविदारिणीम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं ह्रीं पूतायै नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। तत्पश्चिम-

कुम्भे ओं हां सुमुखासनाय नमः सुमुखमूर्तये नमः॥

सुमुखं रक्तवर्णं च अब्जद्वयकरद्वयम्।

पीताम्बरधरं चैव सर्वाभरणभूषितम्॥

ओं हां सुमुखाय नमः आवाहनादि सर्वोपचारैस्सम्पूज्य। तत्प-

श्चिमकुम्भे ओं हां महापूतासनाय नमः महापूतामूर्तये नमः॥

महापूतां कृष्णवर्णां रक्तवस्त्रधरान्विताम्।

दंष्ट्राकरालवदनां खड्गखेटकधारिणीम्॥

ओं ह्रीं महापूतायै नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। नै-

ऋतकुम्भे ओं हां देवसेनापत्यासनाय नमः देवसेनापतिमूर्तये नमः॥

विद्रुमप्रभसंयुक्तमेकवक्त्रं चतुर्भुजम्।

अभयं ऊरुहस्तं च खड्गखेटकधारिणम्॥

ओं हां देवसेनापतये नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य।

194 b तदुत्तरकुम्भे ओं हां निशीथिन्यासनाय नमः निशीथिनीमूर्तये

नमः॥ निशीथिनी स्वरूपां तु क्रूरनेत्रां महाबलाम्।

कपालशूले बिभ्राणां सर्वाभरणभूषिताम्॥

ओं ह्रीं निशीथिन्यै नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। तदुत्तर-

कुम्भे ओं हां गजेन्द्रासनाय नमः गजेन्द्रमूर्तये नमः॥

गजाननं श्वेतवर्णं तु करभूतसमन्वितम्।

महाबलं महाकायं शूर्पकर्णं विभावयेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां गजेन्द्राय नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। तदुत्तर-

कुम्भे ओं हां मालिन्यासनाय नमः मालिनी मूर्तये नमः॥

मालिनीं श्यामवर्णाढ्यां पाशदण्डौ करे धृताम्।

पीतैराभरणैर्युक्तां रक्ताम्बरधरान्विताम्॥

ओं ह्रीं मालिन्यै नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। वायुकुंभे

ओं हां सुरेशासनाय नमः सुरेशमूर्तये नमः॥

एकवक्त्रं चतुर्बाहुं करण्डमकुटान्वितम्।

अभयं वरदं चैव शक्तिकुक्कुटधारिणम्॥

ओं हां सुरेशाय नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। तत्पूर्व-

कुम्भे ओं हां शीतलासनाय नमः शीतलमूर्तये नमः॥

शीतलां शान्तमनसं मन्दहासां मनोहराम्।

पीताम्बरधरां श्यामां पद्मद्वयकरद्वयाम्॥

ओं ह्रीं शीतलायै नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य। त-

195 a त्पूर्वकुम्भे ओं हां सुमित्रासनाय नमः। सुमित्रमूर्तये नमः॥

द्विभुजं चैकवक्त्रं च सर्वाभरणभूषितम्।

उत्पलं दक्षिणे हस्ते ऊरुहस्तं च वामके॥

ओं हां सुमित्राय नमः। आवाहनादि सर्वोपचारैस्सम्पूज्य।

तत्पूर्वकुम्भे ओं हां भूतरूपासनाय नमः भूतरूपमूर्तये नमः॥

भूतरूपां महाघोरां कृष्णवर्णां महोदराम्।

मुसलायुधसंयुक्तां मुक्तामाल्यविभूषिताम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं ह्रीं भूतरूपायै नमः । आवाहनादिसर्वोपचारैस्सम्पूज्य । ईशा-
नकुम्भे ओं ह्रां क्षेत्रपालासनाय नमः क्षेत्रपालमूर्तये नमः ॥

चतुर्भुजं त्रिणेत्रं च कपालं शूलधारिणम् ।
पाशं डमरुकं चैव वीरदंष्ट्रं जटाधरम् ॥

ओं ह्रां क्षेत्रपालाय नमः । आवाहनादिसर्वोपचारैस्सम्पूज्य । तद्बहि-
रावृते तुरीयावरणम् । पूर्वाद्यष्टदिक्षु इन्द्राय नमः अग्नये नमः ।
यमाय नमः निरृतये नमः वरुणाय नमः वायवे नमः कुबेराय
नमः ईशानाय नमः । तद्दक्षिणे ब्रह्मणे नमः नैरृत्यां विष्णवे नमः ।
तद्बहिरावृते पञ्चमावरणम् । पूर्वाद्यष्टदिक्षु वज्राय नमः शक्तये
नमः दण्डाय नमः खड्गाय नमः पाशाय नमः अङ्कुशाय नमः ।
गदायै नमः त्रिशूलाय नमः । तद्दक्षिणे पद्माय नमः । नैरृत्यां
चक्राय नमः । इति पञ्चमावरणम् ॥ पश्चात्प्राणप्रतिष्ठां कुर्यात् ।
1956 अस्य श्री प्राणप्रतिष्ठा महामन्त्रस्य रुद्रब्रह्माच्युता ऋषयः । ऋग्य-
जुस्सामाथर्वाणि च्छन्दांसि । अखिलचैतन्यरूपिणी प्राणशक्तिः
परा देवता । आं बीजं ह्रीं शक्तिः क्रों कीलकम् । श्रीमत्सुब्रह्मण्ये-
श्वरस्य सशक्तिकस्य सपरिवारस्य प्राणकलाप्रसादसिद्ध्यर्थे जपे
विनियोगः । ह्रामित्यादि कराङ्गन्यासः । ध्यानम् ——

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं त्रिणयनविलसत्पीनवक्षोरुहाढ्या

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

इति ध्यात्वा पञ्चोपचारान् कृत्वा। कुम्भस्य मूर्ध्नि स्पृष्ट्वा जपेत्।
आं ह्रीं क्रों यरलवशषसहों हंसस्सोहमोम्। श्रीमद्वल्ली देवना-
यकीसमेतश्रीसुब्रह्मण्येश्वरस्य प्राणाः इह प्राणस्थिताः। आं ह्रीं
क्रों यरलवशषसहों हंसस्सोहमोम्। श्रीमद्वल्ली देवनायकीस-
मेतश्रीसुब्रह्मण्येश्वरस्य जीव इह स्थितः। आं ह्रीं क्रों यरलव-
शषसहों हंसस्सोहमोम्। श्रीमद्वल्लीदेवनायकीसमेतश्रीसुब्र-
ह्मण्येश्वरस्य जीवतत्वसर्वेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तपृथि-
व्यप्तेजोवाय्वाकाशशब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राण-
196 a वाक्पाणिपादपायूपस्थजीवप्राणा इहैवागत्यास्मिन् कुम्भे श्रीम-
द्वल्लीदेवनायकीसमेतश्रीसुब्रह्मण्येश्वरं सुखं चिरं तिष्ठन्तु
स्वाहा। क्रों ह्रीं आं हंसस्सोहं स्वाहा। इति मूलमन्त्रं द्वादशवारं
जप्त्वा पुनष्षडङ्गध्यानम्। असुनीते पुनरस्मासु चक्षुः पुनः
प्राणमिह नो धेहि भोगं ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते
मृळया नः स्वस्ति। पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुन-
रन्तरिक्षम्। पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां या
स्वस्ति। श्रीवल्लीदेवनायकीसमेतश्रीसुब्रह्मण्याय नमः प्राणान्
प्रतिष्ठापयामि। पश्चात्पुनरावाहनादि धूपदीपनैवेद्यं दत्त्वा। मूले-
न यथाशक्ति जप्त्वा। ततो जयन्तादीन् शकुन्यादीन्विना सर्वेषां
गुहेन सार्धमत्यन्तमैक्यं विभावयेत्। चतुर्दिग्वेदपारायणं कृत्वा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्चात्तत्पूर्वकुण्डे वा स्थले वा विधिवदग्निकार्यं कुर्यात्। [illegible]।
कुण्डस्य दक्षिणभागे उत्तराभिमुखमुपविश्य होमद्रव्यं दिव्य-
दृष्ट्यावलोक्य। कुण्डस्याष्टादशसंस्कारं कुर्यात्। तद्यथा- हृद-
याय नमः निरीक्षणम्। ईशानाय नमः प्रोक्षणम्। अस्त्राय हुं
फडिति कुशैस्ताडनम्। शिरसे नमः अभ्युक्षणम्। अघोराय
196b नमः खननं चोद्धारणम्। ईशानाय नमः अवकिरणम्। वाम-
देवाय नमः पूरणम्। सद्योजाताय नमः समीकरणम्। शिखायै
नमः सेचनम्। कवचाय नमः अवकुण्ठनम्। नेत्राय नमः मार्ज-
नम्। तत्पुरुषाय नमः समालेपनम्। पश्चिमे ओं ह्रां निवृत्तिक-
लायै नमः। उत्तरे ओं ह्रीं प्रतिष्ठाकलायै नमः। याम्ये ओं ह्रूं
विद्याकलायै नमः। पूर्वे ओं ह्रैं शान्तिकलायै नमः। मध्ये ओं ह्रौं
शान्त्यतीतकलायै नमः। इत्यभ्यर्च्य। नाभ्यां ओं ह्रां बीजमुखाय
नमः इति त्रिसूत्रवेष्टनम्। तस्मिन्मूलेनाभ्यर्च्य। प्रागग्रामुदगग्रं
च रेखात्रयं ब्रह्मजज्ञानमन्त्रैषट्केण कुर्यात्। तद्यथा - ब्रह्मजज्ञानं
प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः स बुध्न्यामुपमा अस्य
विष्ठास्सतश्चयोनिमसतश्च विवः। इति कुण्डमध्ये पश्चिमादि-
पूर्वान्तमुल्लिख्य। नागे सुपर्णमुपयत्पतन्तं हृदा येनन्तो अभ्य-
चक्षत त्वाः हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुन्यं पुरण्यं।
तद्दक्षिणे पश्चिमादि पूर्वान्तमुल्लिख्य। आप्यायस्व समेतु ते वि-
श्वतस्सोम वृष्ण्यियं भवा वाजस्य सङ्गथे। इति कुण्डस्योत्तरे पश्चिमादि-

पूर्वान्तमुल्लिख्य । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो
विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु । इति कुण्डमध्ये द-
197 a क्षिणोत्तरान्तमुल्लिख्य । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे । इति तत्पश्चिमे दक्षिणादुत्तरान्तमुल्लिख्य ।
इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसङ्गिरः । रथितमं रथीनाम्
वाजानां सत्पतिं पतिम् । कुण्डस्य पूर्वे दक्षिणादुत्तरान्तमुल्लिख्य
शकलं निरस्य । अप उपस्पृश्य । कुण्डस्य मध्यरेखायां ब्रह्मणे
नमः दक्षिणरेखायां यमाय नमः । उत्तररेखायां सोमाय नमः ।
पुनर्मध्यरेखायां रुद्राय नमः । पश्चिमरेखायां विष्णवे नमः । पूर्व-
रेखायामिन्द्राय नमः । इत्यभ्यर्च्य । कुण्डमध्ये ओं भूर्भुव अस्त्राय
नमः इत्युभयत्रिशूलाकृतिना वज्रीकरणम् । पूर्वोत्तराग्रकुश-
द्वयेन चतुष्पथन्यासं कुण्डस्याभ्यन्तरैः अक्षवाटं रुद्रभुवकव-
चाय नम इति विधाय । तन्नाभौ कुशविष्टरद्वयं जगद्भुवहृद-
याय नमः इति निधाय । वागीश्वरं वागीश्वरीं सम्प्रपूजयेत् ।
तद्यथा - पश्चिमकूर्चे ओं हां वागीश्वरासनाय नमः वागीश्वर-
मूर्तये नमः ॥ ध्यानम् —

पञ्चवक्त्रं त्रिणेत्रं च चतुर्हस्तं द्विपादकम् ।
श्वेतवर्णमिति ज्ञेयमभयं वरदं तथा ॥
अक्षमालां च वामे तु दक्षहस्ते तु कूर्चकम् ।
वाचं वागीश्वरं चैव बिन्दुनादसमन्वितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा। ओं हां वागीश्वराय नमः इति मूलेनावाह्य। पाद्या-
द्युपचारैस्सम्पूज्य। पूर्वकूर्चे ओं ह्रीं वागीश्वर्यासनाय नमः वागी-
श्वरीमूर्तये नमः। ध्यानम् —

अतसीपुष्पसङ्काशां नानाभरणभूषिताम्।
द्विभुजां पीनवक्षोजां ऋतुस्नातां सुयौवनाम्॥
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलम्बिताम्।
बिन्दु वागीश्वरी प्रोक्तं नादं वागीश्वरं तथा॥

इति ध्यात्वा। ओं ह्रीं वागीश्वर्यै नमः इति मूलेनावाह्य। पाद्या-
द्युपचारैस्सम्पूज्य। धूपदीपनैवेद्यं दत्वा। सूर्यकान्तजं वारणिजं
वा श्रोत्रियाग्निं वा ताम्रपात्रेण वा मृच्छरावेण वा गृहीत्वा। कुण्ड-
स्य प्राच्यां दिशि निधाय। तस्मिन्नग्नौ क्रव्यादांशं पर्यग्निकरणं
नैरृतौ परिहृत्य। तस्मिन्नग्नौ निरीक्षणादि पञ्चशुद्धीर्विधाय।
पात्रेणैकेन ओं हां हुं वह्निचैतन्याय नमः इति संयोजयित्वा। ओं
हूं वह्निचैतन्याय नमः इत्यभ्यर्च्य। रुद्रभुवकवचाय नमः इति
निस्सार्य योजयेत्। समग्नित्रयमेकीकृतं विभाव्य। ओं सों ईशा-
नाय जगद्भुवाय नमः। ओं सें तत्पुरुषाय वचद्भुवाय नमः। ओं
सुं अघोराय विश्वभुवाय नमः। ओं सिं वामदेवाय रुद्रभुवाय
नमः। ओं सं सद्योजाताय ब्रह्मभुवाय नमः। ओं सौं आप्यभु-
वाय भुवद्भुवाय नमः इत्यभ्यर्च्य। अयं कुमारो जरां जयतु
दीर्घमायुरस्मै त्वं स्तनपृच्छायायुर्वर्चो यशो बलं। इत्यभिमन्त्र्य।

197 b ^ मन्त्रेण समाभ्यग्नौ सङ्गृह्य, ओं हां हं हं हं वह्निमूर्तये नमः इति भ्रूमध्ये ब्रेन्द्रवाग्निना सङ्गृह्य, पात्रस्थेऽग्नौ संयोज्य

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

198 a धेनुमुद्रयामृतीकृत्य। ओं भूर्भुव अस्त्राय नम इति संरक्ष्य।
रुद्रभुवकवचाय नम इत्यवकुण्ठ्य। स्वयं भूमिष्ठजानुः कुण्डे
अग्निं त्रिः परिभ्राम्य। तं गृहबीजमिति ध्यात्वा। योनिमार्गेण
कुण्डमध्ये स्वाभिमुखं संस्थाप्य। सदर्भमिन्धनमग्नौ निधाय।
ततो दर्भाग्रेण जगद्भुवहृदयाय नमः इति वागीश्वरेण वागी-
श्वरीं गर्भे निक्षिप्यमाणं गर्भाधानं विभाव्य। इन्धनेन जग-
द्भुवहृदयाय नमः इत्यग्निं नाभिसमीपे परिसमूह्य। पुनः जग-
द्भुवहृदयाय नमः प्रतिपरिधानं शौचाचमनं दत्वा। गर्भरक्षार्थं
देव्याः करे शराणुना ओं सः भूर्भुव अस्त्राय नमः इति गर्भक-
ङ्कणं विभाव्य। ओं सं सद्योजाताय गर्भाग्नये नमः इत्यग्निं स-
म्पूज्य। जगद्भुवहृदयेनाहुतित्रयं तिलैर्दत्वा। तृतीये मासि
पुंसवनार्थं ओं सिं वामदेवाय रुद्रभुवाय नमः इति सम्पूज्य।
ओं सिं वचद्भुवशिरसे स्वाहा इति त्र्याहुतिं तिलैर्दत्वा। जलबि-
न्दुन्निक्षिप्य। षष्ठे मासि सीमन्तोन्नयनार्थं ओं सुं अघोराय वि-
श्वभुवाय नमः इति सम्पूज्य। ओं सुं बिश्वभुवशिखायै स्वाहा
इति त्र्याहुतिं तिलैर्दत्वा ततः ओं सुं विश्वभुवशिखायै नमः
198 b इति वक्त्राङ्गकल्पनां विभाव्य। दशमे मासि गर्भतः उद्भूतमग्निं
विभाव्य जातकर्मार्थं ओं सें तत्पुरुषाय वचद्भुवाय नमः इति स-
म्पूज्य। ओं सैं रुद्रभुवकवचाय स्वाहा इति त्र्याहुतिं तिलै-
र्दत्वा। गर्भमलापनुत्यै स्नानार्थं जलेनाग्निं सम्प्रोक्ष्य। देव्याः पाणौ

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वर्णकङ्कणं जगद्भुवहृदयाय नमः इति दत्वा। सद्यस्सूतकनाशाय ओं सः भूर्भुव अस्त्राय नमः इत्यग्निं सम्प्रोक्ष्य। अस्त्रकवचाभ्यां नमः इति कुण्डबाह्ये जलमभ्युक्ष्य। मेखलायां सदर्भहस्तेनाताड्य। बालाग्निं भावयेत्। ध्यानम् —

द्विमुखं चैकहृदयं चतुश्श्रोत्रं द्विनासिकम्।
आस्यद्वयं च षण्णेत्रं पिङ्गलं सप्तहस्तकम्॥
त्रिमेखलं त्रिपादं च सप्तजिह्वं प्रकीर्तितम्।
चतुश्शृङ्गं वृषारूढं बालादित्यसमप्रभम्॥
उपवीतसमायुक्तं जटामकुटमण्डितम्।
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके॥
स्रुक्स्रुवौ चाक्षमालां च शक्तिं दक्षिणतः करे।
तोमरं व्यजनं चैव घृतपात्रं च वामके॥
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा।
अतिरक्ता बहुरूपा सप्तजिह्वाः प्रकीर्तिताः॥
हिरण्यादिचतस्रस्तु जिह्वा दक्षिणवक्त्रके।
199 a तिस्रस्तु सुप्रभादीनां जिह्वा वै वामवक्त्रके॥
हिरण्या वारुणे जिह्वा कनका मध्यमे स्थिता।
रक्ता चोत्तरतो जिह्वा कृष्णा याम्ये दिशि स्थिता॥
सुप्रभा पूर्वजिह्वा स्यादतिरक्तानले स्थिता।
बहुरूपेशजिह्वा स्याज्जिह्वास्थानं प्रकीर्तितम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वसिद्धिप्रदं ह्येतद्बालवह्निस्वरूपकम् ॥

इति ध्यात्वा । इत्यग्निं मध्ये पश्चिमाननासीनं विभाव्य । तं ईशा-
नाय जगद्भवाय नमः इति सम्पूज्य । ओं सः भूर्भुव अस्माय
स्वाहा इति त्र्याहुतिं तिलैर्दत्त्वा । ओं ह्रां बालाग्नये नमः इति
नामकरणं कृत्वा । तस्योपस्थानाय 'जुष्टो दमूना अतिथिर्दु-
रोण इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्ने अभियुजो
विहत्या शत्रूयतामाभरा भोजनानि ॥' सदर्भमिन्धनमग्नौ नि-
क्षिप्य । अग्निरक्षार्थं मध्यमेखलायां उत्तरपूर्वाग्रान् कुशविष्ट-
रान् प्रागादिवेदादिक्रमेणास्तीर्य । 'अग्निमीळे पुरोहितं यज्ञस्य
देवमृत्विजम् । होतारं रत्नधातमम् ॥' इति मध्यमेखलां पूर्वे ।
'इषेत्वोर्जे त्वा वायवस्थो पायवस्थः देवो वस्सविता प्रार्पयतु
श्रेष्ठतमाय कर्मणे' इति दक्षिणे । 'अग्न आयाहि वीतये गृणा-
नो हव्यदातये । नि होता तत्स बर्हिषि' इति पश्चिमे । 'शं नो देवी-
रभिष्टये आपो भवन्तु पीतये शं योरभिस्रवन्तु नः ।' इत्युत्तरे ।
199b पश्चादधोमेखलायां प्रागग्रानुदगग्रान् दश दर्भान् देवस्य त्वेत्या-
दिमन्त्रेण पूर्वादिदिक्षु संस्तीर्य । पूर्वे 'देवस्य त्वा सवितुः प्र-
सवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां' परिस्तृणामि । दक्षि-
णतः भूर्भुवस्सुवः परिस्तरणामि । पश्चिमे 'उद्वयन्तमसस्परि
पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्'
परिस्तरणामि । उत्तरतः 'अग्न आयाहि वीतये गृणानो हव्यदातये ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निहोता तत्स बर्हिषि ' परिस्तरणामि । दक्षिणानुत्तरानुत्तरानध-
रान् कृत्वा । स्वस्य वामभागे त्रिभिर्दर्भैः पात्रासनम् । स्वस्य दक्षि-
णे त्रिभिर्ब्रह्मासनम् । पात्रासनोत्तरे प्रणीतासनं च विन्यस्य ।
पात्रासनमूले आज्यस्थालीं स्रुक्स्रुवं च प्रणीतापात्रं चरुस्थालीं
प्रोक्षणीं चेध्मान् परिधींश्च क्रमेणाधोमुखान् साधयित्वा दर्भैः
प्रच्छाद्य अन्यानि होमद्रव्याणि तद्वामभागे कुशोपरि न्यस्य ।
दर्भद्वयेन द्वादशायां तिरः पवित्रं कृत्वा । तेषु पात्रेषु प्रोक्षणी-
पात्रमादाय स्वाग्रे निधाय तिरःपवित्रं अक्षतान्निधाय जलमापू-
200 a र्य । हस्तद्वयेनाङ्गुष्ठानामिकाभ्यां अग्निमुखं त्रिरुत्पूय पात्राण्यु-
त्तानानि कृत्वा सपवित्रेण पाणिना प्रोक्ष्य । तत्पात्रं सव्ये निधाय ।
होतुर्दक्षिणतो ब्रह्मासने त्रिदर्भकूर्चं निधाय । अस्मिन् कूर्चे
ब्रह्मन् ब्रह्मासि नमस्ते ब्रह्मन् ब्रह्मणे ब्रह्मणे नमः ब्रह्माणमा-
वाहयामि । ब्रह्मणे नमः सकलाराधनैः स्वर्चितम् । सप्तदर्भकू-
र्चेन प्रणीताप्रणयनम् । प्रणीतापात्रमादाय स्वाग्रे निधाय कूर्चं
निक्षिप्य । आपो वा इति मन्त्रेण जलमापूर्य पुष्पाक्षतं निक्षिप्य ।
मूलमन्त्रेण त्रिरुत्पूय । ऊर्ध्वयोर्दर्भयुतान्नासिकान्तमुत्थाप्य ।
वरुणोऽसि धृतव्रतो वारुणमसि इति मन्त्रेण होतुर्वामभागे प्रणी-
तासनोपरि निधाय । मूलेनाभ्यर्च्य । ' तद्विष्णोः परमं पदं सदा
पश्यन्ति सूरयः । दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृ-
वांसस्समिन्धते । विष्णोर्यत्परमं पदम् ।' इति मन्त्रेण जप्त्वा । ततः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्रुक्स्रुवौ सकुशौ ऊर्ध्ववदनावधोमुखौ निरीक्षणादिचतुस्सं-
स्कारशुद्धौ गृहीत्वा । काष्ठत्वङ्गिरसनाय हृदयेनाग्नौ प्रताप्य हुंफ-
200 b डन्तास्त्रेण कुशाग्रं मध्यमूलैः स्रुक्स्रुवाग्रं मध्यमूलानि स्पृष्ट्वा ।
तत्क्रमेण ओं हुं शिवतत्वाय नमः । ओं हुं शिवतत्वाधिपतये रु-
द्राय नमः । ओं हिं विद्यातत्वाय नमः । ओं हिं विद्यातत्वाधिपतये
विष्णवे नमः । ओं हां आत्मतत्वाय नमः । ओं हां आत्मतत्वाधिपतये
ब्रह्मणे नमः । इति सम्पूज्य । तं कुशमग्नौ निक्षिप्य । कवचेन त्रिसू-
त्रेण कर्णे संवेष्ट्य । स्वदक्षिणे कुशोपरि मूलेन संस्थाप्य । स्रुचि
वल्लीं स्रुवे स्कन्दं न्यस्य । जगद्भुव हृदयाय नमः इति गजपुष्पा-
दिना सम्पूजयेत् । चरुस्थाल्यां चरुं निक्षिप्य । कुण्डस्य पश्चिमे
भागे स्वाग्रे निधाय । तदुपरि कूर्चं निक्षिप्य । श्री सुब्रह्मण्याय
त्वा जुष्टं निर्वपामि । त्रिभिः श्री सुब्रह्मण्याय त्वा जुष्टं प्रोक्ष्यामि ।
इति प्रोक्षणीजलेन त्रिः प्रोक्ष्य । स्रुवेणाज्यमादाय हविरभिघार्य ।
मेक्षणेनोल्लिख्य । आज्यस्थाल्यां गव्यमाज्यमापूर्य कुण्डपश्चिम-
मेखलोपरि विन्यस्य । निरीक्षणादि कृत्वा । कुण्डस्योपरि अग्नौ
प्रताप्य । कुशाग्रेणाज्यं 'ब्रह्मजज्ञानं प्रथमं पुरस्तात् द्विसीमत-
स्सुरुचो वेन आवः स बुध्या मुपमा अस्य विष्ठाश्शतश्चयोनिमस-
तश्चविव ·· स्वाहा । ब्रह्मण इदं न मम । आज्यमैशान्यामग्नौ प्र-
201 a ताप्य । मेखलोपरि न्यस्य । कुशाग्रेणाज्यबिन्दून् 'इदं विष्णुर्वि-
चक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे' स्वाहा । विष्णवे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इदं न मम। पुनराज्यमैशान्यामग्नौ प्रताप्य। नाभौ धृत्वा। कुशाग्रे-
णाज्यबिन्दून् ' एषामीशे पशुपतिः पशूनां चतुष्पदामथ च द्विपदां
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषाय यजमानस्य सन्तु स्वा-
हा। ईशानायेदं न मम। ततः दर्भद्वयेनाभिद्योत्य दर्भाग्रद्वयं प्र-
च्छिद्य। प्रक्षाल्य प्रत्युस्य। युग्मेन दर्भेण परिभ्राम्य क्षिपेत्। प्रा-
देशमात्रं दर्भाग्रद्वयनिर्मितं मध्यग्रन्थिपवित्रकं अङ्गुष्ठानामिका-
भ्यां पुनराघारं त्रिरुत्पूय। पवित्रग्रन्थिं विस्रस्य। अग्नावनुप्रह-
रति। पुनर्मध्यग्रन्थिपवित्रद्वयं प्रणवेन घृतमध्ये न्यस्य। आ-
ज्यस्थाल्यामिडापिङ्गलां सुषुम्नां विभाव्य। आज्यं त्रिभागं वि-
भज्य। परिधीनादाय स्थविष्ठो मध्यमः अणीयान् द्राघीयान्
दक्षिणोत्तरः मध्यमं परिधिमुपस्पृश्य। आग्नेये ऐशान्यां च हृ-
दयशिरसाधारौ समिधौ निधाय। अनूयाजसमिधमेकां प्रणी-
तोर्ध्वे निधाय। जुषस्वेनेनाभिमन्त्र्य। जुषस्वन समिधमग्नौ अध्य-
शोचा बृहद्यजतं धूमम्‌ृण्वन्नुपस्पृशद्दिव्यं सानस्तूपैसं रश्मिभि-
स्ततनु सूर्यस्य। इत्यभिमन्त्र्य। अदितेनुमन्यस्व सरस्वतेनुम-
201b न्यस्व। देव सवितुः प्रसुव। इति समन्तात् परिषिच्य। ऊर्ध्वमे-
खलायां पूर्वे ओं हां ब्रह्मणे नमः दक्षिणे विष्णवे नमः। पश्चिमे
रुद्राय नमः। उत्तरे ईशानाय नमः। तस्य मेखलायां पूर्वाद्यष्टदिक्षु
कुण्डमध्ये अग्नये नमः। पूर्वादिषु जातवेदसे नमः सहोजसे नमः
अजिराप्रभवे नमः वैश्वानराय नमः। नर्यापसे नमः पङ्क्तिराधसे नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विसर्पिणे नमः। यज्ञपुरुषाय नमः इति सम्पूज्य। मध्यमेखलायां
पूर्वाद्यष्टदिक्षु ओं हां जयन्ताय नमः अग्निशिखाय नमः कृत्तिका-
पुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय नमः हेमशूला-
य नमः विशालाक्षाय नमः इत्यभ्यर्च्य। अधोमेखलायां पूर्वाद्यष्ट-
दिक्षु ओं हां इन्द्राय नमः अग्नये नमः यमाय नमः निरृतये
नमः वरुणाय नमः वायवे नमः कुबे सोमाय नमः ईशानाय नमः
इति सम्पूज्य। धूपदीपनैवेद्यं दत्वा। हे लोकपालाः विघ्नसङ्घातं
निवार्य बालकं पालयिष्यथेति गुहाज्ञां श्रावयेत्। तत इध्ममादा-
याभिघार्य। एतस्मिन् प्रायश्चित्तहोमकर्मण्यकाराद्यैः स्वरैः षोड-
शाङ्गुलानिध्मान् पलाशान् जुहुयात्। घृतं मूलेन त्र्याहुतिं हुत्वा।
पश्चादग्नये स्वाहेति त्र्याहुतिं हुत्वा। ततः नेत्रोद्धरणार्थं स्रुवेणाज्यं
दक्षिणाद्गृहीत्वा। अग्नये स्वाहेति मनसा ध्यायन् उत्तरपरिधिं संस्पृ-
202a श्य। क्षणया सन्ततं इत्यग्नि दक्षनेत्रे हुत्वा। अग्नये इदं न मम।
वामभागमाज्यमादाय। सोमाय स्वाहेत्युपांशु दक्षिणपरिधिस-
न्धिं संस्पृश्य। वामनेत्रे हुत्वा। स्रुवेणाज्यं मध्यमादाय ओं हां
अग्नीषोमाभ्यां स्वाहा। इत्यग्निमध्यनेत्रे हुत्वा। अग्नीषोमाभ्या-
मिदं न मम। किञ्चिदीशाने स्रुवेणाज्यमादाय अग्नये स्विष्टकृते
स्वाहा। अग्निरीशाने हुत्वा। अग्नये स्विष्टकृत इदं न मम शुक्लपक्षे।
कृष्णपक्षे तु पूर्वं सोमाय स्वाहा पश्चादग्नये स्वाहा। विज्ञायते चू-
डान्तमुपनयनसंस्कारार्थं अग्निं हृत्पद्मे द्वादशगृहीतेनाज्येन मूल-

मन्त्रं हृदयसम्पुटितं वौषडन्तमूलेन पूर्णां दद्यात्। अनुस्रुवेणाज्यं
स्रुचि सम्पूर्य। तदग्रे पुष्पं दत्त्वा। वामदक्षिणहस्ताभ्यां कुशाभ्या-
मधोमुखस्रुवं शंखसन्निभमुद्रया गृहीत्वोत्थाय। ऋजुकायकः
समपादसमदृष्टिः स्वस्थिरः दन्तैर्दन्तानयस्पृशन् गुरूपदिष्टमा-
र्गेण मन्त्रमुच्चरन् यवप्रमाणेनाविच्छिन्नधारया समस्तमाज्यं
वह्नौ क्षिपेत्। इति पूर्णां विधायोपविश्य। पश्चादाज्यहोमं जु-
होति। सौम्ये ओं हें तत्पुरुषाय वचद्भुवाय स्वाहा। याम्ये ओं सुं
अघोराय विश्वभुवाय स्वाहा। ऐन्द्रे ओं सूं विश्वभुवाधीशायै स्वाहा।
पश्चिमे ब्रह्मभुवनेत्रेभ्यः स्वाहा। मध्ये ओं सुं सुब्रह्मण्याय स्वाहा।
2026 पश्चात् मुखाहुतिं जुहोति। युक्तो वह जातवेद पुरस्तादग्ने विद्धि
कर्म क्रियमाणं यथेदं त्वद्भिषग्भेषजस्याधिकर्ता त्वयागान-
श्वान् पुरुषान् सनेमि स्वाहा। अग्नये जातवेदसे विचर्षण इदं
न मम। चतस्र आशाः प्रचरन्त्वग्नय इमं नो यज्ञं नयतु प्र-
जानन् घृतं पिन्वन्नजरं सुवीरं ब्रह्म समुद्भवत्याहुतीनां स्वा-
हा। घृतं पिन्वते ब्रह्मण इदं न मम। आनो भद्राः क्रतवो यन्तु
विश्वतो दब्धासो अपरितास उद्भिदः। देवानो यथा सदमृद्धये
आसन्नप्रायुवो रक्षितारो दिवे दिवे स्वाहा। अप्रयुभ्यो रक्षोभ्यो
देवेभ्य इदं न मम। विरूपाक्षमाविबाधिष्ठा विबाधिताः निरृत्यै
त्वा पुत्रमाहुस्सनः कर्माणि साधय स्वाहा। निरृतिपुत्राय विरू-
पाक्षायेदं न मम। विरूपाक्षमहं यजे निजंघं शबलोदरम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यो मायं परिबाधते श्रियै पुष्ट्यै च नित्यधा तस्मै स्वाहा। विरू-
पाक्षाय श्रिया इदं न मम। यातिरश्चीनि पद्यसेहं विधरणी-
ति तां त्वा घृतस्य धारयाग्नौ संराधनीं यजे स्वाहा। अग्नये सं-
राधन्या इदं न मम। संराधन्यै देव्यै स्वाहा। संराधन्यै देव्या
इदं न मम। प्रसादन्यै देव्यै स्वाहा। प्रसादन्यै देव्या इदं न
मम। ओं भूः स्वाहा अग्नये इदं न मम। ओं भुवः स्वाहा वायव
203 a इदं न मम। ओं सुवः स्वाहा सूर्याये दं न मम। ओं भूर्भुवः स्वः
स्वाहा प्रजापतये इदं न मम। सद्योजातं प्रपद्यामि सद्योजाता-
य वै नमः। भवे भवेनाति भवे भजस्व मां भवोद्भवाय नमः
स्वाहा। सद्योजातायेदं न मम। वामदेवाय नमो ज्येष्ठाय नमः
श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बल-
विकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतद-
मनाय नमो मनोन्मनाय नमः स्वाहा। वामदेवायेदं न मम।
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः शर्व सर्वेभ्यो
नमस्ते अस्तु रुद्ररूपेभ्यो नमः स्वाहा। अघोरायेदं न मम।
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्
स्वाहा। तत्पुरुषायेदं न मम। ईशानस्सर्वविद्यानामीश्वरस्स-
र्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु
सदाशिवों स्वाहा। ईशानायेदं न मम। अग्निर्मूर्धा दिवः ककु-
त्पतिः पृथिव्या अयं अपां रेतांसि जिन्वति स्वाहा अग्नये इदं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न मम। अग्निर्मे वाचि तश्रितः वाग् हृदये हृदयं मयि। अहम-
मृते अमृतं ब्रह्मणि स्वाहा। अग्नय इदं न मम। अग्निर्मूर्धानं
दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निं कविं सम्राज-
मदितिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा। मूर्धानायेदं
203 b न मम। या ते रुद्र शिवा तनूरघोरा पापनाशिनी। तयानस्तनु-
वा शन्तमया गिरिशन्ताभिचाकशीहि स्वाहा। रुद्रायेदं न मम।
मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजा अमृतेना-
भिवस्तां उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनुजन्तु देवाः
स्वाहा। सोमायेदं न मम। त्रियम्बकं यजामहे सुगन्धिं पुष्टि-
वर्धनं उर्वारुकमिव बन्धनान्मृत्योर्मृक्षीय मामृतात्स्वाहा।
त्रियम्बकायेदं न मम। प्रमुञ्च धन्वनस्त्वं उभयो रार्त्नियोर्ज्यां
याश्च ते अस्तु इषवः परा ता भगवो वपा स्वाहा। रुद्रायेदं न मम।
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रस्सन्महो
नमः स्वाहा। रुद्रायेदं न मम। कद्रुद्राय प्रचेतसे मीढुष्टमाय
तव्यसे। वेशेम शन्तमगँ हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय
नमो अस्तु स्वाहा। रुद्रायेदं न मम। विश्वं भूतं भुवनं चित्रं
बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय
नमो अस्तु स्वाहा। रुद्रायेदं न मम। गौरी मिमाय सलिलानि
तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभू-
वुषी सहस्राक्षरा परमे व्योमन् स्वाहा। गौर्या इदं न मम।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अयं कुमारो जरां जयतु दीर्घमायु यस्मै त्वं स्तनप्रछायायुर्वि-
र्चो यशो बलं स्वाहा सुब्रह्मण्यायेदं न मम । ओं ह्रीं वल्ल्यै स्वाहा
204 a वल्ल्या इदं न मम । ओं श्रीं देवगजायै स्वाहा । देवगजायै इदं
न मम । ओं सौं आप्यभुवाय भुवद्भुवाय स्वाहा । ओं सं सद्यो-
जाताय ब्रह्मभुवाय स्वाहा । ओं सिं वामदेवाय रुद्रभुवाय स्वाहा ।
ओं सुं अघोराय विश्वभुवाय स्वाहा । ओं सें तत्पुरुषाय वचद्भु-
वाय स्वाहा । ओं सों ईशानाय जगद्भुवाय स्वाहा । इति प्रत्येकं
पञ्च पञ्चाहुतीर्हुत्वा । वक्त्रसन्धानार्थं ओं हं हिं सद्योजातवामदे-
वाभ्यां स्वाहा । ओं हिं हुं वामदेवाघोराभ्यां स्वाहा । ओं हुं हें अ-
घोरतत्पुरुषाभ्यां स्वाहा । ओं हें हों तत्पुरुषेशानाभ्यां स्वाहा । ओं
सों सं जगद्भुववचद्भुवाभ्यां स्वाहा । ओं सें सुं वचद्भुवविश्वभु-
वाभ्यां स्वाहा । ओं सुं सिं विश्वभुवरुद्रभुवाभ्यां स्वाहा । ओं सिं
सं रुद्रभुवब्रह्मभुवाभ्यां स्वाहा । ओं सौं आप्यभुवभुवद्भुवाभ्यां
स्वाहा । इति वक्त्रसन्धानम् । जिह्वासन्धानार्थं हिरण्यकनका-
भ्यां स्वाहा । रक्ताकृष्णाभ्यां स्वाहा । कृष्णासुप्रभाभ्यां स्वाहा । सु-
प्रभातिरक्ताभ्यां स्वाहा । अतिरक्ताबहुरूपाभ्यां स्वाहा । ओं हं
हिं हुं हें हों सद्योजातवामदेवाघोरतत्पुरुषेशानेभ्यः स्वाहा । ओं
204 b हों हें हुं हिं हं ईशानतत्पुरुषाघोरवामदेवसद्योजातेभ्यः स्वाहा ।
ओं सौं सं सिं सुं सें सों भुवद्भुवब्रह्मभुवरुद्रभुवविश्वभुववच-
द्भुवजगद्भुवेभ्यः स्वाहा । ओं सों सें सुं सिं सं जगद्भुववचद्भुव विश्व-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भुवरुद्र भुवब्रह्म भुवभुवद्भवेभ्यः स्वाहा। इत्यग्निं दिशो वायु-
गतां नैऋतेशानगतां घृतधारां जुहुयात्। पश्चादग्नये स्वाहेति
पञ्चाहुतिभिरन्नप्राशनम्। ओं सं सद्योजाताय ब्रह्मभुवाय
स्वाहेति त्र्याहुत्या चौलम्। ओं सिं वामदेवाय रुद्रभुवाय स्वाहे-
ति सप्ताहुतिभिरुपनयनम्। ओं सुं अघोराय विश्वभुवाय स्वा-
हेति त्र्याहुत्या व्रतम्। ओं सें तत्पुरुषाय वचद्भवाय स्वाहेति प-
ञ्चाहुतिभ्यस्समावर्तनम्। ओं सों ईशानाय जगद्भवाय स्वाहेति
त्र्याहुत्या वैवाह्यं कृत्वा। ततो नामकरणार्थं वागीश्वरं वागीश्वरीं
सम्पूज्य विसृज्य। बालाग्निहृदये गुहाग्निं ध्यायेत्। तद्यथा —
ओं सां गुहाग्न्यासनाय नमः गुहाग्निमूर्तये नमः। ध्यानम् —

अनलशतसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गदण्डौ च सव्ये।
वरदमनलखेटं ह्यङ्कुशं स्रुक्च वामे
दधतमृषभसंस्थं भावयेयं गुहाग्निम्॥

ओं ह्रां ह्रीं ह्रूं गुहाग्नये नमः इति मूलेनावाह्य। उपचारैस्सम्पूज्य।
'त्वमग्ने मैश्वरं तेजः पवमाने परं यतः।'
205 a इति मनसा ध्यात्वा। ओं ह्रीं गुहाग्नये स्वाहा इत्याहुतित्रयं हुत्वा।
तदावृतदेवानामिन्द्रादीशानान्तं हुत्वा पश्चात्कुण्डमध्ये ओं स्क-
न्दासनाय नमः स्कन्दमूर्तये नमः। ध्यानम् —

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहनम् ॥

इति ध्यात्वा ओं सुं सुब्रह्मण्यशरवणभवाय नमः इति मूलेन कुण्डाग्निमध्ये श्रीसुब्रह्मण्यमावाहयामि इत्यावाह्य उपचारैस्सम्पूज्य। ओं ह्रीं वल्ल्यै नमः। ओं श्रीं देवगजासनायै नमः। इति शक्तिद्वयं सम्पूज्य। तदावृतदेवानां जयन्ताय नमः अग्निशिखाय नमः कृत्तिकापुत्राय नमः भूतपतये नमः सेनान्ये नमः गुहाय नमः हेमशूलाय नमः विशालाक्षाय नमः इत्यावृतदेवानभ्यर्च्य। पाद्याद्युपचारैस्सम्पूज्य। पश्चात्पूर्णां जुहुयात्। तद्यथा- स्रुवेण स्रुग्गतिमाज्येनापूर्य। पुष्करोपर्यधोमुखं स्रुवं कृत्वा। तदग्रे पुष्पं दत्वा वामदक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां उरसव्येन संलग्नौ तावुभावुपादाय समपादस्समुत्थायोर्ध्वकायो नाभ्यां तिर्यग्विधाय स्रुगग्रदत्तदृष्टिर्वौषडन्तमूलं प्लुतमुच्चार्य वामस्तनान्तं स्रुङ्मूलमानीय। घृतधारां बिन्दुस्थानाद्विनिस्सृतामभृतधारामिति संस्मरन् यवप्रमाणेनाविच्छिन्नधारया समस्तमाज्यं

205 (- वह्नौ क्षिपेत्। इति पूर्णां दत्वा। ततः कुण्डस्य मूर्तिमाधारशक्त्यादि सम्पूज्य ध्यानपुरस्सरमावाहनादि सर्वोपचारैस्सम्पूज्य स्कन्दमूलेनाज्याहुतिं हुत्वा समिदन्नाज्याहुतिं मूलमन्त्रेणाष्टोत्तरशतं जुहुयात्। ततो वल्लीदेवगजामूलमन्त्रेण समिदन्नाज्याहुतिं पञ्चविंशतिवारं प्रत्येकं हुत्वा। द्रव्यं प्रति व्याहृतिभिर्हुत्वा। पश्चाद्विशेषद्रव्यैश्च प्रत्येकं पञ्चविंशतिवारं हुत्वा। तद्यथा - ~~[illegible]~~

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समिधा सद्यमन्त्रेण आज्यं वामेन होमयेत्।
अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु ॥
सिद्धार्थानीशमन्त्रेण हृदयेन यवं हुवेत्।
तिलं च शिरसा हुत्वा मुद्गं च शिखया हुनेत् ॥
कवचेन हुनेन्माषं सक्तुर्नेत्रेण हूयते।
कदलीफलमस्त्रेण अपूपं मूलमन्त्रतः ॥
अयं कुमारमन्त्रेण नालिकेरं हुनेत्क्रमात्।
चणकं च गुहास्त्रेण निष्पावं रुद्रमन्त्रतः ॥
आर्द्रकं गौरिमन्त्रेण कुलुत्थं स्कन्दमन्त्रतः।
प्रियङ्गुं वल्लिमन्त्रेण गोधूमं देवगजास्त्रतः ॥
वैणवं कुमारमन्त्रेण क्षीरं वै गुहमन्त्रतः।
ताम्बूलं मूलमन्त्रेण शेषद्रव्यं च होमयेत् ।
द्रव्यान्ते व्याहृतिं हुत्वा अग्निं प्रज्वाल्य बुद्धिमान्।

ओं सौं शरवणभव स्वाहा। पश्चाद्देशकालदुर्निमित्तदुस्स्वप्न-
द्रव्यलोपमन्त्रलोपतन्त्रलोपसमकालसङ्करदोषनिवृत्त्यर्थं प्रासा-
देनाहुतिशतं वा पञ्चाशत् पञ्चविंशतिं वा हुत्वा। हव्यवाहमभि-
मातिषाहं रक्षोहणं प्रतिनासं जिष्णुं ज्योतिष्मन्तं दीव्यन्तं पुर-
206 a न्धीव अग्निं स्विष्टकृतमाहुवेमोम् स्विष्टमग्ने अभितत्प्रणाहि
विश्वा देवा प्रतिना अभिष्या। उरुं नः पन्थां प्रतिशं विभाहि ज्यो-
तिष्मद्धेह्यजरं न आयुः स्वाहा। अग्नये स्विष्टकृत इदं न मम।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रायश्चित्तार्थं मनाज्ञातादिमन्त्रहोमं होष्यामि । अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा । अग्नये इदं न मम । पुरुषसम्मितो यज्ञो यज्ञः पुरुषसंमितः अग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा । अग्नये इदं न मम । यत्पाकत्रा मनसा दीनदक्षाणा यज्ञस्य मन्वते मर्तो सह अग्निष्टुद्धोतः क्रतुविद्विजानन् नेजिष्ठो देवां क्रतुशो यजामि स्वाहा । अग्नये इदं न मम । ततो बहुरूपेण पञ्चास्त्रेण पापभक्षणमन्त्रेण नवात्ममन्त्रेण शम्बरेण असिना प्रत्येकं पञ्च पञ्चाहुतीर्हुत्वा । तद्यथा । बहुमन्त्रः – ओं हुं अघोराय स्वाहा । शिवास्त्रमन्त्रः – ओं हौं हर हर शिव शिव शिवास्त्राय स्वाहा । क्षुरिकास्त्रमन्त्रः – ओं छित् छित् क्षुत् क्षुत् क्षुरिकास्त्राय स्वाहा । व्योमास्त्रमन्त्रः – षं हं हां हिं हुं व्योमव्यापिने स्वाहा । पाशुपतास्त्रमन्त्रः – ओं श्लीं पशु हुं फट् पाशुपतास्त्राय स्वाहा । अघोरास्त्रमन्त्रः – ओं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनु तनु रूप रूप चट चट प्रचट प्रचट कह कह वम वम बन्धय बन्धय घातय घातय हुं फट् ह्रीं स्वाहा । पापभक्षण-

206 L मन्त्रः – ओं हां हिं हुं हें हों हौं पापभक्षणाय शिवाय स्वाहा । नवात्ममन्त्रः – ओं हं हं हं हं हंसस्सोहं सोहं हंसः स्वाहा । शम्बरमन्त्रः – ओं हां हीं हृदयाय स्वाहा । असिमन्त्रः – ओं हः अस्त्राय स्वाहा । इति क्रमेण हुत्वा व्याहृतिभिर्हुत्वा । पूर्णां विधाय पश्चाज्जयादिहोमं कुर्यात् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

— जयादिहोमः —

कर्मसमृद्ध्यर्थं जयादिहोमं करिष्ये। ओं चित्तं च स्वाहा चित्तायेदं न मम। चित्तिश्च स्वाहा चित्त्या इदं न मम। आकूतं च स्वाहा आकूतायेदं न मम। आकूतिश्च स्वाहा आकूत्या इदं न मम। विज्ञातं च स्वाहा विज्ञातायेदं न मम। विज्ञानं च स्वाहा विज्ञानायेदं न मम। मनश्च स्वाहा मनस इदं न मम। शक्वरीश्च स्वाहा शक्वरीभ्य इदं न मम। दर्शश्च स्वाहा दर्शायेदं न मम। पूर्णमासश्च स्वाहा पूर्णमासायेदं न मम। बृहच्च स्वाहा बृहत इदं न मम। रथन्तरं च स्वाहा रथन्तरायेदं न मम। प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजेषु तस्मै विशस्समनमन्त सर्वास उग्रः स हव्यो बभूव स्वाहा प्रजापतये इदं न मम। अग्निर्भूतानामधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। भूतानामधिपतये अग्नये इदं न मम। इन्द्रो ज्येष्ठानामधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां
207 a देवहूत्यां स्वाहा। ज्येष्ठानामधिपतये इन्द्रायेदं न मम। यमः पृथिव्या अधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। पृथिव्या अधिपतये यमायेदं न मम। वायुरन्तरिक्षस्याधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवहूत्यां स्वाहा। अन्तरिक्षस्याधिपतये वायव इदं न मम। सूर्यो
दिवोऽधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। दिवोऽधिपतये
सूर्यायेदं न मम। चन्द्रमा नक्षत्राणामधिपतिस्समावत्वस्मिन् ब्रह्म-
न्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देव-
हूत्यां स्वाहा। नक्षत्राणामधिपतये चन्द्रमस इदं न मम। बृहस्पति-
ब्रह्मणोऽधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्य-
स्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। ब्रह्मणोऽधि-
पतये बृहस्पतये इदं न मम। मित्रस्सत्यानामधिपतिस्समाव-
त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्
कर्मन्नस्यां देवहूत्यां स्वाहा। सत्यानामधिपतये मित्रायेदं न मम।
वरुणोऽपामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्य-
स्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। अपामधिप-
207 b तये वरुणायेदं न मम। समुद्रस्स्रोतसामधिपतिस्समावत्वस्मिन्
ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां
देवहूत्यां स्वाहा। स्रोतसामधिपतये समुद्रायेदं न मम। अन्नं सा-
म्राज्यानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशि-
ष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। साम्राज्या-
नामधिपतये अन्नायेदं न मम। सोम ओषधीनामधिपतिस्स-
मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्मन्नस्यां देवहूत्यां स्वाहा। ओषधीनामधिपतये सोमायेदं न मम।
सविता प्रसवानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्या-
माशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। प्रस-
वानामधिपतये सवित्र इदं न मम। रुद्रः पशूनामधिपतिस्समाव-
त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्
कर्मन्नस्यां देवहूत्यां स्वाहा। पशूनामधिपतये रुद्रायेदं न मम।
अप उपस्पृश्य। त्वष्टा रूपाणामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन्
क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा।
रूपाणामधिपतये त्वष्ट्र इदं न मम। विष्णुः पर्वतानामधिपति-
स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायाम-
स्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा। पर्वतानामधिपतये विष्णव
इदं न मम। मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मन्न-
208 a स्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां
स्वाहा। गणानामधिपतिभ्यो मरुद्भ्य इदं न मम। पितरः पितामहाः
परेऽवरे ततास्ततामहा इह मावता समावंत्वस्मिन् ब्रह्मन्नस्मिन्
क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा।
पितृभ्य इदं न मम। अप उपस्पृश्य। ऋताषाडृतधामाग्निर्गन्ध-
र्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। ऋतासाहे सूर्यरश्मये
चन्द्रमसे ऋतधाम्ने अग्नये गन्धर्वायेदं न मम। तस्य मरीचयो
अप्सरसो आयुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मरीचिभ्योऽप्सरोभ्य आयुभ्य इदं न मम। सुषुम्नस्सूर्यरश्मि-
चन्द्रमा गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। सुषुम्नाय
सूर्याय चन्द्रमसे गन्धर्वायेदं न मम। तस्य नक्षत्राण्यप्सरसो बे-
गुरयो नाम ता ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। नक्षत्रेभ्योऽप्सरोभ्यः
बेगुरिभ्य इदं न मम। भुज्युस्सुपर्णो यज्ञो गन्धर्वस्स इदं ब्रह्म क्षत्रं
208 b पातु तस्मै स्वाहा। भुज्यवे सुपर्णाय यज्ञाय गन्धर्वायेदं न मम।
तस्य दक्षिणाप्सरसस्तवा नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः
स्वाहा। दक्षिणाभ्योऽप्सरोभ्यस्तवाभ्य इदं न मम। प्रजापतिर्विश्व-
कर्मा मनो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। प्रजापतये
विश्वकर्मणे मनसे गन्धर्वायेदं न मम। तस्य ऋक्सामान्यप्सर-
सो वह्नयो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। ऋक्-
सामभ्योऽप्सरोभ्यो वह्निभ्य इदं न मम। इषिरो विश्वव्यचा- [वेदा?]
वाताय गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। इषिराय
विश्वबेदसे वाताय गन्धर्वायेदं न मम। तस्यापोऽप्सरसो मु-
दा नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा। अद्भ्योऽप्सरो-
भ्यो मुदाभ्य इदं न मम। भुवनस्य पते तस्य त उपरि गृहा
इह च स नो रास्वा स्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां
स्वस्तिं स्वाहा। भुवनस्य पतय इदं न मम। परमेष्ठ्यधिपतिर्मृ-
त्युर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। परमेष्ठिने मृत्यवे
गन्धर्वायेदं न मम। तस्य विश्वमप्सरसो भुवो नाम ता इदं ब्रह्म

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षत्रं पान्तु ताभ्यः स्वाहा । विश्वाभ्योऽप्सरोभ्यो भूभ्य इदं न मम ।
सुक्षिति सुभूति भद्रकृत्सुवर्वान् पर्जन्यो गन्धर्वस्स इदं ब्रह्म
क्षत्रं पातु तस्मै स्वाहा । सुक्षितये भद्रकृते सुवर्वते पर्जन्याय
गन्धर्वायेदं न मम । तस्य विद्युतोऽप्सरसो रुचो नाम ता इदं
ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा । विद्युद्भ्योऽप्सरोभ्यो रुग्भ्य इदं
न मम । दूरे हेति मृडयो मृत्युर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै
207a स्वाहा । दूरेहेतवे अमृडय मृत्यवे गन्धर्वायेदं न मम । तस्य
प्रजाप्सरसो भीरुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा ।
प्रजाभ्योऽप्सरोभ्यो भीरुभ्य इदं न मम । चारुः कृपणकाशी
कामो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा । चारवे
कृपणकाशिने कामाय गन्धर्वायेदं न मम । तस्याधयोऽप्सरसः
सश्शोचयन्तीर्णाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा । आ-
दिभ्योऽप्सरोभ्यश्शोचयन्तीभ्य इदं न मम । स नो भुवनस्य
पते यस्य त उपरिगृहा इह च उरु ब्रह्मणेऽस्मै क्षत्राय महि
शर्म यच्छ स्वाहा । भुवनस्य पते ब्रह्मण इदं न मम । यद्देवा
देवहेडनं देवा सक्रमा वयं आदित्यास्तस्मान्मा मुञ्चतर्तस्य-
र्तेन मा मुञ्चत स्वाहा । देवेभ्य आदित्येभ्य इदं न मम । देवा
जीवनकाम्या यद्वाचानृतमोदिमा अग्निर्मा तस्मा एनसो गा-
र्हपत्यः प्रमुञ्चतु दुरिता यानि चकृमा करोतु मामनेनसं स्वाहा ।
अग्नये गार्हपत्यायेदं न मम । ऋतेन द्यावापृथिवी ऋतेन त्वं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सरस्वती । ऋता मा मुञ्चतांहसे यदन्यकृतमारिम स्वाहा । द्यावा-
पृथिवीभ्यां सरस्वत्या इदं न मम । सजातशंसादुत स्वाजामिशंसा
ज्यायसश्शंसा मुत वा कनीयसः । अनाज्ञातं देवकृतं यदेनस्त-
स्मात्त्वमस्मां जातवेदो मुमुग्धि स्वाहा । अग्नये जातवेदस इदं
न मम । यद्वाचा यन्मनसो बाहुभ्यामूरुभ्यां मुष्टिपद्भ्यां शिश्नै-
र्यदनृतं चकृमा वयं अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु
209 b दुरिता यानि चकृमा करोतु मामनेनसं स्वाहा । अग्नये गार्हप-
त्यायेदं न मम । यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नु-
मुपजघ्नुमानः । दूरे पश्याच राष्ट्रभृश्च तान्यप्सरस वनुधत्ता-
मृणानि स्वाहा । दूरे पश्याच राष्ट्रभृश्च तान्यप्सरोभ्य इदं न मम ।
अदैव्यनृणं यदहं चकार यच्चास्यन् सञ्चकार जनेभ्यः अग्नि-
र्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृमा करोतु
मामनेनसं स्वाहा । अग्नये गार्हपत्यायेदं न मम । यन्मे माता ग-
र्भे सति एनश्चकार यत्पिता अग्निर्मा तस्मादेनसो गार्हपत्यः
प्रमुञ्चतु दुरिता यानि चकृमा करोतु मामनेनसं स्वाहा । अग्नये
गार्हपत्यायेदं न मम । यदापिबेष मातरं पितरं पुत्रः प्रमुदितोऽ-
धयत् । अहिंसितौ पितरौ उ मया तत् तदग्ने अनृणो भवामि
स्वाहा । अग्नये इदं न मम । यदन्तरिक्षं पृथिवीमुत द्यां यन्मा-
तरं पितरं वा जिहिंसिमा अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमु-
ञ्चतु दुरिता यानि चकृमा करोतु मामनेनसं स्वाहा । अग्नये गार्ह-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पत्यायेदं न मम। यदाजसा निजसा यत्पराजसा यदेनश्चकमानू-
तनं यत्पुराणं अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता
यानि च कमा करोतु मामनेनसं स्वाहा। अग्नये गार्हपत्यायेदं न
मम। अतिक्रमामि दुरितं यदेनो जहामि रिपुं परमे सधस्ते य-
त्रन्ती सुकृतो नापि दुष्कृतस्तमारोहामि सुकृतानुलोकं स्वाहा।
अग्नय इदं न मम। त्रते देवा अमृजतैतदेनस्त्रद यतन्मनुष्येषु
मामृजे ततो मायति किञ्चिदाशाने अग्निर्मा तस्मादेनसो गार्ह-
210 a पत्यः प्रमुञ्चतु दुरिता यानि च कमा करोतु मामनेनसं स्वाहा।
अग्नये गार्हपत्यायेदं न मम। दिवि जाताप्सु जाता या जाता ओष-
धीभ्यः अथो या अग्निया आपस्तान शुद्धन्तु शुन्धनीभ्यां स्वाहा।
अद्भः शुन्धनीभ्यां इदं न मम। यदापो नक्तं दुरितं चरामा यद्वा
दिवा नूतनं यत्पुराणं हिरण्यवर्णास्तद उत्पनीतन स्वाहा। अद्भ्यो
हिरण्यवर्णाभ्य इदं न मम। इमं मे वरुण श्रुती हवं यद्या च मृ-
डया आमवस्सु राजके स्वाहा। वरुणायेदं न मम। तत्त्वायामि
ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरु-
णेह बोध्युरुशंगं समान आयुः प्रमोषीः स्वाहा। वरुणायेदं न मम।
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो वायासीसीष्टाः यजि-
ष्ठो वह्नितमः शशोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा।
अग्नये वरुणायेदं न मम। त्वं नो अग्ने वमो भवोति नेजिष्ठो अ-
स्य उषसो व्यष्टौ। अवयक्ष्मणो वरुणगं रराणो विहि मृडिकं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्रुहवो नयेधि स्वाहा । अग्नीवरुणाभ्यामिदं न मम । त्वमग्ने अ-
यास्ययासन् मा न: ··· हित: अयासन् हव्यमूहिषे यानो धेहि
भेषजं स्वाहा । अग्नये अयस इदं न मम । प्रजापते न त्वदे-
तान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्त-
न्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा । प्रजापतये इदं न
मम । इध्मप्रव्रश्चछदनान्भ्याधाय इध्मप्र ··· नानि च ·· ।
अथ प्रायश्चित्ताहुतीर्जुहोति । अस्मिन् कर्मणि मध्ये सम्भा-
210 b वितसमस्तदोषप्रायश्चित्तार्थं महाप्रायश्चित्ताहुतीर्जुहोति । म-
नो ज्योतिर्जुषतामाज्यं विच्छिन्नयज्ञं समिमं दधातु या इष्टा उष-
सो निम्रुचश्चतास्सन्दधामि हविषा घृतेन स्वाहा । मनसे ज्योति-
ष इदं न मम । अयाश्चाग्ने स्यनभिशस्तीश्च सत्वमित्वमया असि
अयसा मनसा धृतोयसा हव्यमूषिषे यानो धेहि भेषजं स्वाहा ।
अग्नये अयस इदं न मम । यदस्मिन् कर्मण्यन्तरत काममन्तत:
कर्मतो वा नयाहुत्वा तच्छमयामि सर्वं तृण्यन्तु देवानवन्तान् घृ-
तेन स्वाहा । देवेभ्य इदं न मम । स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति
न: पूषा विश्ववेदा: । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमि: स्वस्तिनो बृह-
स्पतिर्दधातु स्वाहा । इन्द्राय वृद्धश्रवसे पूष्णे विश्ववेदसे तार्क्ष्या-
य अरिष्टनेमये बृहस्पतये इदं न मम । यन्म आत्मनो मिन्दभू-
दग्निस्तत्पुनराहार्जातवेदा विचर्षणी स्वाहा । जातवेदसे इदं न
क्षि:
। मम । पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पति: । पुनर्मे अश्विना

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

युवं चक्षुराधत्तमक्ष्योः स्वाहा। अग्नीन्द्रबृहस्पतिभ्योऽश्विभ्य इदं
न मम। ओं भूः स्वाहा अग्नये इदं न मम। ओं भुवः स्वाहा
वायव इदं न मम। ओं सुवः स्वाहा सूर्यायेदं न मम। ओं भूर्भुवः
स्वः स्वाहा प्रजापतय इदं न मम। इष्टेभ्यः स्वाहा इष्टेभ्य इदं न
मम। वषडनिष्टेभ्यः स्वाहा वषडनिष्टेभ्य इदं न मम। भेषजं
दुष्ट्यै स्वाहा भेषजं दुष्ट्या इदं न मम। निष्कृत्यै स्वाहा निष्कृत्या
211 a इदं न मम। दौराध्यै स्वाहा दौराध्या इदं न मम। देवीभ्यस्तनूभ्यः
स्वाहा देवीभ्यस्तनूभ्य इदं न मम। ऋद्ध्यै स्वाहा ऋद्ध्या इदं न मम।
समृद्ध्यै स्वाहा समृद्ध्या इदं न मम। सर्वसमृद्ध्यै स्वाहा सर्वसमृ-
द्ध्या इदं न मम। यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवन्
शग्धि तपतन्न ऊतये विद्विषो विमृधे जहि स्वाहा। इन्द्राय अभ-
यङ्करायेदं न मम। आभिर्गीर्भिर्यततो न ऊनं आप्यायये हरि-
वो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासी भूयिष्ठभाजो
अथ ते स्याम स्वाहा। इन्द्राय वर्धमानायेदं न मम। अनाज्ञातं
यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वं वेत्थ य-
थातथं स्वाहा। अग्नये इदं न मम। पुरुषसंमितो यज्ञो यज्ञः पुरु-
षसंमितः। अग्ने तदस्य कल्पय त्वं वेत्थ यथातथं स्वाहा। अग्न-
य इदं न मम। यत्पाकत्रा मनसा दीनदक्षाणा यज्ञस्य मन्वते।
मर्तासह अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो देवां ऋतुशो य-
जामि स्वाहा। अग्नये क्रतुविद्विजानते इदं न मम। भूरग्नये च

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महते च स्वाहा । भूरग्नये पृथिव्यै च महते च इदं न मम । भुवो वा-
यवे चान्तरिक्षाय च महते च स्वाहा । भुवो वायवेऽन्तरिक्षाय महत
इदं न मम । सुवरादित्याय च दिवे च महते स्वाहा । सुवरादित्याय
महत इदं न मम । भूर्भुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च
211 6 महते च स्वाहा । भूर्भुवश्चन्द्रमसे नक्षत्रेभ्यो महत इदं न मम । पाहि
नो अग्न एनसे स्वाहा । पाहि नो अग्न येनस इदं न मम । पाहि नो
विश्ववेदसे स्वाहा । विश्ववेदसे इदं न मम । यज्ञं पाहि विभावसो
स्वाहा । विभावसव इदं न मम । सर्वं पाहि शतक्रतो स्वाहा । शत-
क्रतव इदं न मम । पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाहि
गीर्भिस्तिसृभिरुजाम्पते पाहि चतसृभिर्वसो स्वाहा ।
पाहिभ्य इदं न मम । सप्त ते अग्ने समिधस्सप्त जिह्वाः सप्त ऋष-
यस्सप्त धाम प्रियाणि सप्त होत्रास्सप्तधा त्वा यजन्ति सप्त योनी-
रापृणस्व घृतेन स्वाहा । अग्नये सप्तवत इदं न मम । पुनस्त्वादि-
त्या रुद्रा वसवस्समिन्धताम् पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृ-
तेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामाः स्वाहा ।
वसुनीथायेदं न मम । गणानां त्वा गणपतिं हवामहे कविं क-
वीनामुपमश्रवस्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्व-
न्नूतिभिस्सीद सादनं स्वाहा । गणपतये इदं न मम । त्रियम्बकं
यजामहे सुगन्धिं पुष्टिवर्धनं उर्वारुकमिव बन्धनान्मृत्योर्मु-
क्षीय मामृतात् स्वाहा । त्रियम्बकायेदं न मम । जातवेदसे सुनवाम

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा ना-
वेव सिन्धुं दुरितात्यग्निः स्वाहा। अग्नये जातवेदसे दुर्गायेदं न
212 a मम। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे
स्वाहा। विष्णव इदं न मम। विष्णोरराडमसि स्वाहा विष्णव इदं
न मम। विष्णोः पृष्ठमसि स्वाहा विष्णव इदं न मम। विष्णोश्नप्त्रे-
ध स्वाहा विष्णव इदं न मम। विष्णोस्स्यूरसि स्वाहा विष्णव इदं
न मम। विष्णो ध्रुवमसि स्वाहा विष्णव इदं न मम। वैष्णवमसि
विष्णवे त्वां स्वाहा विष्णव इदं न मम। विष्णोरराडमसि विष्णोः
पृष्ठमसि विष्णोश्नप्त्रे स्थो विष्णोस्स्यूरसि विष्णो ध्रुवमसि वै-
ष्णवमसि विष्णवे त्वां स्वाहा विष्णवे नारायणायेदं न मम। ब्रह्म
प्रतिष्ठा मनसो ब्रह्म वाचः ब्रह्म जज्ञानं हविषमाज्यस्य अतिरिक्तं
कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् स्वाहा।
ब्रह्मण इदं न मम। कृताहुतिरेतु देवान् स्वाहा। यज्ञाय ब्रह्मणे
इदं न मम। यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनं अग्निष्टत्स्वि-
ष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मेऽग्नये स्विष्टकृते सुहु-
ताहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे स्वाहा।
अग्नये स्विष्टकृत इदं न मम। अस्मिन् कर्मणि मध्ये सम्भावि-
त समस्तमन्त्रलोपतन्त्रलोपक्रियालोपद्रव्यलोपन्यूनातिरिक्तवि-
पर्यासविस्मृतिसमस्तदोषप्रायश्चित्तार्थं महाप्रायश्चित्तहोमं
होष्यामि। ओं भवाय देवाय स्वाहा इत्यादि। महते देवाय स्वाहा।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

2b महतो देवायेदं न मम। भवस्य देवस्य पत्न्यै स्वाहा इत्यादि। म-
हतो देवस्य पत्न्यै स्वाहा गौर्या इदं न मम। ज्ञानशक्तिधराय
स्वाहा। स्कन्दाय स्वाहा। देवसेनापतये स्वाहा। सुब्रह्मण्याय स्वाहा
गजारूढाय स्वाहा। शरकाननसम्भवाय स्वाहा। कार्तिकेयाय
स्वाहा। कुमाराय स्वाहा। षण्मुखाय स्वाहा। तारकान्तकाय स्वा-
हा। सेनान्ये स्वाहा। ब्रह्मचारिणे स्वाहा। वल्लीकल्याणसुन्दराय
स्वाहा। बालाय स्वाहा। क्रौञ्चभेदनाय स्वाहा। शिखिवाहनाय
स्वाहा। सुब्रह्मण्यायेदं न मम। ओं भूः स्वाहा अग्नये इदं न मम।
ओं भुवः स्वाहा वायव इदं न मम। ओं सुवः स्वाहा सूर्यायेदं न मम।
ओं भूर्भुवःस्वः स्वाहा प्रजापतये इदं न मम। ततः पूर्णां विधाय
पश्चान्मूलेन दशवारं हुत्वा वल्लीदेवनायकीमूलेन पञ्चवारं हुत्वा।
जयन्ताद्यष्टविघ्नेश्वराणामेकैकवारं हुत्वा। कुण्डमध्ये ओं सौं शर-
वणभवाय सुब्रह्मण्याय नमः वल्लीदेवनायकीभ्यां नमः इति सं-
पूज्य। पराङ्मुखार्घ्यं दत्त्वा। तन्मूर्तिं वल्लीदेवनायकीसहितं पुष्पा-
ञ्जलिना संहारमुद्रया मूलमन्त्रेण सङ्गृह्य। कुम्भे संयोज्य कुम्भे
आवाहनादि सर्वोपचारैस्सम्पूज्य। ततः कुण्डसमीपं गत्वा जुषस्व-
नेत्यभिमन्त्र्य। अदितेऽनुमन्यस्व अनुमतेऽनुमन्यस्व सरस्व-
तेऽनुमन्यस्व देव सवितः प्रासावीः इति समन्तात्परिषिच्य स्वाहा
213a इत्येकसमिधमग्नौ दत्त्वा। उपस्थानम्। यत्ते अग्ने तेजस्तेनाहं तेज-
स्वी भूयासम्। यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम्। यत्ते अग्ने

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्चस्तेन अहं वर्चस्वी भूयासम्। मयि मेधां मयि प्रजां मय्य-
ग्निस्तेजो दधातु। मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु।
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्धुतं तु मया देव परिपूर्णं तदस्तु मे॥
प्रायश्चित्तानि शेषाणि तपःकर्मात्मकानि वै।
यानि शेषाण्यशेषाणां शिवानुस्मरणं परम्॥

अभिवादये। नमस्कृत्वा पश्चात् स्थित्वा। ततः परिस्तरणस्थाधार-
समिधादिक्रमेण दहेत्। पश्चान्मध्यमेखलायाः विष्टरस्थजयन्ता-
दीनां क्रमेण बलिं दत्त्वा। अधोमेखलायां परिस्तरणस्थब्रह्माणं
विसृज्य। ब्रह्मन् ब्रह्मासि नमस्ते ब्रह्मन् ब्रह्मणे ब्रह्मणे नमः।
अस्मात्कूर्चात् ब्रह्माणं यथास्थानं प्रतिष्ठापयामि। तत्कूर्चग्रन्थिं
विस्रस्य। तत्कुण्डावृतपरिस्तरणस्थेन्द्रादीनां क्रमेण बलिं दत्त्वा
विसृज्य। परिस्तरणं किञ्चित्किञ्चिदादाय वामहस्तेऽग्रं सङ्गृह्य।
तन्मूलं दक्षहस्ते सङ्गृह्य। दर्भानाज्यस्थाल्यामग्रमध्यमूलानि नि-
षिच्य दहेत्। पश्चात्प्रणीतामोक्षणम्। प्रणीतापात्रं स्वाग्रे निधाय
किञ्चित्किञ्चिदापूर्य। पूर्वादिचतुर्दिक्प्रणीताजलेन किञ्चित्किञ्चित्
सेचयित्वा। तज्जलेनात्मानं कुम्भं सम्प्रोक्ष्य। अग्नेर्भस्मादाय।
213b त···· बृहस्प···· ललाटे धृत्वा॥ इत्यग्निकार्यं समाप्तम्॥

— महाभिषेकः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथ महाभिषेकविधिरुच्यते ॥

प्रस्थं तैलप्रमाणं स्यात्कदलीशतमेव च ।
पनसैकफलं प्रोक्तं लिकुचं पञ्चविंशति ॥
चूतं पञ्चदशं चैव दाडिमी पञ्चमं भवेत् ।
कुलञ्जी दशकं चैव नारङ्गद्वादशं भवेत् ॥
घृतं द्विकुडुबं स्यान्मधु च कुडुबं भवेत् ।
पञ्चगव्यं कुडुबार्धं षट्प्रस्थं क्षीरमुच्यते ॥
दधि च द्विगुणं प्रोक्तं रजनीफलमेव च ।
कुडुबार्धं पिष्टचूर्णं आमलं तत्समं भवेत् ॥
त्रिप्रस्थमिक्षुसारं च हिमाम्बु कुडुबार्धकम् ।
नालिकेरोदकश्चैव दशषट्प्रस्थं कथ्यते ॥
जलद्रव्यप्रमाणं तु फलद्वयमिहोच्यते ।
आढकान्नाभिषेकं स्यान्नवनीतादिमिश्रकम् ॥
हिमाम्बुमिश्रितं गन्धं त्रिफलमभिषेचयेत् ।
कुम्भाभिषेकं कर्तव्यं सहस्रकलशैर्युतम् ॥
अष्टोत्तरशतं चैव पञ्चविंशतिमेव वा ।
अथवा नवकं स्थाप्य यथाविभवविस्तरम् ॥
सुगन्धलेपनं चैव चतुष्फलमुदाहृतम् ।
नैवेद्यं तण्डुलखारी दीपार्थं प्रस्थतैलकम् ॥

[illegible] द्रव्यप्रमाणम्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

யிபபடுக்கு என்னென்ன யாகுனவெரிலை கணக்கு வொாலைலப

திகி யேல ஙபபு என்ன ஙா அபிஷேகம் ஐயதாவடி

உர௨ாணாஷீநும் வ ஙமவ அபிஷேகம் செய்யக கடவன.

अभ्यङ्गपिष्टामलकं च गव्यं

मृद्राय दुग्धं दधरेव सर्पि ।

मधुच इक्षु फलनालिकेरं

अन्नं सुगन्धं स्नपनं च शंखम् ॥

214 a एवं क्रमेणाभिषिच्य तत्तद्द्रव्याभिषेकान्ते फलादिनिवेद्य धूप-

दीपनीराजनं दत्वा जलं स्नात्वा ॥

तैलान्ते पिष्टचूर्णं स्याद्द्रव्यान्ते लिकुचैः फलम् ।

अमृतान्ते विशेषेण आमलीफलसारकम् ॥

घृतान्ते चोष्णतोयं च पयोऽन्ते च गुलोदकम् ।

दध्यन्ते मुद्गचूर्णं स्याद्दन्नान्ते माषचूर्णकम् ॥

गन्धतोयं तदन्ते च कुम्भाभिषेकमाचरेत् ।

अभिषेकमन्त्राः — शन्नो देवीरिति कवचेन सुगन्धतैलम् । अग्नि-

मीळे हृदा पिष्टम् । लिकुचं दाडिमीनारङ्गफलसारान् मूलेन ।

पञ्चब्रह्ममन्त्रेण पञ्चामृतम् । शुक्रमसीत्याज्यम् । पञ्चब्रह्मम-

न्त्रेण पञ्चगव्यम् । आप्यायस्वेति क्षीरम् । दधिक्राव्णेति दधि ।

मधुवाता इति मधु । स्वादुः पवस्वेति इक्षुसारम् । मधुवाता इति

फलपञ्चामृतम् । मूलेन नालिकेरोदकम् । अन्नं प्राणमित्यन्नम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुम्भोदकैस्सुगन्धसलिलैश्च हरिद्रां श्रीसूक्तेन। इति क्रमेणाभि-
षिच्य मन्त्रान्नं निवेद्य। श्रीरुद्रं चमकं कुमारसूक्तं पुरुषसूक्तं सु-
ब्रह्मण्यमालामन्त्रं इत्यादिमन्त्रेणाभिषेचयेत्। उद्वर्त्य दुकूल-
चित्रवस्त्रादि सन्धाये। उष्णशमनार्थं शिरःपादान्तं सुगन्धले-
पनं कृत्वा। धूपदीपं दत्त्वा॥ इति महाभिषेकविधिः॥

— महाहविर्निवेदनम् —

महाहविर्निवेदनविधिरुच्यते। देवस्य पुरतो धौतवस्त्राणि प्रसा-
र्य उपरि कदलीपत्राणि प्रक्ष्याल्य तानि निधाय। ~~हविरष्ट~~

हविरष्टविधं प्रोक्तं ⋯ न्नं पायसान्नकम्।
कृसरान्नं गुलान्नं च अपूपादि तथैव च॥
माषान्नं चैव शुद्धान्नं मरीच्यन्नं तथैव च।
214 b एवमष्टविधं प्रोक्तं सुपक्वं कारयेद्बुधः॥
द्वात्रिंशद्व्यञ्जनोपेतं क्षीरं दधिं घृतं तथा।

भक्ष्य भोज्य लेह्य चोष्य समोपेतं पञ्चाशद्द्वारपरिमित तण्डुलैः
सुपक्वं दिव्यमन्नं विधाय विधिवन्निवेदनं कृत्वा ताम्बूलं निवेद्य॥
इति महाहविर्निवेदनविधिः॥

— कल्याणक्रमः —

स्थलिकामध्ये ताम्बूल नारिकेल कदलीफल रजनी दर्पण केश-
शोधनाञ्जन नववस्त्र मङ्गल्यसूत्रमेतानि स्थलिकान्निधाय। गुह-
सन्निधावनुज्ञां कृत्वा। सर्ववाद्यघोषैः नवो नवो भवतीति मन्त्रेण

गुहेन नववस्त्रं सन्धार्य धूपदीपनीराजनं दत्त्वा गुहं विज्ञाप्य वल्ली-
देवगजासनामूर्तिं मूलैरभ्यर्च्य धूपदीपं दत्त्वा। देव्यां वस्त्रं सन्धा-
र्य। सुमङ्गलीरियं वधूमिमां इति मन्त्रेण मङ्गल्यसूत्रं सन्धार्य
धूपदीपनैवेद्यं दत्त्वा। गुहादि सर्वत्र देवान् दीपाराधनक्रमेण
षोडशोपचारान् कृत्वा॥ इति कल्याणक्रमविधिस्समाप्तः॥

— एकाहोत्सवः —

एकाहोत्सवविधिरुच्यते। अनुज्ञां कृत्वा आस्थानमण्डपे गजवाहने
वा मयूरे वा गुहमलङ्कृत्य शुकवाहने वल्लीं हंसवाहने देवग-
जासनामलङ्कृत्य सर्वाभरणभूषितौ विचित्रालङ्कृत्य पाद्यादि-
215 a सर्वोपचारैस्सम्पूज्य। मार्जनप्रोक्षणसर्वालङ्कारसहितायां वीथ्यां
सर्वमङ्गलवाद्यघोषनृत्तगीतस्तोत्रस्वस्तिवाचनपुरस्सरं आलयं
प्रदक्षिणीकृत्य आस्थानमण्टपे निवेश्य। निवेद्य ताम्बूलादीन् स-
मर्प्य नृत्तगीतविनोदान् कारयित्वा धूपदीपनीराजनं कृत्वालयं
प्रविश्य स्नपनैरभिषिच्य शेषपूजादि भोगाङ्गं सम्पूज्य॥
इत्येकाहोत्सवविधिः॥

— चूर्णोत्सवः —

चूर्णोत्सवविधिः — प्रभाते स्नात्वा नित्यपूजां विधिवत्कृत्वा वि-
धिवन्नित्योत्सवं कारयित्वा पश्चाच्चूर्णोत्सवं कुर्यात्। तद्यथा —
गुहाग्रे महामण्टपे, गोमयालेपनं कृत्वा द्वितीयस्थण्डिलं कुरु।
लाजैः पुष्पैः परिस्तीर्य स्थण्डिलं चार्चयेद्दृढा॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वातोद्यसमायुक्तं मङ्गलाङ्कुरशोभितम् ।
प्राक् स्थण्डिलं न्यसेद्धीमान् उलूखले मुसलेन तु ॥
दूर्वाधररूपकं न्यस्य वस्त्रं सन्धाय लूखलम् ।
मुसलं लूखलं चैव प्रोक्षयेत्तु गुहाम्भसा ॥
तस्य पश्चिमभागे तु गुहास्त्रं स्थलिकोपरि ।
विन्यस्य हृदयेनैव गन्धाद्यैरर्चयेत्क्रमात् ॥
द्रोणार्धं वा तदर्धं वा शुष्कं च रजनीं ततः ।
निक्षिप्योलूखलेनैव चूर्णयेन्मुसलेन तु ॥
व्योमव्यापिनमुच्चार्य चूर्णयेद्देशिकोत्तमः ।
ततो भक्तजनैस्सार्धं चूर्णयेद्रुणिकान्वितम् ॥
2156 तच्चूर्णं हृदयेनैव निक्षिपेद्बिम्बमस्तके ।
गन्धपुष्पादिभिः पूज्य पद्ममुद्रां प्रदर्शयेत् ॥
तच्चूर्णं सङ्गृहीत्वा तु भक्तानां दापयेत्ततः ॥

॥ इति चूर्णोत्सवविधिस्समाप्तः ॥

रजनीकेलिविधिः — सङ्कल्प्य । ततो वाद्यघोषै रुद्रकन्याभि-र्भक्तजनैस्सह देवाग्रे हरिद्राकुङ्कुममृगमदकर्पूरादि सुगन्ध-मिलिततीर्थं शुद्धवाससा देवं सम्प्रोक्ष्य भक्तजनरुद्रकन्यकानां च प्रोक्ष्य । हरिद्रोदकसेचनलीलापुरस्सरं ग्रामं प्रदक्षिणीकृत्य ॥

— अवभृथस्नानम् —

तीर्थसमीपे अलङ्कृते मण्टपे देवं देवीं गुहास्त्रमारोप्य ——

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम् ।
गीतनृत्तसमायुक्तं गुहास्त्रेण समायुतम् ॥
गत्वा भक्तजनैस्सार्धं तीर्थस्नानं समाचरेत् ।
स्थाप्य कुम्भं प्रपामध्ये चाष्टद्रोणैश्च शालिभिः ॥
पूर्वे स्थण्डिल विन्यस्य दर्भैः पुष्पैः परिस्तरेत् ।
सङ्गाह्य रन्ध्रकलशान् सूत्रेणैव तु वेष्टयेत् ॥
तीर्थोदकैश्च सम्पूर्य स्थापयेत्त(स्थ)ण्डुलोपरि ।
कूर्चादि विन्यसेत्पश्चादलङ्कृत्य यथाक्रमम् ॥
मध्यकुम्भे गुहं पूज्य वर्धनीं पूजयेत्ततः ।
पूर्वादीशानपर्यन्तं जयन्तादीन्यजेत्क्रमात् ॥
216 a जलतीरं समासाद्य पुण्याहं पञ्चगव्यकम् ।
सम्प्रोक्ष्य तीर्थमध्ये तु आपो वा इति मन्त्रतः ॥
अभ्यर्च्य सप्ततीर्थानि नैवेद्यं धूपदीपकम् ।
अष्टादशगणांश्चैव त्रयस्त्रिंशाधिदेवताः ॥
आहूय लोकपालांश्च पुण्यतीर्थानि यानि तु ।
जलमध्ये तु सान्निध्यं पूजयेन्मानसेन तु ॥
अस्त्रराजं तु सम्पूज्य अभिषेकं ततः परम् ।
सर्वत्र कौतुकं त्यक्त्वा जलमध्ये विसर्जयेत् ॥
संस्नाप्य च तथा तीर्थं जलेषु स्नानमाचरेत् ।
गुहास्त्रेण सह स्नानं मर्त्याः कुर्वन्ति ये नराः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वपापप्रशमनं सर्वदारिद्र्यनाशनम् ।
संस्नाप्य देवीं देवं च कुम्भाभिषेकमाचरेत् ॥
प्रभूतहविषं दद्याद्दीपाराधन… परम् ।
शिबिकायामारोप्यास्त्रं प्रविशेदालयं प्रति ॥
मूलबेरादि सर्वत्र पूजयेत्तु यथाक्रमम् ।
॥ इत्यवभृथस्नानविधिस्समाप्तः ॥

— दक्षिणाप्रदानम् —

आचार्यदक्षिणां दद्याद्दलिग्भ्यश्च यथाक्रमम् ।
जापकेभ्यश्च तत्सश्चाद्वित्तशाठ्यं न कारयेत् ॥
न दोष शिल्पिनो भक्तान् दासान् पारशिवानपि ।
एवं यः कुरुते भक्त्या प्रतिष्ठां परमेशितुः ॥
इह भुक्त्वाखिलान् भोगान् शिवसायुज्यमाप्नुयात् ।
शतं सहस्रमयुतान् लक्षमित्यादि संख्यया ॥
कॢप्ते द्रव्ये शिवस्यार्थे दक्षिणाक्रम उच्यते ।
दशभागैकभागं तु मूर्तिधारकदक्षिणा ॥
6 b तदर्धं मन्त्रजप्तानां वैदिकानां तु तत्समम् ।
दैवज्ञे तत्समं विद्याद्द्विगुणं वास्तुहोमिनः ॥
आचार्यस्य चतुर्थांशं शिल्पिनो दक्षिणा मता ।

— आचार्यपूजा —

आचार्यं पूजयेत्तत्र वित्तशाठ्यविवर्जितः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्मसाद्गुण्यसिद्ध्यर्थमाचार्यपूजनं कुरु ॥

प्रदद्यान्मन्त्रवासश्च उष्णीषं चोत्तरीयकम् ।
कटिसूत्रं चाङ्गुलीयं सौवर्णं यज्ञसूत्रकम् ॥
हारकेयूरमालां च कर्णयो रत्नकुण्डलम् ।
ग्रैवेयं कङ्कणमिति भूषणादि प्रकल्प्य च ॥
भूषयित्वा यथाचार्यं कौशेयं च दुकूलकैः ।
अलङ्कृत्य तथा दिव्यगन्धपुष्पाक्षतादिभिः ॥
अभ्यर्च्यारोप्य शिबिकां वाद्यघोषपुरस्सरम् ।
ग्रामं प्रदक्षिणीकृत्य नृत्तगीतादिभिस्सह ॥
प्रवेशयित्वा स्वगृहं प्रणम्यैनं प्रसादयेत् ।
यथोक्तदक्षिणां दत्त्वा गृहक्षेत्रगवादिकम् ॥
सकुटुम्बस्य पर्याप्तं प्रदद्याद्विभवे सति ।
सन्तुष्टो देशिकश्शम्भुस्सन्तुष्टो भवति ध्रुवम् ॥
अनेन विधिना यस्तु देशिकं पूजयेद्बुधः ।
प्राप्नोति स परां लक्ष्मीं परत्र च सुखी भवेत् ॥
तोषयेत्स्थपतिं कर्ता अयस्कारं कुलालकम् ।
पारशैवं च कर्मज्ञं बलिपात्रप्रदानकम् ॥
कर्मान्तिकं च मृतकं शिवकैङ्कर्यकारणम् ।
गीतवाद्यादिविदुषः नाट्याचार्यं तथैव च ॥
तोषयेद्रुद्रकन्याश्च वस्त्रगन्धानुलेपनैः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

217 a रत्नान्याभरणं दद्याद्बहुमानपुरस्सरम् ॥

ब्राह्मणाराधनं चैव भक्तानां भोजनं तथा ।

भूसुरान् दक्षिणायोग्यान् दक्षिणाभिः प्रतोषयेत् ॥

॥ इति कारणे कुमारतन्त्रे दक्षिणाप्रदानविधिस्समाप्तः ॥

इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायां

सुब्रह्मण्याष्टबन्धनप्रयोगविधि-

स्समाप्तः ॥

ஸ்ரீ ஜய வருஷ நாமக வருஷம் வைகாசி மாதம் ௨௰ ஸு
க்ர வாரமும் ரேவதி நட்சத்திரமும் கூடிய சுபதினத்தில்
சுப்ரமண்யாஷ்ட பந்தன ப்ரயோக விதி எழுதி முடிந்தது.
பாலசுப்ரமண்யன் [illegible] ஜெகதீ. ~~[illegible]~~
ஸ்ரீ தர்ம ஸம்வர்த்தினி அம்பா ஸமேத ~~ஸ்ரீ~~ நகரீஸ்வர மஹா
ப்ரபவே நம: ஸ்ரீ கிரிநிவாஸாய நம: ஆறுமுகன்
தாள் துணை. திருமலியப்பன் துணை.

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।

शरण्ये त्र्यम्बिके देवि नारायणि नमोऽस्तु ते ॥

षडाननं कुङ्कुमरक्तवर्णं

महामतिं दिव्यमयूरवाहनम् ।

रुद्रस्य सूनुं सुरसैन्यनाथं

~~217 b~~ गुहं सदा शरणमहं प्रपद्ये ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

218 a — स्रुक्स्रुवलक्षणम् —

स्रुचि तलाङ्गुलायामं वस्वङ्गुलसुविस्तरम् ।
रसाङ्गुलसमुत्सेधं फलकं कारयेद्बुधः ॥
वेदाङ्गुलेन गण्डिः स्याद्दण्डो मार्ताण्डमानतः ।
वेदाङ्गुलं चोपवेदि वेदिरष्टाङ्गुलं भवेत् ॥
कण्ठश्चैकाङ्गुलेनः स्यान्मुखं स्यान्मुखमानतः ।
युगाङ्गुलेन कर्तव्यं वेदिकामध्यदेशके ॥
कनिष्ठा च प्रमाणेन कारयेद् घृतपद्धति ।
वेदिमध्यं त्रियङ्गुल्य प्रमाणं बिलसंयुतम् ॥
मुखं गजोष्ठवत्कुर्यात् कण्ठश्च चतुरङ्गुलः ।
वेदिकायां मुखं पृष्ठं कारयेत्पद्मभूषितम् ॥
रसाङ्गुलप्रमाणेन दण्डनाहं च कारयेत् ।

— स्रुवलक्षणम् —

वितस्तिद्वयमानेन स्रुवं कुर्याद्विचक्षणः ।
षडङ्गुलमितं कुर्यात्स्रुवमूलं च देशिकः ॥
घृतस्थानं त्रियङ्गुल्यं दण्डनाहं त्रियङ्गुलम् ।
रसाङ्गुलमितं वक्त्रं नेत्रयामं च कारयेत् ॥
नासिकावद्बिलं कुर्यात्तेनाज्यं जुहुयाद्बुधः ।
219 a शकुनिं कृष्णवर्णां तु मन्दारकुसुमप्रियाम् ।
पीताम्बरधरां क्रूरां खड्गखेटकधारिणीम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रेवतीं रक्तवर्णाढ्यां कुन्दपुष्पाभदन्तिकाम् ।
कन्दर्पशरहस्ताब्जां प्रसन्नवदनान्विताम् ॥
पूतां महाबलां घोरां पाशाङ्कुशधरान्विताम् ।
रक्ताम्बरधरां रक्तां परगर्वविदारिणीम् ॥
महापूतां ~~महाघोरां~~ कृष्णवर्णां रक्तवस्त्रधरान्विताम् ।
दंष्ट्राकरालवदनां खड्गखेटकधारिणीम् ॥
निशीथिनीस्वरूपां तु क्रूरनेत्रां महाबलाम् ।
कपालशूले बिभ्राणां सर्वाभरणभूषिताम् ॥
मालिनीं श्यामवर्णाढ्यां पाशदण्डधृतकराम् ।
पीतैराभरणैर्युक्तां रक्ताम्बरधरान्विताम् ॥
शीतलां शान्तमनसं मन्दहासां मनोहराम् ।
पीताम्बरधरां श्यामां पद्मद्वयकरद्वयाम् ॥
भूतरूपां महाघोरां कृष्णवर्णां महोदराम् ।
मुसलायुधसंयुक्तां मुक्तामाल्यविभूषिताम् ॥

219 b
अनुज्ञा
अङ्कुरार्पणम्
वास्तुशान्तिः
राक्षोघ्नम्
मण्टपपूजा
प्रधानकुम्भपूजा
होमः
सप्तशुद्धिः
प्रासादशुद्धिः
बिम्बशुद्धिः
ब्राह्मणभोजनम्
कुम्भाभिषेकः
दक्षिणाप्रदानम्

शुभतिथौ विशेषतोऽस्मिन् क्षेत्रे मूलबेरादिसर्वदेवानां अन्त्यजादिस्पर्शदोषवशात् यो दोषस्समजनि तद्दोषपरिहारार्थं आस्थान द्रव्यप्राकारशुद्ध्यर्थं वास्तुशान्तिपर्यग्निकर्म करिष्ये । तदङ्गं शुद्धिपुण्याहवाचनं करिष्ये ॥

copied by: - S. Nagarajarao Bhasker.
21. 11. 1971.

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.